वसीरन्नानुपूर्व्वेण शाणक्षौमाविकानि चेति ।

आनुपूर्व्वेण वर्णानुपूर्व्वेण ।

गौतमः ।

वासांसि शाणक्षौमचीरकृतपाः सर्व्वेषां कार्पासं वा विक्षतमिति ।

चीरं वस्त्रखण्डः ।

वशिष्ठः ।

शुक्लमाहतं वासो ब्राह्मणस्य माञ्जिष्ठं क्षौमञ्च क्षत्रियस्य पीतकौशेयं वैश्यस्येति ।

कौशेयं पट्टविशेषः ।

मौञ्जीलक्षणञ्च मनुराह ।

मौञ्जी त्रिवृत्समा श्लक्ष्णा कार्य्या विप्रस्य मेखला ।

क्षत्रियस्य तु मौर्व्वी ज्या वैश्यस्य शणतान्तवीति ॥

मुञ्जाभावे तु कर्त्तव्या कुशाश्मन्तकवल्वजैः ।

त्रिवृता ग्रन्थिनैकेन त्रिभिः पञ्चभिरेव वा इति ॥

मौर्व्वी मुर्व्वा तेजनी* तन्मयी ज्या धनुर्गुणः । अत्र च त्रिवृत्तं नास्ति ज्याविनाशप्रसङ्गात् । मुञ्जाद्यभावे वर्णक्रमेण कुशाद्या ग्राह्याः । अश्मन्तकाख्यं तृणं तथा वल्वजमपि । ग्रन्थिभेदस्तु मुख्यासु गौणीषु च ।

---

* धनुर्गुणोपयुक्तो लताविशेषः सुरगा इति ख्याता ।

यज्ञोपवीतलक्षणं छन्दोगपरिशिष्टे ।

त्रिवृदूर्द्ध्वृतं कार्य्यं तन्तुत्रयमधोवृतम् ।
त्रिवृतं चोपवीतं स्यात्तस्यैको ग्रन्थिरिष्यते ।

तथा ।

पृष्ठवंशश्च नाभिश्च धृतं यद्विन्दते कटिम् ।
तत्कार्य्यमुपवीतं स्यान्नातिलम्बं न चोच्छ्रितम् ॥

मनुः ।

कार्पासमुपवीतं स्याद्विप्रस्योर्द्ध्वृतं त्रिवृत् ।
शणसूत्रमयं राज्ञो वैश्यस्याविकसूत्रजम् ॥

ऊर्द्ध्वृतलक्षणमाह

संग्रहकारः ।

करेण दक्षिणेनोर्द्ध्वगतेन त्रिगुणीकृतम् ।
बलितं मानवे सूत्रं शास्त्र ऊर्द्ध्वृतं स्मृतम् ॥

ऊर्द्ध्वगतेनोर्द्ध्वस्थितेन दक्षिणकरेण यद्बलितं तदूर्द्ध्वृतमित्यर्थः ।

उक्तोपवीताभावे देवलः ।

कार्पासक्षौमगोबालशणवल्कवृतोद्भवम् ।
सदाऽसम्भवतो धार्य्यमुपवीतं द्विजातिभिः ॥

क्षुमा अतसी । वल्कं तरुत्वक् । असम्भवतः सार्व्वविभक्तिकस्त-सिल् । मुख्यासम्भव इत्यर्थः ।

तथा ।

शुचौ देशे शुचिः सूत्रं संहताङ्गुलिमूलके ।
आवर्त्य षण्णवत्या तु त्रिगुणीकृत्य यत्नतः ॥

अविच्छिन्नैस्त्रिभिः सम्यक् प्रक्षाल्योर्द्धवृतं त्रिवृत् ।
सप्रदक्षिणमावृत्य सावित्र्या त्रिगुणीकृतम् ॥
ततः प्रदक्षिणावर्त्तं समं स्यान्नवसूत्रकम् ।
त्रिरावेष्ट्य दृढं बद्ध्वा ब्रह्मविष्णुशिवात्मकम् ॥

अजिनान्याह मनुः ।

कार्ष्णरौरववास्तानि चर्म्माणि ब्रह्मचारिणः ।

तथा दण्डानपि ।

ब्राह्मणो बैल्वपालाशौ क्षत्रियो वाटखादिरौ ।
पैलवौडुम्बरौ वैश्यो दण्डानर्हति* धर्म्मतः ॥

तथा ।

केशान्तिको ब्राह्मणस्य दण्डः कार्य्यः प्रमाणतः ।
ललाटसम्मितो राज्ञां तथा नासान्तिको विशः ॥
ऋजवस्ते तु सर्व्वे स्युरव्रणाः† सौम्यदर्शनाः ।
अनुद्वेगकरा नृणां सत्वचोऽनग्निदूषिता इति ॥

यथासमयञ्च गायत्रीमुपदिशेत्ताञ्च प्रणवव्याहृतिपूर्व्विकां‡ । पादार्द्धचमस्ततः सर्व्वामिति । गायत्रीच्छन्दस्कां वेदमातरं सूर्य्यदेवतां महाव्याहृतिपूर्व्विकां ब्राह्मणाय ब्रह्मचारिणे क्षत्रियाय त्रिष्टुप्छन्दस्कां बृहस्पतिदृष्टां सवितृदेवतां देवसवित-

---

* अर्हन्तीति पाठान्तरम् ।

† छिद्ररहिताः ।

‡ आदौ गायत्र्याः पादं यावद्येत्ततोऽर्द्धं ततः सम्पूर्णामित्यर्थः ।

रित्यादिकां वाजपेयनिर्युक्तां वैश्याय प्रजापतिदृष्टां जगतीच्छन्दस्कां सवितृदैवतां रुक्मपाशमोचने उषाभरणे विनियुक्तां विश्वारूपाणि प्रतिमुञ्च इति तामृचं ब्रूयात्। सर्वेषां वा ब्रह्मक्षत्रविशां गायत्रीमेवं ब्रूयात्। गायत्रीच्छन्दस्कां सावित्रीमुक्तलक्षणाम्।

आह शातातपः।

तत्सवितुर्वरेण्यमिति सावित्री ब्राह्मणस्य।

देवसवितरिति राजन्यस्य विश्वारूपाणीति वैश्यस्येति॥

कात्यायनोऽपि।

सावित्र्या ब्राह्मणमुपनयेत्त्रिष्टुभा राजन्यं जगत्या वैश्यं सर्वेषां वा सावित्रीति।

आह लोकाक्षिः।

ओं भूर्भुवः स्वरित्युक्त्वा तत्सवितुरिति सावित्रीं त्रिरन्वाह। पच्छोऽर्द्धर्चशः* सर्वामन्तत इति।

अथ समिदाधानमुपनयनाङ्गभूतं कर्त्तव्यम्। स्वस्वशाखोक्तविधिना एवं प्रतिदिनमपि अग्निकार्य्यञ्च कुर्वीत। मेधावी तदनन्तरमिति संवर्त्तस्मरणात्तदनन्तरं सन्ध्योपासनादनन्तरम्। एतच्च कालद्वयेऽपि कार्य्यम्।

आह याज्ञवल्क्यः।

अग्निकार्य्यं ततः कुर्य्यात्सन्ध्ययोरुभयोरपि इति।

---

* पच्छः पादशः।

केचित्सायमेवेच्छन्ति ।

तथाच लोकाक्षिः ।

सायमेवाग्निमिन्धते इत्येक इति ।

मनुस्तु ।

दूरादाहृत्य समिधः सन्निदध्याद्विहायसि ।

सायं प्रातश्च जुहुयात्ताभिरग्निमतन्द्रितः ॥

दूरादन्यापरिगृहीतदेशादित्यर्थः । विहायसि मण्डपादौ ।

अन्यपरिगृहीतनिषेधमाह आपस्तम्बः ।

यथाकथञ्चित्परपरिग्रहमभिमन्यते स्तेनो हि भवतीति ।

अत्र विशेषः स्मृत्यन्तरे ।

पुरास्तमयात्प्रागुदीचीं दिशं गत्वा समिध आहरे-
दिति ।

पुरास्तमयादित्यभिधानादस्ते निषेधः ।

अतएवापस्तम्बः ।

नास्तमिते समिधो गच्छेदिति ।

समिन्नियमो वायुपुराणे ।

पालाश्यः समिधः कार्याः खादिर्यस्तदलाभतः ।

शमीरोहितकाश्वत्थास्तदभावेऽर्कवेतसाविति ॥

समिल्लक्षणं कात्यायन आह ।

नाङ्गुष्ठादधिका कार्या समित्स्थूलतया क्वचित् ।

न वियुक्ता त्वचा चैव न सकीटा न पाटिता ॥

प्रादेशान्नाधिका नोना तथा नैव द्विशाखिकेति ॥

अथाभिवादनम्।

तत्र याज्ञवल्क्यः।

ततोऽभिवादयेद्वृद्धानसावहमिति ब्रुवन्।

ततोऽग्निकार्य्यादनन्तरमित्यर्थः।

ब्रह्मपुराणे।

उत्थाय मातापितरौ पूर्व्वमेवाभिवादयेत्।
आचार्य्यञ्च ततो नित्यमभिवाद्यो विजानता॥

मनुः।

लौकिकं वैदिकं वापि तथाध्यात्मिकमेव वा।
आददीत यतो ज्ञानं तं पूर्व्वमभिवादयेत्॥
अभिवादात्परं विप्रो ज्यायांसमभिवादयेत्।
असौ नामाहमस्मीति स्वं नाम परिकीर्त्तयेत्॥

अभिवादादभिवादय इत्येतस्माच्छब्दात्परममुकनामाहमस्मीति स्वं नाम परिकीर्त्तयेत्। विप्रग्रहणं द्विजात्युपलक्षणार्थम्।

आपस्तम्बः।

स्वदक्षिणबाहुं* श्रोत्रसमं प्रसार्य्य ब्राह्मणोऽभिवादयेत्।

---

* ब्राह्मणः स्वदक्षिणबाहुं श्रोत्रसमनभिवाद्यस्य कर्णसमानं यथा तथा प्रसार्य्य पश्चात्प्राञ्जलिः सन्नभिवादयेत्। एवं क्षत्रियोऽभिवाद्यस्य वक्त्रसमानं वैश्यः कटिसमानं शूद्रो नीचैर्मध्यदेशादधःसमानं स्वदक्षिणबाहुं प्रसार्य्य प्राञ्जलिः सन्नभिवादयेदित्यन्वयः।

उरःसमं राजन्यो मध्यसमं वैश्यो नीचैः शूद्रः प्राञ्जलिः सर्व्वत्र ।

मनुः ।

भोःशब्दं कीर्त्तयेदन्ते स्वस्य नाम्नोऽभिवादने ।
नाम्नां स्वरूपभावो हि भोःशब्द ऋषिभिः स्मृतः ॥
आयुष्मान् भव सौम्येति वाच्यो विप्रोऽभिवादने ।
अकारश्चास्य नाम्नोऽन्ते वाच्यः पूर्व्वाक्षरः प्लुतः ॥

भोःशब्दो नाम्नां स्वकीयानां स्वरूपभावः स्वरूपस्य संबोध्यं प्रति प्राप्तिहेतुः । अयमर्थः भोःशब्देन हि बोधितोऽसावस्य नाम बुध्यत इति । अत्र भूधातुः प्राप्त्यर्थः । भो भाव इति पाठे भोःशब्दस्य भावः सत्ता । आयुष्मान् भव सौम्येति वाक्यस्यान्ते अस्माभिवादकस्य नाम वाच्यं विष्णुशर्म्मन्निति । तस्य चान्ते अकारो वाच्यः तस्य चाकारस्य पूर्व्वाक्षरः प्लुतः । पूर्व्वाक्षरं प्लुतं छान्दसो लिङ्गव्यत्ययः । यद्यपि पूर्व्वाक्षरं नकारस्तथापि तस्य व्यञ्जनत्वेन प्लुतत्वायोगात् शर्म्मन्नित्यत्र योऽयमकारः स एव पूर्व्वपदाभिधेय इति तस्यैव प्लुतता । पूर्व्वाक्षरं प्लुतमित्यपि पाठः । तत्र पूर्व्वमक्षरं प्लुतमस्येति चतुरस्रम् । अथवा अकारश्चास्य नाम्नोऽन्त इत्यस्यायमर्थः । अस्माभिवादकस्य नाम्नोऽन्ते योऽयमकारः अकार इति स्वरमात्रोपलक्षणं सर्व्वेषां नाम्नामकारान्तत्वनियमाभावात् । स एवान्त्यस्वरः पूर्व्वाक्षरम् । पूर्व्वाणि नामगतान्यक्षराणि यस्य स तथोक्तः एवंविधः प्लुतो वाच्यो न पुनरन्य एवाकारो नामान्ते वा इति ।

तथाच वशिष्ठः।

आमन्त्रिते स्वरोऽन्त्योऽस्य प्लुत इति।

आमन्त्रिते कर्त्तव्ये अभिवादकनाम्नोऽन्ते यः स्वरः स प्लुतः त्रिमात्रोभवतीत्यर्थः। ततश्चाभिवादनप्रत्यभिवादनयोरेवं प्रयोगो भवति। अभिवादये चैत्रनामाहमस्मि भो इति। आयुष्मान् भव सौम्य विष्णुशर्म्मन् इति। क्षत्रियवैश्ययोस्तु वर्म्मगुप्तशब्दप्रयोगः। यौ तु स्वनाम गुप्तं भवति।

आत्मनाम गुरोर्नाम यन्नाम कृपणस्य च।

आयुष्कामो न गृह्णीयाज्ज्येष्ठपुत्रकलत्रयोः॥

इत्यादिविधिनिषेधौ तयोरभिवादनव्यतिरिक्तं स्थलं विषय इति विज्ञेयम्। एतच्चाभिवादनं हस्तद्वयेन कार्य्यमन्यथाकरणे विष्णुना दोषसंकीर्त्तनात्।

जन्मप्रभृति यत्किञ्चित्चेतसा धर्म्ममाचरेत्।

सर्व्वं तन्निष्फलं याति एकहस्ताभिवादनादिति॥

एतदपि विद्वद्विषयम्।

यतः स एवाह।

अजाकर्णेन विदुषो मूर्खाणामेकपाणिना इति।

अजाकर्णेन श्रोत्रसमौ करौ कृत्वा पुनः संपुटितेन करद्वयेनेत्यर्थः। अपि वाऽजाकर्णौ सम्पुटितौ यथा तथैव सम्पुटितकरद्वयमपीत्यजाकर्णोक्तिः। प्रत्यभिवादनेऽपि दीक्षितस्य नाम न ग्राह्यम्।

अवाच्यो दीक्षितो नाम्ना यवीयानपि यो भवेत् ।
भो-भवत्-पूर्व्वकं तेनमभिभाषेत धर्म्मवित् ॥

भो दीक्षित भवन् दीक्षित इति । भो-भवत्-पूर्व्वकं यौगिकैः शब्दैरेनं प्रत्यभिवादनादिष्वभिभाषेतेत्यर्थः ।

यो न वेत्त्यभिवादस्य विप्रः प्रत्यभिवादनम् ।
नाभिवाद्यः स विदुषा यथा शूद्रस्तथैव सः ॥

यमः ।

अभिवादे तु यो विप्र आशिषं न प्रयच्छति ।
श्मशाने जायते वृक्षः काकगृध्रादिसेवितः ॥

शातातपः ।

पाषण्डं पतितं व्रात्यं महापातकिनं शठम् ।
सोपानत्कं क्षतघ्नञ्च नाभिवादेत्कदाचन ॥
धावन्तञ्च प्रमत्तञ्च मूत्रोच्चारकृतं तथा ।
भुञ्जानमाचमनार्हञ्च नास्तिकं नाभिवादयेत् ॥
वमन्तं* जृम्भमाणञ्च कुर्व्वन्तं दन्तधावनम् ।
अभ्यक्तशिरसं चैव स्नातं नैवाभिवादयेत् ॥

बृहस्पतिः ।

जपयज्ञगणस्थञ्च समित्पुष्पकुशानलान् ।
उदपात्रार्घ्यभैक्षान्नं वहन्तं नाभिवादयेत् ॥
उदक्यां सूतिकां नारीं भर्त्तृघ्नीं ब्रह्मघातिनीम् ।
अभिवाद्य द्विजोमोहादहोरात्रेण शुद्ध्यति ॥

---

* रमन्तमिति पाठान्तरम् ।

यमदग्निः ।

देवताप्रतिमां दृष्ट्वा यतिं दृष्ट्वा द्विजोत्तमम् ।
नमस्कारं न कुर्य्याच्चेत्प्रायश्चित्तीभवेन्नरः ॥
अभिवादनशीलस्य नित्यं वृद्धोपसेविनः ।
चत्वारि तस्य वर्द्धन्ते आयुः प्रज्ञा यशो बलम् ॥

एतच्चाभिवादनमधिकवयसामेव कार्य्यम् ।

तथाच मनुः ।

ज्यायांसमभिवादयेदिति ।

अतएव गौतमः ।

ऋत्विक्श्वशुरपितृव्यमातुलादीनां यवीयसां प्रत्युत्थानमभिवाद इति ।

ज्यायस्त्वञ्च कियता कालेनेत्याकाङ्क्षायाम्

मनुः ।

दशाब्दाख्यं पौरसख्यं पञ्चाब्दाख्यं कलाभृताम् ।
त्र्यब्दपूर्वं श्रोत्रियाणामल्पेनापि स्वयोनिषु ॥

दशाब्दपर्य्यन्तमाख्यायत इति दशाब्दाख्यं, एवं पञ्चाब्दाख्यमिति घञर्थे कविधानमिति कप्रत्ययः । पुरे भवाः पौराः । एकपुरनिवासिनां विद्याहीनानां दशभिर्व्वर्षैः पूर्व्वः सखा भवति। ततोऽधिकः ज्यायान् । कलाभृतां गीतादिविद्यावतां पञ्चाब्दपूर्व्वः सखा श्रोत्रियाणां त्र्यब्दपूर्व्वस्ततोऽधिको ज्यायान्। स्वयोनिषु भ्रात्रादिषु स्वल्पेनापि कालेन एकदिनपूर्व्वत्वेनापि ज्येष्ठता । एकदिनजातत्वे त ।

तदुक्तमापस्तम्बेन ।

वयस्यः समानेऽहनि जात इति ।

अथ प्रसङ्गादुर्व्वादिलक्षणम् ।

तत्र याज्ञवल्क्यः ।

स गुरुर्यः क्रियां कृत्वा वेदमस्मै प्रयच्छति ।
उपनीय ददद्वेदमाचार्य्यः स उदाहृतः ॥
एकदेशमुपाध्याय ऋत्विग्यज्ञकृदुच्यते ।
एते मान्या यथापूर्व्वमेभ्यो माता गरीयसी ॥

मनुः ।

उपनीय तु यः शिष्यं वेदमध्यापयेद्द्विजः ।
सकल्पं सरहस्यञ्च तमाचार्य्यं प्रचक्षते ॥
एकदेशन्तु वेदस्य वेदाङ्गान्यथवा पुनः ।
योऽध्यापयति वृत्त्यर्थमुपाध्यायः स उच्यते ॥

एकस्यैकदेशं* संहितां† ब्राह्मणं‡ वेदाङ्गमात्रं वा धर्म्मार्थं§-मध्यापयति अपरिभाषितवृत्त्यभिधानेन वा पूर्व्वोक्तमध्यापयति एते त्रयोऽप्युपाध्याया इत्यर्थः ।

---

* वेदस्य ।

† मन्त्रात्मकवेदभागः ।

‡ मन्त्रेतरवेदभागः ।

§ वेतननियममकृत्वा इत्यर्थः ।

¶ मन्त्रमात्रात्मकवेदाध्यापयिता, मन्त्रेतरवेदभागमात्राध्यापयिता, वेदाङ्गमात्राध्यापयिता ।

निषेकादीनि कर्म्माणि यः करोति यथाविधि।
संभावयति चान्नेन स विप्रो गुरुरुच्यते॥

विप्रपदं पित्रुपलक्षणम्*, अतश्चानेवंविधः† पितैव न गुरु-‡ रिति गम्यते।

अग्न्याधानं पाकयज्ञमग्निष्टोमादिकान् मखान्।
यः करोति हृतो यस्य स तस्यर्त्विगिहोच्यते॥

तथा।

उपाध्यायाद्दशाचार्य्य आचार्य्याणां शतं पिता।
सहस्रन्तु पितुर्म्माता गौरवेणातिरिच्यते॥
उत्पादकब्रह्मदात्रोर्गरीयान् ब्रह्मदः पिता।
ब्रह्मजन्मनि विप्रस्य प्रेत्य चेह च शाश्वतम्॥

ब्रह्मजन्मनि ब्रह्मणो वेदाज्जन्म उपनयनम्। प्रेत्य मोक्षसाधन-पर्य्यन्तयोग्यतापादकत्वात्। इह च सर्व्वकर्म्माधिकारापाद-कत्वात् शाश्वतं स्थायिफलं भवति।

अल्पं वा बहु वा यस्य श्रुतस्योपकरोति यः।
तमपीह गुरुं विद्याच्छ्रुतोपक्रियया तया॥
ब्राह्मस्य जन्मनः कर्त्ता स्वधर्म्मस्य च शासिता।
बालोऽपि विप्रो वृद्धस्य पिता भवति धर्म्मतः॥

---

* क्षत्रियादिजातीयपित्रुपलक्षणम्।

† यथाविधि गर्भाधानादिकर्म्माकारीत्यर्थः।

‡ न महागुरुरित्यर्थः।

विप्राणां ज्ञानतो ज्येष्ठं क्षत्रियाणां तु वीर्य्यतः ।
धनधान्येन वैश्यानां शूद्राणामेव जन्मतः ॥

अथ भिक्षाचरणम् ।

तत्र याज्ञवल्क्यः ।

आदिमध्यावसानेषु भवच्छब्दोपलक्षिता ।
ब्राह्मणक्षत्रियविशां भैक्षचर्य्या यथाक्रमम् ॥

भैक्षं भिक्षाकदम्बकम् । भिक्षादिभ्यो णः ।

मनुः ।

प्रतिगृह्येप्सितं दण्डमुपस्थाय च भास्करम् ।
प्रदक्षिणं परीत्याग्निं चरेद्भैक्षं यथाविधि ॥

ईप्सितं यद्यस्य विहितम् । वचनान्तरप्रतिनियतदण्डविधानादनेन विजातीयग्रहणनिषेधः । भास्करं सौरैर्मन्त्रैरुपस्थाय । अग्निं प्रदक्षिणीकृत्य एतत्त्रितयं भिक्षाङ्गं विधाय यथाविधि वक्ष्यमाणविधिना भैक्षं चरेत् ।

भवत्पूर्व्वं चरेद्भैक्षमुपनीतो द्विजोत्तमः ।
भवन्मध्यन्तु राजन्यो वैश्यस्तु भवदुत्तरम् ॥

चरेदित्यनेन याज्ञा लक्ष्यते । अमुमेवार्थं द्योतयति । भैक्षमिति कर्म्मविभक्त्या तेन चार्थसिद्धां भिक्षां देहीतिवाक्यरचना । तत्र गौरवसम्बोधनार्थं* भवत्पदमादिमध्यावसानेषु

* भवन् भिक्षां देहि विप्रस्य, क्षत्रियस्य भिक्षां भवन् देहि, भिक्षां देहि भवन् वैश्यस्य ।

ब्राह्मणादिभिः क्रमेण कार्यं तच्च सम्बुद्ध्यन्तम्। प्रायशोगृह-मेधिनां गृहे स्त्रिय एव भिक्षां ददतीति सामर्थ्यात्स्त्रीप्रत्ययवच्च तत्पदं भवति। तत्रायं प्रयोगः। भवति भिक्षां देहीति ब्राह्मणः। भिक्षां भवति देहीति क्षत्रियः। भिक्षां देहि भवतीति वैश्यः। नायं नियमः। स्त्रिय एव भिक्षणीया इति।

अतएवाह शौनकः।

अप्रत्याख्यायिनमग्रे भिक्षेताप्रत्याख्यायिनीक्षेति।

भिक्षाचरणे विशेषमाह याज्ञवल्क्यः।

ब्राह्मणेषु चरेद्भैक्षमनिन्द्येष्वात्मवृत्तये।

आत्मवृत्तये स्वशरीरयात्रार्थमेव नाधिकाम्। यदा त्वाचार्यः सीदद्वृत्तिर्नैवादिविकलस्तदा तत्पोषणार्थमपि भैक्षं चरेत्। अन्यथा प्रधानभूतवेदाध्ययनविरोधात्। ब्राह्मणेषु चरेदित्येत-द्ब्राह्मणविषयम्।

अतएव व्यासः।

ब्राह्मणक्षत्रियविशश्चरेयुर्भैक्षमन्वहम्।

सजातीयगृहेष्वेव सार्ववर्णिकमेव चेति॥

सर्वशब्दः, प्रकृतवर्णत्रयपरः। नायमैच्छिको विकल्पः, अपि तु व्यवस्थितो विकल्पः।

तथाच भविष्यपुराणे।

सर्वं वा विचरेद्ग्रामं पूर्वोक्तानामसम्भवे।

अन्त्यवर्ज्यं महाभाग इति॥

अन्त्यः शूद्रः।

उक्तेष्वपि क्वचिदपवादमाह मनुः ।

गुरोः कुले न भिक्षेत न ज्ञातिकुलबन्धुषु ।
मातरं वा स्वसारं वा मातुर्वा भगिनीं निजाम् ॥
भिक्षेत भिक्षां प्रथमम् ।

इत्यनेन विरोधः स्यादिति चेन्नैवम् । एतदुपनयनाङ्गभिक्षा-विषयम् ।* पूर्वोक्तं तु नित्यभिक्षाविषयम् । एवं भिक्षां भिक्षित्वा ब्रह्मचारी गुरवे भैक्षं निवेद्य अहःशेषं वाग्यतस्तिष्ठेत् आसीनः प्रयानो वा भवेत् । ततः सायंसन्ध्यां विधाय यस्मिन्नुपनयनहोमो विहितस्तस्मिन्नेवाग्नौ समिधं स्वगृह्योक्त-प्रकारेणाधाय वाचं विसृजेत् । ततश्च तद्भैक्षं भुञ्जीत ।

तत्र याज्ञवल्क्यः ।

कृताग्निकार्य्यो भुञ्जीत वाग्यतो गुर्व्वनुज्ञया ।
आपोशानक्रियापूर्वं सत्कृत्यान्नमकुत्सयन् ॥

अमृतोपस्तरणमसीत्यादिका आपोशानक्रिया तां पूर्वं कृत्वा भुञ्जीतेत्यर्थः ।

गौतमः ।

सायं प्रातस्त्वन्नमभिपूजितमनिन्दन् भुञ्जीतेति ।

सायंः प्रातरित्यनेन मध्ये भोजननिषेधः ।

---

* गुरोः कुले न भिक्षेत इत्यादिकम् ।

† सायं प्रातः पदं रात्रिदिवापरं मध्ये भोजननिषेध इत्यनेन दिवाभोजनादूर्द्धं रात्रिभोजनात् प्रागपरभोजनं न कर्त्तव्यमिति ज्ञापितम् ।

तथा च श्रुतिः ।

सायं प्रातराश्येव स्यादिति ।

अत्र वशिष्ठः ।

अष्टौ ग्रासान्मुनेर्भुक्तं* वानप्रस्थस्य षोड़श ।

द्वात्रिंशत्तु गृहस्थस्य अमितं ब्रह्मचारिणः ॥

भोक्तृनियममाह मनुः ।

आयुष्यं प्राङ्मुखो भुङ्क्ते यशस्यं दक्षिणामुखः ।

श्रियं प्रत्यङ्मुखो भुङ्क्ते ऋतमिच्छन् ह्युदङ्मुखः ॥

आयुषे हितमायुष्यं यशसे हितं यशस्यं श्रियमिच्छन् ऋतमिच्छन्नित्यन्वयः ।

पात्रनियमो हारीतेनोक्तः ।

लौहे† मृण्मये वा पात्रे भुञ्जीतेति ।

तच्च स्वयमेव प्रक्षालयेत् । भुक्त्वा स्वयममन्त्रं प्रक्षालयेदित्यापस्तम्बस्मरणात् । एवं भैक्षेण वर्त्तयेन्नित्यमित्युक्तम् ।

तत्रापवादमाह याज्ञवल्क्यः ।

ब्राह्मणः काममश्नीयाच्छ्राद्धे व्रतमपीड़यन्निति ।

---

* ग्रासान् भुक्तमिति कां दिशं गन्तव्यमितिवत् भावाख्यातेतरत्वात्साधु । मुनेरिति भावक्तान्तत्वात्कर्तृषष्ठी । क्वचिदष्टौ ग्रासामुनेर्भुक्तमिति पाठः तत्पाठे तु मुनेर्भुक्तं भोजनं क्रियत्परिमितं—अष्टौ ग्रासा इति ।

† अत्र लौहपदं सर्व्वतैजसपरं वाच्यं वचनान्तरे लौहनिषेधात् यथा अर्कपत्रे तथा पृष्ठे आयसे ताम्रभाजने । करे कर्पटके चैव भुक्त्वा चान्द्रायणं चरेत् अतएव सर्व्वतैजसं लौहमिति स्मरन्ति ।

व्रतमपीड़यन्मधुमांसादि वर्ज्जयन्नित्यर्थः ।

अकामापन्ने मधुनि अदोषमाह वशिष्ठः ।

अकामापन्नं मधु वाजसनेयके न दुष्यतीति ।

उपनयनकालस्य परमावधिमाह

मनुः ।

आषोड़शाद्ब्राह्मणस्य सावित्री नातिवर्त्तते ।

आद्वाविंशात्क्षत्रियस्य आचतुर्विंशतेर्विशः ॥

अत ऊर्द्धं त्रयोऽप्येते यथाकालं न संस्कृताः ।

सावित्रीपतिता व्रात्या भवन्त्यार्य्यविगर्हिताः ॥

उक्तपरमावध्यतिक्रमे व्रात्यस्तोमरूपप्रायश्चित्तानन्तरं संस्कार्य्यएव। तथाच याज्ञवल्क्यः ।

सावित्रीपतिता व्रात्या व्रात्यस्तोमादृते क्रतोरिति ।

तथान्योऽपि विशेषः स्मृत्यन्तरे ।

षण्ढान्धबधिरस्तब्धजड़गद्गदपङ्गुषु ।

कुब्जवामनरोगार्त्तशुष्काङ्गविकलाङ्गिषु ॥

मत्तोन्मत्तेषु मूकेषु शयनस्थे निरिन्द्रिये ।

स्तब्धपुंस्त्वेऽपि चैतेषु संस्काराः स्युर्यथोचितम् ॥

यस्मिन्यस्मिन् संस्कारे क्रियमाणे तद्विहितकर्म्मसु समर्थो भवति तैः संस्कार्य्य एवेत्यर्थः । मूकोन्मत्तौ न संस्कार्य्यावित्येके । एतेषामसंस्कारेऽपि पातित्यं नास्ति कर्म्मस्वनधिकारात् । तदपत्यन्तु संस्कार्य्यमेव ।

ब्राह्मण्यां ब्राह्मणेनोत्पन्नो वा ब्राह्मण एवेति श्रुतेः । अत्र

ब्राह्मणत्वजात्या क्षत्रियत्वादि अप्युपलक्ष्यते*। असंस्कृतेऽपि जातिमात्रस्यानपायात्†। ब्राह्मण एव भवति न द्विजातिरेवेत्यर्थः। स्त्रीणान्तु विवाह एवोपनयनम्।

तथाच मनुः।

वैवाहिको विधिः स्त्रीणामौपनायनिकः स्मृत इति।

यत्तु हारीतेनोक्तम्।

द्विविधाः स्त्रियो ब्रह्मवादिन्यः सद्योवध्वश्च। तत्र ब्रह्मवादिनीनामुपनयनमग्नीन्धनं वेदाध्ययनं स्वगृहे च भिक्षाचर्य्येति। सद्योवधूनां तूपस्थिते विवाहे कथञ्चिदुपनयनमात्रं कृत्वा विवाहः कार्य्य इति।

तत्कल्पान्तराभिप्रायः।

पुराकल्पे कुमारीणां मौञ्जीबन्धनमिष्यते।
अध्यापनञ्च वेदानां सावित्रीवचनं तथा॥

इति यमस्मरणात्। यदा तु मेखलादीनि त्रुटितानि तदा तेषां प्रतिपत्तिकर्म्म मनुनाभिहितम्।

मेखलामजिनं दण्डमुपवीतं कमण्डलुम्।
अप्सु प्रास्य‡ विनष्टानि गृह्णीतान्यानि मन्त्रवदिति॥

यस्य गृह्ये यो मन्त्र उदितस्तस्य मन्त्रवत् ग्राह्यम्।

इत्युपनयनम्।

---

* तथाच क्षत्रियायां क्षत्रियेण जातः क्षत्रिय एव भवति एवं वैश्येनेत्यादि।

† जन्मना ब्राह्मणो ज्ञेय इति स्मरणात्। संस्कारैर्द्विज उच्यते इति स्मरणाच्च।

‡ निक्षिप्य।

अथ ब्रह्मचारिनियमाः ।

तत्र याज्ञवल्क्यः ।

मधुमांसाञ्जनोच्छिष्टशुक्तस्त्रीप्राणिहिंसनम् ।
भास्करालोकनाश्लीलपरिवादादि वर्जयेत् ॥

मांसवर्जनं व्याधिराहित्ये वेदितव्यम् ।

तथाच वशिष्ठः ।

स चेद्व्याधीयीत कामं गुरोरुच्छिष्टं शेषमौषधार्थं सर्वं प्राश्नीयादिति ।

व्याधीयीत व्याधिमत्तामनुभवतीत्यर्थः । अञ्जनं तैलादिना शरीरस्य कज्जलादिना नेत्रयोः । एतन्निषेधोऽप्यौषधादन्यत्र ।

तथा स्मर्यते ।

अष्टौ तान्यव्रतघ्नानि आपो मूलं फलं पयः ।
हविर्ब्राह्मणकाम्या च गुरोर्वचनमौषधम् ॥

उच्छिष्टं गुरुव्यतिरिक्तं स्वस्य परस्य च वर्जयेत् ।

तथाच वशिष्ठः ।

उच्छिष्टमगुरोरभोज्यं स्वमुच्छिष्टमुच्छिष्टोपहृतं चेति ।

गुरुस्तूक्तलक्षणो निषेकादिकृत् । शुक्तं परुषवचः पर्य्युषितान्नञ्च । स्त्रीशब्देन तद्विषयप्रेक्षणालभने लक्ष्येते ।

तथाच गौतमः ।

स्त्रीप्रेक्षणालभने मैथुनशङ्कायामिति ।

भास्करालोकने तु मनुना विशेषो दर्शितः ।

नेक्षेतोद्यन्तमादित्यं नास्तं यान्तं कदाचन ।

नोपरक्तं न वारिस्थं न मध्यनभसो गतमिति ॥

अश्लीलं सभाऽयोग्यं वचः। परिवादः सदसद्रूपपरदोषकथनम्। आदिशब्दाद्गन्धमाल्यादिनिषेधः।

मनुः।

वर्ज्जयेन्मधु मांसञ्च गन्धं माल्यं रसान् स्त्रियः।
शुक्तानि चैव सर्व्वाणि प्राणिनां चैव हिंसनम् ॥
अभ्यङ्गमञ्जनं वाक्ष्णोरुपानच्छत्रधारणे।
कामं क्रोधञ्च लोभञ्च नर्त्तनं गीतवादनम् ॥
द्यूतञ्च जनवादञ्च परिवादं तथानृतम्।
स्त्रीणाञ्च प्रेक्षणालापमुपघातं परस्य वै ॥
एकः शयीत सर्व्वत्र न रेतः स्कन्दयेत्क्वचित्।
कामाद्धि स्कन्दयन्रेतो हिनस्ति व्रतमात्मनः ॥

व्रतं ब्रह्मचर्य्यम्।

स्वप्ने सिक्त्वा ब्रह्मचारी द्विजः शुक्रमकामतः।
स्नात्वार्कमर्चयेद्विप्रः पुनर्मामित्यृचं जपेत् ॥
पुनर्मा तस्मादेनसो विश्वान मुञ्चत्वंहसः।
यदि दिवा यदि नक्तमेनांसि चक्रमावयमिति ॥
इन्द्रियाणां विचरतां विषयेष्वपहारिषु।
संयमे यत्नमातिष्ठेद्विद्वान् यन्तेव वाजिनाम्* ॥
बुद्धीन्द्रियाणि पञ्चैषां श्रोत्रादीन्यनुपूर्व्वशः।
कर्म्मेन्द्रियाणि पञ्चैव पायुादीनि प्रचक्षते ॥

---

* वाजिनां घोटकानाम्।

एकादशं मनो ज्ञेयं स्वगुणेनोभयात्मकम् ।
यस्मिञ्जिते जितावेतौ भवतः पञ्चकौ गणौ ॥
इन्द्रियाणां प्रसङ्गेन दोषमृच्छत्यसंशयम् ।
सन्नियम्य तु तान्येव ततः सिद्धिं नियच्छति ॥
न जातु कामः कामानामुपभोगेन शाम्यति ।
हविषा कृष्णवर्त्मेव भूय एवाभिवर्द्धते ।
यश्चैतान् प्राप्नुयात्सर्व्वान् यश्चैतान् केवलांस्त्यजेत् ।
प्रापणात्सर्व्वकामानां परित्यागो विशिष्यते ॥
न तथैतानि शक्यन्ते सन्नियन्तुमसेवया ।
विषयेषु प्रजुष्टानि यथा ज्ञानेन नित्यशः ॥
इन्द्रियाणान्तु सर्व्वेषां यद्येकं क्षरतीन्द्रियम् ।
तेनास्य क्षरति प्रज्ञा दृतेः पात्रादिवोदकम् ॥
वशीकृत्येन्द्रियग्रामं संयम्य च मनस्तथा ।
सर्व्वान् संसाधयेदर्थानक्षिण्वन् योगतस्तनुम् ॥
सेवेतेमांस्तु नियमान् ब्रह्मचारी गुरौ वसन् ।
संनियम्येन्द्रियग्रामं तपोहृदार्थमात्मनः ॥

इन्द्रियाणां विचरतामित्यारभ्याभिहिता धर्म्मा न केवलं ब्रह्मचारिणामपितरेषामपि सम्भवति ।

अथोच्चारविधिः ।

तत्र विष्णुः ।

ब्राह्मे मुहूर्त्ते उत्थाय मूत्रपुरीषोत्सर्गं कुर्य्यादिति ।

ब्राह्ममुहूर्त्तलक्षणं पितामह आह ।

रात्रेस्तु पश्चिमे यामे मुहूर्त्तौ द्वौ तु ब्राह्म उच्यते इति ।

पश्चिमे यामे पश्चिमार्द्धप्रहरे ब्राह्ममुहूर्त्त इत्यर्थः ।

अङ्गिराः ।

उत्थाय पश्चिमे यामे रात्रेराचम्य चोदकम् ।

अन्तर्द्धाय तृणैर्भूमिं शिरः प्रावृत्य वाससा ॥

वाचं नियम्य यत्नेन निष्ठीवोच्छ्वासवर्ज्जितः ।

कुर्य्यान्मूत्रपुरीषे तु शुचौ देशे समाहित इति ॥

आचम्य स्वापाद्याचमननिमित्ते सति । तृणैरयज्ञीयैः तृणग्रहणं काष्ठादेरप्युपलक्षणार्थम् । तिरस्कृत्योच्चरेत्काष्ठं पत्रं लोष्ट्रं तृणानि वेति मनुस्मरणात् ।

पराशरः ।

ततः प्रातः समुत्थाय कुर्य्याद्विण्मूत्रमेव च ।

नैर्ऋत्यामिषुविक्षेपमतीत्य ह्यधिकं भुवः ॥

ग्रामात्क्रमशतं* गच्छेन्नगराच्च† चतुर्गुणमिति ॥

याज्ञवल्क्यः ।

दिवासन्ध्यासु कर्णस्थब्रह्मसूत्र उदङ्मुखः ।

कुर्य्यान्मूत्रपुरीषे तु रात्रौ चेद्दक्षिणामुखः ॥

यमः ।

प्रत्यङ्मुखस्तु पूर्व्वाह्णे पराह्णे प्राङ्मुखस्तथा ।

---

* क्रमशतं पादशतमिति यावत् ।

† चतुर्गुणं चतुःशतानि ।

उदङ्मुखस्तु मध्याह्ने निशायां दक्षिणामुखः ॥

देवलोऽपि ।

सदैवोदङ्मुखः प्रातः सायाह्ने दक्षिणामुखः ।

विण्मूत्रमाचरेन्नित्यं सन्ध्यासु परिवर्ज्जयेत् ॥

सन्ध्यासु वर्ज्जनं निरुद्वेतरविषयम् । न वेगं धारयेन्नोपरुद्धः क्रियां कुर्य्यादिति मनुस्मरणात् । दिङ्नियमे विकल्पो वेदितव्यः ।

यच्च मनुनोक्तम् ।

छायायामन्धकारे वा रात्रावहनि वा द्विजः ।

यथासुखमुखः कुर्य्यात्प्राणबाधभयेषु चेति ॥

तन्नीहाद्यन्धकारजनितदिङ्मोहविषयम् ।

विष्णुः ।

घ्राणास्ये समावेष्टयित्वा मृद्वारी ग्रीवायामासज्योत्सृजेत् ।

मृद्वारी मृत्तिकाधारी ग्रीवायां यज्ञोपवीतमासज्य ।

अङ्गिराः ।

कृत्वा यज्ञोपवीतन्तु पृष्ठतः कण्ठलम्बितम् ।

विण्मूत्रन्तु गृही कुर्य्याद्वा कर्णे समाहितः ॥

कर्णे निधानमेकवस्त्रविषयम् ।

तथाच सांख्यायनगृह्ये ।

यद्येकवस्त्रो यज्ञोपवीतं कर्णे कृत्वा मूत्रपुरीषोत्सर्गं कुर्य्यादिति ।

हारीतः ।

उच्चारे मैथुने चैव प्रस्रावे दन्तधावने ।
स्नाने भोजनकाले च षट्सु मौनं समाचरेत् ॥

उच्चारे पुरीषोत्सर्गे ।

विष्णुपुराणे ।

दूरादावसथान्मूत्रं पुरीषञ्च विवर्जयेत् ।
पादावनेजनोच्छिष्टं† न क्षिपेच्च गृहाङ्गने ॥

बृहद्विष्णुः ।

अन्तर्धाय तृणैर्भूमिं शिरः प्रावृत्य वाससा ।
वाचं नियम्य यत्नेन निष्ठीवोच्छ्वासवर्जितः ॥

मनुः ।

वायुग्निविप्रमादित्यमपः पश्यंस्तथैव गाम् ।
न कदाचिन्मेहुर्वीत विण्मूत्रस्य विसर्जनम् ॥

पश्यन्सम्मुखः ।

न फालकृष्टे न जले न चित्यां न च पर्वते ।
न जीर्णदेवायतने न वल्मीके न गाहले ॥
न ससत्त्वेषु गर्त्तेषु न गच्छन्न पथि स्थितः ।
न नदीतीरमासाद्य न भस्मनि न गोमये ॥

न च पर्वतमस्तक इति पाठे पूर्वोक्तपर्वतग्रहणेनैव तन्मस्तकसिद्धावपि पुनर्ग्रहणाद्दोषाधिक्यं द्योत्यते । तन्नाप्ये तु

---

* गृहात् ।

† पादप्रक्षालनावशिष्टजलम् ।

अत्यन्तार्त्तस्य पर्व्वते दोषाभावप्रतिपादनार्थमित्युक्तम् ।

विष्णुपुराणे ।

उत्सर्गे वै पुरीषस्य मूत्रस्य च विसर्ज्जने ।
तिष्ठेन्नातिचिरं तत्र न च किञ्चिदुदीरयेत् ॥

भरद्वाजः ।

अपकृष्य च विण्मूत्रं काष्ठलोष्टतृणादिना ।
उदस्तवासा* उत्तिष्ठेद्दृढं विधृतमेहनः ॥

अथ शौचविधिः ।

याज्ञवल्क्यः ।

गृहीतमिश्रश्चोत्थाय मृद्भिरभ्युद्धृतैर्जलैः ।
गन्धलेपक्षयकरं शौचं कुर्य्यादतन्द्रितः ॥

उद्धृतैरिति जलान्तर्निषेधः । गन्धलेपक्षयकरमिति सर्व्वेषां साधारणं शौचम् । वक्ष्यमाणमृत्संख्यानियमस्त्वदृष्टार्थः ।

दक्षः ।

शौचे यत्नः सदा कार्य्यः शौचमूलो द्विजः स्मृतः ।
शौचाचारविहीनस्य समस्ता निष्फलाः क्रियाः ॥

यमः ।

आहरेन्मृत्तिकां प्राज्ञः कूलात्सिकतात्तथा ।

कूलग्रहणमनुपहतदेशोपलक्षणार्थम् ।

---

* कटिदेशादुत्क्षिप्तवसनः ।

† अयुद्धवस्तुशून्यदेशः ।

वापीकूपतड़ागेषु नाहरेद्वाह्यतो मृदम् ।
आहरेज्जलमध्यात्तु परतो मणिबन्धनात् ॥

शातातपः ।

शुचिदेशात्तु संग्राह्या शर्कराश्मादिवर्जिता ।
रक्ता गौरा तथा श्वेता मृत्तिका त्रिविधा स्मृता ॥

कश्यपः ।

विप्रे गौरा मृदः प्रोक्ताः क्षत्रे रक्तास्तथोदिताः ।
वैश्यस्य हरिताः प्रोक्ताः कृष्णाः स्त्रीशूद्रयोस्तथा ॥

विष्णुपुराणे ।

वल्मीकमूषिकोत्खातान्मृदमन्तर्जलात्तथा ।
शौचावशिष्टां गेहाच्च मृदः शौचे विवर्जयेत् ॥

विष्णुः ।

अन्तःप्राग्वपन्नाच्च हलोत्खातां न चाहरेत् ।

मनुः ।

आहृतामन्यशौचार्थं बालुकां पांशुरूपिणीम् ।
न मार्गान्न श्मशानाच्च नादद्यात्कुध्यतः क्वचित् ॥

तथा ।

यस्मिन्देशे च यत्तोयं या च यत्र च मृत्तिका ।
सैव तत्र प्रशस्ता स्यात्तया शौचं विधीयते ॥

मृत्संख्यानियममाह

दक्षः* ।

---

* यम इति पाठान्तरम् ।

एका लिङ्गे करे तिस्र उभयोर्मृद्वयं स्मृतमिति ।

करे सव्ये एतच्च मूत्रशौचविषयम् ।

एका लिङ्गे करे सव्ये तिस्रो द्वे हस्तयोर्द्वयोः ।

मूत्रशौचं समाख्यातं शुक्रे तद्द्विगुणं भवेत् ॥

इति शातातपस्मरणात् ।

विट्शौचे तु मनूक्तो विशेषः ।

एका लिङ्गे गुदे तिस्रो दश वामकरे तथा ।

उभयोः सप्त दातव्या मृदः शौचोपपादिकाः ॥

यमदग्निः ।

द्वे लिङ्गे मृत्तिके देये गुदे पञ्च करे दश ।

उभयोः सप्त दातव्या इति ।

शङ्खः ।

अपाने मृत्तिकाः सप्त लिङ्गे द्वे परिकीर्त्तिते ।

एकस्मिन् विंशतिर्हस्ते द्वयोर्ज्ञेयाः* चतुर्दश ॥

तिस्रस्तु मृत्तिका देया कर्त्तुं वै नखशोधनम् ।

तिस्रस्तु पादयोर्ज्ञेयाः शौचकामस्य सर्व्वदा ॥

शौचमेतद्गृहस्थानां तथा गुरुनिवासिनाम् ।

द्विगुणं स्याद्वनस्थानां यतीनां त्रिगुणं स्मृतम् ॥

मृत्तिका तु समुद्दिष्टा त्रिपर्व्वी पूर्य्यते यया इति ।

अत्र मृत्तिकाधिक्यं यत्तन्मूत्रपुरीषनिर्हरणागङ्गायाम् । यदा त्वेवमपि गन्धलेपक्षयो न भवति, तदोक्तसंख्यातिक्रमेणापि कार्य्यम् ।

---

* देयेति क्वचित्पाठः ।

यदाह मनुः ।

यावन्नापैत्यमेध्याक्तो गन्धलेपश्च तत्कृतः ।
तावन्मृदारि वा देयं सर्व्वासु द्रव्यशुद्धिष्विति ॥

हस्तशौचे तु हारीतो विशेषमाह ।

दश सव्ये षट् च पृष्ठे समोभाभ्यां च तिसृभिः ।
पादौ प्रक्षालयेदिति ।

पृष्ठे सव्यपश्चाद्भागे ।

लिङ्गशौचे तु मृन्मानमाह

दक्षः ।

लिङ्गे तु मृत्समाख्याता त्रिपर्व्वी पूर्य्यते यया इति ।

विट्शौचे तु मनुः ।

अर्द्धप्रसृतिमात्रा तु प्रथमा मृत्तिका स्मृता ।
द्वितीया च तृतीया च तदर्द्धार्द्धा प्रकीर्त्तिता ॥
एतच्छौचं गृहस्थानां द्विगुणं ब्रह्मचारिणाम् ।
वानप्रस्थस्य त्रिगुणं यतीनाञ्च चतुर्गुणम् ॥
न्यूनाधिकं न कर्त्तव्यं शौचे शुद्धिमभीप्सता ।
प्रायश्चित्तेन युज्येत विहितातिक्रमे कृते ॥

वाशुलः ।

तीर्थे शौचं न कुर्व्वीत कुर्व्वीतोद्धृतवारिणा ।

कथमप्युद्धरणाशक्तौ आदित्यपुराणे ।

रत्निमात्रं जलं त्यक्त्वा कुर्य्याच्छौचमनुद्धृते ।
पश्चात् शोधयेत्तीर्थमन्यथा त्वशुचिर्भवेत् ॥

दक्षः ।

यद्दिवा विहितं शौचं तदर्द्धञ्च निशि स्मृतम् ।
तदर्द्धमातुरे प्रोक्तमातुरस्यार्द्धमध्वनि ॥

आदिपुराणे ।

स्त्रीशूद्रयोरर्द्धमानं शौचं प्रोक्तं मनीषिभिः ।

यो विण्मूत्रोत्सर्ज्जनायोपविष्टः सन्न करोति तस्याप्यर्द्धशौचमाह हरिहरपराशरः ।

उपविश्य तु विण्मूत्रं कर्त्तुं यस्तन्न* विन्दति ।
स कुर्य्यादर्द्धशौचन्तु स्वस्य शौचस्य सर्व्वदेति ॥

यत्र संख्याया विषमत्वेनाङ्गीकरणासम्भवस्तत्र साध्या मृदर्द्ध-परिमाणा ग्राह्या ।

आर्त्तः कुर्य्यात्त्रयाग्नि सुप्तः कुर्य्यात्त्रयोचितम् ।
बालस्यानुपनीतस्य गन्धलेपक्षयावहम् ॥

हरिहरपराशरः ।

अरण्ये निर्जने रात्रौ चौरव्यालाकुले पथि ।
कृत्वा मूत्रपुरीषञ्च द्रव्यहस्तो न दूष्यति ॥

मृदादिकं हस्ते धारयित्वा न दूषयतीत्यर्थः । अन्ये तु द्रव्यहस्तो न दूष्यतीत्यस्यान्यथार्थं वर्णयन्ति । एवंविधस्थले अदनीयद्रव्यं हस्ते गृहीत्वा मूत्रपुरीषकरणेऽपि तद्द्रव्यं शुद्धमेवेति । तद्द्रव्यं हस्ते गृहीत्वैवाचमने कृते शुद्धं भवतीत्यर्थः ।

भोजनकाले गुदस्रावे विशेषमाह

---

* यत्किति पाठान्तरम् ।

हहस्पतिः ।

भुञ्जानस्य तु विप्रस्य कदाचित्प्रच्यवेद्गुदम् ।
उच्छिष्टमशुचित्वञ्च तस्य शौचं विधीयते ॥
पूर्वं कृत्वा तु शौचन्तु ततः पश्चादुपस्पृशेत् ।
ततः कृत्वोपवासञ्च पञ्चगव्येन शुध्यतीति ॥

विप्रग्रहणमुपलक्षणार्थम् ।

शौचे हस्तनियममाह देवलः ।

धर्म्मविद्दक्षिणं हस्तमधःशौचे न योजयेत्* ।
तथा च वामहस्तेन नाभेरूर्द्ध्वं न शोधयेत् ॥

अत्रेदं विचारणीयं विण्मूत्रयोर्मिलितयोः करणे एका लिङ्गे गुदे तिस्र इत्येतच्छौचं प्रवर्त्तते, आहोस्वित्† प्रत्येककरणमपीति‡ । प्रत्येककरणं तावन्न युक्तं केवलमूत्रोत्सर्गे शातातपवचनविरोधात् । वचनन्तु

एका लिङ्गे करे सव्ये तिस्रो दे हस्तयोर्द्वयोः ।
मूत्रशौचं समाख्यातमिति ॥

अथ केवलपुरीषोत्सर्गविषयत्वमुच्यते । लिङ्गशौचनिमित्ताभावेऽपि§ नैमित्तिकं तच्छौच¶मापद्येत तच्चायुक्तमदृष्टार्थप्रस-

---

* विवर्ज्जयेदिति पाठान्तरम् ।

† किमुत ।

‡ केवलमूत्रोत्सर्गकरणं केवलपुरीषोत्सर्गकरणमपीत्यर्थः ।

§ मूत्रोत्सर्गरूपनिमित्ताभावे ।

¶ लिङ्गशौचम् ।

ङाद्वचनादस्त्विति* चेन्न। एका लिङ्ग इत्यस्यांशस्य केवल-मूत्रोत्सर्गविषयत्वेनाप्युपपत्तेः। अगतिका ह्ययं गतिः†। यददृष्टकल्पनम् अतो विशिष्टोत्सर्ग एवेति युक्तम्। तत्रापि‡ लिङ्गशौचं पूर्वम्§। वचनप्रतीतक्रमातिक्रमेण¶ कारणाभा-वात्सन्निहितत्वात्प्रथमत॥ एतदकरणे** साचान्मृत्लेपस्य मणिबन्धोपरिभागेऽपि संसर्गप्रसक्तेश्च। हस्तपादादिशौचन्तु तन्त्रेणैव देशकालकर्तैक्याच्छौचरूपोपकारस्यैकत्वाच्च।

अथ विण्मूत्रव्यतिरिक्तशारीरमलशौचम्।

मनुः।

ऊर्ध्वं नाभेर्यानि खानि तानि मेध्यानि सर्व्वशः।
यान्यधस्यान्यमेध्यानि देहाच्चैव मलाप्लुता इति॥

खानीन्द्रियच्छिद्राणि।

मलानपि स एवाह।

वसा शुक्रमसृङ्मज्जा मूत्रं विट् कर्णविण्नखाः।

---

* अदृष्टमिति शेषः।

† इयं गतिः अदृष्टकल्पनारूपा गतिः अगतिका नास्ति गतिर्यस्यास्तादृशविधिरित्यर्थः।

‡ मूत्रपुरीषोभयोत्सर्गकरणेऽपि।

§ पुरीषशौचात्प्राक्।

¶ एका लिङ्गे गुदे तिस्र इत्यादि वचनप्रामाण्यमाश्रित्य।

॥ प्रथमं तच्च तदकरण इति पाठान्तरम्।

** लिङ्गाशौचाकरणे।

श्लेष्मास्तु दूषिका स्वेदो द्वादशैते नृणां मलाः ॥

वसा कायस्नेहः । मज्जा शिरोभवमेदः । कर्णविट् कर्णमलम् । दूषिकाक्ष्णिमलम् ।

एतैरुपघाते बौधायनः प्राह ।

आददीत मृदोऽपञ्च षट्सु पूर्वेषु शुद्धये ।

उत्तरेषु च षट्स्वङ्गिः केवलाभिर्विशुध्यतीति ॥

मनुस्तु ।

विण्मूत्रोत्सर्गशुद्ध्यर्थं मृद्वार्य्यादेयमर्थवत् ।

दैहिकानां मलानाञ्च शुद्धिषु द्वादशस्वपि ॥

विण्मूत्रमुत्सृज्य तोयेन* तत्ताद्दृशं तच्छुद्ध्यर्थमर्थवत्प्रयोजनवत् । एवञ्च बौधायनमनुवचनयोर्विकल्पः । स च देशकालाद्यपेक्षया ।

तथाच बौधायनः ।

देशं कालं तथात्मानं द्रव्यं द्रव्यप्रयोजनम् ।

उपपत्तिमवस्थाञ्च ज्ञात्वा शौचं प्रकल्पयेत् ॥

यमः ।

मूत्रे तिस्रः पादयोस्तु हस्तयोस्तिस्र एव च ।

मृदः पञ्चदशामेध्ये हस्तादीनां विशेषतः ॥

एतदात्मीयमूत्रादिस्पर्शशौचमुदाहृतम् ।

उत्सर्गकालादन्यत्र परकीये तु पठ्यते ॥

---

* तोयेन तत्ताद्दृशमिति पाठस्य बहुषु पुस्तकेषु दर्शनाद्रचितं परन्तु सार्थकं

परस्य शोणितस्पर्शे रेतोविण्मूत्रजे तथा ।
चतुर्णामपि वर्णानां द्वात्रिंशन्मृत्तिकाः स्मृताः ॥

विष्णुः ।

नाभेरधस्तात्पर्वाङ्सु कायिकैर्मलैः सुराभिर्मद्यैर्वोपहतो मृत्तोयैस्तदङ्गं प्रक्षाल्याचान्तः शुध्येत् । अन्यत्रोपहतो मृत्तोयैस्तदङ्गं प्रक्षाल्य स्नात्वैव इन्द्रियोपहतस्तूष्णीं स्नात्वा पञ्चगव्येन दग्धच्छदोपहत*श्चेति शौचप्रकरणम्।

अथाचमनम् ।

तत्र वृद्धपराशरः ।

कृत्वाथ शौचं प्रक्षाल्य पादौ हस्तौ च मृज्जलैः ।
निबद्धशिखकच्छस्तु द्विज आचमनञ्चरेत् ॥

प्रचेताः ।

अनुष्णफेनगीताभिराचामेदिति ।

आतुराणामुष्णोदकमप्यविरुद्धम् ।

तथाचापस्तम्बः ।

उदकेनातुराणाञ्च तथोष्णेनोष्णपायिनामिति ।

अत्राचमनं भवतीति शेषः ।

योगीश्वरः ।

अन्तर्जानु शुचौ देशे उपविष्ट उदङ्मुखः ।
प्राग्वा ब्राह्मेण तीर्थेन द्विजो नित्यमुपस्पृशेत् ॥

---

* श्रोत्राधरोपहत इत्यर्थः ।

तथा।

कनिष्ठादेशिन्यङ्गुष्ठमूलान्यग्रं करस्य च।
प्रजापतिपितृब्रह्मदेवतीर्थान्यनुक्रमात्॥

दक्षः।

प्रक्षाल्य पादौ हस्तौ च त्रिः पिबेदम्बु वीक्षितम्।
संवृत्याङ्गुष्ठमूलेन द्विः प्रमृज्यात्ततो मुखम्॥

वीक्षितमित्येतदहर्विषयम्।

रात्रावनीक्षितेनैव शुद्धिरुक्ता मनीषिभिरिति यमस्मरणात्।

मनुः।

त्रिराचामेदपः पूर्वं द्विः प्रमृज्यात्ततो मुखम्।
खानि* चोपस्पृशेदङ्गिरात्मानं† शिर एव च॥

गौतमः।

त्रिश्चतुर्वा अप आचामेदिति।

चतुर्ग्रहणं दैवपित्र्यकर्म्मापेक्षयेति केचित्। त्रिर्ग्रहणेन‡ तुच्छभाव§ इत्यन्ये।

भरद्वाजः।

संहताङ्गुलिभिस्तोयं गृहीत्वा दक्षिणेन तु।

---

* इन्द्रियाणि।

† आत्मस्थानं हृदयमित्यर्थः।

‡ त्रिर्ग्रहणेन त्रिवारजलपानेन।

§ मनस्तुष्टेरभावे।

मुक्ताङ्गुष्ठकनिष्ठे तु शेषेणाचमनं चरेत् ॥
ब्राह्मेण विप्रस्तीर्थेन नित्यकालमुपस्पृशेत् ।
कायत्रैदशिकाभ्यां वा न पित्र्येण कदाचन ॥

कायं प्राजापत्यं । त्रैदशिकं दैवं । यस्मिन् आचमनप्रयोगे यद्ब्राह्मादितीर्थं स्वीकृतं तेनैव स प्रयोगः कार्यो न तीर्थान्तरेण ।

दक्षः ।

संहताङ्गुलिभिः पूर्वमास्यमेवमुपस्पृशेत् ।
अङ्गुष्ठेन प्रदेशिन्या घ्राणं पश्चादनन्तरम् ॥
अङ्गुष्ठानामिकाभ्याञ्च चक्षुःश्रोत्रे पुनः पुनः ।
नाभिं कनिष्ठाङ्गुष्ठाभ्यां हृदयन्तु तलेन वै ॥
सर्वाभिस्तु शिरः पश्चाद्बाहू चाग्रेण संस्पृशेत् ।

याज्ञवल्क्यः ।

अद्भिस्तु प्रकृतिस्थाभिर्हीनाभिः फेनबुद्बुदैः ।
त्रिः प्राश्यापो द्विरुन्मृज्य खान्यद्भिः समुपस्पृशेत् ।

अत्र विशेषमाह पैठीनसिः ।

सव्ये पाणौ शेषा अपो निनयेदिति ।

शेषा आचमनावशिष्टाः ।

बृहच्छङ्खस्त्वन्यथोपस्पर्शनमाह ।

तर्जन्यङ्गुष्ठयोगेन स्पृशेन्नासापुटद्वयम् ।
मध्यमाङ्गुष्ठयोगेन स्पृशेन्नेत्रद्वयं ततः ॥
अङ्गुष्ठस्यानामिकाया योगेन श्रवणे स्पृशेत् ।

कनिष्ठाङ्गुष्ठयोगेन स्पृशेत् स्कन्धद्वयं ततः॥
नाभिञ्च हृदयं तद्वत् स्पृशेत्पाणितलेन तु।
संस्पृशेच्च तथा शीर्षमिति॥

अङ्गस्पृ।

ततोऽङ्गुलिचतुष्केण स्पृशेन्मूर्द्धानमादितः।
तर्ज्जन्यङ्गुष्ठयोगेन स्पृशेन्नेत्रद्वयं पृथक्॥
मध्यमानामिकाभ्यान्तु स्पृशेन्नासापुटे क्रमात्।
अङ्गुष्ठेन कनीयस्याः कर्णौ संयोगतः स्पृशेत्।
तर्ज्जन्यङ्गुष्ठयोगेन नाभिं हृदितलं स्पृशेत्॥

पैठीनसिः।

अग्निरङ्गुष्ठस्तस्मात्तेनैव सर्वाणि स्थानानि स्पृशेदिति। अत्र स्वस्वशाखानुसारेण व्यवस्थितो विकल्पः। यत्र शाखायामङ्गस्पर्शनमेव नाम्नातम्, अङ्गुष्ठादिविशेषो वा नाम्नातः, तच्छाखीयानां त्वैच्छिको विकल्पः। येषान्तु स्वशाखायां कतिपयाङ्गस्पर्शनमाम्नातं, तेषान्तु स्वशाखोक्तक्रमानुसारी शाखान्तरोक्तक्रमः अनुक्ताङ्गस्पर्शे भवतीति व्यवस्था।

उदकपरिमाणमाह

याज्ञवल्क्यः।

हृत्कण्ठतालुगाभिश्च यथासंख्यं द्विजातयः।
शुध्येरन् स्त्री च शूद्रश्च सकृत्सृष्टाभिरन्ततः॥

अन्ततस्तालुगाभिः। हृदानां परिमाणमाह उशना।

माषमज्जनमात्रा हृदयङ्गमा भवन्ति।

आचमनप्रसङ्गात्पवित्राचमने कश्चन विशेषः प्रदर्श्यते ।

तत्र मार्कण्डेयः ।

सपवित्रेण हस्तेन कुर्यादाचमनक्रियाम् ।
नोच्छिष्टं तत्पवित्रन्तु भुक्तोच्छिष्टन्तु वर्जयेत् ॥

एतद्दक्षिणकराभिप्रायम् । हारीतेन वामे निषेधात् ।

वामहस्ते कुशान् कृत्वा समाचामति यो द्विजः ।
उपस्पृष्टं भवेत्तेन रुधिरेण मलेन चेति ॥

एतत्केवलवामहस्ताभिप्रायम् । हस्तद्वयाययणे गोभिलेन फल स्मरणात् ।

उभयत्र स्थितैर्दर्भैः समाचामति यो द्विजः ।
सोमपानफलं तस्य भुक्त्वा यज्ञफलं भवेदिति ॥

अत्र विशेषमाह हारीतः ।

सव्यापसव्यौ कुर्वीत सपवित्रौ करौ बुधः ।
ग्रन्थिर्यस्य पवित्रस्य न तेनाचमनं भवेदिति ॥

पवित्रलक्षणमाह कात्यायनः ।

अनन्तर्गर्भिणं साग्रं कौशं द्विदलमेव च ।
प्रादेशमात्रं विज्ञेयं पवित्रं यत्र कुत्रचित् ॥

मार्कण्डेयः ।

चतुर्भिर्दर्भपिञ्जूलैर्ब्राह्मणस्य पवित्रकम् ।
एकैकं न्यूनमुद्दिष्टं वर्णे वर्णे यथाक्रमम् ॥
त्रिभिर्दर्भैः शान्तिकर्म पञ्चभिः पौष्टिकं तथा ।
चतुर्भिश्चाभिचाराख्यं कुर्वन् कुर्यात्पवित्रकमिति ॥

अथाचमननिमित्तानि।

तत्र मनुः।

उत्तीर्योदकमाचामेदवतीर्य तथैव च।

हारीतः।

स्त्रीशूद्रोच्छिष्टाभिभाषणे मूत्रपुरीषोत्सर्गदर्शने देवतामभिगन्तुकाम आचामेत्।

अथ द्विराचमननिमित्तानि।

तत्र याज्ञवल्क्यः।

स्नात्वा पीत्वा क्षुते सुप्ते भुक्त्वा रथ्योपसर्पणे।
आचान्तः पुनराचामेद्वासो विपरिधाय च॥

बौधायनः।

भोजने हवने दाने उच्चारे च प्रतिग्रहे।
हविर्भक्षणकाले वा तद्विराचमनं स्मृतमिति॥

ब्रह्मपुराणे।

होमे भोजनकाले च सन्ध्ययोरुभयोरपि।
आचान्तः पुनराचामेदन्यत्र च सकृत्सकृत्॥

अङ्गिराः।

चाण्डालादीन् जपे होमे दृष्ट्वाचम्य विशुद्ध्यति।
खादीन् स्पृष्ट्वापि वाचामेत्कर्णं वा दक्षिणं स्पृशेत्॥

जानुनोरधस्तात्खादिस्पर्शे आचमनम्। अन्यत्र स्नानविधानात्। उदकाभावे असामर्थ्ये वा दक्षिणकर्णस्पर्शः।

अनेनैवाभिप्रायेण बृहस्पतिः ।

पित्तमन्त्रोच्चरे रौद्रे आत्मालम्भेऽधमेक्षणे ।
अधोवायुसमुत्सर्गे आक्रन्दे क्रोधसम्भवे ॥
मार्जारमूषिकस्पर्शे प्रहासेऽनृतभाषणे ।
निमित्तेष्वेषु सर्वेषु दक्षिणं श्रवणं स्पृशेत् ॥

तथा ।

आर्द्रं तृणं गोमयं वा भूमिं वा संस्पृशेद्द्विज इति ।

सांख्यायनः ।

च्युते निष्ठीवने चैव दन्तोच्छिष्टे तथानृते ।
पतितानाञ्च सम्भाषे दक्षिणं श्रवणं स्पृशेत् ॥
आदित्या वसवो रुद्रा वायुरग्निश्च धर्मराट् ।
विप्रस्य दक्षिणे कर्णे ह्येते तिष्ठन्ति सर्वदा ॥

आचारसागरे ।

अपो जग्ध्वौषधं जग्ध्वा कृत्वा ताम्बूलचर्वणम् ।
सौगन्धिकानि सर्वाणि नाचामेत विचक्षणः ॥

अपो जग्ध्वेति अमृतापिधानमसीत्यादिभिर्मन्त्रैरपो जग्ध्वा तन्निमित्तं नाचामेदित्यर्थः ।

बौधायनः ।

पादप्रक्षालनशेषेण नाचामेदारिणा द्विजः ।
शुद्धाभावेऽपि* वै किञ्चित्क्षिप्त्वा भूमौ जलं स्पृशेत् ॥

---

* शुद्धजलाभावे तज्जलं भूमौ क्षिप्त्वा तेन जलेन आचमनं कुर्यादित्यर्थः ।

आपस्तम्बः ।

सन्ध्यार्थं भोजनार्थं वा पित्रर्थं वा तथैव च ।
शूद्राहृतेन नाचामेज्जपेज्जाह्नवनेषु* च ॥

यमः ।

तावन्नोपस्पृशेद्विप्रो यावद्धामेन संस्पृशेत् ।
वामे हि हादशादित्या वरुणस्त्विदशेश्वरः ॥
उदके चोदकस्थस्तु स्थलस्थस्तु स्थले शुचिः ।
पादौ स्थाप्योभयत्रापि आचान्तोभयतः† शुचिः ॥

जले स्थले चैकैकं पादं कृत्वाचान्त उभयत्र जलकर्मणि स्थलकर्मणि च शुद्धो भवतीत्यर्थः ।

अकृत्वा पादयोः शौचं तिष्ठन्‡ मुक्तशिखोऽपि वा ।
विना यज्ञोपवीतेन आचान्तोऽप्यशुचिर्भवेत् ॥

तिष्ठन्निति स्थलविषयं विष्णुना तिष्ठतोऽपि जलेऽभ्यनुज्ञानात् ।

जान्वोरूर्ध्वं जले तिष्ठन्नाचान्तः शुचितामियात् ।
अधस्ताच्छृतकृत्वोऽपि समाचान्तो न शुद्धयति ॥

इति अधस्तान्निषेधाज्जानुदघ्नेऽप्यविरुद्धम् ।

तथाच स्मर्यते ।

जानुमात्रे जले तिष्ठन्निति ।

---

* जपयज्ञहोमेषु ।

† सन्धिरत्र आर्षः ।

‡ दण्ड्यमानः ।

§ जानुपरिमिते इत्यर्थः ।

अत्राचान्तः शुचिरिति वाक्यशेषः ।

तथा ।

सोपानत्को न चोष्णीषी पर्य्यङ्कासनयानगः ।
दुर्दैशे प्रपदंश्चैव नाचामन्* शुद्धिमाप्नुयात् ॥
नरगोवरयानाश्वहस्त्यधीरोहकस्तथा ।
आचान्तः कर्म्मशुद्धः स्यात्ताम्बूलौषधजग्धिकृत् ॥
भुक्तासनस्थोऽप्याचामेन्नान्यकाले कदाचन ।
न पादुकस्थो न त्वरितो न चायज्ञोपवीतवान् ॥

साङ्गायनः ।

दानमाचमनं होमं भोजनं देवतार्च्चनम् ।
प्रौढ़पादो न कुर्व्वीत स्वाध्यायं पितृतर्पणम् ॥
आसनारूढ़पादस्तु जानुनोर्वाथ जङ्घयोः ।
कृतावसक्थिकोऽ यश्च प्रौढ़पादः स उच्यते ॥
स्पृशन्ति विन्दवः पादौ य आचामयतः परान् ।
भौमिकैस्ते समा ज्ञेया न तैरप्रयतो भवेत् ॥

परेषामाचमनायोदकं दीयमाने ये विन्दवः पादयोः पतन्ति तैर्नाशुद्ध इत्यर्थः ।

इत्याचमनविधिः ।

---

* प्रपदन् गच्छन् न आचामन् न शुद्धिम् आप्नुयादित्यन्वयः ।

† छन्दसि दीर्घः ।

‡ पर्य्यङ्कबन्धवस्त्रः ।

अथ प्रातःस्नानम् ।

तत्र मार्कण्डेयपुराणे ।

अस्नातस्य क्रियाः सर्व्वा भवन्ति ह्यफला यतः ।
प्रातः समाचरेत्स्नानं तच्च नित्यमिति स्मृतम् ॥
प्रातःस्नानं मन्त्रवर्जं मध्याह्ने मान्त्रिको विधिः ।
नित्यं स्नात्वा शुचिः कुर्य्याद्देवर्षिपितृतर्पणम् ॥

योगीश्वरः ।

स्नानमब्दैवतैर्म्मन्त्रैर्मार्ज्जनं प्राणसंयमः ।
सूर्य्यस्य चाप्युपस्थानं गायत्र्याः प्रत्यहं जपः ॥

योगियाज्ञवल्क्यः ।

प्रातर्मध्याह्नयोः स्नानं वानप्रस्थगृहस्थयोः ।
यतेस्त्रिसवनं स्नानं सकृत्तु ब्रह्मचारिणः ॥

वानप्रस्थस्य कालद्वये स्नानं ब्रह्मचारिणश्च सकृत्स्नानमग्नि-विषयम् । अतएव

याज्ञवल्क्यः ।

दान्त*स्त्रिसवनस्नायी निवृत्तश्च प्रतिग्रहादिति ।

स्मृतिसंग्रहे ।

स्नायात्प्रातश्च मध्याह्ने ब्रह्मचारी तथा गृहीति ।

शङ्खः ।

प्रातःस्नानं प्रशंसन्ति दृष्टादृष्टकरं हि तत् ।

---

* दान्तः इन्द्रियदमनशीलः ।

सर्व्वमर्हति शुद्धात्मा प्रातःस्नायी जपादिकम् ॥

दृष्टं मलापनयनाद्दृक्शुद्धिः । अदृष्टं नित्यत्वेन पापक्षयः ।

अलक्ष्मीः कालकर्णी च दुःस्वप्नाद्दुर्विचिन्तितम्* ।

याम्यं हि पातनाद्दुःखं नित्यस्नायी न पश्यति† ॥

कालकर्णी दुःसहदुःखिता ।

नित्यस्नानेन पूयन्ते अपि पापकृतो नराः ॥

कात्यायनः ।

यथाहनि तथा प्रातर्नित्यं स्नायादनातुरः ।

दन्तान् प्रक्षाल्य नद्यादौ गेहे च तदमन्त्रवत् ॥

अमन्त्रवदिति प्रातःस्नाने न सर्व्वमन्त्रनिषेधः । अपि तु मन्त्रबहुत्वनिषेधः । यतः

स एवाह ।

अल्पत्वाद्धोमकालस्य बहुत्वात्स्नानकर्म्मणः ।

प्रातर्न तनुयात्स्नानं होमलोपो विगर्हितः इति ॥

दक्षः ।

अत्यन्तमलिनः कायो नवच्छिद्रसमन्वितः ।

स्रवत्येव दिवारात्रौ प्रातःस्नानं विशोधनम् ॥

वामनपुराणे ।

निषिच्य तीरङ्गुपिञ्जलानि

पूर्व्वोत्तरायाणि मृदं न्यसेच्च ।

---

* दुःस्वप्नमिति क्वचित्पाठः ।

† एतान्न पश्यति इत्यध्याहारेणान्वयः ।

प्रक्षाल्य पादौ च मुखञ्च कण्ठे
यज्ञोपवीतञ्च जलं पिवेत्त्रिः ॥

कण्ठे यज्ञोपवीतमासज्येत्यध्याहारः ।

एवं चैतदुक्तं भवति ।

उपवीतं निवीतं कृत्वा प्रक्षालयेदिति ।

त्रिर्जलं पिवेदाचामेदित्यर्थः ।

कराभ्यां धारयेद्भान् शिखाबन्धं विधाय च ।
प्राणायामांस्तथा कुर्य्यात्कालज्ञानं यथाविधि ॥

यथाविधि कालज्ञानं तिथिनक्षत्रादिज्ञानं कुर्य्यादित्यर्थः ।

मृत्तिकान्तु त्रिधा कृत्वा भागेनैकेन लेपयेत् ।
दक्षिणेनैव हस्तेन अष्टावेताननुक्रमात् ॥

अष्टौ वक्ष्यमाणाः । ललाटमंसहृदयं हृदयं पृष्ठमुदरं कुक्षि चेत्यष्टौ विज्ञेयाः ।

ललाटमंसौ हृत्पृष्ठमुदरञ्च सकुक्षिकम् ।
ततो वामक्रमेणैव नाभिवस्त्युरुजङ्घकम् ॥
दक्षिणादिक्रमेणैव चरणौ च त्रिभिस्त्रिभिः ।
मृदा तृतीयभागेन करौ च त्रिः स मार्ज्जयेत् ॥
इति तूष्णीं मृदा स्नानं कृत्वाचम्य जलं विशेत् ।
नाभिमात्रे जले गत्वा कृत्वा केशान्त्रिधा द्विजः ॥
निरुद्धकर्णौ नासाञ्च त्रिः कृत्वोन्मज्जनं ततः ।
हिराचम्याभिषेकञ्च कुर्य्यादष्टाक्षरेण तु ॥
आयं गौरिति सूक्तेन द्विज आवर्त्तयेदपः ।

जुम्बुकायेति मन्त्रेण विदध्यात्त्रयमर्षणम् ॥

जुम्बुकायेति नायं नियमः अपि तु भावदृत्तादिसूक्तानामुपलक्षणार्थम् ।

जपं द्वादशवारांस्तु महापापापनुत्तये ।
अघमर्षणक्रियया धूतपापः समाहितः ॥
ततो निमज्ज्य वारांस्त्रींस्ततस्तर्पणमारभेत् ।

तर्पणमिति स्नानाङ्गतर्पणम् ।

तथा तैत्तिरीयशाखायाम् ।

ओं भूर्देवांस्तर्पयामि भुवो देवांस्तर्पयामि स्वर्देवांस्तर्पयामि । भूर्भुवःस्वर्देवांस्तर्पयामि । एवं भूर्ऋषीं-स्तर्पयामि । एवं भूः पितॄंस्तर्पयामीत्यादि ।

अङ्गः ।

आब्रह्मस्तम्बपर्य्यन्तं जगत्तृप्यत्विति क्रमात् ।
जलाञ्जलित्रयं दद्यादेतत्तत्तर्पणमिति ॥

एवमेव माध्याह्निकस्नानमपि विशेषस्वाह्निके प्रदर्श्यते ।

अथ प्रातःसन्ध्या ।

तत्र व्यासः ।

प्रातःसन्ध्यां सनक्षत्रां मध्यमां स्नानकर्म्मणि ।
सादित्यां पश्चिमां सन्ध्यामुपासीत यथाविधि ॥

मध्यमां स्नानकर्म्मणीति माध्याह्निकस्नाने जातेत्यर्थः ।

सन्ध्याहीनोऽशुचिर्नित्यमनर्हः सर्व्वकर्म्मसु ।

स यद्यत्करुते कर्म्म न तस्य फलभाग्भवेत् ॥

संवर्त्तः ।

अथाचम्य कुशैर्युक्त आसने समुपस्थितः ।
करसंपुटकं कृत्वा सन्ध्यां नित्यं समारभेत् ॥
नत्वा तु पुण्डरीकाक्षमुपात्ताघप्रशान्तये ।
ब्रह्मवर्चसकामार्थं प्रातःसन्ध्यामुपास्महे ॥
इत्थं कृत्वा तु सङ्कल्पं कुशानादाय पाणिना ।
नद्यां नद्युत्थतोयेषु गृहे वामकरे स्थितैः ॥
त्रिभिर्व्याहृतिमन्त्रैस्तु प्रत्येकं मिलितैश्च तैः ।
गायत्र्या च ततः कुर्य्यादभिषेकन्तु तज्जलैः ॥
आर्षच्छन्दोदैवतञ्च विनियोगविधिं स्मरेत् ।
आवाहनञ्च गायत्र्याः प्राणायामं समभ्यसेत् ।
गायत्रीं त्र्यक्षरां बालां साक्षसूत्रकमण्डलुम् ॥

त्र्यक्षरां प्रणवात्मिकाम् ।

रक्तवस्त्रां चतुर्व्वक्त्रां हंसवाहनसंस्थिताम् ।
ब्रह्माणीं ब्रह्मदैवत्यां ब्रह्मलोकनिवासिनीम् ॥
आवाहयाम्यहं देवीं गायत्रीं सूर्य्यमण्डलात् ।
ओङ्कारस्य ब्रह्म ऋषिर्दैवोऽग्निस्तस्य कथ्यते ॥
गायत्री च भवेच्छन्दो नियोगः सर्व्वकर्म्मसु ।
त्रिमात्रस्तु प्रयोक्तव्य आरम्भे सर्व्वकर्म्मणाम् ॥
व्याहृतीनाञ्च सर्व्वासामार्षञ्चैव प्रजापतिः ।
गायत्र्युष्णिगनुष्टुब्बृहती त्रिष्टुबेव च ॥

पंक्तिश्च जगती चैव छन्दांस्येतानि सप्त वै ।
अग्निर्वायुस्तथा सूर्य्यो बृहस्पतिरपांपतिः ॥
इन्द्रश्च विश्वेदेवाश्च देवताः समुदाहृताः ।
प्राणस्यायमने चैव विनियोग उदाहृतः ॥
भूर्लोकं पादयोर्न्यस्य भुवर्लोकन्तु जानुनोः ।
स्वर्लोकं गुह्यदेशे तु नाभिदेशे महस्तथा ॥
जनलोकन्तु हृदये कण्ठदेशे तपस्तथा ।
भ्रुवोर्ललाटसन्धौ तु सत्यलोकं प्रतिष्ठितम् ॥
सविता देवता यस्या मुखमग्नित्रयात्मकम् ।
विश्वामित्र ऋषिश्छन्दो गायत्री सा विशिष्यते ।
जपहोमोपनयने विनियोगो विधीयते ॥

व्यासः ।

ओं भूर्विन्यस्य हृदये भुवः शिरसि विन्यसेत् ।
स्वरितीदं शिखायान्तु गायत्र्याः प्रथमं पदम् ॥
विन्यसेत्कवचेनैव द्वितीयं नेत्रयोर्न्यसेत् ।
तृतीयेनास्त्रविन्यास एष न्यासोऽथ नाशनः ॥
या सन्ध्या सा च गायत्री त्रिधा भूत्वा व्यवस्थिता ।
पूर्व्वा भवेत्तु गायत्री सावित्री मध्यमा स्मृता ॥
या भवेत्पश्चिमा सन्ध्या सा च देवी सरस्वती ।
आगच्छ वरदे देवि त्र्यक्षरे ब्रह्मवादिनि ।
गायत्रीच्छन्दसां मातर्ब्रह्मयोने नमोऽस्तु ते ॥

कात्यायनः ।

भूर्भुवः सुवरित्यापः* अभिमन्त्र्य परिक्षिपेत् ।
रक्षार्थमिति शेषः ।

अथ प्राणायामः ।

तत्र योगीश्वरः ।

सव्याहृतिकां सप्रणवां गायत्रीं शिरसा† सह ।
त्रिः पठेदायतप्राणः प्राणायामः स उच्यते ॥

गायत्रीशब्दनिरुक्तिमाह व्यासः ।

गायन्तं त्रायते यस्माद्गायत्री त्वं ततः स्मृतेति ।

मार्कण्डेयपुराणे ।

प्रथमं साधनं कुर्य्यात्प्राणायामस्य योगवित् ।
प्राणापाननिरोधस्तु प्राणायाम उदाहृतः ॥
लघुमध्योत्तरीयाख्यः प्राणायामस्त्रिधोदितः ।
तस्य प्रमाणं वक्ष्यामि तदर्कः‡ शृणुष्व मे ॥
लघु द्वादशमात्रस्तु द्विगुणः स तु मध्यमः ।
त्रिगुणाभिस्तु मात्राभिरुत्तरः स उदाहृतः ॥

विष्णुपुराणे ।

प्राणाख्यमनिलं वश्यमभ्यासात्कुरुते तु यः ।
प्राणायामः स विज्ञेयः सबीजोऽबीज एव वा ॥

---

* बहुपुस्तके आप इति पाठदर्शनाच्छन्दोऽनुरोधाच्च आप इति रचितं पर व्याकरणानुसारेण अप इति समीचीनः पाठः ।

† आपो ज्योतीरसोऽमृतमिति मन्त्रेण ।

‡ अर्क इति अर्कराजसम्बोधनम् ।

पूरकः पूरणं वायोः कुम्भकः स्थापनं क्वचित् ।
वहिर्निःसारणं तस्य रेचकः परिकीर्त्तितः ॥

सबीजो ध्यानजपसहितः सगुणोपास्तिः । अबीजो निर्गुणोपासनं तच्च परमहंसविषयम् ।

यथाह पराशरः ।

सालम्बा भगवन्मूर्त्तिः स्थूलं रूपं द्विजोत्तम ।
अनालम्बमनन्तस्य योगिनोऽभ्यासतः स्मृतम् ॥
दृढ़या कर्षयेद्वायुं वाह्यात् षोड़शमात्रया ।
धारयेत्पूरितं योगी चतुःषष्ट्या तु मात्रया ॥
सुषुम्ना मध्यमं सम्यग्द्वात्रिंशन्मात्रया शनैः ।
नाड्या पिङ्गलया चैनं रेचयेद्योगविग्रहात् ॥

व्यासः ।

अङ्गुष्ठेन पुटं ग्राह्यं नासाया दक्षिणं पुनः ।
कनिष्ठानामिकाभ्यान्तु वामं प्राणस्य संग्रहे ॥
अङ्गुष्ठतर्ज्जनीभ्यान्तु ऋग्वेदी सामगायनः ।
अङ्गुष्ठानामिकाभ्यान्तु ग्राह्यः सर्व्वैरथर्व्वभिः ॥

मनुः ।

प्राणायामा ब्राह्मणस्य त्रयोऽपि विधिवत्कृताः ।
व्याहृतिप्रणवैर्युक्ता विज्ञेयं परमं तपः ॥
प्राणायामत्रयं कार्य्यं सन्ध्यासु च तिसृष्वपि ।
प्राणस्यायमनं कृत्वा आचामेत्प्रयतोऽपि सन् ।
अन्तरं खिद्यते यस्मात्तस्मादाचमनं स्मृतम् ॥

अथ मार्ज्जनम् ।

योगियाज्ञवल्क्यः ।

आपोहिष्ठेति तिसृभिः ऋग्भिस्तु प्रयतः शुचिः ।
नवप्रणवयुक्ताभिर्जलं शिरसि निःक्षिपेत् ॥

प्रतिपादमादौ प्रणव उच्चार्य्यमाणे ऋक्त्रयेऽपि नव प्रणवा भवन्तीति नवप्रणवयुक्तत्वं भवति ।

ब्रह्माण्डपुराणे ।

नद्यां वाथ ह्रदे वाथ भाजने मृण्मयेऽथवा ।
औडुम्बरे च सौवर्णे राजते दारवे जलम् ।
कृत्वाथ वामहस्ते वा सन्ध्योपास्तिं समाचरेत्* ॥

एवञ्च वामहस्तोदकसन्ध्यानिषेधवचनानि पात्रान्तरस्थजलसाधकानि ।

द्वैपायनः ।

दत्त्वा चाभिमुखं तोयं मूर्द्ध्नि ब्रह्ममुखेन तु ।
आपो हिष्ठेति सूक्तेन दर्भैर्मार्ज्जनमाचरेत् ॥
यस्य क्षयायेति जलं सकुशं प्रक्षिपेत्त्रिधः ।

नारायणः ।

ऋगन्ते मार्ज्जनं कुर्य्यात्पादान्ते वा समाहितः ।
आपो हिष्ठेत्यृचं कार्य्यं मार्ज्जनञ्च कुशोदकैः ॥
प्रतिप्रणवयुक्तञ्च क्षिपेन्मूर्द्ध्नि पदे पदे ।

---

* समारभेदिति पाठान्तरम् ।

ऋचस्यान्तेऽथवा कुर्यादृषीणां मतमीदृशम् ॥

आपोहिष्ठेति सूक्तस्य सिन्धुद्वीप ऋषिः स्मृतः ।

आपो वै देवता च्छन्दो गायत्री मार्ज्जनं स्मृतम् ॥

मार्ज्जने तीर्थविशेषमाह हारीतः ।

मार्ज्जनार्चनबलिकर्म्मभोजनानि देवतीर्थेन कुर्यादिति।

एवं मार्ज्जनं कृत्वा सूर्य्यश्चेत्यपः पिबेत् ।

आह शौनकः ।

सायमग्निश्च मेत्युक्त्वा प्रातः सूर्य्येत्यपः पिबेत् ।

आपः पुनन्तु मध्याह्ने एतैश्चाचमनं चरेत् ॥

तत्र सूर्य्यश्च मा मन्युश्च इत्यस्य मन्त्रस्य प्रकृतिच्छन्दः अग्निर्ऋषिः मन्युमन्युपतिरात्रयो देवताः प्रातःसन्ध्याचमने विनियोगः । केचन नारायणार्षं त्रैष्टुभं छन्दश्च मन्यन्ते । अग्निश्च सूर्य्यश्चेति यजुर्व्वेदिकौ मन्त्रौ ।

बौधायनोऽपि ।

अथातः सन्ध्योपासनविधिं व्याख्यास्यामः । तीर्थं गत्वा प्रयतोऽभिषिक्तः प्रक्षालितपाणिपादः अप आचम्य अग्निश्च मामन्युश्चेति सायमपः पीत्वा सूर्य्यश्च मा मन्युश्चेति प्रातरपः पीत्वा सपवित्रेण पाणिना सुरभिमद्बल्लिङ्गाभिर्वारुणीभिर्हिरण्यवर्णाभिः पावमानीभिर्व्याहृतिभिरन्यैश्च पवित्रैरात्मानं प्रोक्ष्य प्रयता भवतीति। सुरभिमती दधिक्रावृमिति । अस्या वामदेव्य ऋषिरनुष्टुप् छन्दः दधिक्रावा देवता मार्ज्जने विनियोगः ।—अब्लिङ्गाभि-

रापोहिष्ठीयाभिः । हिरण्यवर्णाभिः, हिरण्यवर्णाः शुचय यासां राजा यासां देवा अग्निवेन मावचक्षुषा इति चतसृभि आसां त्रिष्टुप् छन्दः । अग्निर्ऋषिः आपो देवता मार्ज विनियोगः । केचनात्र ऋषिं कश्यपं मन्यन्ते। पावमानीं स्वादिष्टयेत्यादिभिः पावमानीनां बहुत्वादृषिच्छन्दोदेवतान भिन्नत्वादिस्तरभयान्नोक्ता । तत्स्वरूपं छन्दोगानान्तु सन्ध्या मने गौतमोक्तौ मन्त्रौ द्रष्टव्यौ । अहश्च मादित्यश्च पुनात्वि प्रातः रात्रिश्च मा वरुणश्च पुनात्विति सायमिति । प प्रजापतिदृष्टौ लिङ्गोक्तदैवतौ च ।

सन्ध्याचमनानन्तरं नारायणः ।

स्पृष्ट्वा चाभिप्लुतं तोयं मूर्ध्नि ब्रह्ममुखेन तु ।
आपोहिष्ठेति सूक्तेन दर्भैर्मार्ज्जनमाचरेत् ॥

स्पृष्ट्वा आचम्य ब्रह्ममुखं मनुनोक्तम् ।

ओङ्कारपूर्व्विकास्तिस्रो महाव्याहृतयोऽव्ययाः ।
त्रिपदा चैव गायत्री विज्ञेयं ब्रह्मणो मुखमिति ॥

सूक्तऋक्संख्यादिकमाह भृगुः ।

आपो हिष्ठानवस्तु सिन्धुद्वीप ऋषिः स्मृतः ।
अब्दैवत्यासु सप्तर्चेषु गायत्र्योद्वे त्वनुष्टुभाविति ॥

मार्ज्जनानन्तरं ब्रह्मा ।

जलपूर्णं तथा हस्तं नासिकाग्रे समर्पयेत् ।
ऋतञ्चेति पठित्वा तु तज्जलन्तु क्षितौ क्षिपेत् ॥

यमः ।

गृहीत्वा पाणिना वारि स्वशाखोक्तामृचं जपेत्।
विभृयान्नासिकाग्रे तु निरुध्य प्राणमारुतम्॥
य एवं द्रुपदां नित्यं त्रिरङ्गः प्रयतो जपेत्।
न च तिष्ठन्ति पापानि तस्य देहे द्विजन्मनः॥ इति।

ऋतञ्च सत्यञ्चेति सूक्तं वृाचमघमर्षणदृष्टम्। द्रुपदादिव मुमुचान इति द्रुपदाः। अस्याः कोकिलीराजपुत्र ऋषिः आपो देवता अनुष्टप् छन्दः। ततः सूर्य्यार्घ्यं निवेदयेत्।

व्यासः।

कराभ्यां तोयमादाय गायत्र्या चाभिमन्त्रितम्।
आदित्याभिमुखस्तिष्ठंस्त्रिरूर्द्धं सन्ध्ययोः क्षिपेत्।
मध्याह्ने तु सकृदेव क्षेपणीयं द्विजातिभिः॥

अर्घ्यदाने मन्त्रान्तरमाह नारायणः।

कराभ्यामञ्जलिं कृत्वा जलपूर्णं समाहितः।
उदुत्यमिति मन्त्रेण ततोयन्तु क्षिपेत्ततः॥

इति शाखानुसारेण व्यवस्था।

उदकक्षेपणे कारणमाह काश्यपः।

त्रिंशत्कोट्यो महावीर्य्या मद्देहा नाम राक्षसाः।
कृष्णातिदारुणा घोराः सूर्य्यमिच्छन्ति खादितुम्॥
ततो देवगणाः सर्व्वे ऋषयश्च तपोधनाः।
उपासते सदा सन्ध्यां प्रक्षिपन्त्युदकाञ्जलिम्॥
दह्यन्ते तेन ते दैत्या वज्रीभूतेन वारिणा।
एतस्मात्कारणाद्विप्राः सन्ध्या नित्यमुपासते॥

ततः प्रदक्षिणमावर्त्य जलं स्पृशेत् ।

तथाच भविष्यपुराणम् ।

सायं मन्त्रवदाचम्य प्रोक्ष्य सूर्य्यस्य चाञ्जलिम् ।

दत्वा प्रदक्षिणं कृत्वा जलं स्पृष्ट्वा विशुध्यति ॥

सायमित्युपलक्षणं सूर्य्यार्घ्यदानरूपनिमित्तस्य सर्व्वत्र विद्यमानत्वात् ।

श्रुतिरपि ।

यत्प्रदक्षिणं प्रक्रमन्ति तेन पाप्मानवधुन्वन्तीति* ।

अथ सूर्य्योपस्थानम् ।

तत्र काश्यपः ।

हस्ताभ्यां स्वस्तिकं† कृत्वा प्रातस्तिष्ठेद्दिवाकरम् ।

मध्याह्ने तु ऋजू बाह्वौ सायं मुकुलितौ करौ ॥

देवलः ।

मित्रस्य चर्षणी तिस्रो वसवस्त्वेति चोदये ।

इमं मेति‡ चतुष्केण सायं कुर्य्यादुपस्थितिम् ॥

व्यासः ।

सन्ध्यात्रयेऽप्येकमेव उपस्थानं प्रचक्षते ।

---

* पाप्मानमवधुन्वन्तीत्येवं भवितुमर्हति परन्तु बहुषु पुस्तकेषु दर्शनादैदिकत्वं पाप्मानवधुन्वन्तीति रचितम् ।

† अञ्जलिरूपम् ।

‡ इमं मे वरुण इत्यादिमन्त्रः ।

उद्वयं* उदुत्यं† चित्रं‡ तच्चक्षुर्§ शिष्टेदिवाकरम् ॥

एतच्चोपस्थानं प्रातर्जपानन्तरमेव कार्य्यम् ।

तदुक्तं कूर्म्मपुराणे ।

ओङ्कारव्याहृतियुतां गायत्रीं वेदमातरम् ।

कृत्वा जलाञ्जलिं दद्याद्भास्करं प्रति जन्मना¶ ॥

वेदमातरमुच्चार्य्येत्यध्याहारः । जन्मना द्विजन्मना ।

ध्यात्वार्कमण्डलगतां सावित्रीं वै जपेद्बुधः ।

अथोपतिष्ठेदादित्यमुद्यन्तं‖ तं समाहितः ॥ इति ।

अथ जपः ।

तत्र व्यासः ।

तेजोसीति च मन्त्रेण गायत्रीमावहेद्द्विजः ।

उपस्थाय तुरीयेण नमस्कृत्य जपेच्च ताम् ॥

योगियाज्ञवल्क्यः ।

ओङ्कारपूर्व्वमुच्चार्य्य भूर्भुवः स्वस्तथैव च ।

गायत्रीं प्रणवश्चान्ते जपोऽयमेष उदाहृतः ॥

---

* उद्वयं तमसः परिज्योतिरित्यादिमन्त्रः ।

† उदुत्यं जातवेदसमित्यादिमन्त्रः ।

‡ चित्रं देवानामित्यादिमन्त्रः ।

§ तच्चक्षुर्देवहितमित्यादिमन्त्रः ।

¶ इति आर्षम् ।

‖ उद्यन्तमिति क्वचित्पाठः ।

गायत्र्या विश्वामित्र ऋषिः सविता देवता गायत्रीच्छन्दः ज विनियोगः ।

ध्यायेच्च मनसा मन्त्रं जिह्वौष्ठौ न विचालयेत् ।
न कम्पयेच्छिरोग्रीवां दन्तान्नैव प्रकाशयेत् ॥
मध्यमादिदयं पर्व्व जपकाले तु वर्ज्जयेत् ।
एवं मेरुं विजानीयादृषितं ब्रह्मणा स्वयम् ॥
विश्वतश्चक्षुरिति मन्त्रेण जपान्ते भास्करं द्विजः ।
कुर्य्यात्प्रदक्षिणञ्चैव उपविश्यासने ततः ॥
देवागातुविदो मन्त्रात्कुर्य्याज्जपविसर्ज्जनम् ।
प्रातःसन्ध्याङ्गभूतेन गायत्र्या जपितेन च ।
यथासङ्ख्येन जप्येन ब्रह्मा मे प्रीयतां रविः ॥
उत्तरे शिखरे जाता भूम्यां पर्व्वतवासिनी ।
ब्राह्मणैः समनुज्ञाता गच्छ देवि यथासुखमिति ॥

अकृतसन्ध्यस्य सूर्य्योदये सति प्रायश्चित्तं स्मर्य्यते ।

आदित्योऽभ्युदियाद्यस्य सन्ध्योपास्तिमकुर्व्वतः ।
स्नात्वा प्राणांस्त्रिरायम्य गायत्र्यष्टशतं जपेत् ॥

प्राणायामत्रयं कृत्वेत्यर्थः ।

अथ मध्याह्नसन्ध्यायां सौकर्य्याय विशेषः कथ्यते ।

सङ्कल्पावाहनाचमनोपस्थानजपनिवेदनेषु ।

तद्यथा । यथोक्तफलप्राप्तये माध्याह्निकीं सन्ध्योपास्तिमहं करिष्ये । इति सङ्कल्पः ।

सावित्रीं युवतीं शुक्लां शुक्लवस्त्रां त्रिलोचनाम् ।
त्रिशूलहस्तां वृषभाधिरूढ़ां रुद्राणीं रुद्रदैवताम् ॥
यजुर्व्वेदकृतोल्लङ्गां जटामुकुटमण्डिताम् ।
कैलाशविहितावासामायान्तीं सूर्य्यमण्डलात् ।
वरदां व्याहरां साचाद्देवीमावाहयाम्यहम् ।

व्याहरां प्रणवाम्बिकाम् । इत्यावाहनम् ।

आपः पुनन्त्वित्याचमनमन्त्रः ।

अस्य नारायण ऋषिरापो देवता अनुष्टुप् छन्दस्त्वाचमने विनियोगः । एकाञ्जलिं प्रक्षिपेत् । ऊर्द्ध्वबाहुः सूर्य्यमुदीक्षमाणः उपतिष्ठेत् । उपस्थानमन्त्रशेषः स्मृत्यन्तरे प्रदर्शितः ।

गायत्र्या च यथाशक्त्या उपस्थाय दिवाकरम् ।
विभाड़ित्यनुवाक्येन सूक्तेन पुरुषस्य च ॥
शिवसङ्कल्पेन तथा मण्डलब्राह्मणेन च ।
पवित्रैर्विविधैश्चान्यैर्गुह्योपनिषदैस्तथा ।
जपयज्ञो हि कर्त्तव्यः सर्व्ववेदप्रणीतकैः ॥

इति स्वस्वशाखाभिप्रायमुपस्थानं स्वकैर्मन्त्रैरादित्यस्य तु कारयेदिति वशिष्ठस्मरणात् ।

मध्याह्नसन्ध्याङ्गत्वेन गायत्र्या जपितेन च ।
यथासंख्येन जप्येन रुद्रो मे प्रीयतामिति ॥

अथ क्रमप्राप्तसायंसन्ध्याविशेषः ।

सङ्कल्पावाहनाचमनोपस्थानजपनिवेदनेषु ।

उपात्तदुरितक्षयार्थं ब्रह्मप्राप्त्यै सायंसन्ध्योपासनमहं करिष्ये ।

दृष्टां सरस्वतीं कृष्णां पीतवस्त्रां चतुर्भुजाम् ।
शङ्खचक्रगदापद्महस्तां गरुडवाहनाम् ॥
वदर्याश्रमवासान्तामायान्तीं सूर्यमण्डलात् ।
सामवेदकृतोत्सङ्गां वनमालाविभूषिताम् ।
वैष्णवीं त्र्यक्षरीं शान्तां देवीमावाहयाम्यहम् ॥

अग्निश्च मेति नारायण ऋषिः अग्निर्देवता अनुष्टुप् छन्द आचमने विनियोगः । इमं मे वरुण श्रुधीति चतसृभि उपस्थानम् । अवशिष्टोपस्थानं प्रातर्वत् ।

सायंसन्ध्याङ्गभूतेन गायत्र्या जपितेन च ।
यथासंख्येन जप्येन विष्णुर्मे प्रीयतामिति ॥
नोदकस्थो जपेत्प्राज्ञो गायत्रीं वेदमातरम् ।
अग्निचयमुखी* यस्मात्तस्मादुत्थाय तां जपेत् ॥

उत्थायेति न सायंसन्ध्याविषयम् ।

जपन्नासीत सावित्रीं प्रत्यगातारकोदयात् ।

इति याज्ञवल्क्यस्मरणात् । मध्याह्ने तु योगियाज्ञवल्क्योक्तो विशेषः ।

तिष्ठंश्चेद्दीक्षमाणोऽर्कं जपं कुर्यात्समाहितः ।

अन्यथा प्राङ्मुखः कुर्यादिति ।

---

* गायत्र्यग्निमुखीति पाठान्तरम् ।

अथ जपसंख्याविधिः ।

तत्र मनुः ।

ब्रह्मचारी गृहस्थश्च शतमष्टोत्तरं जपेत् ।
वानप्रस्थो यतिश्चैव सहस्राधिकं जपेत् ॥

योगियाज्ञवल्क्यः ।

पूर्वां सन्ध्यां जपंस्तिष्ठेत्सावित्रीमर्कदर्शनात् ।
पश्चिमान्तु समासीनः सम्यग्ऋक्षविभावनात् ॥
यत्किराक्षसभूतानि सिद्धविद्याधरोरगाः ।
हरन्ति प्रसभं यस्मात्तस्माद्गुप्तं सुकारयेत् ॥
न चङ्क्रमन्न च हसन्न पार्श्वमवलोकयन् ।
उपाश्रितो न कुड्यादीन्न नग्नः प्रयतो नरः ॥
नावाश्रितो* न जल्पंश्च न प्रावृतशिराः†स्तथा ।
न पदा पदमाक्रम्य न चैव हि तथा करौ ।
न चासमाहितमना न च संत्यावयञ्जपेत् ॥

बृहस्पतिः ।

मनःसंहरणं शौचं मौनं मन्त्रार्थचिन्तनम् ।
अव्यग्रत्वमनिर्वेदः‡ जपसम्पत्तिहेतवः ॥
न क्लिन्नवासाः स्थलगो जपादीनाचरेद्बुधः ।
जपकाले न भाषेत स्नानहोमादिकेषु च ॥

---

* अवाश्रितः जलमध्यस्थितः शुक्लवासा इति भेदः ।

† आच्छादितशिराः ।

‡ विवेकशून्यः ।

तूष्णीमासीत च जपंश्चाण्डालपतितादिकान्।
दृष्ट्वा तान्नद्युपस्पृश्याभाष्य स्नात्वा विशुध्यति॥
विधियज्ञा*ज्जपयज्ञो विशिष्टो दशभिर्गुणैः।
उपांशुः स्याच्छतगुणः साहस्रो मानसः स्मृतः॥
विना शब्दं जपो यस्तु चलज्जिह्वाहिजच्छदः†।
उपांशुं तं जपं प्राहुर्मनसा मानसं बुधाः॥

वशिष्ठः।

मानसः शान्तिको जप्य उपांशुः पौष्टिकः स्मृतः।
सशब्दस्त्वभिचाराय त्रिविधो जप उच्यते॥
गृहे तु प्राकृती सङ्ख्या गोष्ठे दशगुणा भवेत्।
नदीषु शतसाहस्रा अनन्ता शिवसन्निधौ॥

प्राकृती यथावस्थिता नाधिकफलेति यावत्।

शातातपः।

अनृतं मद्यगन्धश्च दिवामैथुनमेव च।
पुनाति हृषलस्यान्नं सन्ध्या बहिरुपासिता॥

ब्रह्मपुराणे।

अङ्गुष्ठेन जपन्मोक्षं तर्जन्यामाभिचारिकम्।
मध्यमा धनसम्पत्तिः शान्तिः पुष्टिरनामिका॥

स्कन्दपुराणे।

सौवर्णं राजतं ताम्रं स्फाटिकं रत्नजं तथा।

---

* पशुहिंसात्मकः पशुयागादिः।

† ओष्ठः।

अरिष्टं* पुत्रजीवञ्च† शङ्खं पद्मं तथा मणिम् ।
कुशग्रन्थिञ्च रुद्राक्षमुत्तमं चोत्तरोत्तरम् ॥

ब्रह्मपुराणे ।

अक्षुण्णा समरन्ध्रा च परिपूर्णा दृढ़ा नवा ।
निखिला ग्रथिताव्यङ्गा अन्योऽन्यं दृष्टिवर्जिता ॥
सशब्दा चञ्चला या तु त्रुटिता ग्रथिता तु या ।
भिन्नसूत्रेण ग्रथिता पाषण्डस्य पुरातनी ॥

पाषण्डस्य पाषण्डसम्बन्धिनीत्यर्थः ।

माला दुःखप्रदायिन्यो ग्रथिता निन्द्यतन्तुभिः ।
अष्टोत्तरशती कार्य्या चतुःपञ्चाशिकाथवा ।
सप्तविंशतिका कार्य्या ततो नैवाधमाहिता ॥

उमासंवादे ।

उच्छिष्टो वा विकर्म्मस्थः संलिप्तः सर्व्वपातकैः ।
नासौ लिप्यति पापेन रुद्राक्षस्य तु धारणात् ॥
लक्षन्तु स्पर्शने पुण्यं कोटिर्भवति चालनात् ।
दशकोटिसहस्राणि धारणाल्लभ्यते फलम् ॥
लक्षकोटिसहस्रस्य लक्षकोटिशतस्य च ।
जपे तु लभ्यते पुण्यं नात्र कार्य्या विचारणा ॥

योगियाज्ञवल्क्यः ।

अभावे त्वक्षमालायाः कुशग्रन्थ्या च पाणिना ।

---

* निम्बफलम् ।

† जीयापुतीतिख्यातम् ।

जप एव हि कर्त्तव्य एकाग्रमनसा सदा ॥

पाणिरेखाभिः परिगणनाप्रकारमाह

स एव ।

अनामिकामध्यरेखामादिं कृत्वा क्रमेण तु ।
तर्ज्जन्यादिगतान्ते च अक्षमाला करे स्थिता ॥

अस्यार्थः ।

अनामिकामध्यरेखामादिं कृत्वा तदधःक्रमेण प्रदक्षिणावर्त्तं तर्ज्जन्यादिरेखा अन्ते कर्त्तव्या इयं करस्थिता अक्षमाला भवतीति ।

मध्यमादिहयं पर्व्व जपकाले तु वर्ज्जयेत् ।
एतन्मेरुं विजानीयादृषितं ब्रह्मणा स्वयम् ॥
तर्ज्जन्या न स्पृशेत्सूत्रं न कम्पेन्न विधूनयेत् ।
अङ्गुष्ठस्य तु मध्यस्थं परिवर्त्तं समाचरेत् ॥
नार्द्रवासाः* जपं कुर्य्याद्धोमं दानं प्रतिग्रहम् ।
सर्व्वं तद्राक्षसं ज्ञेयं बहिर्जानु च यत्कृतम् ॥
अङ्गुष्ठाग्रेण यज्जप्तं यज्जप्तं मेरुलङ्घितम् ।
असंख्यातं तु यज्जप्तं तत्सर्व्वं निष्फलं भवेत् ॥

यमः ।

जातके मृतके वापि सन्ध्याकर्म्म न सन्त्यजेत् ।

---

* स्यादसिन्न इत्यर्थः ।

मनसोच्चारयेन्मन्त्रान् प्राणायामं विवर्जयेत् ॥

योगीश्वरः ।

सन्ध्यां स्नानं त्यजन्विप्रः सप्ताहाच्छूद्रतां व्रजेत् ।
तस्मात्सन्ध्यां स्नानञ्च सूतकेऽपि न सन्त्यजेत् ॥
शिवविष्णुर्च्चनं दीक्षा यस्य चाग्निपरिग्रहः ।
श्रौतकर्म्माणि कुर्व्वीत स्नातः शुद्धिमवाप्नुयात् ॥
सहस्रकृत्वस्तु बहिर्जपन्नैतत्त्रिकं द्विजः ।
महतोऽप्येनसो मासात्त्वचेवाहिर्विमुच्यते ॥
योऽधीते चान्वहं चेतां त्रीणि वर्षाणि मानवः ।
स ब्रह्मपद*मभ्येति वायुभूतः खमूर्त्तिमान् ॥
एतदक्षरमेताञ्च जपन् व्याहृतिपूर्व्विकाम् ।
सन्ध्ययोरुभयोर्विप्रो वेदपुण्येन युज्यते ॥
सप्तावर्त्तात्पुनात्येषा दशभिः प्राप्नुयाद्दिवम् ।
विंशाहत्या तु सा देवी नयते ईश्वरालयम् ॥
अष्टोत्तरशतं जप्त्वा तारयेज्जन्मसागरात् ।
सर्व्वेषाञ्चैव पापानां सङ्करे समुपस्थिते ॥
दशसाहस्रिकोऽभ्यासो गायत्र्याः शोधनं परम्† ।

---

* स ब्रह्म परमर्थेति इति पाठान्तरम् ।

† अस्य पूर्व्वश्लोकार्द्धेनान्वयः तथाच पापानां सङ्करे समुपस्थिते नानाविधपापे जाते गायत्र्याः दशसाहस्रिकः अभ्यासः जपरूपः परं शोधनं तत्तत्पापनाशकः ।

वायुभक्षो दिनं तिष्ठेद्राचिं नीत्वा तु सूर्यटक् ॥*
जप्त्वा सहस्रं गायत्र्याः शुचिर्ब्रह्मवधाट्टते ।
न गायत्र्या समो मन्त्रो न जपो वैदिकात्परः ॥
वासुदेवात्परो देवो नेति व्यासः समब्रवीत् ।

अथोपाकर्म ।

तत्र याज्ञवल्क्यः ।

अध्यायानामुपाकर्म श्रावण्यां श्रवणेन वा ।
हस्तेनौषधिभावे वा पञ्चम्यां श्रावणस्य तु ॥

अधीयन्त इत्यध्याया वेदाः । तेषां संस्कारकं कर्मोपाख्यं तत् श्रावण्यां श्रावणस्य पौर्णमास्यां कार्यं चन्द्रमसायुक्तं श्रवण नक्षत्रं यस्यां सा श्रावणी । श्रवणेन वा श्रवणेन युक्तेऽहनि व हस्तेन युक्तायां पञ्चम्यां वा उपाकर्म कार्यम्। अन्येन तु हस्तेः युक्तेऽहनि वा पञ्चम्यां वेति व्याचक्ष्यते । अथवा श्रवणशब्दा सप्तम्यर्थे एनप्रत्ययः । एवं हस्तादपि श्रवणे नक्षत्रे हस्ते नक्षत्रं इत्यर्थः । ओषधिभावः ओषधीनां व्रीहिप्रभृतीनां प्रादुर्भाव अङ्कुरोदय इति यावत् एतच्च विशेषणं श्रावणस्येति च सर्वत्र सम्बध्यते । यदा त्वौषधिप्रादुर्भावाभावो ग्रहसंक्रान्त्यादिदोषो

---

* कल्पान्तरं दर्शयति वायुभक्ष इत्यादि तथाच ब्रह्मवधाट्टते महतः पातकाद्विन तु चार्वे सूर्यटक् सूर्यं वीक्षमाणः वायुभक्षः सन्दिनं रात्रिञ्च नीत्वा सहस्रं गायत्रीं जप्त्वा सर्वेभ्यः पापेभ्यः शुचिः तिष्ठेन्मुक्तो भवेदित्यर्थः ।

† ब्रह्मवधादिदोषः ।

वा स्यात्तदा भाद्रपदपौर्णमास्यादिषु कार्यम्।

तथाच मनुः।

श्रावण्यां प्रौष्ठपद्यां वाप्युपाकृत्य यथाविधि।
युक्तश्छन्दांस्यधीयीत मासादिप्रोऽर्द्धपञ्चमात्॥

अर्द्धः पञ्चमो मासो येषां ते तादृशः। उपाकर्म्मप्रभृति अर्द्धसहितांश्चतुरो मासान्। शुक्लकृष्णपक्षे तु स्वाध्यायदिने स्वाध्यायमधीयीतेत्यर्थः। एतच्च ग्रहणाध्ययनं गृहस्थस्यापि भवति।

यथाह शौनकः।

समावृत्तौ ब्रह्मचारिकल्पेन यथान्यायमितरे जायोपेयीत्येक इति। इतरे ब्रह्मचारिणः* जायोपेयी† गृहस्थः अपिशब्दाद्भाद्रपदश्रवणहस्तपञ्चमीनामुपसंग्रहः।

तथा वह्वृचगृह्यपरिशिष्टकारिका।

अवृष्ट्यौषधयस्तस्मिन्मासेन तु भवन्ति चेत्।
तदा भाद्रपदे मासि श्रवणेन तदिष्यते॥

गोभिलः।

प्रौष्ठपदीं हस्तेनोपाकरणम्।

प्रौष्ठपदीं प्राप्य इत्यर्थः।

शौनकः।

तद्वार्षिकमित्येतदाचक्षत इति।

---

* नैष्ठिकरूपाः।

† जायाया उपेयौ उपगतः।

वर्षाकाले भवं वार्षिकम्।

बौधायनः।

श्रावण्यां पौर्णमास्यामाषाढ्यां वोपाकृत्य च्छन्दांस्यधीयीतेति।

निगमः।

श्रावण्यां श्रावणीकर्म्म यथाविधि समाचरेत्।
उपाकर्म्म तु कर्त्तव्यं कर्कटस्थे दिवाकरे॥
हस्तेन शुक्लपञ्चम्यां श्रावण्यां श्रवणेन चेति।

अत्र स्वस्वगृह्यानुसारेण व्यवस्थेति साधारणनिर्णयः। तत्रार्ऋच्छाखिनां* श्रवणे अपि। यजुःशाखिनां पौर्णमास्याम् तत्रापि तैत्तिरीयाणामौदयिके† पर्व्वणि इतरेषान्तु पूर्व्वविं पर्व्वणि सामगानान्तु हस्ते। अयञ्च निर्णयः श्रवणादि प्राधान्यनिर्देशाल्लभ्यते। असति ग्रहसंक्रान्त्यादिरूपप्रतिबन्धे श्रावणे मास्येव। तत्र प्रतिबन्धे प्रौष्ठपद्यामुभयत्रापि प्रतिबन्धसद्भावे यदि स्वशाखायां शृङ्गग्राहिकतया‡ न निषेधस्तदा सर्व्वशाखाधिकरणन्यायेन कर्म्मण एकत्वात् बौधायनोक्तत्वेन पारक्य§मविरोधवदिति वचनाच्चाषाढ्यां पौर्णमास्यां यजुःशाखिनां भवति। बह्वृचानां सामगानां चाषाढ़-

---

* ऋग्वेदिनाम्।

† उदयप्राप्ततिथिखण्डे।

‡ प्रातिस्विकतया।

§ परशाखोक्तम्।

मासश्रवणहस्तनक्षत्रयोर्न भवति। कस्मिंश्चिदपि ऋच्छाखा-विशेषे* सामशाखाविशेषे वा आषाढ़मासे विध्यदर्श-नात् शिष्टपरम्परायामश्रुतत्वाच्च कालद्वावप्युपाकर्मोत्कर्षो भवति।

यदाह कात्यायनः।

उत्कर्षः कालद्वौ स्यादुपाकर्मादिकर्मणि।
अभिषेकादिद्वयीनां न तूत्कर्षो युगादिषु॥

यत्तु ऋष्यशृङ्गवचनम्।

दशहरासु नोत्कर्षश्चतुर्ष्वपि युगादिषु।

उपाकर्मणि चेति तच्छन्दोगविषयम्। यतः कालद्वावपि तेषां सिंहार्क एवोपाकर्म।

तथाच गार्ग्यः।

सिंहे रवौ च पुष्यर्क्षे पूर्व्वाह्णे विचरेद्बहिः।
छन्दोगा मिलिताः कुर्य्युरुत्सर्गं स्वच्छन्दसाम्†॥
शुक्लपक्षे तु हस्तेन उपाकर्मापराह्णिकमिति।

सिंहे रवावुपाकर्म पुष्यर्क्षे उत्सर्जनमित्यन्वयः।

अत्रेति कर्त्तव्यतामाह कार्ष्णाजिनिः।

उपाकर्मणि चोत्सर्गे यथाकालं समेत्य च।
ऋषीन्दर्भमयान् कृत्वा पूजयेत्तर्पयेत्ततः॥

---

* ऋग्वेदिविशेषे।

† स्वकर्मणामिति पाठान्तरम्।

हृष्टमनेताः ।

भवेदुपाकृतिः पौर्णमास्यां पूर्वाह्ण एव तु ।
ब्राह्मणान् भोजयेत्तत्र पितॄनुद्दिश्य देवताः ॥

बौधायनः ।

गौतमादीनृषीन् मन्त्रैः कृत्वा दर्भमयान्पुनः ।
पूजयित्वा यथान्यायं पूजयेदृचमग्रतः ॥

गौतमादीनिति स्वस्वगार्ग्यादिप्रदर्शनार्थं पूजयेदृचमिति ऋचमृग्वेदं पूजयेत् . तथा उच्चरेत् पठेत् । एतच्च वेदान्तराणामपि प्रदर्शनार्थम् ।

भविष्योत्तरपुराणे ।

अप्राप्ते श्रावणस्यान्ते पौर्णमास्यां दिनोदये ।
स्नानं कुर्वीत मतिमान् श्रुतिस्मृतिविधानतः ॥
ततो देवान् पितॄंश्चैव तर्पयेत्परमात्मना ।
उपाकर्म दिवेत्येवमृषीणां चैव तर्पणम् ॥
कुर्वीत ब्राह्मणः श्राद्धं वेदानुद्दिश्य शक्तितः ।

अप्राप्ते श्रावणस्यान्ते इति शुक्लप्रतिपदादिमामाभिप्रायेण । संप्राप्ते श्रावणस्यान्ते इत्यपि पाठः तदा कृष्णप्रतिपदादिमामाभिप्रायः । दिनोदय इति प्रादेशिकपर्व्वाभिप्रायम् । एतच्च तैत्तिरीयाणामेव ।

तथाच बह्वृचपरिशिष्टकारिका ।

मासश्रवणहस्तनक्षत्रत्रयोर्न भवति। कस्मिंश्चिदपि ऋच्छाखा-विशेषे* सामशाखाविशेषे वा आषाढ़मासे विध्यदर्श-नात् शिष्टपरम्परायामश्रुतत्वाच्च कालद्वयावप्युपाकर्म्मोत्सर्गौ भवति।

यदाह कात्यायनः।

उत्सर्गः कालद्वयी स्यादुपाकर्म्मादिकर्म्मणि।
अभिषेकादिवृद्धीनां न तूत्सर्गो युगादिषु॥

यत्तु ऋष्यशृङ्गवचनम्।

दशहरासु नोत्सर्गश्चतुर्ष्वपि युगादिषु।

उपाकर्म्मणि चेति तच्छन्दोगविषयम्। यतः कालद्वयेऽपि तेषां सिंहार्क एवोपाकर्म्म।

तथाच गार्ग्यः।

सिंहे रवौ च पुष्यर्क्षे पूर्व्वाह्णे विचरेद्बहिः।
छन्दोगा मिलिताः कुर्य्युरुत्सर्गं स्वस्वच्छन्दसाम्†॥
शुक्लपक्षे तु हस्तेन उपाकर्म्मापराह्णिकमिति।

सिंहे रवावुपाकर्म्म पुष्यर्क्षे उत्सर्ज्जनमित्यन्वयः।

अत्रेति कर्त्तव्यतामाह कार्ष्णाजिनिः।

उपाकर्म्मणि चोत्सर्गे यथाकालं समेत्य च।
ऋषीन्दर्भमयान् कृत्वा पूजयेत्तर्पयेत्ततः॥

---

* ऋग्वेदिविशेषे।

† स्वस्वकर्म्मणामिति पाठान्तरम्।

हृष्टमनाः ।

भवेदुपाकृतिः पौर्णमास्यां पूर्व्वाह्ण एव तु ।
ब्राह्मणान् भोजयेत्तत्र पितॄनुद्दिश्य देवताः ॥

बौधायनः ।

गौतमादीनृषीन् सप्त कृत्वा दर्भमयान्पुनः ।
पूजयित्वा यथाशक्ति पूजयेदृचमुच्चरेत् ॥

गौतमादीनिति स्वस्वशाखोक्तर्षिप्रदर्शनार्थं पूजयेदृचमिति ऋचमृग्वेदं पूजयेत् । तथा उच्चरेत् पठेत् । एतच्च वेदान्तराणामपि प्रदर्शनार्थम् ।

भविष्योत्तरपुराणे ।

अप्राप्ते श्रावणस्यान्ते पौर्णमास्यां दिनोदये ।
स्नानं कुर्व्वीत मतिमान् श्रुतिस्मृतिविधानतः ॥
ततो देवान् पितॄंश्चैव तर्पयेत्परमाभसा ।
उपाकर्म्म दिवैवोक्तमृषीणाञ्चैव तर्पणम् ॥
कुर्व्वीत ब्राह्मणः श्राद्धं वेदानुद्दिश्य शक्तितः ।

अप्राप्ते श्रावणस्यान्त इति शुक्लप्रतिपदादिमासाभिप्रायेण* । संप्राप्ते श्रावणस्यान्त इत्यपि पाठः तदा कृष्णप्रतिपदादिमासाभिप्रायः† । दिनोदय इति औदयिकपर्व्वाभिप्रायम् । एतच्च तैत्तिरीयाणामेव ।

तथाच बह्वृचपरिशिष्टकारिका ।

---

* तथाच श्रावणस्यान्ते अप्राप्ते अर्थात् पौर्णमास्यन्तमासो न भवतीत्यर्थः ।

† श्रावणस्यान्ते सम्प्राप्ते अर्थात्पौर्णमास्यन्तमासो भवति ।

पर्वण्यौदयिके कुर्य्युः श्रावणां तैत्तिरीयकाः ।
बह्वृचः श्रावणे कुर्य्युर्ग्रहसंक्रान्तिवर्जिते ॥ इति ।
तैत्तिरीयव्यतिरिक्तैर्यजुःशाखीयैः पूर्वविद्धैव पौर्णमासी ग्राह्या ।
श्रावणी दौर्गनवमी दूर्वा चैव हुताशनी ।
पूर्वविद्धा तु कर्त्तव्या शिवरात्रिर्बलेर्दिनमितिस्मरणात् ।
नन्वेतदनुपपन्नम् । औदयिके पर्वणि तैत्तिरीयका एव कुर्य्युरिति वक्तुमशक्यत्वात् । तथाहि औदयिकत्वविशेषणविशिष्टे पर्वणि यदुपाकर्म्म तदनुवादेन हि तैत्तिरीयकाः कर्त्तारो विधीयन्ते तथाच वाक्यभेदप्रसङ्गः । किञ्च औदयिकत्वस्याप्राप्तत्वादनुवादोऽपि न घटते । नापि तैत्तिरीयकरूपकर्त्तृविधिः न हि कर्म्मणि कर्त्तृविधानमपि तु कर्त्तुर्हि कर्म्म विधीयते । किञ्च बह्वृचगृह्य एवोपाकर्म्मणस्तत्कालस्य पौर्णमास्याश्च विधानादत्र कारिकायामङ्गस्य पौर्णमासीकालस्य औदयिकत्वसम्बन्धो विधेयः । तथाङ्गरूपकर्त्तृणां तैत्तिरीयकाणामौदयिकत्वेनापरः सम्बन्धो विधेयः सम्बन्धद्वयस्याप्राप्तत्वात् । तथाच दुष्परिहरणीयो वाक्यभेदः प्राप्ते कर्म्मण्यनेकगुणविधानात् । नचारुणैकहायनीन्यायेन पार्श्विकान्वयः* । कर्म्मणः प्राप्तत्वाद्द्रव्यगुणरूपत्वाभावाच्च । तत्र ह्यारुण्यं गुणो द्रव्यरूपगोद्वारा सोमक्रयणाय उपयुज्यते । अत्र तु

---

* अरुणया एकहायन्या यथा सोमं क्रीणाति पदे क्रीणाति । इति श्रुतिरस्ति अत्र पार्श्वस्थत्वात्पदे इत्यस्य यथा गोपद इति लक्ष्यते इति न्यायः ।

तैत्तिरीयकरूपकर्त्तरि औदयिकत्वं चेत्युभयं परस्परनिरपेक्षाङ्गम्। न च निरपेक्षयोर्गुणयोर्मिथः सम्बन्धः* गुणानाञ्च परार्थत्वादसम्बन्धः समत्वात्स्यादिति सूत्रकारवचनात्। कर्त्तुश्च शेषत्वमुपदिष्टं† गुरुणा।

अधिकारो हि यज्ञेषु कर्त्तुः शेषस्य‡ चिन्त्यत इति। तस्मात्तैत्तिरीयकपदं हविरुभयत्ववदुपलक्षकम्। ततएवानुवादः। तथाचौदयिकत्वमात्रं विधेयमिति। तैत्तिरीयकव्यतिरिक्तानामपि यजुःशाखिनामौदयिक एव पर्व्वण्युपाकर्म्म प्राप्तम्। श्रावणी दौर्गनवमीत्यस्य तु हिरण्यगर्भपरिचारोपणविषयः§। उपाकर्म्माङ्गभूतमाभ्युदयिकं श्रावणीकर्म्म चेति। एवं प्राप्तेऽभिधीयते। न तावद्विशिष्टानुवादे वाक्यभेदः। उद्देश्यविशेषणविवक्षायामेव वाक्यभेदो न तु विशिष्टोद्देशेनेति भवदेवेनोक्तत्वात्। यदुक्तमौदयिकत्वस्याप्राप्तत्वादनुवादो न घटत इति तदयुक्तम्। वाक्यान्तरेणो-

---

* परस्परावच्छेद्यावच्छेदकरूपेणान्वयः।

† प्राधान्येनान्वयित्वमुपदिष्टम्।

‡ नियोज्यतया अन्वयिनः।

§ हिरण्यगर्भस्य ब्रह्मणः पूजायां पूर्व्वविद्धा श्रावणी ग्राह्या इत्यर्थः तथाच धनदश्च रमा गौरी गणेशः सोमराड्गुहः। भास्करश्चण्डिकाम्बास्य वासुकी च तथर्षयः चक्रपाणिर्ब्रह्मनङ्गश्च शिवो ब्रह्मा तथैव च। प्रतिपत्प्रभृतिष्वेताः पूज्यास्तिथिषु देवताः। यथोक्ताः शुक्लपक्षे तु तिथयः श्रावणस्य चेति।

दयिकपर्व्वप्राप्तेः ।

तथाच भविष्योत्तरे ।

संप्राप्ते श्रावणस्यान्ते पौर्णमास्यां दिनोदय इति ।

वाक्यशेषस्तु पूर्व्वमेव दर्शितः ।

तथा कालिकापुराणे ।

चतुर्दश्यां समुत्पन्नावसुरौ मधुकैटभौ ।
वेदान् स्वीकुर्व्वतः पद्मयोनेस्तौ जह्रतुः श्रुतीः ॥
हत्वा तावसुरौ देवः पातालतलवासिनौ ।
आहृत्य ताः श्रुतीस्तस्मै ददौ लोकगुरुः स्वयम् ॥
स प्राप्तवान् श्रुतीर्ब्रह्मा पर्व्वण्यौदयिके पुनः ।
अतो भूतयुते* तस्मिन्नौपाकरणमिष्यते ॥
असुखं वर्ज्जयेत्कालं वेदाहरणशङ्कया । इति ।

तस्मात् ।

पर्वण्यौदयिके कुर्य्युः श्रावणीं तैत्तिरीयकाः ॥

इत्यत्र तैत्तिरीयककर्त्तृत्वमात्रं विधीयत इति न वाक्यभेदः । प्राप्ते कर्म्मणि गुणद्वयविध्यभावात् । न हि कर्म्मणि कर्त्तुर्विधानमिति चेत् । न अप्राप्तांशे विधिः । अत्र कर्त्तृविशेषस्याप्राप्तत्वादुपपद्यते अपित्वनुपादेयपञ्चकमध्यस्थत्वात् कर्म्म विधीयते कर्त्तुर्देशेन विधेः पर्य्यवसानं न तु कर्त्तृविशेषएव

---

* भूतयुते चतुर्दशीयुते तस्मिन् पर्व्वणि औपाकरणं न इष्यते इत्यर्थः ।

अथवा विशिष्टविधिरेव कारिकायाम्। ननु गङ्गे उपाकर्म्मादीनां विहितत्वेन प्राप्तत्वात्कथं विशिष्टविधिः, उच्यते ग्रन्थकर्त्तृभेदेन विशिष्टविध्याश्रयणं न च कारिकाकारेणोपाकर्म्मादि विहितम्। अन्यथा सर्वस्मृत्युच्छेदापत्तेः। न च सर्वशाखाधिकरणन्यायेन* कर्म्मणः प्रधानस्यैकत्वाद्विशिष्टविधौ गौरवप्रसक्तेश्च तैत्तिरीयकपदे लक्षणाश्रयणमुचितम्। तथा सति तैत्तिरीयकपदस्य वैयर्थ्यापत्तेः। तथाहि पर्वण्यौदयिके श्रावणीं कुर्य्युरित्येतावता सर्वेषां प्राप्तत्वात्तैत्तिरीयकपदं व्यर्थमेव किञ्च विशिष्टविधौ गौरवभयाल्लक्षणास्वीकारे अनवस्था प्रसज्येत।

यदुक्तम्।

नाङ्गानां मिथः सम्बन्ध इति।

तदप्यनुपपन्नं कर्त्तृविशेषस्य कालाकाङ्क्षायामौदयिकत्वरूपकालसम्बन्धोपपत्तेः, न चायं नियमः, द्रव्यगुणयोरेव सम्बन्ध इति। अद्रव्यगुणयोरप्याकाङ्क्षावशात्सम्बन्धोपपत्तेः। पूर्वोक्तदोषाणां बह्वृचपदेऽपि समानत्वात्तदपि विवक्षितमेव। तस्मात्तैत्तिरीयका औदयिके पर्वणि तैत्तिरीयकव्यतिरिक्तयजुःशाखीयानां पूर्वविद्धैव पौर्णमासी बह्वृचानान्तु श्रवण एवेति सिद्धम्। तच्च श्रवणनक्षत्रमुत्तराषाढ़ाविद्धं न ग्राह्यम्।

---

* सर्वशाखिप्रत्ययमेकं कर्म्म इति न्यायेन कर्म्म न गौरवाद्यक्तम्।

तथाच व्यासः ।

श्रवणेन तु यत्कर्म उत्तराषाढ़संयुतम् ।
संवत्सरकृतोऽध्यायस्तत्क्षणादेव नश्यति ॥
धनिष्ठासंयुतं कुर्य्याच्छ्रावणं कर्म यद्भवेत् ।
तत्कर्म सफलं विद्यादुपाकर्मेति संज्ञितमिति ॥

तैत्तिरीयशाखिनां बह्वृचानां सामगानां चौदयिक एव स्वोक्तः कालो भवति ।

तथाच परिशिष्टम् ।

धनिष्ठाप्रतिपद्युक्तं त्वाष्ट्रऋक्षसमन्वितम्* ।
श्रावणे कर्म कुर्व्वीरन्नृग्यजुःसामपाठकाः ॥

धनिष्ठायुक्तं श्रवणनक्षत्रं प्रतिपद्युक्तं पूर्व्वचित्रायुक्तं हस्तनक्षत्रं वेधश्च षड्घटिकात्मको ज्ञेयः ।

वेधः षड्घटिको ज्ञेय इति स्मरणात् ।

एतच्चोपाकर्म ग्रहणादिरहिते कार्य्यम् ।

तथाच स्मृत्यन्तरे ।

उपाकर्म प्रकुर्व्वन्ति क्रमात्सामर्ग्यजुर्विदः ।
ग्रहसंक्रान्त्ययुक्तेषु हस्तश्रवणपर्व्वसु ॥

तथा ।

संक्रान्तौ ग्रहणे चैव सूतके मृतकेऽथवा ।

---

* त्वाष्ट्रऋक्षसमन्वितमिति छन्दोऽनुरोधादार्षसन्धिः ।

गणस्नानं* न कुर्वीत नारदस्य वचो यथा ॥
अथ चेद्दोषसंयुक्ते पर्व्वणि स्यादुपाक्रिया ।
दुःखशोकामयग्रस्ता राष्ट्रे तस्मिन्द्विजातयः ॥

तथा ।

यदि स्याच्छ्रवणं पर्व्व ग्रहसंक्रान्तिदूषितम् ।
स्यादुपाकरणं शुक्लपञ्चम्यां श्रावणस्य तु ॥

शुक्लपञ्चमीति वाजसनेयाभिप्रायम्† ।

तथाच स्मृतिमहार्णवे ।

संक्रान्तिर्ग्रहणं वापि पौर्णमास्यां यदा भवेत् ।
उपाकृतिस्तु पञ्चम्यां कार्य्या वाजसनेयिभिरिति ॥

तथा ।

संक्रान्तिर्ग्रहणं वापि यदि पर्व्वणि जायते ।

---

* गणानां वेदच्छन्दोब्रह्मादिदिवौकसादीनां सन्निधाने सति यत्स्नानं तद्गणस्नानं उपाकर्म्मादिनिमित्तस्नानमित्यर्थः ।

तथाच च्छन्दोगपरिशिष्टम् ।

वेदाश्छन्दांसि सर्व्वाणि ब्रह्माद्याश्च दिवौकसः ।
जलार्द्रिनोऽपि पितरोमरीच्याद्यास्तर्पयेयुः ॥
उपाकर्म्मणि चोत्सर्गे स्नानार्थं ब्रह्मवादिनः ।
धियासूनृतमुच्छन्ति संहृष्टाश्चशरीरिणः ॥
समवायश्च यत्रैषां तत्रान्ये बहवोजलाः ।
न्यूनं सर्व्वे चयं यान्ति किमुतैकं नदीरजः ॥

† यजुर्व्वेदमभिप्रायम् ।

तन्मासे हस्तयुक्तायां पञ्चम्यां वा तदिष्यते ॥

हस्तयुक्तायामन्यस्यां तिथौ पञ्चम्यां वेति विकल्पः। न तु पर्व्वणि ग्रहणे चतुर्दश्यां श्रवणे नोपाकर्म्म कार्य्यं वेधदोषसम्भवात्।

तथाच स्मर्य्यते।

त्रयोदश्यादितो वर्ज्यं दिनानां नवकं* ध्रुवम्।
माङ्गल्येषु समस्तेषु ग्रहणे चन्द्रसूर्य्ययोः ॥

तथा।

द्वादश्यादितृतीयान्तो वेध इन्दुग्रहे स्मृतः।
एकादश्यादिकः सौरे चतुर्थ्यन्तः प्रकीर्त्तितः ॥
खण्डे ग्रहे तयोः प्रोक्तमुभयत्र दिनद्वयमिति।

दिनद्वयं पूर्व्वोत्तरम्।

उत्तरम्।

नित्यनैमित्तिके जप्ये होमयज्ञक्रियासु च।
उपाकर्म्मणि चोत्सर्गे ग्रहवेधो न विद्यते ॥

इति न दोषः। गुरुशुक्रास्तमयादिष्वपि उपाकर्म्म केचन नेच्छन्ति। तेषामयमभिप्रायः। विद्यारम्भो गुरुशुक्रमौढ्यादिषु† निषिद्धः। उपाकर्म्म च वेदारम्भरूपः। ततश्च प्रथमो-

---

* अत्र पञ्चम्यां उपाकर्म्मविधानात् वचनान्तरे एकादश्यादिचतुर्थ्यन्तवेधविधानाच्च त्रयोदश्यादिः व्यवहितादिरेकादशी तामारभ्य दिनानां नवकं वर्ज्यमित्यर्थः।

† गुरुशुक्रास्तमयादिषु।

पाकर्म्मणि गुरुशुक्रास्तमयप्राप्तावुपाकर्म्म न कर्त्तव्यम्। अन्यत्र न दोष इति।

अथोत्सर्ज्जनम्।

तत्र याज्ञवल्क्यः।

पौषमासस्य रोहिण्यामष्टकायामथापि वा।
जलान्ते च्छन्दसां कुर्य्यादुत्सर्गं विधिवद्बहिः॥

रोहिणीयुक्तायामन्यस्यां तिथौ रोहिणीयुक्तायामष्टकायां कृष्णाष्टम्यां वा। बहिः ग्रामाद्बहिः। जलसन्निधौ। अत्र च्छन्दसामुत्सर्ज्जनं न सर्व्वात्मना*।

अतएव मनुः।

अतःपरन्तु च्छन्दांसि शुक्लेषु नियतः पठेत्।
वेदाङ्गानि रहस्यञ्च कृष्णपक्षेषु संपठेत्॥

तथा।

पुष्येषु च्छन्दसां कुर्य्याद्बहिरुत्सर्ज्जनं द्विजः।
माघशुक्लस्य वा प्राप्ते पूर्व्वाह्णे प्रथमेऽहनि॥

श्रावणे यदोपाकर्म्म तदा पुष्ये उत्सर्ज्जनम्। यदा भाद्रपदे तदा माघे शुक्लप्रतिपदि।

हारीतः।

अर्द्धपञ्चमान्मासानधीत्योर्द्धमुत्सृजति पञ्चार्द्धषष्ठान् वेति।

---

* सर्व्वांशेन।

अर्द्धषष्ठान् पञ्चमासान् वेत्यर्थः। अयञ्च पक्ष आषाढ़स्य पौर्णमास्यामुपाकर्म्माभिप्रायः।

अथ वेदव्रतानि।

एतान्यप्युदगयने आपूर्य्यमाणपक्षे प्राजापत्याग्नेयवैश्वदेवसौम्याख्यानि कुर्य्यात्। प्राजापत्यादिस्वरूपप्रदर्शनमुपलक्षणार्थम्। अतः स्वस्वशाखाविहितव्रतानि कर्त्तव्यानि।

अत्र कालविशेषमाह गार्ग्यः।

वेदव्रतानामुदगयनादिककाल इति।

आदिशब्दादापूर्य्यमाणपक्षाद्युपसंग्रहः।

यदाह स एव।

पर्व्वण्युदगयनआपूर्य्यमाणपक्षस्य चोदगयन इति।

दक्षः।

स्वीकरोति यदा वेदांश्चरेद्वेदव्रतानि च।
ब्रह्मचारी भवेत्तावद्यूनं स्नातो भवेद्गृही॥

गौतमोऽपि।

गर्भाधान-पुंसवन-सीमन्तोन्नयन-जातकर्म्म-नामकरण-निष्क्रमणान्नप्राशन-चूड़ोपनयनं चत्वारि वेदव्रतानीति।

ब्रह्मचर्य्यव्रतकालविधिमाह देवलः।

अतः परमष्टचत्वारिंशद्वार्षिकीं वेदव्रतचर्य्यामातिष्ठेदशक्नुयेत् षट्त्रिंशद्वार्षिकीं चतुर्विंशतिर्द्वादश वा प्रतिवेदमिति।

मनुः।

षट्त्रिंशदाब्दिकं कार्य्यं गुरौ त्रैवेदिकं व्रतम्।
तदर्द्धिकं पादिकं वा ग्रहणान्तिकमेव च॥ इति।

अस्यार्थः, त्रिवेदा एव त्रैवेद्यम्। वेदत्रयविषयं ब्रह्मचर्य्यं षट्त्रिंशदाब्दिकं कार्य्यं प्रतिवेदं द्वादश वर्षाणि ब्रह्मचर्य्यं चरेदित्यर्थः। अर्द्धिके षड्वर्षाणि पादिके तु त्रीणीति। एवमुपनीतं तत्कार्य्योपयुक्तव्रतधारिणं माणवकमध्यापयेत्।

याज्ञवल्क्यः।

उपनीय गुरुः शिष्यं महाव्याहृतिपूर्व्वकम्।
वेदमध्यापयेदेनमिति।

तत्र यदा ऋग्वेदमारभते तदा खगृह्योक्तविधिनाग्निं प्रतिष्ठाप्य पृथिव्यै स्वाहा अग्नये स्वाहा इति आज्याहुतीर्हुत्वा ब्रह्मणे च्छन्दोभ्य इत्याद्या नवाहुतीर्हुत्वा शेषं समापयेत्। यदि यजुर्वेदं तदान्तरीक्षाय स्वाहा वायवे स्वाहा। यदा सामवेदं तदा दिवे स्वाहा सूर्य्याय स्वाहेति। यदाथर्व्ववेदं तदा दिग्भ्यः स्वाहा चन्द्रमसे स्वाहेति विशेषः। यद्येकदैव सर्व्ववेदारम्भः तदाज्यभागानन्तरं प्रतिवेदं पूर्वोक्तप्रधानाहुतिद्वयं हुत्वा प्रजापतये स्वाहा देवेभ्यः ऋषिभ्यः श्रद्धायै मेधायै सदसस्पतये अनुमतये स्वाहेति सम्मूज्याहुतीर्जुहुयात्। अनन्तरं महाव्याहृतिस्विष्टिकृतं द्वादशाहुतीर्हुत्वा शेषं समाप्य यथाविधि वेदमध्यापयेत्। तत्रापि माणवककुलपरम्परया तं वेदमध्यापयेत्। तस्यैवाध्येतव्यत्वनियमात्।

वशिष्ठः ।

पारम्पर्य्यागतो येषां वेदः सपरिबृंहणः ।
तच्छाखं कर्म कुर्वीत तच्छाखाध्ययने तथेति ॥

स्वशाखाध्ययनानन्तरं शाखान्तराध्ययनमपि भवति ।

तथाच वशिष्ठः ।

अधीत्य शाखामात्मीयामन्यां शाखां ततः पठेत् । इति

आरम्भश्च शुभदिनादौ कार्य्यः ।

तथा ज्योतिःशास्त्रम् ।

विद्यारम्भः प्रशस्तो भवति मधुरिपौ प्राप्तबोधे* सुधांशौ
शस्ते तीक्ष्णद्युतौ† च त्रिदशपतिगुरावुद्गते चापि शुक्रे‡।
अप्राप्ते सिंहराशौ दशशतकिरणे§ चापि दैत्यारिपूज्ये¶
स्वाध्याये भानुशुक्रत्रिदशगुरुदिने लग्नसंस्थे च जीवे ॥
षष्ठीं प्रतिपदञ्चैव वर्ज्जयित्वा तथाष्टमीम् ।
रिक्तां पञ्चदशीञ्चैव सौरभौमदिनं तथा ॥
विद्यारम्भः सुरगुरुसितज्ञेष्वभीष्टार्थदायी
कर्त्तुश्चायुश्चिरमपि करोत्यंशुमान्‖ मध्यमोऽत्र ।

---

* हरिशयाने ।

† रविशुद्धौ चेत्यर्थः ।

‡ बृहस्पतौ शुक्रे च उदिते सति ।

§ सूर्य्ये ।

¶ बृहस्पतौ च सिंहराशिगते इत्यर्थः ।

‖ अंशुमांश्च चन्द्रः सूर्य्यश्च ग्राह्यः अग्निसङ्गलयोर्निषेधात् ।

नीहारांशौ भवति जड़ता पद्मता भूमिपुत्रे
छायासूनावपि च मुनयः कीर्त्तयन्त्येवमाद्याः ॥
मृगादिपञ्चस्वपि भेषु मूले
हस्तादिके च त्रितयेऽश्विनीषु ।
पूर्व्वात्रयेषु श्रवणे च तत्त्व-
विद्यासमारम्भमुशन्ति सिद्धौ ॥

अथाध्ययनविध्यादयः ।

याज्ञवल्क्यः ।

गुरुञ्चैवाप्युपासीत स्वाध्यायार्थं समाहितः ।

मनुः ।

अधीयमानः स्वाचान्तो यथाशास्त्रमुदङ्मुखः ।
प्राञ्जलिश्च कृतोऽध्याप्यो लघुवासा जितेन्द्रियः ॥
ब्रह्मारम्भेऽवसाने च पादौ ग्राह्यौ गुरोः सदा ।
व्यत्यस्तपाणिना कार्य्यमुपसंग्रहणं गुरोः ॥
सव्येन सव्यः स्प्रष्टव्यो दक्षिणेन तु दक्षिणः ।
ब्रह्मणः* प्रणवं कुर्य्यादादावन्ते च सर्व्वदा ॥
अवत्य†नोङ्कृतं पूर्व्वं परस्ताच्च विशीर्य्यते‡ ।

---

* ब्रह्मणोवेदस्य आदौ पाठारम्भे अन्ते पाठसमाप्तौ प्रणवं कुर्य्यादुच्चरेत् ।

† अवति अर्थादभ्यस्तो न भवति ।

‡ अरण्योग्यो न भवति ।

प्राञ्जलिः पर्य्युपासीत पवित्रैश्चैव पावितः ॥
प्राणायामैस्त्रिभिः पूतस्तत ओङ्कारमर्हति ।

मनुः ।

अध्येष्यमाणश्च गुरुर्नित्यकालमतन्द्रितः ।
अधीष्व भो इति ब्रूयाद्विरामोऽस्त्विति चारमेत्† ॥
नोदितो‡ गुरुणा नित्यमप्रणोदित एव वा§ ।
कुर्य्यादध्ययने योग¶माचार्य्यस्य हितेषु च ॥

दक्षः ।

द्वितीये तु तथा भागे‖ वेदाभ्यासो विधीयते ।
वेदस्वीकरणं** पूर्व्वं विचारोऽभ्यसनं जपः ॥
तद्दानं चैव शिष्येभ्यो वेदाभ्यासो हि पञ्चधा ।

मनुः ।

नित्यमुद्यतपाणिः स्यात्स्वाध्यायार्थं समाहितः ।
आस्यता††मिति चोक्तः‡‡ सदासीताभिमुखं गुरोः॥

---

* कुशादिभिः ।

† विरमेत् ।

‡ प्रेरितः ।

§ चोदितो गुरुणा नित्यमप्रचोदित एव वा इति पाठान्तरम् ।

¶ यजमिति पाठान्तरम् ।

‖ यामे ।

** अध्ययनम् ।

†† उपविश्यताम् ।

‡‡ गुरुणेति शेषः ।

हीनान्नवस्त्रवेशः स्यात्सर्व्वदा गुरुसन्निधौ।

गुर्व्वपेक्षया हीनान्नवस्त्रवेशत्वम्।

उत्तिष्ठेत्प्रथमं चास्य चरमं* चैव संविशेत्†।

याज्ञवल्क्यश्चिक्षा।

हस्तौ तु संयतौ धार्य्यौ जानुभ्यामुपरि स्थितौ।
गुरोरनुकृतिं कुर्व्वन् पठन्नान्यमतिर्भवेत्॥
शरीरञ्चैव वाचञ्च बुद्धीन्द्रियमनांसि च।
नियम्य प्राञ्जलिस्तिष्ठेदीक्षमाणो गुरोर्मुखम्॥

पाणिनीयशिक्षायाम्।

हस्तेन‡ वेदं योऽधीते स्वरवर्णार्थसंयुतम्।
ऋग्यजुःसामभिः पूतो ब्रह्मलोके महीयते॥
हस्तहीनन्तु योऽधीते स्वरवर्णविवर्जितम्।
ऋग्यजुःसामनिर्दग्धो वियोनिं§मभिगच्छति॥

पराशरः।

ज्ञातव्यः सर्व्वदैवार्थो वेदानां कर्म्मसिद्धये।
पाठमात्रन्तमधीती¶ च पङ्के गौरिव सीदति॥

---

* गुरोः शयनानन्तरम्।

† शय्यायामिति शेषः।

‡ हस्तचालनेन।

§ विरुद्धयोनिं नीचयोनिमित्यर्थः।

¶ अर्थज्ञानं विनेत्यर्थः।

व्यासः ।

वेदस्याध्ययनं सर्व्वं धर्म्मशास्त्रस्य चैव हि ।
अजानतोऽर्थं तद्वच्च तुषाणां खण्डनं* यथा ॥

मनुः ।

योऽनधीत्य द्विजो वेदानन्यत्र कुरुते श्रमम् ।
स जीवन्नेव शूद्रत्वमाशु गच्छति सान्वयः ॥

यमः ।

य इमां पृथिवीं सर्व्वां सर्व्वरत्नोपशोभिताम् ।
दद्याच्छास्त्रज्ञ शिष्येभ्यस्तच्च तच्च समं ॥

मनुः ।

ब्रह्म योऽभ्यननुज्ञातः† अधीयानादवाप्नुयात्‡ ।
स ब्रह्मस्तेयसंयुक्तो नरकं प्रतिपद्यते ॥
गुरोरनुमतिं कृत्वा वेदाध्ययनमारभेत् ।
अध्यापयेत्ततः शिष्यान्मायशीलान्§ गुणान्वितान् ॥

याज्ञवल्क्यः ।

कृतज्ञाद्रोहिमेधाविशुचिकल्याणसूचकाः ।
अध्याप्या धर्म्मतः साधुशक्तात्मज्ञानवित्तदाः ॥

---

* खण्डनमिति पाठान्तरम् ।

† गुरोरनुमतिं विना ।

‡ भूयात् ।

§ बहुषु पुस्तकेषु दर्शनात् शिष्यान् मायशीलान् इति पाठो रचितः परन्तु शिष्यान्मायशीलान् इति पाठो युक्तः आयशीलान् आयव्ययविज्ञानिति तस्यार्थः ।

एते अध्याया इति ग्रहणादेतद्व्यतिरिक्तानां निषेधः ।

तथाच मनुः ।

धर्म्मार्थौ यत्र न स्यातां शुश्रूषा चापि तद्विधा ।
तत्र विद्या न वक्तव्या उप्तं बीजमिवोषरे ॥
विद्ययैव समं कामं मर्त्तव्यं ब्रह्मवादिना ।
आपद्यपि हि कष्टायां नत्वेनामिरिणे* वपेत् ।
विद्या ब्राह्मणमित्याह सेवधिं†स्तेऽस्मि रक्ष माम् ।
असूयकाय मां मादास्तथा स्यां वीर्य्यवत्तमा ॥

निधिर्नौ सेवधिरित्यमरः । असूया गुणाविष्कारेण दोषाविष्करणशीलः ।

यमेव तु शुचिं विद्यान्नियतं ब्रह्मचारिणम् ।
तस्मैमां ब्रूहि विप्राय निधिपायाप्रमादिने ॥
न निन्दाताड़ने कुर्य्यात्पुत्रं शिष्यञ्च ताड़येत् ।
अधोभागे शरीरस्य नोत्तमाङ्गे न वत्सरि ।
अतोऽन्यथा तु प्रहरन्न्याययुक्तो भवेन्नरः ॥

न्याययुक्तो दण्ड्यः ।

सर्व्वधर्म्ममयं ब्रह्म प्रदानेभ्योऽधिकं यतः ‡ ।
तद्दत्त्वमवाप्नोति ब्रह्मलोकमविच्युतम् ॥

---

* मूर्खाय ।

† निधिस्वरूपः ।

‡ प्रधानदानेभ्यः ।

अथानध्यायाः ।

तत्र उशना ।

अयने विषुवे चैव शयने बोधने तथा ।
अनध्यायं प्रकुर्व्वीत मन्वादिषु युगादिषु ॥

याज्ञवल्क्यः ।

चाहं प्रेतेष्वनध्यायः शिष्यादिगुरुबन्धुषु ।
उपाकर्म्मणि चोत्सर्गे स्वशाखार्थोत्थिये मृते ॥
पञ्चदश्यां चतुर्दश्यामष्टम्यां राहुसूतके ।
ऋतुसन्धिषु भुक्त्वा च आद्धिकं प्रतिगृह्य च ॥
सन्ध्यागर्জ্জितनिर्घातभूकम्पोल्कानिपातने ।
समाप्य वेदं दुर्निशमारण्यकमधीत्य च ॥
पशुमण्डूकनकुलश्वाहिमार्জ্জारमूषिकैः ।
कृतेऽन्तरे त्वहोरात्रं शक्रपाते तथोच्छ्रये ॥

अत्र विशेषस्तु शिष्टाचारादवगन्तव्यः ।

खरोष्ट्रगर्दभोलूकसामवाणार्त्तनिस्वनैः* ।
अमेध्यशवशूद्रान्त्यश्मशानपतितान्तिके ॥
देशेऽशुचावात्मनि च विद्युत्स्तनितसंप्लवे ।

---

* शिष्यर्त्विग्गुरुबन्धुष्विति पाठान्तरम् ।

† खरनिस्वनोष्ट्रनिस्वनगर्दभनिस्वनोलूकनिस्वनसामनिस्वनबाणनिस्वनार्त्तनिस्वनेषु इत्यर्थः ।

भुक्त्वार्द्रपाणिरम्भोऽन्तः*रर्द्धरात्रेऽतिमारुते ।
पांशुवर्षे दिशान्दाहे सन्ध्यानीहारभीतिषु ।
धावतः पूतिगन्धे च शिष्टे च गृहमागते ।
खरोष्ट्रयानहस्त्यश्वनौवृक्षगिरिरोहणे† ॥
सप्तविंशदनध्याया न तांस्तात्कालिकान्विदुः ।

ब्रह्माण्डपुराणे ।

रात्रौ यामद्वयाद्वर्ष्मण्यदि पश्येत्त्रयोदशीम् ।
प्रदोषः स तु विज्ञेयः सर्व्वस्वाध्यायवर्ज्जितः ॥
षष्ठी च द्वादशी चैव अर्द्धरात्रोननाड़िका ।
प्रदोषे न त्वधीयीत तृतीया नवनाड़िका ॥
अष्टमी हन्त्युपाध्यायं शिष्यं हन्ति चतुर्दशी ।
अमावास्योभयं हन्ति प्रतिपद्गुरुनाशिनी ॥
अष्टकास्तु समाख्याताः सप्तम्यादिदिनत्रयम् ।
शास्त्रं तत्र नाधीयीत व्रतबन्धं विवर्ज्जयेत् ॥

मनुः ।

वेदोपकरणे‡ चैव स्वाध्याये चैव नित्यके ।
नानुरोधस्त्वनध्याये होममन्त्रेषु चैव हि ॥

---

* जलमध्ये ।

† रणरोहणे इति पाठान्तरम् ।

‡ वेदाङ्गशास्त्रे ।

अथ गुरुकुले वासचर्य्या ।

तत्र मनुः ।

शरीरं चैव वाचञ्च बुद्धीन्द्रियमनांसि च ।
नियम्य प्राञ्जलिस्तिष्ठेदीक्षमाणो गुरोर्मुखम् ॥
प्रतिश्रवणसंभाषे* शयानो न समाचरेत् ।
नासीनो न च भुञ्जानो न तिष्ठन्न पराङ्मुखः ।

कथं कुर्य्यादित्यत आह ।

आसीनस्य स्थितः कुर्य्यादभिगच्छंस्तु तिष्ठतः ।
प्रत्युद्गम्याथ व्रजतः पश्याद्धावंस्तु धावतः ॥
पराङ्मुखस्याभिमुखो दूरस्थस्येत्य चान्तिकम् ।
प्रणम्य तु शयानस्य निर्दैशे चैव तिष्ठतः ॥

अभिगच्छन् संमुखं गच्छन्, प्रत्युद्गमनं पश्याद्गमनम् । दूरस्थस्येति । अत्र तु माङ्स्थेति पररूपत्वाद्डाभावः । प्रणम्येति निर्दैशे तिष्ठत इत्यनेन सम्बध्यते, निर्दैशे स्वस्थानान्निम्नदेशे गर्त्तादौ, निर्दैशे निकटदेशे इत्यपरे ।

नीचं शय्यासनं चास्य नित्यं स्याद्गुरुसन्निधौ ।
गुरोश्च चक्षुर्विषये न यथेष्टासनो भवेत्† ॥
नोदाहरेदस्य नाम परोक्षेणापि केवलम् ।
न चैवास्यानुकुर्व्वीत गतिभाषितचेष्टितम् ॥

---

* गुरोः प्रत्युत्तरप्रदाने ।

† उच्चासनस्थादिको न भवेत् ।

गुरोर्यत्र परीवादो निन्दा वापि प्रवर्त्तते ।
कर्णौ तत्र पिधातव्यौ गन्तव्यं वा ततोऽन्यतः ॥
परीवादात्खरो भवति श्वा वै भवति निन्दकः ।
परिभोक्ता कृमिर्भवति कीटो भवति मत्सरी ॥

अननुज्ञातगुरुधनोपभोक्ता परिभोक्ता ।

दूरस्थो नार्चयेदेनं न क्रुद्धो नान्तिके स्थितः ।
यानासनस्थश्चैवैनमवरुह्याभिवादयेत् ॥
प्रतिवातेऽनुवाते च नासीत गुरुणा सह ।
असंभवे* चैव गुरोर्न किञ्चिदपि कीर्त्तयेत् ॥

गुरुदेशाच्छिष्यदेशं प्रत्यभिमुखो वातः प्रतिवातः तत्र नासीत तद्दोषाग्निनिर्गमसम्भवात् । शिष्यदेशाद्गुरुदेशं प्रत्यनुगतो वातः अनुवातः । तत्रापि नासीत उदीरितशब्दाश्रवणात् । असम्भवे अननुज्ञायाम् ।

गोऽश्वोष्ट्रयानप्रासादप्रस्तरेषु कटेषु च ।
आसीत गुरुणा सार्द्धं शिलाफलकनौषु च ॥
गुरोर्गुरौ सन्निहिते गुरुवद्वृत्तिमाचरेत् ।
न चानिसृष्टो गुरुणा स्वान् गुरूनभिवादयेत् ॥

गुरोराचार्यस्य समीपे गुरावुपाध्यायादौ सन्निहिते सति गुरुतुल्यं वृत्तिमाचरेत् । गुरुणाचार्येण नानुज्ञातः स्वान् गुरूनुपाध्यायादीन्नाभिवादयेत् ।

---

* असंभवे इति कल्पतरौ पाठः ।

अध्यापयन् गुरुसुतो गुरुवन्मानमर्हति ।
उत्सादनन्तु* गात्राणां स्नापनोच्छिष्टभोजने ।
न कुर्य्याद्गुरुपुत्रस्य पादयोश्चावनेजनम् ॥
गुरुवत्प्रतिपूज्याः स्युः सवर्णा गुरुयोषितः ।
असवर्णास्तु सम्पूज्याः प्रत्युत्थानाभिवादनैः ॥
अभ्यञ्जनं स्नापनञ्च गात्रोत्सादनमेव च ।
गुरुपत्न्या न कार्य्याणि केशानाञ्च प्रसाधनम् ॥
गुरुपत्नी तु युवती नाभिवाद्येह पादयोः ।
पूर्णविंशतिवर्षेण गुणदोषौ विजानता ॥
यथा खनन् खनित्रेण नरो वार्य्यधिगच्छति ।
तथा गुरुगतां विद्यां शुश्रूषुरधिगच्छति ॥
अब्राह्मणाद्ध्ययनमापत्काले विधीयते ।
अनुव्रज्या च शुश्रूषा यावदध्ययनं गुरोः ॥

ब्रह्मचारी द्विविधः उपकुर्व्वाणको नैष्ठिकश्च, तत्रोक्ता आद्यधर्म्माः† ।

अथ द्वितीयधर्म्माः प्रस्तूयन्ते ।

तत्र याज्ञवल्क्यः ।

नैष्ठिको ब्रह्मचारी च वसेदाचार्य्यसन्निधौ ।
तदभावेऽस्य तनये पत्न्यां वैश्वानरेऽपि वा ॥

---

* मर्द्दनम् ।

† उपकुर्व्वाणस्य धर्म्माः ।

उपकुर्व्वाण उक्तविधिना आत्मानं निष्ठां मृत्यान्तकालं गमयतीति नैष्ठिक उच्यते। स आचार्य्यसन्निधौ वसेन्न समावर्त्तयेत्। तदभाव इति सर्व्वत्रानुषज्यते। ततश्च पत्न्यभावे गुरुसपिण्डे वसेत्। तदभावे स्वाग्निशुश्रूषा कर्त्तव्या।

तथाच मनुः।

आचार्य्ये तु खलु प्रेते गुरुपुत्रे गुणान्विते।
गुरुदारे सपिण्डे वा गुरुवद्वृत्तिमाचरेत्॥
एषु त्वविद्यमानेषु स्थानासनविहारवान्।
प्रयुञ्जानोऽग्निशुश्रूषां साधयेद्देहमात्मनः॥

अयञ्च वासः अनूचानब्राह्मणगुर्व्वादिषु*।

यथाह मनुः।

नाब्राह्मणे गुरौ शिष्यो वासमात्यन्तिकं वसेत्।
ब्राह्मणे चाननूचाने† काङ्क्षन् गतिमनुत्तमामिति॥

अस्य धर्म्मानाह देवलः।

ब्रह्मसूत्राचमालादण्डकाष्ठकुण्डिकाः‡ मौञ्जमेखलाधारणं सकृद्भोजनमसकृदवगाहनं त्रिषवणस्नानं§ उभयकालमग्निहोत्रं सन्ध्योपासनमनुप्तलोमकेशनखत्वं गन्ध-

---

* साङ्गवेदाध्ययनकुशलब्राह्मणगुरुषु।

† साङ्गवेदानध्येतरि ब्राह्मणेऽपि चिरतरकालं न वसेदित्यर्थः।

‡ कमण्डलुः।

§ [illegible]

माल्यस्नेहाभ्यञ्जनाञ्जनवेषालङ्कारच्छत्रोपानद्वाहन लङ्घन* प्लवन† धावन चिकित्सा ज्योतिषलक्षणवास्तुविधान‡ मङ्गलपौष्टिकशान्तिकर्म गन्धर्वसङ्गसमयसम्बन्धन§ शिल्प लेखन कारुकर्म वेश्म क्षेत्र द्युम्न¶ धान्य परिच्छद शस्त्र द्यूत व्यवहारप्रभाव‖ लीला परिहास प्रणय कुहक विस्मापन विड़म्ब विवादालोक परिदेवन पादोद्वर्त्तनवर्ज्जनमिति ।

अग्निपरिचर्य्याप्रकारमाह हारीतः ।

यज्ञियाः समिध आहृत्य संमार्ज्जनोपलेपनोद्धोधनोपगूहन समिन्धन पर्य्यग्निकरण परिक्रमोपस्थानहोमस्तत्र नमस्कारादिभिरग्निं परिचरेदिति ।

एवं कुर्व्वतः फलमाह याज्ञवल्क्यः ।

अनेन विधिना देहं साधयन्विजितेन्द्रियः ।
ब्रह्मलोकमवाप्नोति न चेह जायते पुनः ॥

---

* उपवासः तथाच अनड्वान् ब्रह्मचारी च आहिताग्निश्चैव च. अश्नन्एव शिष्यन्ति नैषां सिद्धिर्न्नशता ।

† सन्तरणम् ।

‡ वास्तुविद्या ।

§ नृत्यगीतादिसमयसम्बन्धः ।

¶ द्युम्नशब्देन हिरण्यं धनमुच्यते ।

‖ व्यवहारप्रभावः व्यवहारप्रबलम् ।

अत्रेदं चिन्त्यं किमिष्टं नैष्ठिकं ब्रह्मचर्य्यं कुब्जादिपुरुषविशेषाधिकारकमिति। कुब्जादिविषयमिति तावद्भूमः। वैष्णवे नियमाभिधानात्।

तथाहि।

कुब्जवामनजात्यन्धक्लीवपङ्ग्वार्त्तरोगिणाम्।
ब्रह्मचर्य्या भवेत्तेषां यावज्जीवमनंशतः॥ इति।

अनंशतः अंशाभावादित्यर्थः। किञ्च उपनीतमात्रविषयत्वे यावज्जीवमग्निहोत्रं जुहुयादिति गृहस्थधर्म्मप्रतिपादिकायाः श्रुतेः सङ्कोच आपद्येत। एवं प्राप्ते विधीयते उपनीतमात्रविषयमेव। तदन्यथा मनुवचनविरोधात्।

तथाहि।

यदि त्वात्यन्तिको वासो रोचेतास्मै गुरोः कुले।
युक्तः परिचरेदेनमाशरीरविमोक्षणादिति॥

तत्र यदीत्यनेन पाक्षिकत्वं द्योत्यते। विष्णुवचने च यावज्जीवमित्यनेन पङ्ग्वादीनां नित्यमेतदित्यवगम्यते। एवञ्च पङ्ग्वादिविषये मनुविष्णुवचनयोर्विरोधः। तत्परिहाराय मनुवचनं पङ्ग्वादिव्यतिरिक्तविषयम्। ततश्च पङ्ग्वादिव्यतिरिक्तोपनीतमात्रत्वं पाक्षिकमिति पक्षे नैष्ठिकपक्षे नेत्ययमर्थः सिद्धः। एवञ्च केवलं कुब्जादिविषयत्वे विरोधो दुष्परिहरः स्यात्। यच्चोक्तं श्रुतिसङ्कोच इति। तत्तु श्रुत्यन्तरविरोधपरिहारार्थमस्माभिः यमिच्छेत्तमावसेत्। यदहरेव विरज्येत्तदहरेव

ज्जीवमग्निहोत्रं जुहुयादित्यनेनापि ये रागवशात्कृतोपयमास्तेषामेव रागानिवृत्तौ यावज्जीवं गार्हस्थ्यनिष्ठत्वेनाग्निहोत्रकर्त्तव्यता प्रतिपाद्यते। न तु सर्व्वेषामतो यो रागाभावेन नैष्ठिकब्रह्मचर्य्यं कामयते तस्याग्निहोत्राधिकाराभावादेव न तद्विषये यावज्जीवश्रुतिः प्रवर्त्तते।

तथाच जाबालश्रुतिः।

यदि गृहमेव कामयते तदा यावज्जीवमिति।

केचन नैवं मन्यन्ते नैष्ठिकस्य स्मार्त्तत्वेन श्रौताग्निहोत्रादिना बाध इति। तत् स्वाध्यायवैधुर्य्यनिबन्धनमित्युपेक्षणीयम्।

तस्यापि श्रुतिमूलत्वात्।

ब्रह्मचार्य्याचार्य्यकुलवासी द्वितीयोऽत्यन्तमात्मानमाचार्य्यकुलेऽवसादयन्निति श्रुतिः।

ननु ब्रह्मचारिद्वैविध्ये चत्वार आश्रमा इत्यापस्तम्बवचनविरोधः स्यादिति चेन्नत्यम्। सङ्कल्पभेदमात्रेण नित्यकाम्यदर्शपौर्णमासादिवदभेदोपपत्तेः।

तथाच दक्षः।

द्वितीयो नैष्ठिकश्चैव तस्मिन्नेवाश्रमे स्थितः।

अथ समावर्त्तनम्।

तत्र याज्ञवल्क्यः।

गुरवे तु वरं दत्त्वा स्नायीत तदनुज्ञया।
वेदं व्रतानि वा पारं नीत्वा ह्युभयमेव वा॥

चितय इति, वरोऽभिलषितार्थः । वेदशब्दो वेदाध्ययनतदर्थ-जिज्ञासानामप्युपलक्षणार्थः ।

तथाच स्मर्य्यते ।

वेदस्वीकरणं पूर्व्वं विचारोऽभ्यसनं जपः ।
तद्दानञ्चैव शिष्येभ्यो वेदाभ्यासो हि पञ्चधा ॥

व्यासः ।

वेदस्याध्ययनं सर्व्वधर्म्मशास्त्रस्य वापि यत् ।
अजानतोऽर्थं तत्सर्व्वं तुषाणां खण्डनं यथा ॥
योऽधीत्य विधिवद्विप्रो वेदार्थं न विचारयेत् ।
स सान्वयः शूद्रसमः पात्रतां न प्रपद्यते ॥
अधीत्य यत्किञ्चिदपि वेदार्थाधिगमे रतः ।
स्वर्गलोकमवाप्नोति धर्म्मानुष्ठानवान्द्विजः ॥
ऋक्पादमप्यधीयानो न्यायतश्च तदर्थवित् ।
सम्यग्व्रतानि संसेव्य समावर्त्तनमर्हति ॥

त्रिविधो हि स्नातकः ।

तथाच हारीतः ।

त्रयः स्नातका भवन्ति विद्यास्नातको व्रतस्नातको विद्याव्रतस्नातक इति ।

यो वेदमेव समाप्य समावर्त्तते स विद्यास्नातकः । यश्च व्रतान्येव समाप्य स व्रतस्नातकः । यश्चोभयं स विद्याव्रतस्नातकः । एवञ्च व्रतस्नातकस्य विवाहोत्तरकालमध्ययनसमापनं वेदार्थज्ञानञ्चेति

तत्र गौतमः ।

विद्यान्ते गुरुरर्थेन निमन्त्र्य इति ।

अर्थेन हेतुना निमन्त्र्यः प्रष्टव्यः ।

यत्तु मनुनोक्तम् ।

स्नास्यंस्तु गुरुणाज्ञप्तः शक्त्या गुर्व्वर्थमाहरेत् । इति ।

तद्व्रतस्नातकेतरविषयम् । गुरवे तु वरं दत्त्वा स्नायादित्युक्तम् ।

न चैतत्स्नानकर्म्मविषयनियतं विरक्तस्य विवाहरागाभावात् ।

तथाच नृसिंहपुराणे ।

गुरवे दक्षिणां दत्त्वा स्वयमिच्छेत्तु वा विशेत्* ।

विरक्तः प्रव्रजेद्विद्वान् सरागस्तु गृहे वसेत्† ॥ इति ।

एतच्च समावर्त्तनमुक्तदिने कार्य्यम् ।

तथाच सुरेश्वरः ।

भौमभानुजयोर्व्वारे नक्षत्रे च व्रतोदिते ।

ताराचन्द्रविशुद्धौ स्यात्समावर्त्तनकक्रिया ॥

अथ स्नातकव्रतानि ।

तत्र पारस्करः ।

स्नातकस्य नियमान् वक्ष्यामः । कामादितरो नृत्य-

गीतवादित्राणि न कुर्य्यान्न गच्छेत् । कामस्तु‡ गीतं

---

* स्वयमिच्छेद्गुरुकुले स्थातुमिच्छेत् । वा विशेद्विवाहं न कुर्य्यात् ।

† गृहे वसेद्विवाहं कुर्य्यात्, न गृहं गृहमित्याहुर्गृहिणी गृहमुच्यते इति स्मरणात् ।

‡ कामन्विति पाठान्तरम् ।

गायति चैवं गीतेन रमत इत्यपरम्। क्षेमे नक्तं ग्रामान्तरं न गच्छेन्न धावेदिति।

ब्रह्मचर्य्यात्समावृत्तस्य नियमान् व्रतान् वक्ष्यामः। कामादिच्छया गीतनृत्यवादित्राणि न कुर्य्यात्। न गच्छेद्द्रष्टुमिति शेषः। इतरो ब्रह्मचारी सोऽपि न कुर्य्यान्न गच्छेदित्येव। इच्छया* गायेत् शृणुयात्। यथाश्वमेधे दिवा ब्राह्मणी गायतीति यजमानं श्रावयति चेति गाने श्रवणे चाधिकारः। एवमन्यत्रापि यत्र विशेषविधिरस्ति तत्रैवाधिकारो नान्यत्रेत्यर्थः। क्षेमे नक्तं ग्रामान्तरं न गच्छेत्। क्षेमे आपदभावे सति न च धावेत् क्षेमे सतीत्यनुषज्यते†।

तथा।

उदपानावेक्षणवृक्षारोहणफलप्रचयनसन्धिसर्पणविवृत्तस्नानविषमलङ्घनशुक्लवदनसन्ध्यादित्यप्रेक्षणमाभीक्ष्ण्येन न कुर्य्यात्।

उदपानं कूपादि। वृक्षाग्रोपरि गमनेन फलप्रचयनं फलग्रहणम्। सन्धिसर्पणं सन्धिभूमिगमनम्‡। अथवा सन्ध्याया-

---

* पारस्करसूत्रस्थं कामतो गीतं गायति च इत्यपरभागं व्याचष्टे इच्छया इति। गायति इति विध्यर्थे लट् इत्यभिप्रेत्य व्याकरोति गायेत्। चकारस्य सार्थक्यं दर्शयति शृणुयादिति।

† एकत्रान्वितस्य पदस्य अन्यत्रान्वयार्थमनुसन्धानमनुषङ्गः।

‡ भमे ग्रहर्क्षादिपर्यन्ते गमनम्।

मपमार्गे गमनम्। विवृत्ते वृक्षादौ* स्नानम्। विषमं गर्त्तादि। शुक्लमश्लीलम्। तत्त्रिविधं लज्जाकरं दुःखकरमङ्गलसूचकम्। आभीक्ष्ण्यं वारंवारमादित्यमण्डलं न पश्येदित्यर्थः। तथा न ह वै स्नात्वा भिक्षेत वर्षत्यप्रावृतो न गच्छेत्। अयं मे वज्रः† इत्यनेन मन्त्रेण गच्छेत्।

छत्री यष्टिर्नरपाणिस्तु चरेत्। रात्रौ तच्छा दिवा‡ तच्छायाशब्दविचस्ताः प्रशाम्यन्ति हि पन्नगाः। अप्सु स्वमुखं नावेक्षेत गर्भिणीं विजयन्तीति ब्रूयात्। सकुलमिति नकुलम्। भगालमिति कपालम्। इन्द्रधनुर्मणिधनुरिति ब्रूयात्। परस्य गां वत्सं वा पाययन्तीं नाचक्षीत। खानिते अनास्तृते भूमौ शस्यवत्यां वा उपसर्पंस्तिष्ठन्न मूत्रपुरीषे कुर्य्यात्। स्वयं जीर्णेन काष्ठेन लोष्ट्रेण प्रसृजीत गुदं विकृतम्। वासो नाच्छादयीत मञ्जिष्ठादिरक्तं नीलादिरक्तं§ वा। गूढव्रतो वधत्रः स्यात्सर्व्वेषामिति। मित्रमिव वधात्त्रायते इति वधत्रः। इत्यादि व्रतलोपे एकरात्रं तिस्रो रात्रीर्व्वा व्रतं चरेत्।

---

* आच्छादितजलाशयादौ सूर्य्यकररहितादौ।

† अयं मे वज्रपाप्मानमपहन्तु।

‡ बहुषु पुस्तकेषु एकरूप एवं पाठो दृश्यते। परन्तु यष्टिपाणिर्नरस्त्वछत्री चरेत् रात्रौ तथा दिवा इत्येव पाठो युक्तः।

§ मञ्जिष्ठादिना रक्तं नीलीमिश्रितरक्तं वासो वस्त्रं नाच्छादयीत इत्यन्वयः।

संवर्त्तः ।

कुर्य्याद्गृह्याणि कर्म्माणि स्वभार्य्यापोषणं परम् ।
ऋतुकालाभिगामी स्यात्प्राप्नोति परमाङ्गतिम् ॥
शेषान्नस्तुगामित्वं पञ्चयज्ञाः स्वकर्म्म च ।
तुल्यैश्च सह सम्बन्धो गृहस्थस्य विधीयते ॥

गृहस्थस्यापि स्नातकत्वमस्तीति स्नातकस्य गृहस्थसाधारणकर्म्मकथनमविरुद्धम् ।

बृहस्पतिः ।

सख्यं समाधिकैः कुर्य्यादुपेयादीश्वरं सदा ।
वैरं निर्हेतुकं वादं न कुर्य्यात्केनचित्सह ॥

वशिष्ठः ।

आहारनिर्हारविहारयोगाः
सुसंवृता धर्म्मविदा तु कार्य्याः ।
वाग्बुद्धिगुप्तानि नयस्तथैव
धनायुषी गुप्ततमे च कार्य्ये ॥

निर्हारो मूत्रपुरीषोत्सर्गः विहारः स्त्रीसेवा योगः समाधिः । वाग्गुप्तिरशुभैरालापादिपरिवर्जनेन । बुद्धिगुप्तिरशुभसंकल्पादिपरिवर्जनेन ।

मनुः ।

भद्रं भद्रमिति ब्रूयाद्भद्रमित्येव वा वदेत् ।
शुष्कवैरं विवादञ्च न कुर्य्यात्केनचित्सह ॥

विरोधं नोत्तमैर्गच्छेन्नाधमैश्च सदा बुधः ।
विवाहश्च विवादश्च तुल्यरूपे नृपेक्षते ॥
नारभेत कलिं* प्राज्ञः शुष्कवैरञ्च† वर्ज्जयेत् ।
अप्यल्पहानिः सोढ्व्या वैरेणार्थागमं त्यजेत् ॥
जीवेति क्षुवतां ब्रूयाज्जीवित्युक्तः सहेति च ।

पैठीनसिः ।

मत्तप्रमत्तोन्मत्तैः सह संभाषं न कुर्व्वीत । न परस्त्रियं रहसि संभाषेत ।

सांख्यायनगृह्ये ।

सूतिकोदक्यां न संवदेत् ।

गौतमः ।

न म्लेच्छाशुच्यधार्म्मिकैः सह संभाषेत संभाष्य पुण्यक्रतो मनसा ध्यायेत् । ब्राह्मणेन सह संभाषेत ।

यमः ।

तिथिं पक्षस्य न ब्रूयात्‡ नक्षत्राणि न निर्द्दिशेत् ।

गौतमशङ्खलिखिताः ।

न परक्षेत्रे चरन्तीं गां पाययन्तीं वान्यस्मिन् कथयेत् ।

महाभारते ।

सम्यन्नं भोजने ब्रूयात्पानीये तर्पणं तथा ।

---

* कलहम् ।

† निष्प्रयोजनविवादम् ।

‡ शुक्लपक्षस्य कृष्णपक्षस्य वा तिथिं न ब्रूयात् परन्तु प्रतिपदादित्वेन ब्रूयात् ।

सुकृतं पायसे ब्रूयाद्यवाग्वां क्षपरे तथा ॥
महात्मनाञ्च गुह्यानि न वक्तव्यानि कर्हिचित्।
त्वंकारं नामधेयञ्च ज्येष्ठानां परिवर्ज्जयेत्।
अधराणां* समानानामुभयेषां न दुष्यति ॥

तथाच नारदः।

गुरोर्ज्येष्ठकलत्रस्य भ्रातुर्ज्येष्ठस्य चात्मनः।
आयुष्कामो न गृह्णीयान्नामानि क्षपणस्य च ॥

पैठीनसिः।

अनित्या ब्राह्मणा गावः सलिलं काञ्चनं स्त्रियः।
पृथिवी च षड़ेतानि यो निन्दति स निन्दितः ॥

मार्कण्डेयपुराणे।

वेददेवद्विजातीनां साधुसत्यतपस्विनाम्।
गुरोः पतिव्रतायाश्च तथा यज्ञतपस्विनाम् ॥
परिवादं न कुर्व्वीत परिहासेऽपि पुत्रकाः।
कुर्व्वतामविनीतानां श्रोतव्यं न कथञ्चन ॥

हारीतः।

विवादं वर्ज्जयेद्विप्रे सर्व्वेषाञ्चैव सूचनम्† ।
परिभोगं यथोक्तेषु‡ मत्सरं पुत्रशिष्ययोः ॥

तथा।

---

* नीचानाम्।

† हिंसनमथवा दोषाविष्करणम्।

‡ अनिषिद्धेष्वपि अत्यन्तभोजनं वर्ज्जयेत्।

तस्मान्नैव परिवदेद्यजन्तं याज्यमीश्वरम् ।
आदत्ते सुकृतं तेषां ये वै परिवदन्ति तम् ॥

मनुः ।

ऋत्विक्पुरोहिताचार्यैर्मातुलातिथिसंश्रितैः ।
बालवृद्धातुरैर्वैद्यैर्ज्ञातिसम्बन्धिबान्धवैः ॥
मातापित्रोर्यां जामीभिर्भ्रात्रा पुत्रेण भार्यया ।
दुहित्रा दासवर्गेण विवादं न समाचरेत् ॥
न च वाचं वदेद्दुष्टां न दीनां न च कर्कशाम् ।

अथानाक्रमणीयानधिष्ठेयानि ।

तत्र मनुः ।

देवतानां गुरौ राज्ञः स्नातकाचार्ययोस्तथा ।
नाक्रामेत्क्रामतश्छायां बभ्रुणो दीक्षितस्य च ॥

बभ्रुः कपिलः ।

यमः ।

स्नान्तु नाक्रामयेच्छायां क्लीबिनः* पतितेन च ।
चाण्डालेन द्विषद्भिश्च नित्यरोगान्वितेन च ॥

याज्ञवल्क्यः ।

देवर्त्विक्स्नातकाचार्यैराज्ञां छायां परस्त्रियः ।
नाक्रामेद्वृत्तविण्मूत्रष्ठीवनोदर्त्तनानि च ॥

मनुः ।

---

* क्लीबेन इत्यादिगततृतीया षष्ठ्यर्थे [illegible]

मध्यन्दिनेऽर्द्धरात्रे च श्राद्धं भुक्त्वा च सामिषम् ।
सन्ध्ययोरुभयोश्चैव न सेवेत चतुष्पथम् ॥
उद्वर्त्तनमपस्नानं विण्मूत्रे रक्तमेव च ।
श्लेष्मानिष्ठ्यूतवान्तानि नाधितिष्ठेत कामतः ॥
वैरिणं नोपसेवेत सहायश्चैव वैरिणः ।
अधार्म्मिकं तस्करञ्च परस्यैव च योषितम् ॥

उद्वर्त्तनं कृतमलापकर्षणं कुङ्कुमादि। अपस्नानं स्नानत्यक्तजलम् । निष्ठ्यूतमुद्गीर्णताम्बूलादि ।

अङ्गलिखितौ ।

नोद्धतकुहकैः सहैकत्र तिष्ठेत् ।

उद्धतः अविनीतः कुहकः वशीकरणादिनिष्ठः ।

विष्णुः ।

न चतुष्पथमभितिष्ठेन्न रात्रौ वृक्षमूलं शून्यालयं न तृणं न बन्धनागारम् ।

हारीतः ।

आवपनापमार्ज्जनास्नानतुषभस्मास्थिकपालसञ्चयं नाधितिष्ठेत् ।

आवपनं गोप्यादिभाण्डम्, अपमार्ज्जनं मार्ज्जनोपयुक्तकुशादि, कपालः खर्परः ।

विष्णुपुराणे ।

पूज्यदेवध्वजज्योतिश्छायान्नातिक्रमेद्बुधः* ।

---

* प्रतिष्ठितदेवानां ध्वजानां ज्योतिःपदार्थानाञ्च ।

देवीपुराणे ।

न चैव गोः प्रसूताया विश्वासः स्त्रीजनस्य च ।
न मुखेन धमेदग्निं* न खड्गं लङ्घयेत्तथा ॥

अथानवलोकनीयानि ।

तत्र विष्णुः ।

नोद्यन्तमादित्यमीक्षेत नास्तं यान्तं नोपरक्तं† न वास-
सातिरोहितम् । न चादर्शजलाद्युपगतं न मध्येऽह्नि‡।

याज्ञवल्क्यः ।

नेक्षेतार्कं नग्नां स्त्रीं न च संयुक्तमैथुनाम् ।
न च मूत्रं पुरीषं वा नाशुचीराहुतारकाः ॥

मार्कण्डेयपुराणे ।

देवतापिष्टसच्छास्त्रयज्ञसत्यादिनिन्दकैः§ ।
कृत्वा स्पर्शनमालापं शुध्येतार्कविलोकनात् ॥
अवलोक्य तथोदक्यामन्त्यजं¶ पतितं शठम् ।
विधर्म्मसूतिकाषण्ढविवस्त्रान्त्यावसायिनः‖ ।

---

* फुत्कारेण अग्निं न ज्वालयेत् ।

† राहुग्रस्तम् ।

‡ मध्याह्नकाले ।

§ सप्तार्थे तृतीया ।

¶ रजकचर्म्मकारश्च नटी वरुड एवच, कैवर्त्तो मेदभिल्लाश्च सप्तैते चान्त्यजाः स्मृताः ।

‖ चण्डालः श्वपचः पक्षी सूतोवैदेहकस्तथा, मागधायोगवौ चैव सप्तैतेऽन्त्यावसायिनः ।

मृतनिर्यातकांश्चैव परदाररतांस्तथा।
एतदेव* हि कर्त्तव्यं प्राज्ञैः शोधनमात्मनः॥

स्कन्दपुराणे।

कृतघ्नं मानवं दृष्ट्वा नरकेष्वपि† कुत्सितम्।
शुध्यर्थं देवि द्रष्टव्याः सोमानलदिवाकराः॥

सोमादीनां यथासम्भवं विकल्पः।

विष्णुः।

न क्रुद्धस्य गुरोर्मुखं न तैलोदकयोः स्वां छायां मलवत्यादर्शे न पत्नीं भोजनसमये न स्त्रियं नग्नां न किञ्चन गूहमानं न बालां न भ्रष्टकुञ्जरनरविषमस्थौ‡ न क्षुधादियुक्तं नोन्मत्तं न प्रमत्तम्§।

मनुः।

नाश्नीयाद्भार्यया सार्द्धं नैनामीक्षेत चाश्नतीम्।
क्षुवतीं जृम्भमाणाञ्च न वासीनां¶ यथासुखम्॥
नाञ्जयन्तीं स्वके नेत्रे न चाभ्यक्तां‖मनाहृताम्।

---

* आदित्यदर्शनरूपम्।
† नरसमूहेषु मध्ये।
‡ प्रस्खलच्युतहस्तिनं विषद्रुमनरञ्च।
§ मादकद्रव्यभक्षणेन मत्तमित्यर्थः।
¶ उपविष्टाम्।
‖ तैलमर्दने आसक्ताम्।

न पश्येत्प्रसवन्तीञ्च* तेजस्कामो द्विजोत्तमः ॥

अथाकुलकरणानि ।

क्रमेण च यमव्यासप्रातातपाः ।

देवद्रव्यविनाशेन ब्रह्मस्वहरणेन च ।
कुलान्यकुलतां यान्ति ब्राह्मणातिक्रमेण च ॥
गोभिरश्वैश्च यानैश्च कृषा राजोपसेवया ।
अयाज्ययाजनेनैव नास्तिक्येन च कर्म्मणा ।
कुलान्यकुलतां यान्ति यानि हीनानि मन्वतः ॥
मन्वतस्तु समृद्धानि कुलान्यल्पधनान्यपि ।
कुलसंख्याञ्च गच्छन्ति कर्षन्ति च महद्यशः ॥
अनृतं पारदार्य्यञ्च तथाभक्ष्यस्य भक्षणम् ।
अगम्यागमनञ्चैव हिंसा स्तेयं तथैव च ॥
अश्रौतधर्म्माचरणं मन्वधर्म्मबहिष्कृतम् ।
एतानि चैव कर्म्माणि वर्ज्जयेन्मानवः सदा ॥

अथ निवासः ।

अत्र बृहस्पतिः ।

भूरिमान्य†कुशेधान्नशय्याम्बु‡द्विजनैगमे ।

---

* प्रस्रवन्तीमिति पाठान्तरम् ।

† मान्यीमानार्हौजनः । माल्यमिति पाठान्तरम् ।

‡ अप्यमिति पाठान्तरम् ।

निष्कण्टके धार्म्मिके च वसेत्स्थाने निरामये ॥

नैगमो वाणिजिकः ।

एककूपोदके ग्रामे ब्राह्मणो बलीपतिः ।

वर्षेण शूद्रो भवति कृष्णवर्णमुपाश्रितः ॥

व्यासः ।

धनिकः श्रोत्रियो राजा नदी वैद्यस्तु पञ्चमः ।

पञ्च यत्र न विद्यन्ते चिरं तत्र न संवसेत्* ॥

मार्कण्डेयपुराणे ।

जितामित्रो नृपो यत्र बलवान्धर्म्मतत्परः ।

तत्र नित्यं वसेत्प्राज्ञः कुतः कुनृपतौ सुखम् ॥

यस्मिन् कृषीवला राष्ट्रे प्रायशो नातिभोगिनः ।

यत्रौषधान्यशेषाणि वसेत्तत्र विचक्षणः ॥

प्रीयमाणा नरा यत्र प्रयच्छेदुरुयाचितम् ।

सुस्थचित्ते वसेत्तत्र कृतकृत्य इवात्मवान् ॥

दण्डो यत्राविनीतेषु सत्कारश्च कृतात्मसु ।

वसेत्तत्र वसेच्चैव धर्म्मशीलेषु साधुषु ॥

देवलः ।

अरण्यं देवतास्थानं तीर्थान्यायतनानि च ।

तस्मात्तेषु वसँल्लोको याति लोकं दिवौकसाम् ॥

---

* न दिवसं वसेदिति पाठान्तरम् ।

अरण्यं नैमिषादि तीर्थं गङ्गादि आयतनमविमुक्तादि*।

अथ गमने वर्ज्यानि।

तत्र मनुः।

नाविनीतैर्व्रजेद्ग्रामं न च क्षुद्राधिपीड़ितैः।
न भिन्नशृङ्गाक्षिखुरैर्न बालधिविरूपितैः† ॥
विनीतैश्च व्रजेन्नित्यमाशुगैर्लक्षणान्वितैः।
वर्णरूपोपसम्पन्नैः प्रतोदेनातुदन् भृशम् ॥
नातिकल्यं‡ नातिसायं नातिमध्यन्दिने स्थिते।
नाज्ञातेन समं गच्छेन्नैको न वृषलैः सह ॥
गवाञ्च यानं पृष्ठेन§ सर्व्वथैव विगर्हितम्।

विष्णुः।

नैकोऽध्वानं प्रपद्येत नाधार्म्मिकैः साकम्।

विष्णुः।

वर्षातपादिषु च्छत्री दण्डी रात्र्यटवीषु च।
शरीरत्राणकामो वै सोपानत्कः सदा व्रजेत् ॥
नाधो न तिर्य्यगूर्द्ध्वं वा निरीक्षन् पर्य्यटेद्बुधः।

---

* अविमुक्तादि इति पाठान्तरम्।

† वक्रलाङ्गूलैः।

‡ नातिप्रातः।

§ गवां पृष्ठेन यानं गमनम्।

युगमात्रं* महीपृष्ठं नरो गच्छेदिलोकयन् ॥

तथा ।

न दुष्टं यानमारोहेत्कुलच्छायां† न संश्रयेत् ।
नैकः सुप्याटवीं‡ गच्छेन्न तु शून्यगृहे वसेत् ॥
नासहायो व्रजेद्राज्ञो नोत्पथे न चतुष्पथे ।

वशिष्ठः ।

नाग्निब्राह्मणान्तरे व्यपेयान्नाग्न्योर्न ब्राह्मणयोर्गुरु-शिष्ययोरनुज्ञया व्यपेयान्न बाहुभ्यां नदीं तरेन्न नावं सांशयिकीमारोहेत्§ ।

आपस्तम्बः ।

प्रतिमुखमाद्रियमाणं प्रतिष्ठितं भूमौ प्रदक्षिणीकृत्य अभ्युपेयात् ।

ब्रह्मचारिप्रकरणे सूतकप्रकरणे ये साधारणा धर्म्मा अभिहितास्ते अनिषिद्धा गृहस्थादीनामपि भवन्त्येव । उक्तं वक्ष्यमाणाश्रमोपयोगित्वाद्ब्रह्मचर्य्यरूपं तद्वैदश्च प्रदर्श्यते ।

तत्र हारीतः ।

ब्रह्मचर्य्यं नामाप्रार्थनमस्मरणमसङ्कल्पनमनभिप्रेक्षणम-

---

* चतुर्हस्तमात्रम् ।

† बदरीवृक्षच्छायाम् ।

‡ बहुषु पुस्तकेषु दर्शनाद्रचितं परन्तु नैकः सुप्याद्वनं गच्छेदित्येव साधु ।

§ सांशयिकीमिति नौविशेषणं निषेधति नवेति संशयविषयिकाम् ।

सङ्कीर्त्तनमनभिभाषणमनभिगमनमसन्दर्शनमसमाग-
मश्चासाम् ।

अप्रार्थनं सा मे भूयादित्याशाविरहः । असङ्कल्पनमेवं करिष्यामीत्यभिधानाभावः । अनभिप्रेक्षणमाभिमुख्यानावलोकनम् । असन्दर्शनं कन्यावयवावलोकनाभावः ।

तच्च ब्रह्मचर्य्यं चतुर्विधं भवति । कृष्णं रक्तं शुक्लं विमलमिति । तत्र परदारवर्ज्जनं नित्यम् । स्वदाराभिगमनं कृष्णम् । पर्व्ववर्ज्जं तदेव रक्तम् । ऋतुकालाभिगमनं शुक्लम् । ऊर्द्धरेतस्त्वं विमलम् ।

कृष्णे भौमाञ्जयेल्लोकान्मध्यमं रक्तकाञ्जयेत् ।
शुक्लेन तु जयेत्स्वर्गं विमलान्मोक्षमाप्नुयात् ॥ इति ।

इह मदनपारिजाते मदने क्षितिपालदानजलरूढे ।
स्तवकोऽयमाद्य आसीदामोदाकृष्टपण्डितभ्रमरः ॥
मतिर्येषां शास्त्रे प्रकृतिरमणीया व्यवहृतिः
परं शीलं श्लाघ्यं जपति ऋजवस्ते कतिपये ।
चिरं चित्ते तेषां मुकुरतलभूते स्थितिमया-
दियं व्यासाख्यप्रवरमुनिशिष्यस्य भणितिः ॥

इति पण्डितपारिजात भट्टारमल्लेत्यादि विरुदराजीविराजमानस्य श्रीमदनपालस्य निबन्धे मदनपारिजाताभिधेये प्रथमः स्तवकः ।

द्वितीयः स्तवकः।

अथ ब्रह्मचारिस्तवकानन्तरं क्रमप्राप्तो गृहस्थस्तवक आरभ्यते। तत्रोपयुक्ता सापिण्ड्यमीमांसा प्रथमं प्रक्रम्यते।

तस्य सापिण्ड्यं केचिदेवं वर्णयन्ति। एकस्यां पिण्डदानक्रियायां दातृत्वेन यजमानस्य देयत्वेन पितृपितामहप्रपितामहानां लेपभोक्तृत्वेन प्रपितामहस्यपितृपितामहप्रपितामहानां यजमानादिभार्य्याणां पत्या सह कर्त्तृत्वे*नैकशरीरारम्भकत्वेन† च। भ्रातृभार्य्याणां परस्परमेकशरीरारम्भकत्वेन यजमानप्रभृतिपितृपरम्पराणां सप्तमपुरुषावधिकसन्ततिजातानां मध्ये केषाञ्चित्पिण्डदेवतात्वेनोद्दिश्यमानान्वयेन केषाञ्चिल्लेपभागित्वेनोद्दिश्यमानान्वयेन चेति।

दात्रादिसापिण्ड्यविषये मत्स्यपुराणे वचनमप्युदाहरन्ति।

लेपभाजश्चतुर्थाद्याः पित्राद्याः पिण्डभागिनः।
पिण्डदः सप्तमस्तेषां सापिण्ड्यं सप्तपौरुषमिति॥

अत्र ते प्रष्टव्याः कल्पनागुरुलघुभावयोः को वा ज्यायानिति।

---

* सपत्नीको धर्म्ममाचरेदिति स्मरणात्पत्न्या अपि धर्म्माचरणक्रियायां कर्त्तृत्वस्वीकारेण।

† अस्थिभिरस्थीनि मांसैर्मांसानि त्वचा त्वचमिति श्रुत्या पत्या सह पत्न्या विवाहोत्तरमभिन्नशरीरत्वेन।

यदि कल्पनागौरवं ज्यायस्तर्हि सपिण्डशब्दवृत्तौ* पूर्वोक्त-निमित्तान्येव स्युः ।

अथ कल्पनालाघवं ज्यायस्तत्र वयं ब्रूमः । पिण्डो देहः समान एकः पिण्डो देहो यस्य स सपिण्डः । तस्य भावः सापिण्ड्यं तच्च पुत्रादीनामेकशरीरावयवान्वयेन पत्न्यादीनां भ्रातृभार्य्यादीनाञ्चैकशरीरारम्भकत्वेनैकशरीरावयवान्वितैः सह-ैककार्य्यकर्तृत्वेन च भवति एवञ्च शब्दप्रवृत्तौ† निमित्तत्रय-मेवाङ्गीकृतं स्यात् । अथैवं मन्यसे एकपिण्डदानक्रियान्वयि-त्वमेकपिण्डदानक्रियान्वयान्वयित्वञ्चेति निमित्तद्वयमिति न कल्पनागौरवमिति । तर्हि अस्मत्पक्षेऽपि एकमेव निमित्त-मिति ततोऽपि लाघवम् । तच्चैकशरीरावयवान्वयित्वमेव । अवयवान्वयश्च पित्रादिषु अवयवानां समवायकरणत्वेन पत्न्या-दिष्वेकशरीरावयवान् प्रति साक्षात्परम्परावयवाऽधिकरण-त्वेनेति निमित्तैक्यान्नाघवम् ।

कल्पनागौरवञ्च गर्हितमाचार्य्यैः कल्पनालाघवं यत्र तत्पक्षं रोचयामहे तदेकतरत्र निपुणं सम्यधार्य्यतामिति । ततश्च निर्मथ्य पङ्कजादिवद्योगरूढोऽयं शब्दः§ । शरीरावयवान्वयस्य

---

* सापिण्ड्यनिर्णये ।

† व्युत्पत्तिनिर्वाचने ।

‡ एककार्य्यकर्तृत्वैकशरीरारम्भकत्वैकावयवान्वितत्वरूपम ।

§ निर्मथ्य विचार्य्य अयं शब्दः सापिण्ड्यशब्दः सम्यधार्य्यतामिति पूर्वानुषङ्गेणान्वयः ।

श्रुतौ श्रूयते। आत्मा हि यज्ञ आत्मन इति तथा प्रजामनु प्रजायस इति। तथा गर्भोपनिषद्यपि। एतत्षाट्कौशिकं शरीरं त्रीणि पितृतस्त्रीणि मातृतः अस्थिस्नायुमज्जानः पितृतस्त्वङ्मांसरुधिराणि मातृत इति।

आपस्तम्बोऽपि।

स एवायं विरूढः प्रत्यक्षेणोपलभ्यत इति।

मत्स्यपुराणवचनस्य त्वयमर्थः। लेपभाजश्चतुर्थाद्याः प्रपितामहपिता चतुर्थस्तदाद्याः प्रतिलोमक्रमेण त्रयो लेपभाजः। पिण्डदानं कृतवतः स्ववंशजस्य हस्तलेपं कुशेषु दत्तं भुञ्जते इति। पित्राद्याः पिण्डभागिनः पिण्डदाने देवताभूताः। पिण्डदः सप्तमस्तेषां तेषां पिण्डदाता सप्तमः। सापिण्ड्यं सप्तपौरुषम्। एतान् सप्तपुरुषान् सापिण्ड्यं व्याप्नोति इत्युक्तं भवति। ननु सापिण्ड्ये पूर्वोक्तं लेपभाक्त्वादिकं निमित्तमिति। तथा सति पूर्वोक्तगौरवदोषापत्तेः। अतोऽस्मदुक्तमेव युक्तम्।

अथ प्रकृतमनुसरामः।

तत्र मनुः।

वेदानधीत्य वेदौ वा वेदं वापि यथाक्रमम्।
अविप्लुतब्रह्मचर्य्यो गृहस्थाश्रममाश्रयेत्॥
उद्वहेत द्विजो भार्य्यां सवर्णां लक्षणान्विताम्।

कश्यपः।

दाराधीनाः क्रियाः सर्व्वाः ब्राह्मण्यास्तु विशेषतः।
दारान्सर्व्वप्रयत्नेन विशुद्धानुद्वहेत्ततः॥

विशुद्धान् कुलतो रूपतश्च ।

याज्ञवल्क्यः ।

अविप्लुतब्रह्मचर्य्यो लक्षण्यां स्त्रियमुद्वहेत् ।
अनन्यपूर्विकां कान्तामसपिण्डां यवीयसीम् ॥
अरोगिणीं भ्रातृमतीमसमानार्षगोत्रजाम् ।

अविस्खलितब्रह्मचर्य्यो बाह्याभ्यन्तरलक्षणयुक्तां स्त्रियमुद्वहेत् ।

बाह्यलक्षणानि मनुराह ।

अव्यङ्गाङ्गीं सौम्यनाम्नीं हंसवारणगामिनीम् ।
तनुलोमकेशदशनां मृदुङ्गीमुद्वहेत्स्त्रियम् ॥ इति ।

यान्यभ्यन्तराणि सन्दिग्धानि च तज्ज्ञानोदयाय आश्वलायनेनोक्तो द्रष्टव्यः ।

अथाऽविज्ञेयानि* लक्षणानि ।

अष्टौ पिण्डान् कृत्वा कृतमग्नेः प्रथमं यज्ञे ऋते सत्यं प्रतिष्ठितम् । यदियं कुमार्य्यभिजाता तदिदमिह प्रतिपद्यतां यत्सत्यं तदस्त्वतामिति । पिण्डानभिसंमन्त्र्य कुमारीं ब्रूयादेषामेकं गृहाणेति चेत्राऽऽददीत उभयतः श्रस्याद्गृह्णीयात् । अन्नवत्यस्याः प्रजा भविष्यतीति विद्याद्गोष्ठात्पशुमती वेदिपुरीषाद्ब्रह्मवादिनी अविनाशिनी क्रदात्सर्व्वसम्पन्ना देवनाकितवी चतुष्पथाद्विप्रव्राजिनी ईरिणादधन्या श्मशानात्पतिघ्नीति ।

---

* दुर्विज्ञेयानीति पाठान्तरम्। अवहिर्ज्ञेयानीति पाठान्तरम्।

अस्यायमर्थः। क्षतमग्नइत्यारभ्य यत्सत्यं तद्दृश्यतामित्यनेन मन्त्रेण मृत्पिण्डाभिमन्त्रणं कुर्य्यात्। मृदाहरणस्थानमाह। क्षेत्राच्चेदिति। पार्श्वद्वयेऽपि प्रश्नपरिपूर्णत्वेचादाहृता या मृत्तत्कृतं पिण्डं यदि गृह्णाति तदा अस्याः प्रजा अन्नवती भविष्यतीति विद्यात्। एवं गोष्ठादित्येवमादि वेदिपुरीषं वेदिमृत्तिका देवनं दूरतस्थानं विप्रव्राजिनी विविधप्रव्रजनशीला स्वैरिणीति यावदीरिणमूषरमधन्या धनरहितेत्यर्थः। अनन्यपूर्व्विकां दानेनोपभोगेन वा पुरुषान्तरापरिगृहीताम्। असपिण्डां समानमेकं पितुः शरीरं यस्याः सा सपिण्डा न सपिण्डा असपिण्डा तां सपिण्डता चैकशरीरावयवान्वयेनेति निरूपितं प्राक्।

मनुरपि।

असपिण्डा च या मातुरसगोत्रा च या पितुः।
सा प्रशस्ता द्विजातीनां दारकर्म्मणि मैथुने॥

अस्यार्थः। या मातुरसपिण्डा चकाराद्असगोत्रा च या च पितुरसगोत्रा चकाराद्असपिण्डा च सा दारकर्म्मणि मैथुने च प्रशस्ता। प्रशस्ता परिणयनार्हेत्यर्थः। एतदुक्तं भवति। अनुलोमक्रमेण द्विजातीनां सवर्णापाणिग्रहणममनन्तरं क्षत्रियादिकन्यापरिणयो विहितस्तत्र च सवर्णाविवाहो मुख्यः इतरस्त्वनुकल्पः। सदारस्य विहितं कर्म्मद्वयमेकं यज्ञादिकमपरं निधुवनम्। यज्ञादिके तु सवर्णदारैः सहितस्यैवाधिकारः सवर्णायां तु वयसा वर्षेण वा ज्येष्ठत्वेन तस्यां सत्यामन्यस्या-

अनधिकारः। असत्यां ज्येष्ठायां नित्ययज्ञादिकेष्वेवासवर्णा-सहितस्य गौणाधिकारो न काम्येषु। तथा ज्येष्ठापरित्यागे-नान्याग्रहणनिषेधाच्च। सुरतन्तु विवाहितास्विति नियमः। एवं स्थिते दारकर्म्मणि मैथुन इत्यत्र गोबलीवर्द्दन्यायेन दार-कर्म्मशब्दो मैथुनव्यतिरिक्ते यज्ञादौ वर्त्तते। तथाच। दार-कर्म्मणि प्रशस्तेत्युक्ता यज्ञादिकर्म्मणि सवर्णामात्रस्या*धिकारा-त्तद्विवाह एवासपिण्डा च या मातुरित्यादि ग्राह्यं स्यात्। न त्वसवर्णाविवाहे तन्निवृत्त्यर्थं मैथुनपदग्रहणम्। एवञ्चासवर्णा-परिणयेऽपि पूर्व्वोक्तवाक्यमनुषज्यते। यदि मैथुने प्रशस्तेत्युच्यते तदा तस्मिन् कर्म्मणि पूर्व्वोक्ता ग्राह्या नान्येति स्यात्। ततश्च

अनाश्रमी न तिष्ठेत्तु क्षणमेक†मपि द्विजः।

इति क्रतसमावर्त्तनस्य पञ्चमहायज्ञनित्योपासनादिदारकर्म्म-निष्पत्त्यर्थं पूर्व्वोक्तगुणरहितापि परिणेया स्यात्। तन्माभू-दिति दारकर्म्मग्रहणम्। ननु च

एकत्वं सा गता भर्त्तुः पिण्डगोत्रे च सूतके।

इति मातुर्गोत्रान्तराभावादसपिण्डा च या मातुरित्येतावते-वालं किमिति चकारान्मातुरसगोत्राग्रहणं क्रतं मनुना। उच्यते। सत्यमेवं तथापि दत्तपुत्री यस्य माता भवति सा च

---

* सवर्णाया एव।

† क्षणमात्रमिति पाठान्तरम्।

पुत्रिका कृता दत्तपुत्रीप्रतिग्रहीत्रा इयमेव मम पुत्रस्थानीयेति तदा तस्याः परिणेतुर्दत्तपुत्री प्रतिग्रहीतृसपिण्डा असपिण्डा भवतीति तत्र परिणयो मा प्रशांक्षीदिति चकारेण मातृसगोत्रा परिणेयेत्युच्यते।

उक्तञ्च दत्तिमाणां जनकगोत्रादिनिवृत्त्या अन्यगोत्रादिप्राप्तिर्मनुना।

गोत्रऋक्थे जनयितुर्न हरेद्दत्तिमः सुतः।

गोत्रऋक्थानुगः पिण्डो व्यपैति ददतः स्वधा॥ इति

एवं तर्हि असपिण्डा च या मातुरिति न वक्तव्यम्। चकारलभ्यासगोत्राग्रहणेनैवासपिण्डाया अपि प्राप्तत्वाद्दाढ़म्। सापत्नमातृपितृकुलजासपिण्डा मातृसगोत्रापि भवति मातृसपिण्डा चेति तत्र विवाहप्राप्ताविदमुच्यते मातुरसपिण्डेति। तथा च सापत्नमातृसपिण्डेष्वपि मातुलादिव्यवहारं दर्शयति सुमन्तुः।

पितृपत्नाः सर्व्वा मातरस्तद्भ्रातरो मातुलास्तद्दुहितरश्च भगिन्यस्तदपत्यानि भागिनेयानि* अन्यथा सङ्करकारिकाः स्युरिति।

असगोत्रा च या पितुरित्यत्र चकारेण पितुरसपिण्डाया ग्रहणं न कर्त्तव्यम्। असगोत्रपदेनैव लभ्यत्वादुच्यते। यस्य पिता दत्तिमपुत्रस्तस्य दत्तिमस्य यज्जनककुलं तत्र जाता परिणेतृ-

---

* तात्पर्यविवाद्याः अन्यथा सङ्करकारिण्यस्तथाध्यापयितुरेतदेवतीति पाठान्तरम्।

अनधिकारः। असत्यां ज्येष्ठायां नित्ययज्ञादिकेष्वेवासवर्णा-सहितस्य गौणाधिकारो न काम्येषु। तथा ज्येष्ठापरित्यागे-नान्याग्रहणनिषेधाच्च। सुरतन्तु विवाहितास्विति नियमः। एवं स्थिते दारकर्म्मणि मैथुन इत्यत्र गोबलीवर्द्दन्यायेन दार-कर्म्मशब्दो मैथुनव्यतिरिक्ते यज्ञादौ वर्त्तते। तथाच। दार-कर्म्मणि प्रशस्तेत्युक्ता यज्ञादिकर्म्मणि सवर्णामात्रस्याधिकारा-त्तद्विवाह एवासपिण्डा च या मातुरित्यादि ग्राह्यं स्यात्। न त्वसवर्णाविवाहे तन्निवृत्त्यर्थं मैथुनपदग्रहणम्। एवञ्चासवर्णा-परिणयेऽपि पूर्व्वोक्तवाक्यमनुषज्यते। यदि मैथुने प्रशस्तेत्युच्यते तदा तस्मिन् कर्म्मणि पूर्व्वोक्ता ग्राह्या नान्यत्रेति स्यात्। ततश्च

अनाश्रमी न तिष्ठेत्तु क्षणमेकमपि† द्विजः।

इति क्रतसमावर्त्तनस्य पञ्चमहायज्ञनित्योपासनादिदारकर्म्म-निष्पत्त्यर्थं पूर्व्वोक्तगुणरहितापि परिणेया स्यात्। तन्माभू-दिति दारकर्म्मग्रहणम्। ननु च

एकत्वं सा गता भर्त्तुः पिण्डगोत्रे च सूतके।

इति मातुर्गोत्रान्तराभावादसपिण्डा च या मातुरित्येतावते-वालं किमिति चकारान्मातुरसगोत्राग्रहणं कृतं मनुना। उच्यते। सत्यमेवं तथापि दत्तपुत्री यस्य माता भवति सा च

---

* सवर्णाया एव।

† क्षणमात्रमिति पाठान्तरम्।

पुत्रिका कृता दत्तपुत्रीप्रतिग्रहीत्रा इयमेव मम पुत्रस्थानीयेति तदा तस्याः परिणेतुर्दत्तपुत्री प्रतिग्रहीतृसपिण्डा असपिण्डा भवतीति तत्र परिणयो मा प्रशांक्षीदिति चकारेण मातृसगोत्रा परिणेयेत्युच्यते।

उक्तञ्च दत्तिमाणां जनकगोत्रादिनिवृत्त्या अन्यगोत्रादिप्राप्तिर्मनुना।

गोत्रऋक्थे जनयितुर्न हरेद्दत्रिमः सुतः।

गोत्रऋक्थानुगः पिण्डो व्यपैति ददतः स्वधा॥ इति

एवं तर्हि असपिण्डा च या मातुरिति न वक्तव्यम्। चकारलभ्यासगोत्राग्रहणेनैवासपिण्डाया अपि प्राप्तत्वाद्दाढ़म्। सापत्नमातृपितृकुलजासपिण्डा मातृसगोत्रापि भवति मातृसपिण्डा चेति तत्र विवाहप्राप्ताविदमुच्यते मातुरसपिण्डेति। तथा च सापत्नमातृसपिण्डेष्वपि मातुलादिव्यवहारं दर्शयति सुमन्तुः।

पितृपत्नाः सर्व्वा मातरस्तद्भ्रातरो मातुलास्तद्दुहितरश्च भगिन्यस्तदपत्यानि भागिनेयानि* अन्यथा सङ्करकारिकाः स्युरिति।

असगोत्रा च या पितुरित्यत्र चकारेण पितुरसपिण्डाया ग्रहणं न कर्त्तव्यम्। असगोत्रपदेनैव लभ्यत्वादुच्यते। यस्य पिता दत्तिमपुत्रस्तस्य दत्तिमस्य यज्जनककुलं तत्र जाता परिणेतृ-

---

* तात्रापिवाक्या. अन्यथा सङ्करकारिण्यस्तथाभ्यापपितुरेतदेवेतीति पाठान्तरम्।

पितुरसगोत्रा दानेन जनकगोत्रनिवृत्तेरुक्तत्वात्। एवंविधाया मातुरसगोत्रायां विवाहप्रसक्तौ चकारेणेवमुच्यते पितुरसपिण्डा ग्राह्येति। यद्येवं नाभविष्यदसगोत्रा च यात्मन इत्येवावक्ष्यत्। तस्मान्मातुरसपिण्डा असगोत्रापि पितुरसपिण्डा असगोत्रा च परिणेयेति सिद्धम्। यवीयसीं वयसा प्रमाणेन च। अरोगिणीमचिकित्सनीयव्याधिरहितां स्मार्तमतीं पुत्रिकाकरणशङ्कानिवृत्तये।

अत्र मनुः।

यस्यास्तु न भवेद्भ्राता न विज्ञायेत वै पिता।
नोपयच्छेत तां प्राज्ञः पुत्रिकाधर्मशङ्कयेति॥

यस्याः पिता पुत्रिकाकरणाभिप्रायवान् वेति न विज्ञायते तां नोपयच्छेत्यर्थः। एवञ्च यत्र शङ्का नास्ति तामुपयच्छेत्यर्थः उक्तो भवति। असमानार्षगोत्रजामुपेरिदमार्षं प्रवर इत्यर्थः। गोत्रं वंशपरम्पराप्रसिद्धम्। आर्षञ्च गोत्रञ्च आर्षगोत्रे समाने आर्षगोत्रे यस्य स तादृशस्तस्मादुत्पन्ना समानार्षगोत्रजा अनेवंविधा असमानार्षगोत्रजा। गोत्रं प्रवरश्च पृथक् पृथक् पर्य्युदासे निमित्तम्।

परिणीय सगोत्रान्तु समानप्रवरां तथा।
त्यागं कृत्वा द्विजस्तस्यास्ततश्चान्द्रायणं चरेत्॥

इति पार्थक्येन परिगणनात्त्यागश्चोपभोगस्यैव न तु तस्याः।

समानप्रवरां कन्यामेकगोत्रामथापि वा।
विवाहयति यो मूढ़स्तस्य वक्ष्यामि निष्कृतिम्॥

उत्सृज्य तां ततो भार्य्यां मातृवत्परिपालयेत् ।

इति शातातपस्मरणात् ।

तत्रापस्तम्बः ।

समानगोत्रप्रवरां कन्यामूढ्वोपगम्य* च ।

तस्यामुत्पाद्य चाण्डालं ब्राह्मण्यादेव हीयते ॥ इति ।

समानप्रवरस्वरूपञ्च बौधायन आह ।

एक एव ऋषिर्यावत्प्रवरेष्वनुवर्त्तते ।

तावत्समानगोत्रत्वमृते भृग्वङ्गिरोगणात् ॥

समानगोत्रत्वं समानप्रवरत्वमित्यर्थः ।

भृग्वङ्गिरोगणेषु विशेषमाह संग्रहकारः ।

पञ्चानां त्रिषु सामान्यादविवाहस्त्रिषु द्वये ।

भृग्वङ्गिरोगणेष्वेव शेषेष्वेकोऽपि वारयेत् ॥ इति ।

पञ्चार्षेयाणामृषित्रयानुवृत्तौ† न मिथो विवाहस्त्यार्षेयाणा-
मृषिद्वयानुवृत्तौ न शेषेष्वेकानुवृत्तौ न विवाह इत्यर्थः ।

बौधायनोऽपि ।

द्व्यार्षेय‡सन्निपातेऽविवाहस्त्यार्षेयाणां त्र्यार्षेय§सन्नि-
पातेऽविवाहः पञ्चार्षेयाणामिति ।

---

* समुद्वाह्योपगम्येति पाठान्तरम् ।

† पञ्चप्रवराणां प्रवरत्रयैक्ये न विवाहः, एवं परत्र ।

‡ द्व्यार्षे इति पाठान्तरम् ।

§ त्र्यार्षे इति पाठान्तरम् ।

सन्निपाते साम्य इत्यर्थः ।

गोत्रभेदेऽपि प्रवरैक्यमस्ति तद्यथा संकृतिपूतिमाषनखिड-शख्वशैवगवानां गोत्राणामाङ्गिरसगौरिवीतसांकृत्यत्रिप्रवरै-क्यम्* । तथा यास्कवाधूलमौनामौकानाङ्गोत्रभेदेऽपि भार्गव-वीतहव्यसावेतसेति प्रवरैक्यम् । एतेषां मिथो विवाहो मा भूदित्यसमानार्षग्रहणम् । यत्र तु प्रवरविकल्पो यथा आङ्गिर-साम्बरीषयौवनमान्धात्रम्बरीषयौवनाश्वेति, अत्रास्ति प्रवरभेदः न तु गोत्रभेदः, तन्निरासार्थं समानगोत्रग्रहणम् । एवं प्रवर-गोत्रयोः पृथक् पृथक् पर्य्युदासनिमित्तत्वं ज्ञेयम् ।

एवं साक्षात्परम्परया वा अवयवानुवृत्तेर्निर्मर्य्यादत्वात्सर्व्वत्र निषेधप्राप्ताववधिमाह याज्ञवल्क्यः ।

पञ्चमात्सप्तमादूर्द्ध्वं मातृतः पितृतस्तथा ।

मातृतः मातृकुले पञ्चमादूर्द्ध्वं पितृतः पितृकुले सप्तमादूर्द्ध्वं सापिण्ड्यं निवर्त्तते इत्यर्थः । पित्रादयः षट् सपिण्डाद्याः तस्यैव स्वपुत्रादयश्च षट् आत्मा च सप्तमः । तथा मात्रादय-श्चत्वारः आत्मा च पञ्चमः ।

सन्तानभेदेऽपि यतः सन्तानभेदस्तमादाय गणयेद्यावत् सप्तमो भवति पित्रादिबीजतो नियोगादिना या कुलान्तरे जाता तत्रापि ऊर्द्ध्वं सप्तमाज्जातायां विवाहः ।

---

* संकृति, पूतिमाष, नखिशख्वु, शैवगवानां प्रत्येकमाङ्गिरस, गौरिवीत, सां-कृत्यत्रिनामकप्रवरचतुष्टयम् ।

पितृबन्धुभ्यः सप्तमान्मातृबन्धुभ्यश्च पञ्चमादाह वशिष्ठः।

असमानार्षेयीमस्पृष्टमैथुनामवरवयस्कां सद्दशीं भार्यां विन्देत।

पञ्चमीं मातृबन्धुभ्यः सप्तमीं पितृबन्धुभ्य इति बन्धुशब्दोपादानादयमर्थो गम्यते। अन्यथा कुलादित्येव ब्रूयात्।

यच्च वशिष्ठेनोक्तम्।

पञ्चमीं सप्तमीञ्चैव मातृतः पितृतस्तथा। इति।

तत्सवर्णसापत्नमातृकुलविषयम्। ब्राह्मणादीनां क्षत्रियादिदारसमुत्पन्नपितृकुलविषयञ्च*। एकवा†वयवानुवृत्तेरभावादन्यत्र‡ सावर्ण्याभावाच्च।

यत्तु पैठीनसिराह।

पञ्च मातृतः सप्त पितृतस्त्रीनतीत्य मातृतः पञ्चातीत्य वा पितृत इति।

अत्र त्रीनतीत्येत्यादिकस्यायं विषयः। यस्य माता दत्तपुत्त्री तां यः प्रतिगृहीता पुत्त्रत्वेन स्वीकरोति तत्कुलम्। यस्य दत्तपुत्त्रः पिता तस्य दत्त्रिमस्य जनककुलञ्च§ एकवा¶वयवानु-

---

* ब्राह्मणादिः यदा स्वपितुः क्षत्रियादिपुत्त्रवंशे विवाहं करोति तदैव भवति।

† सपत्नीमातुः पितृवंशे।

‡ स्वपितृजातसमूढाविक्तादिवंशे।

§ दत्तकपुत्त्ररूपपितुः जनककुले पञ्चमीं परिहृत्य विवाहं कर्त्तुनर्हतीति।

¶ दत्तकपुत्त्रीरूपमातुः गृहीतृरूपपितृकुले।

वृत्तेरभावादन्यत्र* गोत्रानुवृत्तेरभावाच्च ।

यत्तु शङ्खवचनम् ।

यद्येकजाता बहवः पृथक्स्त्रीताः पृथक्जनाः ।

एकपिण्डाः पृथक्शौचाः पिण्डस्त्वावर्त्तते त्रिषु ॥ इति ।

अस्यार्थः† । एकस्माद्ब्राह्मणादेर्जाताः पृथक् भिन्नमातृजनाः पृथग्जनाः भिन्नजातीयास्ते एकपिण्डाः सपिण्डाः पृथक्शौचाः पिण्डस्त्वावर्त्तते त्रिषु त्रिपुरुषमेव सापिण्ड्यमिति । एतद्भिन्नजातीयसापत्नमातृकुलविषयम् । तत्रापकृष्टजातीयानामुत्तमजातीयविवाहप्राप्तिरेव नास्ति । अनुलोमतः प्राप्तिरस्ति तत्र त्रिषु पुरुषेष्वेव‡ सापिण्ड्यं युक्तम् । उत्कृष्टजातीयावयवसंयोगेतरजातीयावयवविपरिणामात् । एवं पूर्वोक्तगुणविशिष्टा परिणेयेत्युक्तम् ।

तत्र येषु विधिनिषेधेषु दृष्टगुणदोषौ§ न स्तः केवलं शास्त्रैकसमधिगम्यौ तौ । यथा असपिण्डा च या मातुरित्यत्र शास्त्रसमधिगम्यो गुणस्तदतिक्रमे च दोषोऽपि । अत्रातिक्रान्तशास्त्रस्य भार्यैव न सा भवति¶ । भार्यागम्यस्याहव-

---

* दत्तकपुत्ररूपपितृजनककुले ।

† अस्यायमर्थेति पाठान्तरम् ।

‡ त्रिपुरुषमेवेति पाठान्तरम् ।

§ अधिकाङ्गादिगुणदोषौ ।

¶ भार्यागम्यगुणस्तदतिक्रमे च दोषोऽपीति पाठान्तरम् । शास्त्रमुल्लङ्घ्य त्रिपिण्डकन्याविवाहे तस्या भार्यात्वमेव न भवति ।

नीयादिवत्संस्कारशब्दत्वात्* प्रायश्चित्तीयते च। तथाच पुत्रिकायाश्च न परिपूर्णं भार्य्यात्वं प्रदानाभावात्† तथा गोत्रमपि न निवर्त्तते। एवमासुरादिविवाहेष्वपि गोत्रानिवृत्तिः, अभ्रातेव पुंस एति प्रतीचीमिति मन्त्रलिङ्गाच्च न परिपूर्णं पुत्रिकाया भार्य्यात्वं व्याख्यातं निरुक्तकृता। अभ्रातृकेव पुंसः पितृनेत्यभिमुखी सन्तानकर्म्मणे पिण्डदानाय वेति।

वशिष्ठः।

अभ्रातृका पुंसः किं पितृलभ्येति प्रतीचीं न गच्छति पुत्रत्वमेति। यत्र पुनर्दृष्टगुणदोषदर्शनेन विधिनिषेधाभिधानं यथा हीनक्रियमित्यादिना न तदतिक्रमे भार्य्यात्वाभावः। किन्तु नियमातिक्रमात्प्रायश्चित्तमात्रं भवति। तथा प्रसिद्धश्रोत्रियकुलजा परिणेया।

तथाच याज्ञवल्क्यः।

दशपौरुषविख्याताच्छ्रोत्रियाणां महाकुलात्। इति।

मातृतः पञ्च पितृतः पञ्चेति दश।

एवं सर्व्वत्र प्राप्तापवादमाह स एव।

स्त्रीतादपि‡ न सञ्चारिरोगदोषसमन्वितात्।

---

* अग्नेर्यथा मन्त्रसंस्कृतत्वेन आहवनीयत्वं तथा मन्त्रसंस्कारेण भार्य्यात्वम्।

† प्रकृतदानाभावात्पुत्रिकाया गौणपुत्रत्वेन औरसपुत्रवद्गोत्रखत्वयोरानुभविकत्वादिति भावः।

‡ धनधान्यादिसङ्घादपि।

सञ्चारिणो रोगाः कुष्ठापस्मारादयः। मातृसापिण्ड्याभावेऽपि मातृसगोत्राया अपि पाचिकां निषेधो व्यासेन दर्शितः।

सगोत्रां मातुरप्येके नेच्छन्त्युद्वाहकर्म्मणि।

एके नेच्छन्तीत्यनेन पक्षे विवाहप्राप्तिर्दर्शिता।

अमुमेवार्थं हेतुपूर्व्वकं उत्तरार्द्धे स एवाह।

जन्मनाम्नोरविज्ञानादुद्वहेदविशङ्कितः॥

अत्र देशाचाराद्यवस्था विज्ञेया।

अथ वरलक्षणानि।

तत्र याज्ञवल्क्यः।

एतैरेव गुणैर्युक्तः सवर्णः श्रोत्रियो वरः।

यत्नात्परीक्षितः पुंस्त्वे युवा धीमाञ्जनप्रियः॥

एतैः कन्यागुणैः अनन्यपूर्व्वकत्वयवीयस्त्वभ्रातृमत्त्वव्यतिरिक्तैः * र्युक्तः सवर्णः उत्कृष्टवर्णोवा न हीनवर्णः श्रोत्रियः श्रुताध्ययनसम्पन्नः।

कात्यायनः।

उन्मत्तः पतितः कुष्ठी षण्ढश्चैव सगोत्रजः।

चक्षुःश्रोत्रविहीनश्च तथापस्मारदूषितः॥

वरदोषाः स्मृता ह्येते कन्यादोषाः प्रकीर्त्तिताः।

---

* लक्षणाभनन्यपूर्व्विकां कान्यामसपिण्डां यवीयसीमित्यादिवचने कन्याया ये गुणा उक्तास्तैः अनन्यपूर्व्वकत्वादित्रितयं त्यक्त्वा लक्षणत्वेकान्यासपिण्डत्वादिगुणैर्युक्तः इत्यर्थः।

नारदः।

परीक्ष्य पुरुषं पुंस्त्वे निजैरेवाङ्गलक्षणैः।
पुमांश्चेदविकल्पेन* स कन्यां लब्धुमर्हति॥
सुबद्धजत्रुजान्वस्थिसुबद्धांसशिरोधरः।
यस्यापि स्रवते रेतो ऋादिः† मूत्रञ्च फेनिलम्।
पुमान् स्याल्लक्षणैरेभिर्विपरीतस्तु षण्ढकः॥
अपत्यार्थं स्त्रियः सृष्टाः स्त्री क्षेत्रं बीजिनो नराः।
क्षेत्रं बीजवते देयं नाबीजी क्षेत्रमर्हति॥

अथ दारानुकल्पः।

तत्र मनुः।

सवर्णाग्रे द्विजातीनां प्रशस्ता दारकर्मणि।
कामतस्तु प्रवृत्तानामिमाः स्युः क्रमशोऽवराः॥

अवरा जघन्याः।

शूद्रैव भार्य्या शूद्रस्य सा च स्वा च विशः स्मृता।
ते च स्वा चैव राज्ञस्तु ताश्च स्वा चाग्रजन्मनः॥

अथ शूद्राविषये पक्षान्तराणि स चाह।

शूद्रावेदी पतत्यत्रेरुतथ्यतनयस्य च।
शौनकस्य सुतोत्पत्त्या तदपत्यतया भृगोः॥

---

* निःसंशयेन।

† कण्ठस्य पार्श्वयोरस्थिविशेषः।

‡ शब्दयुक्तम्।

शूद्राया वोढ़ा पततीति अत्रेरुतथ्यतनयस्य गौतमस्य च मतम्। अत एतयोर्मते शूद्राविवाह एव नास्ति। गौनकमते तु शूद्राविवाहान्न पातित्यं किन्तु सुतोत्पत्त्या, अतः शूद्रास्तुकाले नोपयच्छेदिति। एवञ्च ऋतुगमनप्रापकाणि अगमने दोषप्रापकाणि च वचनान्येतद्व्यतिरिक्तविषयाणि। भृगुमते तु न तत्र सुतोत्पत्तिरपि पातित्यहेतुः। अपि तु ब्राह्मण्यादिभार्यासु पुत्ररहितस्य केवलशूद्रापत्यत्वं पातित्यहेतुः। ततश्च ब्राह्मण्यादिष्वप्रसूतासु शूद्रास्तुतौ नोपगच्छेत्। तदपत्यतयेति तान्येव शूद्रायासुत्पन्नान्येव चापत्यानि यस्य स तदपत्यस्तस्य भावस्तदपत्यता। एष एवार्थो वचनान्तरेण स्पष्टीकृतः।

शिल्पेन व्यवहारेण शूद्रापत्यैश्च केवलैरिति।

अत्र वाक्यशेषः। कुलान्यकुलतां यान्ति इति।

यच्च मनुनैवोक्तम्।

न ब्राह्मणक्षत्रिययोरापद्यपि च तिष्ठतोः।

कस्मिंश्चिदपि वृत्तान्ते शूद्रा भार्योपदिश्यते॥ इति।

तत्प्रथमत एव शूद्रापरिणयनविषयम्। आपद्यपि हि तिष्ठतोः सवर्णामलभमानयोरित्यर्थः। एतद्वैश्यस्यापि नियतम्।

यतः स एवाह।

हीनजातिस्त्रियं मोहादुद्वहन्तो द्विजातयः।

कुलान्येव नयन्त्याशु ससन्तानानि शूद्रताम्॥ इति।

हीनजातिं शूद्राम्।

सवर्णालाभे तु क्षत्रियादिविवाहमाह पैठीनसिः।

अभावे कन्यायाः स्नातकव्रतश्चरेदपि वा क्षत्रियायान्तु
पुत्रानुत्पादयीत वैश्यायां वा शूद्रायां वेत्यन्ये इति।

सर्व्वात्मना* शूद्रापरिणयनिषेधमाह याज्ञवल्क्यः।

यदुच्यते द्विजातीनां शूद्रादारोपसंग्रहः।
नैतन्मम मतं यस्मात्तच्चात्मा जायते स्वयम्॥

एषु पक्षेषु यच्छाखीयस्मार्त्तो यः पक्ष आदृतस्तच्छाखीयस्यापि स एव पक्ष इत्येवंविधस्थितो विकल्पः†।

अथ दात्रनिरूपणम्।

तत्र याज्ञवल्क्यः।

पिता पितामहो भ्राता सकुल्यो जननी तथा।
कन्याप्रदः पूर्व्वनाशे प्रकृतिस्थः परः परः॥

सकुल्यो दायादः, दायादेष्वपि सन्निहित एवाधिकारी। प्रकृतिस्थः पातित्योन्मत्तादिदोषरहितः, अप्रकृतिस्थेन पित्रादिना कृतमप्यकृतमेव।

यथाह नारदः।

स्वतन्त्रोऽपि हि यत्कर्म्म कुर्य्यादप्रकृतिं गतः।
तदप्यकृतमेव स्यादस्वातन्त्र्यस्य हेतुतः॥

पितृत्वादिना स्वतन्त्रोऽपि सन्नप्रकृतिस्थत्वेन हेतुना परतन्त्रो

---

* सर्व्वप्रकारेण।

† एषु पक्षेषु शूद्राविवाहतदभावपक्षेषु। स्मार्त्तः स्मृत्युक्तः। विकल्पः शाखिभेदेन व्यवस्थितो विकल्पः।

भवति। तदीयकृतं वाग्दानादिकं कार्य्यमकृतमेव वेदितव्यं यदि तस्मिन्वरे पतनीयदोषा अचिकित्स्यरोगा वा भवेयुः, अभावे तु* तथैवोपरितनं कर्म्म† प्रकृतिस्थो निर्व्वर्त्तयेत्। दृष्टादृष्टदोषाभावात्। यद्यप्रकृतिस्थदत्ताया विवाहसंस्कारो निर्व्यूढस्तदा प्रधानकर्म्मणो निष्पन्नत्वेनाधिकारित्वमात्रवैकल्यात्तयापि न सर्व्वात्मना प्रत्यावर्त्तनीया कन्या, एवं तर्हि अनधिकारिणां कृतमकृतमेवेत्येतद्विरुध्येत सत्यं तद्विरोधपरिहाराय परिवेत्तृविवाह इवः‡ तां प्रत्याहृत्य§ पुनस्तस्मायैवाधिकारी दद्यात्। अत्र पुनर्विवाहोऽपि परिवेत्तृविवाहवद्विज्ञेयः।

तथाच नारदोऽपि दाढक्रममाह।

पिता दद्यात्स्वयं कन्यां भ्राता वानुमते पितुः।
मातामहो मातुलश्च सकुल्यो बान्धवास्तथा॥
माता त्वभावे सर्व्वेषां प्रकृतौ यदि वर्त्तते।
तस्यामप्रकृतिस्थायां दद्युः कन्यां स्वजातयः॥

सकुल्याः पितृपक्षीयाः, बान्धवा मातृपक्षीयाः, स्वजातीयाः ब्राह्मणादयः। यस्य वर्णस्य या कन्या तज्जातीया अधिकारिणी¶

---

* पतितत्वाचिकित्स्यरोगयोरभावे तु।

† वाग्दानोत्तरक्रियमाणप्रकृतदानादि कर्म्म इत्यर्थः।

‡ परिवेत्तृस्थले यथा आनत्यर्थं पुनर्दानम्।

§ प्रत्याहृत्य तद्दानस्वासम्यक्त्वेन तत्परिपाटीक्रममास्थाय।

¶ कन्यादाने इति शेषः।

इत्यर्थः। अस्मिन्वचने म्राचनन्तरं मातामहमातुलयोः क्रमेणाधिकारं प्रतिपद्येत, तदनन्तरं पितृबन्धूनामधिकारः प्रदर्शितः। अयञ्च क्रम औरसकन्यकाविषये पुत्रिकादिविषये च वेदितव्यः। पुत्रिकाप्यौरससमैव।

औरसो धर्म्मपत्नीजस्तत्समः पुत्रिकासुतः।

इति याज्ञवल्क्यस्मरणात्।

क्षेत्रजायान्तु क्रमान्तरमाह कात्यायनः।

स्वयमेवौरसीं दद्यात्पित्रभावे स्वबान्धवाः।

मातामहस्ततोऽन्यां हि माता वा धर्म्मजां सुताम्॥

अस्यार्थः। औरसीं पिता स्वयमेव दद्यात्पित्रभावे बान्धवाः पितृबान्धवा दद्युः। ततोऽन्यामौरसीव्यतिरिक्तां धर्म्मजां नियोगेन जातां क्षेत्रजान्तु पित्रभावे मातामहो दद्यात्। मातामहो दद्यादिति मातामहग्रहणं मातुलस्याप्युपलक्षणं अतस्तदभावे मातेति क्रमः। युक्तञ्चैतत्क्षेत्रजायां मातामहावयवप्राधान्यात्। एवञ्च मातामहादीनामौरसीपुत्रीदाने पितृबन्धुषु विद्यमानेष्वधिकारो नास्तीत्युक्तम्। तत्र च विषयविशेषे अपवादः श्रूयते।

दीर्घप्रवासयुक्तेषु पौगण्डेषु च बन्धुषु।

मातुलः समये दद्यादौरसीमपि कन्यकाम्॥

पौगण्डो व्यवहाराद्यसमर्थः। समये रजोदर्शनोचितसमयात्पूर्व्वकाले पूर्व्वोक्तसकलाधिकार्य्यभावे।

मनुः।

यदा नैव तु कश्चित्* स्यात्कन्या राजानमाव्रजेत्
अनुज्ञया तस्य वरं सवर्णं वरयेत्स्वयम् ॥

वरयेदित्यनुवृत्तौ नारदः ।

सवर्णमनुरूपञ्च कुलरूपवयःश्रुतैः† ।
सह धर्मं चरेत्तेन पुत्रांश्चोत्पादयेत्ततः ॥

पित्रादिषु सत्स्वपि कालविशेषे‡ विद्यत एव स्वयंवरः ।

यदाह बौधायनः ।

त्रीणि वर्षाण्यृतुमती काङ्क्षेत पितृगामनम् ।
ततश्चतुर्थे वर्षे तु विन्देत सदृशं पतिम् ।
अविद्यमाने सदृशे गुणहीनमपि§ ॥

यत्तु विष्णुनोक्तं ।

ऋतुत्रयमुपास्यैव¶ कन्या कुर्यात्स्वयंवरम् । इति तद्गुणवद्वरलाभे वेदितव्यम् ।

अत्र विशेषान्तरमाह मनुः ।

अलङ्कारं नाददीत पितृदत्तं स्वयंवरा ।
मातृदत्तं भ्रातृदत्तं स्त्रेयं स्याद्यदि तं हरेत् ॥

---

* अधिकारीति शेषः ।

† कुलसुत्कृष्टत्वादि, रूपं सौन्दर्यादि, वयः ज्येष्ठत्वादि, श्रुतं वेदविद्यादि वरुरूपं दानार्हम् ।

‡ रजोयोगानन्तरं चतुर्थवर्षे ।

§ विन्दित ।

¶ अव्ययानामनेकार्थत्वादुपास्येत्यर्थः ।

वरं प्रत्यपि स एवाह।

पित्रे न दद्याच्छुल्कन्तु कन्यामृतुमतीं हरन्।
स हि स्वाम्यादतिक्रामेदृतूणां प्रतिरोधनात्॥

यमः।

कन्या द्वादश वर्षाणि या प्रदत्तार्त्तवे गृहे*।
भ्रूणहत्या पितुस्तस्याः सा कन्या वरयेत्स्वयम्॥
एवं चोपगतां पत्नीं नावमन्येत्कदाचन।
न तु तां बन्धकीं† विद्यान्मनुः स्वायम्भुवोऽब्रवीत्॥

एवंविधायां बन्धकीत्वाभावो देशकालादिप्रतिबन्धाभावे सति। अन्यथा कालातिक्रमे दोषश्रवणात्।

तथाच बौधायनः।

दद्याद्गुणवते कन्यां नग्निकां धर्म्मचारिणीम्।
अपि वा गुणहीनाय नोपरुन्ध्याद्रजस्वलाम्॥

कुलीनाय‡ रूपादिगुणरहिताय§।

नग्निका च दर्शिता वायुपुराणे।

पश्यत्यलज्जा याङ्गानि कन्या पुरुषसन्निधौ।
योन्यादीन्नावगूहेत तावद्भवति नग्निका॥ इति।

अमरसिंहस्त्वन्यथा प्राह।

---

* या प्रदत्ता गृहे वसेदिति यत्रान्तरे पाठः।

† पुरुषसन्तुष्टदोषमोक्षौत्सुक्याम्।

‡ गुणवते इत्यस्यार्थमाह कुलीनायेति।

§ गुणहीनाय इत्यस्यार्थमाह रूपादीत्यादि।

नग्निकानागतार्त्तवा इति ।

अत्रिकश्यपौ ।

पितुर्गृहे तु या कन्या रजः पश्येदसंस्कृता ।
भ्रूणहत्या पितुस्तस्याः सा कन्या वृषली स्मृता ॥
यस्तु तां वरयेत्कन्यां ब्राह्मणो ज्ञानदुर्बलः ।
अश्राद्धेयमपाङ्क्तेयं तं विद्याद्वृषलीपतिम् ॥

संवर्त्तः ।

रोमकाले तु संप्राप्ते सोमोभुञ्जीत कन्यकाम् ।
रजःकाले तु गन्धर्व्वो वह्निस्तु कुचदर्शने ॥
तस्मात्तामुद्वहेत्कन्यां यावन्नर्त्तुमती भवेत् ।
विवाहस्त्वष्टवर्षायाः कन्यायाः स्मर्यते बुधैः ॥

कश्यपः ।

अष्टवर्षा भवेद्गौरी नववर्षा तु रोहिणी ।
दशवर्षा भवेत्कन्या अत ऊर्द्ध्वं रजस्वला ॥

एवं कन्यादाने अधिकारिणो निरूपिताः । साम्प्रतं दत्तायाः कन्यायाः क्वचित्प्रत्याहरणं निरूप्यते ।

तत्र याज्ञवल्क्यः ।

दत्तामपि हरेत्पूर्व्वाच्छ्रेयांश्चेद्वर आव्रजेत् ।

दत्तामपि हरेद्यदि पूर्व्वस्य पातकादिदोषापसृष्टत्वमितरस्य गुणयुक्तत्वं स्यात् । तच्च सप्तपदात्प्राग्द्रष्टव्यम् ।

यथाह नारदः ।

स्त्रीपुंसयोस्तु सम्बन्धाद्वरणं प्राग्विधीयते ।

वरणाद्ग्रहणं पाणेः सम्बन्धोऽयं त्रिलक्षणः।
तयोरनियतं प्रोक्तं वरणाद्दोषदर्शनात्॥
पाणिग्रहणिका मन्त्रा नियतं दारलक्षणम्।
तेषां निष्ठा च विज्ञेया विद्वद्भिः सप्तमे पदे॥ इति।

अस्यार्थः। स्त्रीपुंसयोः सम्भोगाहरणं प्राग्भवति। वरणात् पाणिग्रहणं, एवं सम्बन्धस्त्रिलक्षणः। वरणं पाणिग्रहणमुपभोगश्चेति त्रिविधः। गान्धर्व्वादिषु नायं क्रमः। तयोः कन्यावरयोरनियतमनियमः। हृतोऽपि न परिणीयते, वाग्दत्तापि न दीयते इत्येवंरूपः। तत्र हेतुर्व्वरणाद्दोषदर्शनादिति। वरणादूर्द्धं कन्यावरयोरन्योऽन्यं दोषदर्शनात्। अनेन च

विवाहादूर्द्धं नानियम इत्युक्तं भवति।

तत्र नियमे हेतुमाह।

पाणिग्रहणिका मन्त्रा इति।

तैर्मन्त्रैरुत्पादितसंस्कारयोर्न परित्याग इत्यर्थः।

पाणिग्रहणमन्त्रोत्पाद्यसंस्कारावधिमाह।

तेषामिति।

केचनास्मिन्वचने पाठान्तरं व्याख्यान्तरञ्च कुर्व्वते।

तद्यथा।

वरणाद्ग्रहणं पाणेः संस्कारो ह्यग्निलक्षणः।
तयोरनियतं प्रोक्तं वरणाद्दोषदर्शनात्॥

पाणिग्रहणे यः सोऽग्निलक्षणः संस्कारोऽग्निचिह्नितो होमादिनिष्पाद्यः संस्कारः। तयोर्वरणदानपाणिग्रहणयोर्मध्ये वरण-

मेव दोषदर्शनादनियतं, न पाणिग्रहणम्। तस्मादर्वाक् पतित्वानुत्पत्तिरिति।

यमोऽपि।

पाणिग्रहणसंस्कारात्पतित्वं सप्तमे पदे।

एवञ्च सप्तपदादर्वाक् परिणेतुमरणेऽपि न विधवात्वमवगम्यते।

उक्तञ्च वशिष्ठेन।

अग्निर्वाचा च दत्तायां म्रियेतार्द्धं वरो यदि।
न च मन्त्रोपनीता स्यात्कुमारी पितुरेव सा॥

सा पितुरेव न प्रतिग्रहीतुरित्यर्थः। सा च तद्भ्रातृभ्राय प्रदेया तदभावे तत्पौत्राय तदभावे अन्यस्मै। इदमपि लोकविहिष्टत्वादेशाचारानुसारेण भवति।

बलादपहृतायान्तु विशेषमाहतुर्यमवशिष्ठौ।

बलाद्यपहृता कन्या मन्त्रैर्यदि न संस्कृता।
अन्यस्मै विधिवद्देया यथा कन्या तथैव सा॥

बहुभ्यो वाग्दाने कात्यायनेनोक्तविशेषो द्रष्टव्यः।

अनेकेभ्यो हि दत्तायामनूढायान्तु यत्र वै।
वरागमश्च सर्व्वेषां लभेतादिवरम् तान्॥

सर्व्वेषां वराणामागमे सतीत्यर्थः। स च पूर्व्ववरो यदि दोषरहितो गुणवांश्च भवति।

वरयित्वा देशान्तरगमने नारदः।

प्रतिगृह्य च यः कन्यां वरो देशान्तरं व्रजेत्।
त्रीनृतून् समतिक्रम्य सा चान्यं वरयेद्वरम्॥

प्रतिगृह्य वरयित्वेत्यर्थः ।

प्रदाय शुल्कं गच्छेद्यः कन्यायाः स्त्रीधनं तथा ।
धार्य्या सा वर्षमेकन्तु देयान्यस्मै विशेषतः* ॥

अत्र विशेषमाह मनुः ।

कन्यायां दत्तशुल्कायां म्रियते यदि शुल्कदः ।
देवराय प्रदातव्या यदि कन्यानुमन्यते ॥

कुलादिरहितेभ्योऽपि कन्या प्रत्याहरणीयेत्याह वशिष्ठः ।

कुलशीलविहीनस्य षण्ढादिपतितस्य च ।
अपस्मारिविधर्म्मस्य रोगिणां वेशधारिणाम् ।
दत्तामपि हरेत्कन्यां स्वगोत्रोढ़ां तथैव च ॥

अत्र पुनर्विवाहादिविशेषस्तु पूर्व्वमेव निरूपितः ।

अदुष्टकन्यापरित्यागे विशेषमाह नारदः ।

प्रतिगृह्य तु यः कन्यामदुष्टामुत्सृजेद्वरः ।
विनेयः सोऽर्थदण्डेन कन्यां तामेव चोद्वहेत् ॥

कात्यायनः ।

वरदोषमनाख्याय पाणिं गृह्णाति यो नरः ।
याचनं च प्रकुर्व्वीत तद्दानं नाप्नुयात्तु सः ।
कन्यादोषेऽप्येवमेव दाता दण्ड्यो वरस्तथा ॥

---

* विधानत इति पाठान्तरम् ।

नारदः ।

नादुष्टां दूषयेत्कन्यां नादुष्टं दूषयेद्वरम् ।
दोषे सति न दोषः स्यादन्योऽन्यं त्यजतस्त्रयोः ॥

मनुः ।

विधिवत्प्रतिगृह्यापि त्यजेत्कन्यां विगर्हिताम् ।
व्याधितां विप्रदुष्टां च छद्मना चोपपादिताम् ॥

विप्रदुष्टामन्यगतभावां छद्मना अन्यकन्योपदर्शनेन । एवमुक्तलक्षणाय वरायोक्तलक्षणकन्या देयाधिकारिणेत्युक्तो विवाहः सप्रपञ्चः । सोऽपि ज्येष्ठानुक्रमेणेति शास्त्रनियमः ।

अत्र क्वचिदपवादविषये मनुः ।

जड़ान्धबधिरादीनां विवाहोऽस्ति यथोचितम् ।
विवाहासम्भवे तेषां कनिष्ठो विवहेत्तदा ॥
पितव्यपुत्रे सापत्ने परदारसुतादिषु ।
विवाहाधानयज्ञादौ परिवेदो न दूषणम् ॥

शातातपोऽपि ।

नाग्नयः परिविन्दन्ति न च दानतपांसि* च ।
न च श्राद्धं कनिष्ठस्य या च कन्या विरूपिका† ॥

अन्येऽपि विशेषा आवसथ्याधानप्रकरणे वक्ष्यन्ते ।

---

* न यज्ञा न तपांसि चेति पाठान्तरम् ।

† विकला या च कन्यकेति पाठान्तरम् ।

अथ विवाहभेदः।

तत्र मनुः।

यो यस्य धर्म्यो वर्णस्य गुणदोषौ च यस्य यौ।
तदः सर्व्वं प्रवक्ष्यामि प्रसवे च गुणागुणान्॥
ब्राह्मो दैवस्तथैवार्षः प्राजापत्यस्तथासुरः।
गान्धर्व्वो राक्षसश्चैव पैशाचश्चाष्टमोऽधमः॥

ब्राह्मविवाहलक्षणं तत्सन्ततिफलञ्चाह

याज्ञवल्क्यः।

ब्राह्मो विवाह आहूय दीयते शक्त्यलङ्कृता।
तज्जः पुनात्युभयतः पुरुषानेकविंशतिम्॥

उभयतः पित्रादीन्दश पुत्रादीन्दश आत्मानं चैकमित्येकविंशतिं पुनाति। यद्वा उभयतो मातृतो दश पितृतो दश आत्मानञ्चेत्येकविंशतिम्।

यथा।

यज्ञस्थऋत्विजे दैव आदायार्षन्तु गोद्वयम्*।

यज्ञे प्रारब्धे कन्यामलङ्कृत्य यत्तर्त्विजे दीयते स दैवः। वराय देया मिथुनं वृषभं गाञ्च गृहीत्वा यथाशक्त्यालङ्कृता यत्र तस्मै दीयते स आर्षः। गोद्वयग्रहणं प्रदर्शनार्थम्।

यतः मनुः।

एकं गोमिथुनं द्वे वा वरादादाय धर्म्मतः। इति।

---

* गोयुगमिति क्वचित्पाठः।

एतन्नोमिथुनं पित्रादिश्चेद्गृह्णाति तदा विक्रय एव ।

तथाच मनुः ।

आर्षे गोमिथुनं शुल्कं केचिदाहुर्मृषैव तत् ।

अल्पोऽपि वा महान्वापि विक्रयस्तावदेव सः ॥ इति

कन्यार्थं यदि गृह्णाति तदा न दोष इत्याह

स एव ।

यासान्नाददते शुल्कं ज्ञातयो न स विक्रयः ।

अर्हणं तत्कुमारीणामानृशंस्यं हि केवलम् ॥

यच्छुल्कं कन्यार्थं तत्कुमारीणामर्हणं पूजनमानृशंस्यमपापिष्ठम्। तच्छुल्कं कन्यायै दद्यादित्यर्थः ।

दैवार्षयोः फलमाह याज्ञवल्क्यः ।

चतुर्दश प्रथमजः, पुनात्युत्तरजश्च षट् ।

प्रथमजो दैवविवाहजः, उत्तरज आर्षविवाहजः । सप्त पूर्व्वान् सप्तावरान् इति चतुर्दश । त्रीन् पूर्व्वान्त्रीनवरानिति षट्। पुनाति उभयत्र स्वस्य मध्यस्थितत्वादेव पवित्रता ।

तथा ।

इत्युक्त्वा चरतां धर्म्मं सह या दीयतेऽर्थिने ।

सकायः पावयेत्तज्जः षट् षट् वंश्यान् सहात्मना ॥

सह धर्म्मं चरतामिति परिभाषणपूर्व्वकमलङ्कृता कन्या यत्र दीयते सकायः प्राजापत्यस्तस्यां जातः षट् पूर्व्वान् षट् परानात्मानं चेति त्रयोदश पावयेत् । अथवान्योऽर्थः आत्मना सह षट् पूर्व्वानात्मना सह षट् परानिति एकादश पावयेत् ।

तथा।

आसुरो द्रविणादानाद्गान्धर्व्वः समयान्मिथः।
राक्षसो युद्धहरणात्पैशाचः कन्यकाच्छलात्॥

आत्मार्थं द्रविणमादाय कन्यार्पणं स आसुरः, अस्य मानुष इत्यपि संज्ञा।

तथाच हारीतः।

शौल्केन मानुष इति।

कन्यावरयोरन्योऽन्यरागेण यः समयः त्वं मे भार्य्या त्वं मे पतिरिति स गान्धर्व्वः। समयपूर्व्वकमुपभोगोऽपि गान्धर्व्व-एव। युद्धहरणाद्राक्षसः चाक्ष इत्यभिधीयते।

यथाह हारीतः।

अलङ्कृतामभिजयः चाक्ष इति।

कन्यकाच्छलाच्छलनं छलः, कपटेन स्वापाद्यवस्थासु कन्यकाया-श्छलेनोपहरणं पैशाचो विवाहः। कन्यकां छलादित्यपि पाठः। न चासुरादिविवाहेषु सप्तपादातिक्रमणाभावात्पतित्वभार्य्या-त्वयोरनुत्पत्तिरित्याशङ्कनीयम्। तत्रापि स्वीकारानन्तरमेव संस्कारविधानात्।

तथाच देवलः।

गान्धर्व्वादिविवाहेषु पुनर्वैवाहिको विधिः।
कर्त्तव्यश्च त्रिभिर्वर्णैः समयेनाग्निसाक्षिकः॥

गन्धर्वपरिशिष्टेऽपि।

गान्धर्व्वासुरपैशाचो विवाहो राक्षसश्च यः।

पूर्व्वं परिणयस्तेषां ततो होमो विधीयते ॥

परिणयः स्वीकारादि ।

एवं स्थिते वर्णव्यवस्थया विवाहनियममाह

मनुः ।

षड़ानुपूर्व्या विप्रस्य क्षत्रस्य चतुरोऽवरान् ।

विट्शूद्रयोस्तु तानेव विद्याद्धर्म्यानराक्षसान् ॥

अस्यार्थः । ब्राह्मादीन् षड़ानुपूर्व्या क्रमेण ब्राह्मणस्य धर्म्यान् धर्म्यादनपेतान्विद्यात्, ते च षट् ब्राह्मो दैव आर्षः प्राजापत्य आसुरो गान्धर्व्वश्चेति ।

यत्तु कश्यपेनोक्तम् ।

क्रीता द्रव्येन या नारी न पत्नी सा विधीयते ।

न सा दैवे न सा पित्रे दासीं तां कश्यपोऽब्रवीत् ॥ इति तदुच्यमाणप्राक्तविवाहासम्भवे सति द्रष्टव्यम् । क्षत्रस्य अवरान् पश्चादुक्तानासुरगान्धर्व्वराक्षसपैशाचान्धर्म्यान् जानीयात् विट्शूद्रयोस्तु अराक्षसाराक्षसवर्ज्जितान्तानेवासुरादिपैशाचान्तान्धर्म्यान्विद्यात् । केचनैवं व्याचक्षते—षट् ब्राह्मादिगान्धर्व्वान्तान्विप्रस्य, क्षत्रस्य प्राजापत्यादिराक्षसान्तांश्चतुरः । विट्शूद्रयोस्तु आसुराराक्षसादीन् प्राजापत्यादीन्तानेव धर्म्यान्विद्यात् । पैशाचपरित्यागे च हेतुमप्युपदिशन्ति ।

हेतुश्च नारदमनुवचने ।

चत्वारो ब्राह्मणस्याद्याः शस्ता गान्धर्व्वराक्षसौ ।

राज्ञस्तथासुरो वैश्ये शूद्रे चान्यस्तु गर्हितः ॥

स पापिष्ठो विवाहानां पैशाचः कथितोऽष्टमः । इति ।

एषामपि मध्ये प्रशस्तानाह मनुः ।

चतुरो ब्राह्मणस्याद्यान् प्रशस्तान् कवयो विदुः ।

राक्षसं क्षत्रियस्यैकमासुरं वैश्यशूद्रयोः ॥

अयमर्थः । ब्राह्मो दैव आर्षः प्राजापत्यश्चेति चतुरो ब्राह्मणस्य प्रशस्तानाहुः । क्षत्रियस्यैकं राक्षसमेव प्रशस्तं, वैश्यशूद्रयोः आसुरमेव । ब्राह्मणस्य ब्राह्मादिप्राजापत्यान्तो मुख्यः कल्पः, राक्षसोऽनुकल्पः अनन्तरक्षत्रधर्म्मत्वात्* । क्षत्रस्य राक्षसो मुख्यः चतुरोऽवरानित्यत्र मते† आसुरगान्धर्व्वराक्षसपैशाचा इति चत्वारः‡ । एतन्मते§ आसुरगान्धर्व्वपैशाचोऽनुकल्पः¶ । यन्मते तु‖ प्राजापत्यादयश्चत्वारः प्राजापत्यासुरगान्धर्व्व-राक्षसा इति, तन्मते तु प्राजापत्यादयस्त्रयोऽनुकल्पः । तथा वैश्यशूद्रयोरासुरो मुख्यः कल्पः, गान्धर्व्वपैशाचावनुकल्पः प्राजापत्यगान्धर्व्वौ वा ।

---

* राक्षसं क्षत्रियस्यैकमित्यनेन अव्यवधानेन धर्म्मज्ञापनायैव क्षत्रियपदस्य निर्द्दिष्टत्वात् ।

† षड़ानुपूर्व्व्या विप्रस्य चत्रस्य चतुरोऽवरानिति वचनानुसरणे ।

‡ प्रशस्ता इति शेषः ।

§ एतद्वचनानुसरणेऽपि ।

¶ क्षत्रियस्यैकमिति एकपदनिर्द्देशादेते विवाहा अनुकल्पएवेति युक्तम् ।

‖ यन्मते अवरानिति अकारप्रश्लेषरहितपाठानुसरणे तु ।

एवं स्थिते ब्राह्मणस्यापत्कल्पमाह

मनुरेव ।

पञ्चानान्तु त्रयो धर्म्म्या द्वावधर्म्म्यौ स्मृताविह ।
पैशाचआसुरश्चैव न कर्त्तव्यौ कदाचन ॥

प्राजापत्यासुरगान्धर्व्वराक्षसपैशाचानां मध्ये त्रयः प्राजापत्यगान्धर्व्वराक्षसाः । अधर्म्म्यौ तावेव दर्शयति पैशाचआसुरश्चेति । मुख्यकल्पमध्ये* परिगणितस्यापि प्राजापत्यस्यापकल्पमध्यपरिगणन†मार्षापेक्षया प्राजापत्यस्यापकृष्टताद्योतनार्थं पुनरुक्तरजश्च षड्त्यार्षविवाहजापेक्षया सकायः पावयेत्सप्त षट् षट् वंशान् सहात्मनेति प्राजापत्यविवाहस्याधिक्यश्रवणात्प्राजापत्यस्याधिक्यं द्योतयति तस्मा भूदिति ।

क्षत्रियस्यापत्कल्पमाह ।

पृथक् पृथग्वा मिश्रौ वा विवाहौ पूर्व्ववेदिनौ ।
गान्धर्व्वो राक्षसश्चैव धर्म्म्यौ क्षत्रस्य तौ स्मृतौ ॥

पृथक् पृथक् मुख्योऽनुकल्पश्चेति व्यवस्थितविकल्पत्वेनाभिहितः, तत्र पूर्व्वोक्तविवाहौ यदि मिश्रौ भवतः स मिश्रविवाह उच्यते । मिश्रविवाहमेवोदाहृत्य दर्शयति गान्धर्व्वो राक्षसश्चेति । यथा प्रथमं गान्धर्व्वेण परिगृह्य तद्बन्धुषु विरुद्धेषु युद्धेन हरणमेतच्च प्रदर्शनार्थं अतश्चानेनैव न्यायेन वर्णा-

---

* चत्वारो ब्राह्मणस्याद्या इति वचनेनेति शेषः ।

† पञ्चानान्तु त्रयो धर्म्म्या इति वचनेनेति शेषः ।

न्तराणामप्यूहनीयम्। वैश्यशूद्रयोरप्यापत्कल्पेऽतिनिन्दितोऽपि पैशाचो ग्राह्यः। तथा वैश्यशूद्रवृत्तेरपि विप्रादेः।

तथाच वत्सः।

सर्व्वोपायैरसाध्या स्याद्युक्तन्या पुरुषस्य वै।
चौर्य्येणापि विवाहेन सा विवाह्या रहःस्थिता॥ इति।

चौर्य्येण पैशाचेन।

सकलविवाहोपयोगविशेषो यज्ञपार्श्वेनोक्तः।

विवाहे विततेतन्त्रे होमकाल उपस्थिते।
कन्याया ऋतुरागच्छेत्कथं कुर्व्वन्ति याज्ञिकाः॥
स्नापयित्वा तु तां कन्यामर्च्चयित्वा यथाविधि।
युञ्जान* आहुतिं दत्त्वा† ततस्तन्त्रं‡ प्रवर्त्तयेदिति॥

याज्ञवल्क्येनाप्यन्यो विशेषो दर्शितः।

पाणिर्ग्राह्यः सवर्णासु गृह्णीयात्क्षत्रिया शरम्।
वैश्या प्रतोदमादद्याद्दिने त्वग्रजन्मनः॥

स्त्री शरादिकं गृह्णाति तत्पाणिस्थितञ्च वरो गृह्णीयादित्यर्थः। अग्रजन्मन इत्युत्कृष्टोपलक्षणम्।

तथाच मनुः।

वसनस्य दशा ग्राह्या शूद्रयोत्कृष्टवेदन इति।

---

* विप्रः।

† हुत्वा चाज्याहुतीस्त्रीणेति यज्ञान्तरीयपाठः।

‡ वैवाहिकहोमादिकम्।

विधवानियोगो नात्र विचारसरणि*मारोपितो युगान्तर-विषयत्वात् ।

विवाहे वर्षमासादिशुद्धिर्ज्योतिःशास्त्रेऽभिहिता ।

सिंहस्थं मकरस्थञ्च गुरुं यत्नेन वर्ज्जयेत् ।
सिंहस्थे तु मघासंस्थं गुरुं यत्नेन वर्ज्जयेत् ॥
अन्यत्र सिंहभागे तु विवाहादि विधीयते ।

मनुः ।

नर्म्मदापूर्व्वभागे तु शोणस्योत्तरदक्षिणे ।
गङ्गाया: पश्चिमे पारे मकरस्थो न दोषभाक् ॥

ज्योतिःसारसागरे ।

अतिचारगतो जीवः स्वं राशिं नैति चेद्यदि ।
लुप्तसंवत्सरो ज्ञेयः सर्व्वकर्म्मबहिष्कृतः ॥
माघफाल्गुनवैशाखज्यैष्ठाषाढ़मृगाह्वया:† ।
षड़ेते पूजिता मासाश्चातुर्व्वर्ण्यस्य नित्यशः ॥
मार्गे मासि तथा ज्यैष्ठे चौरं परिणयं व्रतम् ।
ज्येष्ठपुत्रदुहित्रोस्तु यत्नेन परिवर्ज्जयेत् ॥
श्रेष्ठं पक्षमुशन्ति शुक्लमसितस्याद्यं त्रिभागं‡ तथा
रिक्तां प्रोह्य तिथिं तथर्त्वयनयोः सन्धिञ्च शेषाः शुभाः ।

---

* विचारपथम् ।

† मार्गशीर्षः ।

‡ कृष्णपञ्चमीपर्य्यन्तम् ।

अमायाञ्चैव भद्रायां* करणे विष्टिसंज्ञिते ।
यः करोति विवाहं स शीघ्रं याति यमालयम् ॥
प्रतिपद्दुःखजननी द्वितीया प्रीतिवर्द्धिनी ।
सौभाग्यदा तृतीया स्याच्चतुर्थी चार्थनाशिनी ॥
पञ्चम्यां सुखवित्तानि षष्ठी विघ्नप्रदा मता ।
विद्याशीलसुखानिः स्यात्सप्तम्यामफलाष्टमी ॥
नवमी शोकभयदा आनन्दो दशमीदिने ।
सुखदैकादशी ज्ञेया द्वादशी सफला स्मृता ।
मानपुत्त्री त्रयोदश्यां चतुर्दश्यौ† तु दोषदे ॥
फलं बहुविधं ज्ञेयं पञ्चदश्यां‡ विशेषतः ।
न चेह शुक्लप्रतिपदुदयन्ती निषिध्यते ॥
अत्रापि कृष्णपक्षस्य दशमीं ह्यविवाहिकीम् ।
वदन्त्यन्ये तु दशमीमुभयोरविवाहिकीम् ॥
गुरुशुक्रेन्दुपुत्राणां दिनेषु परिणीयते ।
या कन्या सा भवेन्नित्यं भर्तुश्चित्तानुवर्त्तिनी ॥
अर्कार्किभौमवाराणां दिनेषु कलहप्रिया ।
सापत्न्यं समवाप्नोति तुषारकरवासरे ॥

तत्र दिनेत्यभिधानाद्रात्रावभ्यनुज्ञा गम्यते ।
तथाच स्मरन्ति ।

---

* विष्टिभद्रायाम् ।
† शुक्लौ च ।
‡ पौर्णमास्याम् ।

न वारदोषाः प्रभवन्ति रात्राविति ।
यावज्जीवन्तु कन्या सा भर्त्रा सह वियुज्यते ।
दुःखं पश्चादामरोगैरश्विन्यां याति पञ्चताम् ॥
याम्ये* षड्भिर्मासैर्वैधव्यं याति निर्धनत्वञ्च ।
धनकनकभूषणयुता पाणिग्रहणे तु कृत्तिकायाञ्च ॥
पश्चात् षष्ठेऽब्दे याति पञ्चत्वम् ।
प्राजापत्ये† सुभगा पतिव्रता भामिनी प्रिया भर्त्तुः ।
शुचिरनुकूला भर्त्तुः प्रियंवदा सौमदैवते‡ कन्या ॥
आर्द्रापाणिग्रहणे वर्षेणैकेन याति पञ्चत्वम् ।
त्रिभिरब्दैरादित्ये§ कन्या समुपैति पतिमन्यम् ॥
अब्दचतुष्कात्कन्या कुलविद्वेषिणी भवति पुष्ये ।
अश्लेषास्वपि कन्या पाणिग्रहणे समेत्य भर्त्तारम् ॥
सप्तभिरब्दैर्दुष्येत्¶ अथ कुलटात्वं समाप्नोति ।
भवति त्रिवर्गयुक्ता‖ पित्र्ये** पाणिग्रहे हि सम्प्राप्ते ॥
भाग्ये†† सत्यसौभाग्यं दासीत्वं याति निर्भया कन्या ।

---

* भरण्याम् ।

† रोहिण्याम् ।

‡ मृगशिरसि ।

§ पुनर्व्वसौ ।

¶ हन्यादिति पाठान्तरम् ।

‖ धर्म्मार्थकामयुक्ता ।

** मघासु ।

†† पूर्व्वफल्गुन्याम् ।

अब्दैकेऽतिक्रान्ते पतिमरणं प्राप्नुयाच्चैव ॥
व्यपगतशोका सुभगा भोगवती सुप्रजा प्रिया भर्तुः ।
अर्य्यम्णि* शशियुक्ते कन्या वर्षद्वयेनेतीति† ॥
हस्ते पाणिग्रहणं समेत्य कन्या पतिव्रता नित्यम् ।
आत्मप्राणवियोगमवाप्नुयात्कन्यका चाब्दात् ॥
अथवा शीलभ्रंशं त्वाष्ट्रे‡ प्राप्नोति बान्धवकुलात् ।
स्वातौ धर्म्मसमेता पतिदयिता बन्धुवल्लभा साध्वी ॥
ऐन्द्राग्न्याख्ये§ कन्या बुद्धिभ्रष्टा प्रयाति पतिमन्यम् ।
अब्दचतुष्केऽतीते, मैत्रे¶ कन्याप्नुयाद्धनं सौख्यम् ॥
भर्त्तुरवज्ञां कृत्वा दुःखान्यनुभूय शक्रभे‖ कन्या ।
दशमेऽब्दे वैधव्यं प्रयाति यद्यष्टमे न मृता ॥
मूले सधना साध्वी पत्युरतिप्रियतमा प्रहृष्टा च ।
अशुचिरनाचारा दासरतान्यथा** समेति भर्त्तारम् ॥
अब्दद्वयेन कन्या ज्ञेया सा पूर्वाषाढ़ासु ।
विदधाति वैश्वदैवे†† भर्तुर्वित्तञ्च गुरुजनानुरता ॥

---

* उत्तरफल्गुन्याम् ।
† अतीति इति पाठान्तरम् ।
‡ चित्रायाम् ।
§ विशाखायाम् ।
¶ अनुराधायाम् ।
‖ ज्येष्ठायाम् ।
** अन्यप्रकारम् ।
†† उत्तराषाढानक्षत्रे ।

पाणिग्रहणमुपयाते श्रवणे नैकत्र सा रमते ।
विभ्रष्टस्मृतिशौचा मृत्युमुखं याति वसुदैवे* ॥
ईर्षारोगेण हता यमसदनं याति वारुणे† पश्चात् ।
आजैकपादे‡ कन्या दुःशीला दुर्भगा दरिद्रा च ॥
अहिब्रध्ने§ कन्या मणिकनकविभूषणं प्रभूतमाप्नोति ।
प्राप्नोति शीलं शौचं पौष्णे¶ शय्यासनोपकरणानि ॥
वैधृतिके परिणीता कन्या विकलेन्द्रिया, व्यतीपाते ।
विद्याभरणं नित्यं सुभगा षट्स्वपि वरेषु‖ करणेषु ॥
ध्रुवकरणैः शकुनाद्यैः पाणिग्रहणाद्ध्रुवं मृत्युः ।
दुष्टपूर्वमपहाय दिनार्द्धभागं
विष्टिप्रदुष्टमपि नष्टविधुं** तिथिञ्च ।
शेषाः शुभा अशुभास्तथान्ये
पूर्वोक्तमत्र सकलं हि विचिन्तनीयम् ॥
शनैश्चरदिने प्राप्ते यदि रिक्ता तिथिर्भवेत् ।
तस्मिन्विवाहिता कन्या पतिसन्तानवर्द्धिनी ॥

---

* धनिष्ठायाम् ।
† शतभिषायाम् ।
‡ पूर्वभाद्रपदनक्षत्रे ।
§ उत्तरभाद्रपदनक्षत्रे ।
¶ रेवत्याम् ।
‖ श्रेष्ठेषु । ववेषु पाठे ववप्रभृतिषु ।
** चन्द्ररहितममावास्याम् ।

मेषे कुमारेष्वनुरक्तचित्ता
विहीनवित्ता गवि, गोव्रता च।
कुलद्वयानन्दकरी तृतीये
कुलीरलग्ने कुलटा नृशंसा॥
हरौ† प्रसूता सुकृताश्रिता पितुः
पितुः प्रिया च श्वशुरस्य षष्ठे‡।
रूपाभिमानार्थवती तुलाधरे
तथालिनि क्रन्दति नित्यमस्थिरा॥
धनुषि कुलटा तत्पूर्व्वार्द्धे सत्यपरे§ जगुः।
मृगघटझषेष्वन्यासक्ता जरामुपगच्छति॥
पञ्च पाणिग्रहे दोषा वर्ज्जनीयाः प्रयत्नतः।
दारिद्र्यं मरणं व्याधिः पुंश्चल्यमनपत्यता॥ इति।

तथा गुरुशुक्रास्तादिष्वपि विवाहादिनिषेधो ज्योतिःसार-सागरे।

बाले शुक्रे हृडे शुक्रे जीवे नष्टे हृडे जीवे।
बाले जीवे जीवे सिंहे जीवादित्ये सिंहादित्ये॥
तथा मलिम्लुचे मासि सुराचार्य्येऽतिचारगे।

---

* वर्षेषु।

† सिंहलग्ने।

‡ कन्यालग्ने।

§ समस्तधनुर्लग्ने दोषः, अपरसते धनुःपूर्व्वार्द्धभावे।

¶ मकरकुम्भमीनलग्नेषु।

वापीकूपतड़ागादि*क्रियाः प्रागुदितास्त्यजेत् ॥

अस्तादिलक्षणं ब्रह्मसिद्धान्ते ।

रविणा सन्धिरन्येषां ग्रहाणामस्त उच्यते ।
अर्वागूर्द्धमवस्था स्यान्मौढ्याद्दार्ढ्यकृद्यवे ॥ इति ।

बालवृद्धयोरवधिर्दामोदरीये ।

प्राग्बालो दिवसत्रयं दशदिनं पश्चात्स्थितो वृद्धताम्
पक्षे वासरपञ्चके च लभते पक्षे गुरुः सर्व्वतः ।
तत्पश्चाद्गुरुशुक्रयोर्विमलयोः कुर्य्याद्विवाहं सिते
कृष्णे वासरपञ्चकञ्च शिववन्न स्याद्दशाहः परः ॥ इति ।

वार्हस्पत्ये तु ।

प्राक् पश्चादुदितः शुक्रः पञ्च सप्तदिनं शिशुः ।
विपरीतस्तु वृद्धत्वं तद्वदेव गुरोरपीति ॥

अत्र देशभेदेन आपदा च व्यवस्थामाह गार्ग्यः ।

शुक्रो गुरुः प्रागपरार्ककालो†
विन्ध्ये दशावन्तिषु सप्तरात्रम् ।
वङ्गेषु म्लेच्छेषु‡ च षट् च पञ्च
शेषे च देशे त्रिदिनं वदन्ति ॥ इति ।

---

* विवाहादीति पाठान्तरम् ।

† शुक्रीगुरुश्च चेत् प्राक् पूर्व्वस्यां दिशि अपरस्मिन् पश्चिमस्यां दिशि अर्ककालः अर्केण सूर्य्येण युक्तः सन् बालत्वादि प्राप्नुतदा तन्निमित्तकालः अकालः ।

‡ म्लेच्छदेशविशेषेषु यथा -- खपाकश्च तुरष्कश्च यवनीयवन इत्यपि ।

अस्मिन्वचने येऽधिककालास्ते देशभेदेन व्यवस्थिता इति न विरोधः ।

मिहिरोऽपि ।

बहवो दर्शिताः काला ये बाल्ये वार्द्धकेऽपि वा ।
ग्राह्यास्तत्राधिकाः शेषा देशभेदात्तथापदेति ॥

इति विवाहविधिः ।

अथावसथ्याधानम् ।

आवसथ्यस्य गृह्यस्य अग्नेराधानमावसथ्याधानम् ।

तद्विवाहकाले चतुर्थीकर्म्मानन्तरं कुर्य्यात् । प्रयोगमध्ये प्रयोगान्तरकरणाधिकाराभावाद्वैवाहिकोऽग्निरेव औपासनाग्निरित्याश्वलायनादीनां पक्षः, दायाद्यकाले आवसथ्याधानम् इत्येकेषां मतम् । दायाद्यकालो नाम भ्रातॄणां पित्र्यधनस्य विभागकालः । अविभक्ते पित्र्यधने सर्व्वेषां भ्रातॄणां स्वत्वस्य साधारण्येन[1] विनियोगानर्हत्वात्* धनविनियोगसाध्य[2] मावसथ्यादिकर्म्मानुष्ठानमतो भ्रात्मतो विभक्तस्यैवाधानेऽधिकार इति तेषामभिप्रायः, अन्येषान्तु मते समुदितधनस्यापि स्वत्वमस्तीतरानुज्ञया विवाहकालो भवतीत्यभिप्रायः ।

तथा पारस्करः ।

---

1 साधारणधने एकस्य दानाद्यनधिकारात् ।

2 धनत्वयमाश्रित्य ।

आवसथ्याधानं दारकाले*वा दायकाल†एकेषामिति ।
व्यासोऽपि ।

अग्निर्वैवाहिको येन न गृहीतः प्रमादतः‡ ।
पितर्युपरते तेन ग्रहीतव्यः प्रयत्नतः ॥
यो गृहीत्वा विवाहाग्निं गृह्यः प्रतिमन्यते§ ।
अन्नं तस्य न भोक्तव्यं वृथापाको हि स स्मृतः ॥

एतच्च ज्येष्ठाधिकारिणो द्रष्टव्यम् । कनीयांस्तु ज्येष्ठे कृताग्नि-परिग्रहे विद्यमाने स्वयमध्ययनादिनिष्ठोऽग्निपरिग्रहमकुर्व्वन्नपि न प्रत्यवैति¶ ।

तथाच गर्गः ।

पित्रपाकोपजीवी वा भ्रात्रपाकोपजीवकः ।
ज्ञानाध्ययननिष्ठो वा न दुष्येताग्निना विना ॥

अध्ययननिष्ठ इति प्रथमाध्ययनपरम् । अत्र च ज्येष्ठे विद्यमाने न कनीयसामधिकारः ।

तथाच मनुश्चातातपौ ।

दाराग्निहोत्रसंयोगं कुरुते योऽग्रजे स्थिते ।

---

* विवाहकाले ।

† पित्रधनविभागकाले ।

‡ प्रमादिनेति पाठान्तरम् ।

§ परित्यजति ।

¶ अध्ययनादिकार्य्ये व्यापृतः ।

¶ प्रत्यवायी न भवति ।

परिवेत्ता स विज्ञेयः परिवित्तिस्तु पूर्वजः ॥

अग्रजस्य सोदर एव, अन्यमातृजो न ।

तथाह वशिष्ठः ।

पितृव्यपुत्रान् सापत्नान् परनारीसुतांस्तथा ।

दाराग्निहोत्रसंयोगो न दोषः परिवेदने ॥

परनारीसुता दत्तकादयः ।

अन्यमपि विशेषं छन्दोगपरिशिष्टे

कात्यायन आह ।

देशान्तरस्थक्लीवैकदृषणांश्चासहोदरान् ।

वेश्यानिष्ठान्त्य*पतितशूद्रतुल्यातिरोगिणः ॥

जड़मूकान्धबधिरकुब्जवामनखञ्जकान्† ।

अतिवृद्धानभार्य्यांश्च ऋषिसत्तान्नृपस्य च ॥

धनवृद्धिप्रसक्तांश्च कामतः कारिणस्तथा ।

कुटिलोन्मत्तरोगांश्च‡ परिविन्दन्न दुष्यति ॥

एतेषामाधानाद्यधिकाराभावादेव न दोष इत्यर्थः । देशान्तरस्थिते सोदरे वशिष्ठेन विशेषः कथितः ।

अष्टौ दश द्वादश वर्षाणि ज्येष्ठं भ्रातरमनिर्विष्टमप्रतीक्षमाणः प्रायश्चित्ती भवति ।

अनिर्विष्टमकृतविवाहाग्निहोत्रम् । कालविकल्पस्त्वेवं ज्ञेयः ।

---

* वेश्यानिरतेति देशान्तरीयपाठः ।

† कुब्जवामनेति पाठान्तरम् ।

‡ कुब्जटीमतनीरोगेति पाठान्तरम् ।

तत्र पुनः पुनः श्रूयमाणे सुप्रदेशे स्थिते द्वादश वर्षाणि, किञ्चित् श्रूयमाणे नातिसुप्रदेशस्थिते दश, नदीपर्व्वतचौराद्याकुलदूरतरदेशस्थिते अश्रूयमाणे वाष्टौ वर्षाणीति। यत्र ज्येष्ठोऽधिकार्य्यपि आधानं न करोति, तत्र तदनुज्ञया कनीयसा कर्त्तव्यम्।

यथाह सुमन्तुः।

ज्येष्ठभ्राता यदा तिष्ठेदाधानं नैव चाश्नुयेत्*।
अनुज्ञातस्तु कुर्व्वीत ग्रह्यस्य वचनं यथा॥

हृद्धवशिष्ठोऽपि।

अग्रजस्तु यदानग्निः प्रकुर्य्यादनुजः† कथम्।
अग्रजानुमतः कुर्य्यादग्निहोत्रं यथाविधि॥

हारीतोऽपि।

अधिकारिभ्रातुरनुज्ञापूर्व्वकमाधानमनुजानीते न विवाहम्।
सोदराणान्तु सर्व्वेषां परिवेत्ता कथं भवेत्।
दारैस्तु परिविद्यन्ते नाग्निहोत्रेण नेज्यया॥

पितृविषयेऽपि सुमन्तुः।

पित्रा यस्य तु नाधीतं कथं पुत्रः स कारयेत्।
अग्निहोत्रेऽधिकारोऽस्ति ग्रह्यस्य वचनं यथा॥

नाधीतमग्निरहित इत्यर्थः। अत्राप्यनुज्ञापूर्व्वकमित्यवगन्तव्यं

---

* कारयेदिति पाठान्तरम्।

† अधिकार्य्यनुज इति पाठान्तरम्।

समानन्यायत्वात्* ।

आधानार्थमग्निः कुतो ग्राह्य इत्याकाङ्क्षायां स्मृत्यन्तरे दर्शितम्।

आधानं विधिवद्वैश्यकुलाद्ब्राह्मादथापि वा ।
महानसादरघुत्याद्दारदायादकालयोः† ॥

वैश्यस्य पशुसमृद्धस्य गृहात्, महानसाद्बहुपाकवतो ब्राह्मणस्य महानसात् ।

तथाच कात्यायनः ।

वैश्याद्बहुपशोरम्बरीषाद्बहुयाजिनो ब्राह्मणस्येति ।

अरणिलक्षणं स्मृत्यन्तरेऽभिहितम् ।

अश्वत्थो यः शमीगर्भः प्रशस्तोर्वीसमुद्भवः ।
तस्य या प्राङ्मुखी शाखा चोदीची चोर्ध्वगाऽपि वा ।
अरणिस्तन्मयी ज्ञेया तन्मध्येवोत्तरारणिः ।
सारवद्वारवं चक्रमोविली च प्रशस्यते ॥

सारवद्बलवत्, खदिरादिदृढकाष्ठनिर्मितमित्यर्थः । चक्रं यस्मिन् काष्ठे रज्जुं वेष्टयित्वा भ्रमय्यते तत् । ओविली चक्रस्योपरि विलयुक्तं,§ तन्नियन्त्रणार्थं यद्दीयते तत् ।

संसक्तामूलो यः शम्याः शमीगर्भः स उच्यते ।
अलाभे त्वश्वशमीगर्भादुद्धरेद्विलम्बितः ॥

---

* ऊर्ध्वस्थल इव पितृस्थलेऽपि न्यायस्य तौल्यात् ।

† विवाहकाले विभागकाले च ।

‡ भर्त्रनुज्ञानात् ।

§ छिद्रयुक्तम् ।

चतुर्विंशाङ्गुला दीर्घा विस्तारेण षडङ्गुला ।
चतुरङ्गुलमुत्सेधा अरणिर्याज्ञिकैः स्मृता* ॥
मूलादष्टाङ्गुलं त्यक्त्वा अग्राच्च द्वादशाङ्गुलम् ।
ओविली द्वादशैव स्यादेतन्मन्थनयन्त्रकम् ॥†

प्रमन्थश्चस्याधोभागेऽरणिकाष्ठनिर्म्मितमग्निप्रमथनार्थं यद्दीयते स उच्यते। अधोभागे प्रमन्थकाष्ठसंबद्धचक्रस्योपरि ओविलीं निधाय चक्रं नेत्रेण वेष्टयित्वा प्रमथनं कुर्य्यात् ।

गोबालैः श्रणमिश्रैस्तु‡ त्रिवृत्तममलात्मकम् ।
व्यामप्रमाणं§ नेत्रं¶ स्यात्तेन मन्थो हुताशनः ॥
चक्रवह्नी प्रमन्थाग्रं गाढ़ङ्कृत्वा विचक्षणः ।

इत्यत्र नक्षत्रनियमश्च ज्योतिःशास्त्रे ।

उत्तरात्रितय‖पौष्ण**रोहिणीपौरुहूत††बहुला‡‡

---

* छन्दोगपरिशिष्टे तु चतुर्विंशतिरङ्गुष्ठदैर्घ्यं षडपि पार्श्विकम्। चत्वार उच्छ्रायमानमरण्याः परिकीर्त्तितमेवं पाठो दृश्यते ।

† अष्टाङ्गुलः प्रमथः स्याच्चक्रं स्याद्द्वादशाङ्गुलमिति छन्दोगपरिशिष्टपुस्तके विशेषपाठो दृश्यते ।

‡ श्रणसंमिश्रैरिति पाठान्तरम् ।

§ बाहुद्वयपरिमितम् ।

¶ मन्थनदण्डबद्धरज्जुः ।

‖ उत्तरफल्गुन्युत्तराषाढोत्तरभाद्रपत् ।

** रेवती ।

†† ज्येष्ठा ।

‡‡ कृत्तिका ।

द्विदैवतैः* पुष्यसोमांसहितैर्द्विजन्मनः स्याद्धुताशन-परिग्रहो हितः।

इत्यावसथ्याधानम्।

अथोपासनस्य चोपासनम्।

कुत आरभ्येत्याकाङ्क्षायामाह

पारस्करः।

उदयप्रभृतीनि।

अथ स एव कालनियममाह।

अस्तमितानुदितयोरिति।

अस्तमितञ्च अनुदितञ्च अस्तमितानुदिते तयोः।

अस्तमितलक्षणं छन्दोगपरिशिष्टे।

यावत्सम्यक् न भाव्यन्ते† नभस्यृक्षाणि सर्व्वतः।
न च लौहित्यमायाति तावत्सायञ्च ह्नयते॥

अनुदितस्य तु द्वैविध्यं, अनुदितः समयाध्युषितश्च।

तथाच मनुः।

उदितानुदिते चैव समयाध्युषिते तथा।
सर्व्वथा वर्त्तते यज्ञ इतीयं वैदिकी श्रुतिरिति॥

अनुदितसमयाध्युषितलक्षणमाह

---

* विशाखः।

† मृगशिराः।

‡ न ऋक्षाभवन्ति।

कात्यायनः ।

रात्रेः षोड़शमे भागे ग्रहनक्षत्रदूषिते* ।
कालस्त्वनुदितं ज्ञात्वा होमं कुर्य्याद्विचक्षणः ॥
तथा प्रभातसमये नष्टे नक्षत्रमण्डले ।
रविर्यावन्न दृश्येत समयाध्युषितं चरेत्† ॥
रेखामात्रञ्च दृश्येत रश्मिभिश्च समन्वितः ।
उदितं तं विजानीयात्तत्र होमं प्रकल्पयेत् ॥

तत्र वाजसनेयिनां नियमेनानुदितहोमः । सूर्य्ये हवा अग्निहोत्रमित्यारभ्य तस्मादुदितहोमिनां विच्छिन्नमग्निहोत्रमहरिति । उदितहोमनिन्दापूर्व्वकमनुदितहोमसमर्थनात्, तथा तत्समानतन्त्राणां छन्दोगादीनामपि, आश्वलायनादीनामुदितहोमः । तथा तैत्तिरीयके ब्राह्मणे अनुदितहोमे निन्दा श्रूयते ।

प्रातः प्रातरनृतं ते वन्दिपुरोदयः । जुह्वति ये चाग्निहोत्रं दिवाकीर्त्यमदिवा कीर्त्तयन्तः सूर्य्यज्योतिर्न तदा ज्योतिरेषामिति ।

होमद्रव्याणि च स्मृत्यन्तरे प्रदर्शितानि ।

दर्भाक्षतण्डुलैरक्षतैर्वा तदभावे श्यामाक, नीवार, वेणु, यव, कन्द, मूल, फलादीनि इति । तण्डुलग्रहो व्रीहियवोपलक्षणार्थः ।

---

* भूषिते इति पाठान्तरम् ।

† समयाध्युषितश्च स इति पराशरमाधवे पाठः ।

अतएव श्रुतौ ।

व्रीहिभिर्यजेत यवैर्व्वा यजेत वा ।

वेणुयवा वेणुवीजानि ।

आहुतिपरिमाणञ्च स्मृत्यर्थसारे ।

व्रीहीणाञ्च यवानाञ्च शतमाहुतिरिष्यते ।

व्रीहिवदेव तण्डुला अपि ।

यद्वा धान्यं* चतुःषष्टिराहुतः परिकीर्त्तितम् ।

तिलानान्तु तदर्द्धं स्यात्तदर्द्धं स्याद्घृतस्य च ॥

यावति प्रदेश उक्तसंख्यकास्तिलास्तिष्ठन्ति, तदर्द्धदेशव्यापिघृतमाहुतौ भवतीत्यर्थः । एवं सायं प्रातर्नित्यहोमो निवर्त्तनीयः ।

होमे कर्त्तारो दर्शिताः स्मृत्यर्थसारे ।

यजमानः प्रधानं स्यात्पत्नी पुत्रश्च कन्यका ।

ऋत्विक्शिष्यो† गुरुर्भ्राता भागिनेयः सुतापतिः‡ ॥

एतैरेव हुतं यत्तु तद्धुतं स्वयमेव तु ।

पत्नी कन्या च जुहुयादिना पर्य्युक्षणक्रियाम् ॥

असमक्षन्तु दम्पत्योर्होतव्यं नर्त्विगादिना ॥

दयोरप्यसमक्षं चेद्धविर्हुतमनर्थकम् ।

सन्निधौ यजमानः स्यादुद्देश्यत्यागकारकः ॥

---

* ग्रस्थ धान्यमिति माधवीये पाठः ।

† पच इति देशान्तरीयः पाठः ।

‡ अव धिट्पतिरिति देशान्तरीयः पाठः ।

असन्निधौ तु पत्नी स्यादध्वर्युस्तदनुज्ञया ।
उन्मादे प्रसवे चर्त्वौ कुर्वीतानुज्ञया विना ॥
नोपवासी प्रवासे स्यात्पत्नी धारयते ध्रुवम्* ।
सर्व्वदा यजमानो वा त्यजेत्तद्दिङ्मुखः शुचिः ॥

अग्निधमने च विशेषो दर्शितः कात्यायनेन ।

जुह्वंश्च हुते चैव पाणिसूर्पाश्मदारुभिः ।
न कुर्य्यादग्निधमनं न कुर्य्याद्व्यजनादिना† ॥
मुखेनैव धमेदग्निं मुखादेष ह्यजायतः‡ ।

तथा ।

नाग्निं मुखेनेति वचो लौकिके योजयन्ति तत् ।

यदा मुखेन धमनं तदा न नलिकादिव्यवधानेन साक्षादिति ज्ञेयम् ।

बौधायनः ।

आसायं कर्म्मणः प्रातराप्रातः सायकर्म्मणः ।
आहुतिर्नातिपद्येत पार्व्वणं पार्व्वणान्तरात् ॥

मैत्रायनीयपरिशिष्टेऽपि ।

ऋषयो हस्तप्राप्ता युका आसंस्ते अग्निहोत्रेणातप्यन्ते

---

* व्रतमिति पाठान्तरम् ।

† मुद्रितच्छन्दोगपरिशिष्टपुस्तके पाठान्तरं दृश्यते यथा —
होतव्ये च हुते चैव पाणिसूर्पस्फदारुभिः ।
न कुर्य्यादग्निधमनं कुर्य्याद्वा व्यजनादिना ॥

‡ तत्रैव पाठान्तरं यथा — मुखेनैके धमन्त्यग्निं मुखाद्देवा ऽध्यजायत ।

समस्तहोमानपश्यंस्तथा द्विरात्रायषड्रात्रायार्द्धमासाय-मासायाग्निहोत्रमनुजुहुवुः । तस्माद्यायावरः* आमया-व्यार्त्तो† वार्द्धमासाग्निहोत्रं जुहुयात् । पक्षादौ पर्व्व-णोऽन्ते सायञ्च प्रातरेव चतुर्हश्च चतुर्गृहीतानि सक्रदुन्न-यनमेका समित्सक्रद्धोमः । सक्रत्पाणिमार्ज्जनमिति । पक्षादौ यजनीयेऽहनि प्रतिपदि पर्व्वणोऽन्ते पक्षान्ते-ऽमावस्यादावौपवसथ्ये अग्न्याधानदिने‡ अत्र च पक्षान्ते सायंकाले चतुर्हश्च पञ्चदश्च वा आगामिदिनपरिगण-नेन§ स्वशाखोक्तप्रकारेण चतुरात्तादीनि¶ हवींष्युपादाय सक्रच्च सम्मार्ज्जनादिकं विधाय सक्रदेव होमः कर्त्तव्यः । देशकालकर्त्तृदेवताहविषामेकत्वात्तत्त्वम् । एवं पक्षादौ यजनीयेऽहनि प्रातराप्रातश्च गौणकालाश्रयणं पक्षहो-मश्च दैवात्कर्म्मण उत्कर्षे प्रवासादिनिमित्ते च वेदि-तव्यम् । न सर्व्वदा एवं हित्वादिदिनार्थमपि नि-मित्तसद्भावे तत्त्वेन होमः ।

पक्षहोमे विशेष॥माह ।

---

* पुनः पुनर्गमनशीलः ।

† आमयावी रोगी आर्त्तोऽन्यप्रकारेण कातरः ।

‡ अन्वाधानदिने इति क्वचित्पाठः ।

§ आगामिदिनगणनेन ह्रासवशात्कदाचिच्चतुर्दशदिनं कदाचिद्वा पञ्चदशदिनम् ।

¶ चतुर्गृहीतादीनि इति क्वचित्पाठः ।

॥ पक्षहोमिनस्तत्पतनस्थे आपन्निवृत्तौ तदाप्रभृति पुनर्होमः कर्त्तव्य इत्याह ।

मरीचिः ।

पञ्चहोमानथो कृत्वा गत्वा कस्मान्निवर्त्तते* ।
होमं पुनः प्रकुर्व्वीत भवेच्च न च दोषभाक् ॥

पञ्चहोमानित्युपलक्षणमतोऽन्यत्राप्येवमेव, अत्र च सायंहोमे यद्द्रव्यं स्वीकृतं हविष्केण तदेव प्रातर्होमेऽपि नान्यत् । यतः सायमुपक्रमः प्रातरपवर्गोऽयमेक एव प्रयोगः । एकस्मिंश्च प्रयोगे प्रक्रान्तद्रव्यपरित्यागेन द्रव्यान्तरस्वीकरणं न युज्यते, इति व्रीहियववाक्यमीमांसायाममीमांसि मीमांसकैः । अथ दैवात्सायंहोमगृहीतद्रव्यं प्रातर्होमे न प्राप्येत तदा तद्द्रव्यप्रतिनिधिभूतं द्रव्यान्तरं गृह्णीयान्न तूक्तव्रीह्यादिमध्ये अन्यतमं ग्राह्यम् । अप्रतिनिधिद्रव्यान्तरे प्रकृतिद्रव्यावयवाभावात्प्रतिनिधौ प्रकृतिद्रव्यावयवसम्भवाच्च । एतदपि प्रतिनिधिपदे निर्णीतम् ।

स्मृत्यर्थसारे ।

हव्यार्थे गोघृतं ग्राह्यं तदभावे तु माहिषम् ।
आजं वा तदभावे तु साक्षात्तैलं गृहीयते ॥
तैलाभावे गृहीतव्यं तैलं यत्तिलसम्भवम् ।
तदलाभे तु सस्नेहः कौसुम्भः सर्षपोद्भवः ॥
हृत्सस्नेहोऽथवा ग्राह्यः पूर्व्वालाभे परः परः ।

---

* पञ्चहोमानथो कृत्वा गत्वा तस्मान्निवर्त्तितः ।
होमं पुनः प्रकुर्य्यात्तु न चासौ दोषभाग्भवेत् ।
इति पराशरमाधवीये पाठः ।

तदलाभे यवव्रीहिश्यामाकान्यतमोद्भवम्॥
पिष्टमालोड्य यत्नेन* घृतार्थे योजयेत्सुधीः।
वृक्षतैलेषु पुन्नागनिम्बैरण्डोद्भवं त्यजेत्॥
येषां केषाञ्चिदन्येषां हविषामप्यसम्भवे।
सर्व्वत्राज्यमुपादेयं भरद्वाजमुनेर्मतात्॥

अथ प्रसङ्गात्सकलनित्यनैमित्तिककर्म्मोपयोगितया मुख्यकालातिक्रमे गौणकालो निरूप्यते। ननु को मुख्यः को वा गौणः उच्यते। यो विहितः स मुख्यः, यथा वृद्धिश्राद्धादौ प्रातरादिः, यश्च विहितसमीपवर्त्ती उपरितनस्तेष्वेव कर्म्मस्वङ्गत्वं नीयमानः सङ्गवादिकालः स गौणः।

तदाहुः चिकाण्डमण्डनमिश्राः।

यश्चागामियागीयमुख्यकालादधस्तनः।
स्वकालादुत्तरो गौणः कालः पूर्व्वस्य कर्म्मणः॥
यद्वागामिक्रियामुख्यः कालस्याप्यन्तरालवत्।
गौणकालत्वमिच्छन्ति केचित्प्राक्तनकर्म्मणि॥ इति।

अस्यायमर्थः। पूर्व्वोत्तरयोः कर्म्मणोर्मध्ये पूर्व्वस्य कर्म्मणः स्वकालादुत्तरो यः कालः उत्तरकर्म्मकालावधिकः स पूर्व्वकर्म्मणो गौणकालः, अथवा आगामिक्रियाया उत्तरक्रियाया मुख्यकालस्तस्यापि प्राक्तनकर्म्मणि पूर्व्वकर्म्मणि केचिद्गौणकालत्वमिच्छन्ति। तत्र दृष्टान्तः अन्तरालवदिति। यथा

---

* तौयेन इति क्वचित्पाठः।

पूर्व्वोत्तरकर्म्मणोर्मध्यकालः पूर्व्वकर्म्मणि गौणः, तद्दुत्तरकर्म्ममुख्यकालोऽपि पूर्व्वकर्म्मणि गौण इत्यर्थः*। न तूत्तरकर्म्ममुख्यकालः पूर्व्वकर्म्मानुष्ठाने† हि न स्वीकर्त्तुमुचितः तथाहि पूर्व्वं कर्म्म तावत्स्वकालाच्च्युतं विनष्टप्रायं, तदुत्तरकर्म्मकाले क्रियमाणं तस्मादुत्तरकर्म्मापसारयतिः‡। ततश्च स्वकालाद्विच्युतं तदपि प्रनष्टरूपं भवति। तदपि उत्तरकर्म्मकाले§ यदि क्रियते तर्हि विनष्टसमाधानगतं प्रसज्येतेति¶ चेदाढमेवम्। उत्तरकर्म्मकाले पूर्व्वोत्तरयोः कर्म्मणोरवकाशे‖ सतीदमुच्यते। न पुनरसतीति** न दोषः। एवं स्थिते विचार्य्यते किमयं

---

* पूर्व्वकर्म्मणि स्वकालानुष्ठितपूर्व्वकर्म्मविषये एव उत्तरकर्म्ममुख्यकालस्य शास्त्रे गौणत्वमुक्तं न तु स्वकालाक्रतस्य कर्म्मणोऽनुष्ठानार्थं तदेवोपपादयति ननूत्तरेत्यादिना।

† पूर्व्वकर्म्मानुष्ठानार्थमुत्तरकर्म्ममुख्यकालः न तु गौण इत्यर्थः इत्यनुषङ्गेणान्वयः हि यतः स्वीकर्त्तुमुचितो न भवति।

‡ पूर्व्वकर्म्मानुष्ठानेनैव उत्तरकर्म्मणो मुख्यकालातिपातादेव तस्मात् स्वमुख्यकालात् उत्तरकर्म्म अपसारयति दूरीकरोति।

§ तदपि उत्तरकर्म्मकाले तदुत्तरक्रियमाणकर्म्मणोमुख्यकाले।

¶ यदि उत्तरोत्तरकाले पूर्व्वपूर्व्वकर्म्मणः करणं भवेत्, तदा कालातीतत्व यत्कर्म्म अक्रतं तद्विनिर्द्दिश्येदिति शास्त्रेण विनष्टस्य असिद्धस्य बहुनः कर्म्मणः समाधानं सिद्धिः प्रसज्येत प्रसक्तं भवेदित्यर्थः।

‖ शास्त्रान्तरेण कालान्तरकर्त्तव्यत्वेन विधाने।

** असति शास्त्रान्तराभावे सति इत्यर्थः तथाच यस्य शास्त्रान्तरे कालान्तरस्मृतं तस्य दैवान्मुख्यकाले अकरणे गौणकाले करणं यस्य नास्ति शास्त्रान्तरं तस्य मुख्यकालाकरणे बाध एव न गौणकालकल्पनमिति समुदितार्थः।

गौणः कालः सर्व्वेषां नित्यनैमित्तिककाम्यकर्म्मणां मुख्यकालासम्भवे अङ्गमुत नेति तत्र ब्रूमः। काम्यवर्ज्यं नित्यनैमित्तिकानि सर्व्वाण्यपि मुख्यकालातिक्रमे गौणकाले कर्त्तव्यानीति। आवश्यकेषु नित्यनैमित्तिकेषु यथा शक्त्यात्तथा कुर्य्यादित्यभिधानाद्विहिताङ्गाभावे तत्सदृशप्रतिनिधिग्रहणस्य न्याय्यत्वान्मुख्यकालातिक्रमे गौणकालो ग्राह्यः।

तथाच मण्डनमिश्रः।

मुख्यकाले यदावश्यं कर्म्म कर्त्तुं न शक्यते।
गौणकालेऽपि कर्त्तव्यं गौणोऽप्यत्रेदृशो भवेत्॥ इति।

ईदृशः मुख्यकालसदृशः।

अत्रापि विशेषस्तेनैवोक्तः।

गौणेष्वेतेषु कालेषु कर्म्म चोदितमाचरन्।
प्रायश्चित्तप्रकरणप्रोक्तां निष्कृतिमाचरेदिति॥

निष्कृतिं प्रायश्चित्तम्।

तथा।

प्रायश्चित्तमकृत्वा वा गौणकालं समाचरेत्।

देशकालशक्त्यपेक्षया प्रायश्चित्तकरणमकरणं वेति व्यवस्था।

तथा स्मृत्यन्तरमपि।

यथा कथञ्चित्कर्त्तव्यं* नित्यकर्म्म विजानता।
न प्राप्तस्य विलोपोऽस्ति पैत्तकस्य विशेषतः॥

---

* गौणकालेऽपि कर्त्तव्यम्।

तथा ।

दिवोदितानि कर्म्माणि प्रमादादकृतानि वै ।
यामिन्याः प्रहरं यावत्तावत्सर्व्वाणि कारयेत् ॥

श्राद्धे तु विशेषः ।

सन्ध्याराचयोर्न कर्त्तव्यं श्राद्धं खलु विचक्षणैः । इति । सन्ध्यायां रात्रौ च श्राद्धं न कर्त्तव्यमित्यर्थः । एतदुक्तं भवति यदा शक्नुयात्तदा कुर्य्यात् । इत्युपबन्धात्* काम्येषु न गौण-स्वीकारः नित्यनैमित्तिके तु यथा शक्नुयादित्युपबन्धाद्गौणपरि-ग्रह इति ।

तथाच पैठीनसिः ।

प्रधानसचिवाद्यङ्गानि भवन्ति न भवन्ति वेति ।

काम्ये प्रधानसचिवत्वमितरत्रासचिवत्वम् । सचिवत्वं सट्ट-श्यत्वम् । प्रधानमिवाङ्गान्यपि मुख्यानीव न गौणानीत्यर्थः । यदि एवं तर्हि दर्शपौर्णमासपार्व्वणश्राद्धादीनाममावास्यादि-विहितकालातिक्रमे तदनन्तरगौणकालकर्त्तव्यता प्रसज्येतेति चेत् । अस्तु नाम का नो हानिर्गौणकालस्वीकारवादिनां, एवं प्राप्ते सिद्धान्तोऽभिधीयते । काले हि कर्म्म विधीयते, न कर्म्मणि कालः, यत्स्वेच्छाविनियोगार्हं† तदुपादेयम् । यदुपादेयं तद्विधेयम् । कालस्तु स्वेच्छया कर्त्तुं न शक्यः‡ । अतएवानुपा-

---

* उपक्रमात् ।

† प्राप्तियोग्यम् ।

‡ द्रव्यवत्कर्त्तृधीनत्वाभावादिति भावः ।

देवपञ्चकमध्ये मीमांसकैः कालः परिगणितोऽतः कालोद्देशेन कर्म्म विधातव्यम्। तथाच कालो निमित्तं निमित्तभूतकालाभावेऽधिकाराभावात्कालान्तरे कृतमकृतमेवेति। गौणकालग्रहणं नोचितम्। विहितकालाभावे चाधिकाराभावः स ह्यफलाधिकरणे* प्रापणाच्च निमित्तस्येत्यस्मिन् सूत्रे प्रतिपादितः।

लोकाच्चिरपि गौणस्यापरिग्राह्यत्वमाह।

गणिताज्ज्ञायते कालः काले तिष्ठन्ति देवताः।
वरन्त्वेकाहुतिः काले नाकाले लक्षकोटयः॥

यत्तु मण्डनमिश्रैरभिहितम्।

गौणकालेऽपि कर्त्तव्यं गौणोऽप्यवेष्टयो भवेत्। इति।

तद्विरोदितानि कर्म्माणीत्यादिना यत्र गौणकालाभ्यनुज्ञानं वाचनिकं तद्विषयम्।

अतएव मण्डनमिश्राः।

मुख्यकाले हि मुख्यस्येत्साधनं नैव लभ्यते।
तत्कालद्रव्ययोः कस्य मुख्यत्वं गौणतापि वा॥
मुख्यकालमुपाश्रित्य गौणं†मप्यस्तु साधनम्।
न मुख्यद्रव्यलाभेन‡ गौणकालप्रतीक्षणम्॥ इति।

---

* सहि अधिकाराभावोहि अफलाधिकरणं यस्मिन् कर्म्मणि कृते फलं नास्ति तत् अफलं अफलमधिकृत्य यत्र विचार्य्यते तदफलाधिकरणं तस्मिन्।

† प्रतिनिहितद्रव्यम्।

‡ लाभार्थम्।

यत्तु।

यथाकथञ्चित्कर्त्तव्यं नित्यं कर्म्म विजानता। इति। तस्यायमभिप्रायः। स्वकालं प्राप्तस्य कर्म्मणो मुख्यद्रव्याभावेन विलोपी न कर्त्तव्यः। अपि तु मुख्यकाल एव मुख्यद्रव्याभावेऽपि प्रतिनिधिद्रव्येन कर्म्म निवर्त्तनीयमिति। अतो वचनमन्तरेण संवत्सरर्त्तुमासतिथ्यादिकालविशेषविहितानि कर्म्माणि स्वकालातिक्रमे कालान्तरे कर्त्तुं न युज्यन्ते अपि तु तदतिक्रमे प्रायश्चित्तमेव कुर्य्यात्, यच्च गौणकालानुष्ठानं दृश्यते तच्छिष्टगर्हापरिहरणाय स्वमनःपरितोषाय वेति। एवं सर्व्वमनवद्यम्।

इति गौणमुख्यकालनिर्णयः।

अथ समाचारप्राप्तद्विरागमने शुभाशुभकालादिः।

तत्र सुरेश्वरः।

वैशाखे सुभगा प्रभूतधनिनी मार्गे च पुत्रान्विता
फाल्गुन्ये प्रियवल्लभा प्रियतमा नित्यं प्रिया पुत्रिणी।
बन्ध्या निर्धनदुर्भगा विरहिणी सोद्विगता नित्यशो
नूनं देवसमापि दुःखमतुलं लेभेऽन्यमासे गता॥
मार्गफाल्गुनवैशाखे शुक्लपक्षे शुभे दिने।
गुर्व्वादित्यविशुद्धौ स्यान्नित्यं पत्नीद्विरागमः॥

बादरायणः।

नीहारांशुधनोत्तरादितिगुरुत्वाष्ट्रानुराधाश्विनी

शुक्रे भास्करवायुविष्णुवरुणब्राह्मे* प्रशस्ते तिथौ ।
कुम्भाजालिगते रवौ शुभकरे प्राप्तोदये† भार्गवे
जीवारास्फुजितां‡ दिने नववधूसद्मप्रवेशः शुभः ॥
भर्तुः शोभनगोचरे हिमकरे नास्तं गते भार्गवे
सूर्ये कीटघटाजगे शुभदिने पक्षे तु कृष्णेतरे ।
हित्वा दिक्प्रतिलोमगौ बुधसितौ लालाटगं§ दिक्पतिं
चानीता गुणशालिनी नववधूर्नित्योत्सवैर्नन्दते ॥
पूर्वतोऽभ्युदिते शुक्रे प्रयायाद्दक्षिणोत्तरे ।
पश्चादभ्युदिते चैव यायात्पूर्वोत्तरे दिशौ ॥

नवनपुनःप्रवेशे देशानां विप्लवे तथोद्वाहे नववध्वा गृहागमने प्रतिशुक्रविचारणा नास्ति ।

इति द्विरागमनम् ।

---

* मृगशिरो धनिष्ठोत्तराचय पुनर्वसु पुष्या चित्तानुराधाश्विनी स्वाति श्रवणा शतभिषा रोहिणी नक्षत्रेषु ।

† बृहस्पति मङ्गल शुक्राणाम् ।

‡ जीवज्ञास्फुजितां दिने इत्येव पाठान्तरं साधु तथाच श्रीपतिसंहितायां वारेष्विज्य सितेन्दुवित्त शुभदे तारे प्रशस्ते विधौ कन्या सद्मथ मीन तौलि मृगभे स्यादङ्गना-धागमः ।

§ सम्मुखगम् ।

अथाधिवेदनम्।

तत्र मनुः।

मद्यपासत्यवृत्ता च प्रतिकूला च या भवेत्।
व्याधिताप्यधिवेत्तव्या हिंस्रार्थघ्नी च सर्व्वदा॥

मद्यपेति यज्जातीयाया यन्निषिद्धं मद्यं तत्पानकर्त्र्यभिधीयते। असत्यवृत्ता असाध्वाचारा प्रतिकूला भर्त्तुरनिष्टकारिणी हिंस्रा पुत्रदासादिताड़नशीला अर्थघ्नी उपेक्षादिना अर्थविनाशकारिणी। अधिवेदनं भार्य्यान्तरपरिग्रहः।

याज्ञवल्क्यः।

सुरापी व्याधिता धूर्त्ता बन्ध्यार्थघ्न्यप्रियंवदा।
स्त्रीप्रसूश्चाधिवेत्तव्या पुरुषद्वेषिणी तथा॥

धूर्त्ता वञ्चनप्रधाना स्त्रीप्रसूः स्त्रीमात्रजननी।

अधिवेदनप्रतीक्षणे कालो मनुनोक्तः।

बन्ध्याष्टमेऽधिवेद्याब्दे दशमे तु मृतप्रजा।
एकादशे स्त्रीजननी सद्यस्त्वप्रियवादिनी॥

अधिवेत्तव्येति शेषः।

देवलः।

आकाङ्क्षेताष्टवर्षाणि भर्त्तातिप्रसवां स्त्रियम्।
दश बन्ध्याञ्च निन्द्याञ्च द्वादश स्त्रीप्रसूयतीम्॥
ततो विन्देत विधिना पुत्रार्थं धर्म्मतः स्त्रियम्।
पुत्रलाभात्परं लोके नास्ति हि प्रसवा हि तत्॥

अतिप्रसवा प्रसवः पुष्पं रजः तद्योग्यकालमतिक्रान्ता। निन्द्या

स्त्रिचादियुक्ता । प्रसवाः फलानि ते पुत्राः ।

एकामूढ्वा तु कामार्थमन्यां वोढुं य इच्छति ।
समर्थस्तोषयित्वार्थैः पूर्व्वोढ़ामपरां वहेत् ॥

अष्टदशकालप्रतीक्षा* विकल्पा वयःशक्त्यपेक्षया व्यवस्थिता बोद्धव्याः । समर्थस्तोषयित्वार्थैरित्यत्रार्थैरित्युपलक्षणम् । अत उपायान्तरेणापि सा परितोषणीया, येषु तु अधिवेदननिमित्तेषु न कालविशेषः श्रूयते तेषु यावता कालेन तद्दोषनिश्चयो भवति तावत्कालं प्रतीक्षेत ।

याज्ञवल्क्यः ।

अधिविन्नस्त्रियै दद्यादाधिवेदनिकं समम् ।
न दत्तं स्त्रीधनं यस्यै दत्ते त्वर्द्धं प्रकीर्त्तितम् ॥

आधिवेदनिकमधिवेदनप्रयोजनमलङ्करणादि यस्यै पूर्व्वं विवाहादिसमये स्त्रीधनमलङ्कारादि न दत्तं तस्यै समं दातव्यम् । पश्चादुह्यमानाया यावद्दीयते तावदित्यर्थः । दत्ते तु पूर्व्वमेवालङ्कारादिके दत्ते अर्द्धं, अत्रार्द्धशब्दोऽंशमात्रपरो न तु समांशपरः पूर्व्वस्यै दत्तमलङ्कारादिकं नवोढ़ालङ्काराद्यूनं चेद्यावता तत्साम्यं भवति तावद्दातव्यमित्यर्थः ।

मनुः ।

अधिविन्ना तु या नारी निर्गच्छेद्दुषिता गृहात् ।

---

* वन्ध्याविषये मनुना अष्टाब्दप्रतीक्षणमुक्तं देवलेन दशाब्दप्रतीक्षणमुक्तं तद्विरोधपरिहाराय एतदुक्तं भवति ।

सा सद्यः सन्निरोद्धव्या त्याज्या वा कुलसन्निधौ ॥

याज्ञवल्क्यः ।

अधिविन्ना तु भर्त्तव्या महदेनोऽन्यथा भवेत् ।
यत्रानुकम्प्यं दम्पत्योस्त्रिवर्ग*स्तत्र वर्द्धते ॥

मनुः ।

चतस्रस्तु परित्याज्याः शिष्यगा गुरुगा च या ।
पतिघ्नी च विशेषेण जुङ्गितोपगता च या ॥

जुङ्गितः प्रतिलोमजः ।

अत्र विशेषमाह याज्ञवल्क्यः ।

हृताधिकारां मलिनीं पिण्डमात्रोपजीविनीम् ।
परिभूतामधःशय्यां वासयेद्व्यभिचारिणीम् ॥

इत्यधिवेदनम् ।

अथ स्त्रीधर्मः ।

तत्रादौ तासामवश्यरक्षणीयत्वं प्रदर्श्यते ।

तत्र मनुः ।

प्रजनार्थं महाभागाः पूजार्हा गृहदीप्तयः ।
स्त्रियः श्रियश्च गेहेषु न विशेषोऽस्ति कश्चन ॥

---

* धर्म्मार्थकामाः ।

† ग्रासमात्रेण उपजीव्यते ।

उत्पादनमपत्यस्य जातस्य परिपालनम् ।
प्रत्यहं लोकयात्रायाः प्रत्यक्षं स्त्रीनिबन्धनम् ॥
अपत्यं धर्म्मकार्य्याणि शुश्रूषा रतिरुत्तमा ।
दाराधीनास्तथा स्वर्गः पितॄणामात्मनश्चिह ॥
तस्माद्यत्नेन रक्ष्येत भर्त्तव्या मनुरब्रवीत् ॥
अस्वतन्त्राः स्त्रियः कार्य्याः पुरुषैः स्वैर्दिवानिशम् ।
विषयेषु च सज्जन्त्यः संस्थाप्या ह्यात्मनो वशे ॥
पिता रक्षति कौमारे भर्त्ता रक्षति यौवने ।
पुत्रा रक्षन्ति वार्द्धके न स्वातन्त्र्यं क्वचित्स्त्रियः ॥
सूक्ष्मेभ्योऽपि प्रमादेभ्यः स्त्रियो रक्ष्या विशेषतः ।
द्वयोर्हि कुलयोः शोकमावहेयुररक्षिताः ॥

भारते ।

पानं दुर्ज्जनसंसर्गः पत्या च विरहोऽटनम् ।
स्वप्नोऽन्यगेहे वासश्च स्त्रीणां वै दूषणानि षट् ॥
नेता रूपं परीक्षन्ते नासां वयसि संस्थितिः* ।
सुरूपं वा कुरूपं वा पुमानित्येव भुञ्जते ॥
एवं स्वभावं ज्ञात्वासां प्रजापतिनिसर्गजम् ।
परमं यत्नमातिष्ठेत् पुरुषो रक्षणं प्रति ॥
शय्यासनमलङ्कारं कामं क्रोधमनार्ज्जवम् ।
द्रोहभावं कुकार्य्यञ्च स्त्रीभ्यो मनुरकल्पयत् ॥

---

* वयोनियमः अपेक्षणीयः इत्यर्थः ।

यादृग्गुणेन भर्त्रा स्त्री संयुज्येत यथाविधि ।
तादृग्गुणा सा भवति समुद्रेणेव निम्नगा* ॥

अथ रक्षोपायाः ।

न कश्चिद्योषितः शक्तः प्रसह्य परिरक्षितुम् ।
एतैरुपाययोगैस्तु शक्यास्ताः परिरक्षितुम् ॥
अर्थस्य संग्रहे चैनां व्यये चैव नियोजयेत् ।
शौचे धर्म्मेऽन्नपक्त्यां† च पारिणाम्यस्य‡ रक्षणे ॥

अथ स्त्रीकर्त्तव्यधर्म्माः ।

तत्र मनुः ।

बालया वा युवत्या वा वृद्धया वापि योषिता ।
न स्वातन्त्र्येण कर्त्तव्यं किञ्चित्कार्य्यं गृहेष्वपि ॥
पित्रा भर्त्रा सुतेनापि नेच्छेद्विरहमात्मनः ।
एतेषां विरहेण स्त्री गर्हिता स्यात्कुलद्वये ॥
सदा प्रहृष्टया भाव्यं गृहकार्य्येषु दक्षया ।
सुसंस्कृतोपस्करया व्यये चामुक्तहस्तया ॥

---

* नदी ।

† अन्नपाके ।

‡ आदर्शप्रभृति द्रव्यस्य ।

याज्ञवल्क्यः ।

संयतोपस्करः* दक्षा हृष्टा व्ययपराङ्मुखी ।
कुर्य्यात्श्वश्वशुरयोः पादवन्दनं भर्त्तृतत्परा ॥
स्त्रीभिर्भर्त्तृवचः कार्य्यमेष धर्म्मः परः स्त्रियः ।
आशुद्धेः सम्प्रतीच्छो हि महापातकदूषितः ॥

मनुः ।

विगीलकामवृत्तो वा गुणैर्वा परिवर्ज्जितः ।
उपचर्य्यः† स्त्रिया साध्वा सततं देववत्पतिः ॥
नास्ति स्त्रीणां पृथग्यज्ञो न व्रतं नाप्युपोषणम् ।
पतिः संसेव्यते येन‡ तेन स्वर्गे महीयते ॥
पत्यौ जीवति या स्त्री स्यादुपोष्य व्रतचारिणी ।
आयुष्यं हरते भर्त्तुर्नरकं चाधिगच्छति ॥
पाणिग्राहस्य साध्वी स्त्री जीवतो वा मृतस्य च ।
पतिलोकमभीप्सन्ती नाचरेत्किञ्चिदप्रियम् ॥
मृते जीवति पत्यौ च या नान्यमुपगच्छति ।
सेह कीर्त्तिमवाप्नोति मोदते चोमया सह ॥

स्कान्दे ।

प्रसुप्तन्तु सुखासीनं रममाणं यदृच्छया ।
आतुरेष्वपि कार्य्येषु§ पतिं नोत्तापयेत्¶ क्वचित् ॥
स्त्रीधर्म्मिणी चिरात्तन्तु स्वमुखं नैव दर्शयेत् ।

---

* पाकोपकरणद्रव्यसंग्रहे । † सेव्यः । ‡ हेत्वर्थे तृतीया । § पीड़ाजनकेषु कार्य्येषु सत्स्वपि । ¶ आक्रोशं न कुर्य्यात् ।

स्वं वाक्यं श्रावयेन्नापि यावत्स्नाता* न शुध्यति ॥
सुस्नाता भर्तृवदनमीक्षेन्नान्यस्य कस्यचित् ।
अथवा मनसि ध्यात्वा पतिं भानुं विलोकयेत् ॥
हरिद्रां कुङ्कुमञ्चैव सिन्दूरं कज्जलं तथा ।
कूर्पासकञ्च† ताम्बूलं मङ्गल्याभरणं शुभम् ॥
केशसंस्कारकबरीकरकर्णविभूषणम् ।
भर्तुरायुष्यमिच्छन्ती दूरयेन्न‡ क्वचित्सती ॥
न रजक्या न कामुक्या§ तथा श्रमणयापि¶ च ।
न च दुर्भगया वापि सख्यित्वं कुरुते तु सा ॥
भर्तृविद्वेषिणीं नारीं न सम्भाषेत कर्हिचित् ॥
नैकाकिनी क्वचिद्गच्छेन्नानग्ना स्नाति वै क्वचित् ।
नोदूखले न मूषले न वर्ज्यां‖ दृषद्यपि** ।
न यन्त्रके न देहल्यां†† न स्त्री चोपविशेत्क्वचित् ।
उक्ता प्रत्युत्तरं दद्याद्या नारी क्रोधतत्परा ।
सा शुनी जायते ग्रामे शृगाली विजने वने ॥
अपराधो न वक्तव्यः कलहं दूरतस्त्यजेत् ।
गुरूणां सन्निधौ क्वापि नो ब्रूयाच्च न वा हसेत् ॥
ताड़िता ताड़ितुं चेच्छेत्सा व्याघ्री वृषदंशिका‡‡ ।
कटाक्षैर्वीक्षते या तु भर्त्तारं कुपिता हठात् ।

---

* ऋतुस्नाता । † कञ्चुलिकां कांचुलि इति यस्य प्रसिद्धिः । ‡ कुर्यात् । § कारु क्येति पाठान्तरम् । ¶ भिक्षुकया । ‖ वाडुनीति प्रसिद्धिः । ** प्रस्तरे । †† धारार्धीभागे । ‡‡ विड़ाली ।

केकराक्षी* तु सा नूनं भवेद्वै नात्र संशयः॥
भर्त्तारं या समुत्सृज्य मिष्टमश्नाति केवलम्।
ग्रामे वा शूकरी वा स्याद्गर्दभी वा श्वविड्भुजा॥

याज्ञवल्क्यः।

पतिप्रियहिते युक्ता स्वाचारा विजितेन्द्रिया।
इह कीर्त्तिमवाप्नोति प्रेत्य चानुत्तमां गतिम्॥

अङ्गः।

नानुक्ता गृहान्निर्गच्छेन्नानुत्तरीया न त्वरितं व्रजेत् न परपुरुषं भाषेतान्यत्र वणिक्प्रव्रजितवृद्धवैद्येभ्यो न नाभिं दर्शयेत्। आगुल्फाद्वासः परिदध्यान्न स्तनौ विवृतौ कुर्य्यान्न हसेदनपावृतं न भर्त्तारं तद्बन्धून्वा ब्रूयान्न गणिका†धूर्त्ताभिचारिणी‡प्रव्रजिताप्रेक्षणिका§मायामूलकूहककारूकारिका¶दुःशीलादिभिः सहैकत्र तिष्ठेत्संसर्गे चारित्रं दुष्यतीति।

अयञ्च सकलस्त्रीधर्म्मो विवाहादूर्द्धं वेदितव्यः।

अथ पतिव्रताविशेषधर्म्माः।

तत्र मनुः।

कन्यां विवाहसमये वाचयेयुरिति द्विजाः।

---

* वक्राक्षी। † धैर्य्या। ‡ हिंसाकारिणी। § वृत्यगीतदर्शनकारिका। ¶ माया-मूलकूहककारूणां प्रत्येकं कारिकेत्यनेनान्वयभेदेन मूलकारिका धनहृद्विकारिका।

भर्त्तुः सहचरी भूयाज्जीवतोऽजीवतोऽपि वा ॥
भर्त्ता देवो गुरुर्भर्त्ता धर्म्मतीर्थव्रतानि च ।
तस्मात्सर्व्वं परित्यज्य पतिमेकं समर्च्चयेत् ॥
भुङ्क्ते भुक्ते पतौ या तु ह्यासीना चापि वासिते ।
विनिद्रिते विनिद्राति प्रथमं परिबुध्यते ॥
अनलङ्कृतमात्मानं पत्युर्नो दर्शयेत्क्वचित् ।
कार्य्यार्थं प्रोषिते पत्यौ सर्व्वमङ्गलवर्ज्जिता ॥
न च तन्नाम गृह्णीयात्तस्यायुष्यं विवर्द्धयेत् ।
पुरुषान्तरनामापि न गृह्णीयात्कदाचन ॥
आक्रुष्टापि न चाक्रोशेत्ताड़ितापि प्रसीदति ।
इदं कुरु कृतं स्वामिन्मन्यतामिति च क्वचित् ॥
आहूता गृहकार्य्याणि त्यक्त्वा गच्छति सत्वरम् ।
पूजोपकरणं सर्व्वमनुक्ता शोधयेत्स्वयम् ॥
नियमोदकवह्नींश्च पत्रपुष्पादिकञ्च यत् ।
सा च ते भर्त्तुरुच्छिष्टं मिष्टमन्नफलादिकम् ॥
महाप्रसादमित्युक्त्वा पतिदत्तं प्रतीच्छति ।

हारीतः ।

माल्यकं पैत्यकञ्चैव यत्र चैव प्रदीयते ।
कुलत्रयं पुनात्येषा भर्त्तारं यानुगच्छति ॥

अयञ्च सर्व्वासां स्त्रीणां पतिव्रतानामगर्भिणीनामबालापत्यानामाचाण्डालं साधारणो धर्म्मः । अपतिव्रतादीनामधिकारात् । ननु च अपतिव्रतादीनामप्यधिकारोऽनुगमने श्रूयते ।

तथाच महाभारते।

अवमन्य च या पूर्व्वं पतिं दुष्टेन चेतसा।
वर्त्तते या च सततं भर्त्तृणां प्रतिकूलतः॥
भर्त्रानुमरणं काले याः कुर्व्वन्ति यथाविधि।
कामात्क्रोधाद्भयान्मोहात्सर्व्वाः पूताः भवन्त्युत॥
आदिप्रभृति† या साध्वी पत्युः प्रियपरायणा।
ऊर्द्धं गच्छति सा तत्र भर्त्रानुमरणं गता॥ इति।

नैतत्सारं‡ उतशब्दश्रवणात्सर्व्वाः पूता भवन्त्युतेति पत्यवमानकर्त्र्यादीनामपि पापक्षयोऽस्ति किमुतादिप्रभृति या साध्वी तस्याः पापक्षयः परलोकश्च विद्यत इति। साध्व्या उत्तमलोकप्राप्तिविधायकवाक्यशेषत्वेन तच्छावकत्वेनापि चरितार्थत्वात्। साधारणार्थत्वञ्च भर्त्तारं यानुगच्छतीत्यविशेषोपादानादेव गम्यते। यानि च ब्राह्मण्यनुगमननिषेधपराणि पैठीनस्यङ्गिरःप्रभृतीनां वाक्यानि।

मृतानुगमनं नास्ति ब्राह्मण्या ब्रह्मशासनात्॥
या स्त्री ब्राह्मणजातीया मृतं पतिमनुव्रजेत्।
सा स्वर्गमात्मघातेन नात्मानं न पतिं नयेत्॥

इत्येवमादीनि तानि पृथक्चितिविषयाणि।

पृथक्चितिं समारुह्य न विप्रा गन्तुमर्हति॥
अन्यासाञ्चैव नारीणां स्त्रीधर्म्मोऽयं परः स्मृतः।

* भर्त्रेति गम्यमानमहार्थे तृतीया। † प्रथमावधि। ‡ श्रेष्ठकल्पः।

इत्युशनसो विशेषस्मरणात्। इत्यन्वारोहस्य स्वर्गादिफल-युक्तत्वेन काम्यत्वात्।

अतएव विकल्पमाह विष्णुः।

मृते भर्त्तरि ब्रह्मचर्य्यं तदन्वारोहणञ्चेति।

देशान्तरमृते पत्यौ ब्राह्मणास्तदस्थिभिः सहानुगमनं भवत्येव। इतरासान्तु अस्थ्यभावेऽपि पतिपादुकादिकचिह्नं किमपि गृहीत्वा चिह्नाभावेऽपि भवति। पृथक्चित्यनुज्ञानान्नन्वनु च पतिव्रताया इदमनुगमनं नित्यमेव।

तथाच हारीतः।

आर्त्तार्त्ते मुदिते हृष्टा प्रोषिते मलिना कृशा।

मृते म्रियेत या पत्यौ सा स्त्री ज्ञेया पतिव्रता* ॥

अतो मृते या म्रियेत पतिव्रतेत्यनेन नित्यत्वं द्योत्यते। अतः अनित्यत्ववर्णनमयुक्तमिति चेन्नैवम्।

मृते भर्त्तरि साध्वी स्त्री ब्रह्मचर्य्ये व्यवस्थिता।

स्वर्गं गच्छेदपुत्रापि यथा ते ब्रह्मचारिणः ॥ इति।

मनुना पतिव्रताया अननुगमनस्याभिहितत्वात्। अत्र साध्वीत्यनेन पतिव्रताभिधीयते। अन्यथा ब्रह्मचर्य्ये व्यवस्थितेत्यनेन पौनरुक्त्यप्रसक्तेः†। तथा महाभारते भगवान्व्यासः।

---

* साध्वी ज्ञेया पतिव्रतेति देशान्तरीयः पाठः। † पौनरुक्त्यप्रसक्तेरित्यत्र पाठः साधुः। तथाच यदि पतिव्रतात्वं मरणनियतं तदतिरिक्तस्थले साध्वीत्वं तदा ब्रह्मचर्य्ये व्यवस्थिता इत्यनेनैव साध्वीत्वप्राप्तौ साध्वी इत्यस्य पुनरुक्तं स्यात् अतोऽपुनरुक्तायै साध्वीत्वेन पतिव्रतात्वमेव मनुना विधीयते इत्यवश्यं वाच्यम्।

पतिव्रतायाः सत्या अग्निप्रवेशं दर्शयति न चाग्निप्रवेशेन पतिव्रतात्वम्।

पतिव्रता संप्रदीप्तं प्रविवेश हुताशनम्।
तच्च चिच्छेद धर्त्तारं सानुपद्यते॥ इति।

न च तस्माद्दहनपुरुषायुषः स्वकामी प्रेयादिति श्रुतिविरोधः विषयभेदात्। श्रुतिर्हि सामान्येन शास्त्राविहितं स्वेच्छामरणं निषेधति। स्मृतिस्तु भर्त्तरि मृते ज्वलनप्रवेशविशेषेण मरणविशेषं विधत्ते। अतो विषयभेदान्न विरोधः। यथा नः हिंस्यात् सर्व्वभूतानि सामान्यशास्त्रमग्नीषोमीयं पशुमालभेतेति विशेषशास्त्रविषयमुत्सृज्य प्रवर्त्तते तद्वदत्रापि इति न कश्चिद्विरोधः। ननु

ब्रह्मघ्नो वा कृतघ्नो वा मित्रघ्नो वा भवेत्पतिः।
पुनात्यविधवा† नारी तमादाय स्त्रियेत या॥

इत्येवमादि हारीतादिवाक्यानि ब्रह्महत्यादिदोषनिवृत्तिमनुगमनेनाभिदधति। एतदनुपपन्नं शास्त्रफलंः प्रयोक्तृविलक्षणत्वादिति न्यायेनापूर्व्वफलयोः कर्त्तृसमवेतत्वात्। पतिगतदुरितापूर्व्वस्य पत्नीगतानुगमनेनानिवृत्तिः। निवृत्त्यभ्युपगमे तु कार्य्यकारणयोः सामानाधिकरण्यं शास्त्रसिद्धं

---

* मा हिंस्यात्सर्व्वा भूतानीति पाठान्तरम्। † पुनाति विधवा नारीत्येव पाठः साधुः। ब्रह्मघ्नो वा कृतघ्नो वा मित्रघ्नो वापि यो नरः। तं वै पुनाति सा नारी इत्यङ्गिरसभाषितमिति देशान्तरीयपाठः। ‡ शास्त्रफलं शास्त्रोक्तकर्म्मजन्यफलम्। प्रयोक्तृविलक्षणत्वात् अनुष्टातृनियतत्वात्।

व्याहन्येतेति चेत् बाढम्। ब्रह्मघ्नो वेत्यादीनि वाक्यानि अनुगमनविधिशेषत्वेनार्थवादादनुगमनस्य प्राशस्त्यं वर्णयन्ति। अतो न स्वार्थे प्रमाणानि युक्तमेवार्थवादत्वम्। ब्रह्महननादिदोषदुष्टस्य पतितत्वेनासौ संस्कारमेव तावन्नार्हति दूरेऽनुगमनमतः प्राशस्त्यपराणीति न कदाचिदनुपपत्तिः। एवं वा द्विविधं कर्म्म प्रारब्धमप्रारब्धञ्चेति। तत्र प्रारब्धकर्म्मणां भोगादेव क्षयात्प्रारब्धमपि अनुगमनरूपप्रतिबन्धकेन प्रतिबद्धम्। विद्यमानमप्यविद्यमानमिव सदुदास्ते। तथाचानुगमनस्वर्गादिकमनुभूय पश्चात्प्रारब्धशेषमुपभुङ्क्ते। अप्रारब्धकर्म्म द्विविधं फलदानोन्मुखमनुन्मुखञ्च यदुन्मुखं प्रारब्धं* कर्म्म तदनुगमनेनापनुद्यते प्रायश्चित्तेनेव, अन्यथा पतिपत्न्योः स्वर्गसाधनत्वेनोपदिश्यमानानुगमनेन साध्वग्राः स्वर्गानुपपत्तेः। पुनात्यविधवा† नारी तमादाय म्रियेत येत्यत्र च पुनात्येतदप्यनुपपद्यते। यत्तु‡ दानायोन्मुखमप्रारब्धं कर्म्म तस्यनिवृत्तिरनुगमने भवतीत्येतदेव मनसि कृत्वा व्यासोऽप्याह।

यदि प्रविष्टो नरकं बहुः पापैः सुदारुणैः।
सम्प्राप्तो यातनास्थानं गृहीतो यमकिङ्करैः।
तिष्ठते विवशो दीनो वेष्ट्यमानः स्वकर्म्मभिः॥
व्यालग्राही यथा व्यालं बलादुद्धरते बिलात्।

---

* यदुन्मुखं प्रारब्धमिति लिपिकरप्रमाद एव अप्रारब्धमित्येव साधुः अप्रारब्धं द्विविधमित्युक्त्वा विहितत्वात्। † पुनाति विधवा इत्येव साधु। ‡ यत्तु इत्येव साधु यदुन्मुखमित्यस्य उक्तत्वात् पुनरुक्तापत्तेः।

तद्भर्त्तारमादाय दिवं याति च सा बलात् ॥ इति । फलदानोन्मुखप्रारब्धं* कर्म्मानुगमनसाध्यस्वर्गोपभोगानन्तरं उपभुज्यते इति न विरोधः†। ननु फलदानोन्मुखप्रारब्धं प्रायश्चित्तस्थानीयेनानुगमनेन यथा विनश्यति तथा फलदानानुन्मुखमपि‡ तेन वापगच्छतु विशेषाभावादिति चेन्न । पुनातीत्युक्त्या पापनिवृत्तिः कल्प्यते§ कल्पना चानुपपत्तिवशात्, सा चानुपपत्तिः यावति कल्पिते शाम्यति तावत्कल्पनीयं¶, तथापि‖ फलोन्मुखप्रारब्धकर्म्मनिवृत्त्यापि पुनातीत्यस्य चरितार्थत्वान्न सकलपापनिवृत्तिः** परिकल्पनीया तूक्तकर्म्मण्यनिष्ठेनानुमानेन†† निवृत्त्यापि पुनातीत्यस्यान्यगतदुरितनिवृत्तिः§§रयुक्तेति¶¶ तदपेशलम्‖‖ । पतिपत्न्योः सहकर्त्तृत्वे-

---

* भोगमात्रेनारब्धं मा भुक्तं क्षीयते कर्म्म कल्पकोटिशतैरपीति स्मरणात् । † सहमरणजन्यस्वर्गभोगानन्तरं प्रारब्धकर्म्मजन्यफलभोगारम्भेण मा भुक्तं क्षीयत इत्यनेन न विरोधः । ‡ पुनाति विधवा नारी तमादाय म्रियेत या इत्यत्रेति शेषः । § फलदानोन्मुखप्रारब्धकर्म्मजन्यपापफलनिवृत्तिः कल्प्यत इत्यर्थः । अन्यथा फलदानोन्मुखप्रारब्धकर्म्मणा सहमरणाद्यनन्तरमपि निन्दितफले नरकादौ जाते सहमरणादिजन्यपतिपूतत्वादिबाधापत्तेः । ¶ यत्पापफलप्रतिबध्या सहमरणादिजन्यपूतत्वादिबाधस्तत्पापफलानुत्पत्तिः कल्पनीया इत्यर्थः । ‖ तथाच इत्यर्थः, पुस्तकान्तरेऽपि एवंविध एव पाठो दृश्यते । ** सहमरणादिजन्यफलाविरोधिफलदानानुन्मुखप्रारब्धकर्म्मजन्यकालान्तरभाविपापफलनिवृत्तिर्न परिकल्पनीया इत्यन्वयः । †† तु किन्तु, उक्तकर्म्मणि सहमरणादिकर्म्मणि इत्यर्थः । ‡‡ अनुमानेनेति सहमरणादिना पूर्व्वसञ्चितफलदानोन्मुखप्रारब्धकर्म्मजन्यपापफलनिवृत्तिः कल्पनीया सहमरणादिजन्यपतिपूतत्वादिरूपफलबाधादित्येवंरूपमनुमानम् । §§ पत्नीगतदुरितफलनिवृत्तिरित्यर्थः । ¶¶ नारी पुनातीत्यनेन नार्य्याः कर्त्तृत्वश्रुतेः पतिगतदुरितफलनिवर्त्तयितृत्वात्तस्य पत्नीगतदुरितफलनिवृत्तिः । ‖‖ असुन्दरम् ।

ना*ग्निहोत्रादिसाध्यस्वर्गादिवदुपपत्तेः†। इदञ्च दुरितं जन्मान्तरकृतमेव निवर्त्त्यम्। एतज्जन्मकृतदुरितयुक्तस्य पतितत्वेन तेन‡ सहानुगमनानधिकारात्। वैधव्यपालनेऽपि स्वर्गादिफलविशेषः स्मृत्यन्तरे स्मर्य्यते।

पत्यौ मृतेऽपि या योषिद्वैधव्यं पालयेत्क्वचित्।
सा पुनः प्राप्य भर्त्तारं स्वर्गाँल्लोकान् समश्नुते॥
विधवा कबरीबन्धा§ भर्त्तृबन्धाय जायते।
शिरसो वपनं तस्मात्कार्य्यं विधवया सदा॥
एकाहारः सदा कार्य्यो न द्वितीयः कदाचन।
त्रिरात्रं पञ्चरात्रं वा पक्षव्रतमथापि वा॥
मासोपवासं वा कुर्य्याच्चान्द्रायणमथापि वा।
कृच्छ्रं पराकं वा कुर्य्यात्तप्तकृच्छ्रमथापि वा॥
यवान्नेन फलाहारैः शाकाहारैः पयोव्रतैः।
प्राणयात्रां प्रकुर्व्वीत यावत्प्राणैः स्वयं व्रजेत्॥
पर्य्यङ्कशायिनी नारी विधवा पातयेत्पतिम्।
तस्माद्भूशयनङ्कार्य्यं पतिसौख्यं समीहिता॥
नैवाङ्गोद्वर्त्तनं कार्य्यं स्त्रिया विधवया क्वचित्।
गन्धद्रव्यस्य सम्भोगो नैव कार्य्यस्तया पुनः॥
तर्पणं प्रत्यहङ्कार्य्यं भर्त्तुः कुशतिलोदकैः।

तर्पणं पुत्रपौत्राभावविषयम्।

---

* सपत्नीको धर्ममाचरेदिति स्मरणात्। † पुरुषानुद्दिश्याग्निहोत्रकर्म्मजन्यादृष्टेन पत्न्या अपि स्वर्गोपपत्तिः तद्वत्। ‡ पतितेन पत्या। § कबरीबन्ध इति पाठान्तरम्।

विष्णोस्तु पूजनङ्कार्य्यं पतिबुद्ध्या न चान्यथा ।
पतिमेव सदा ध्यायेद्विष्णुरूपधरं परम् ॥
यद्यदिष्टतमं लोके यद्यत्प्रियः समीहितम् ।
तत्तद्गुणवते देयं पतिप्रीणनकाम्यया ॥
वैशाखे कार्त्तिके माघे विशेषनियमञ्चरेत् ।
स्नानं दानं तीर्थयात्रां विष्णोर्नामग्रहं मुहुः ॥
एवंविधैश्च विधिवद्विधिस्थैर्नियमैर्व्रतैः ।
वैशाखात्कार्त्तिकान्माघानेवमेवातिवाहयेत् ॥
नाधिरोहेदनड्वाहं प्राणैः कण्ठगतैरपि ।
कञ्चुकञ्च* परीदध्याद्वासो न विकृतं† वसेत् ॥
अदृष्ट्वा च‡ तासु न किञ्चित्§ न कुर्य्याङ्नर्त्तितत्परा ।
एवंधर्म्मसमायुक्ता विधवापि पतिव्रता ।
पतिलोकानवाप्नोति न भवेत्क्वापि दुःखिता ॥ इति ।

इति मदनपारिजाते मदनक्षितिपालनदानजलरूढे ।
स्तवको द्वितीय आसीदामोदाकृष्टपण्डितभ्रमरः ॥
मतिर्येषां शास्त्रे प्रकृतिरमणीया व्यवहृतिः
परा¶ शीलं श्लाघ्यं जगति ऋजवस्ते कतिपये ।
चिरं चित्ते तेषां मुकुरतलभूते स्थितिमिया-
दियं व्यासारण्यप्रवरमुनिशिष्यस्य भणितिः‖ ॥

इति पण्डितपारिजातकटीरमल्लीत्यादिविरुदराजीविराजमानस्य
श्रीमदनपालस्य निबन्धे पारिजाताभिधेये द्वितीयः स्तवकः ।

---

* काँचुलीति प्रसिद्धिः । † रञ्जितम् । ‡ अदृष्ट्वापि । § अप्रियमिति शेषः ।
¶ परमिति पाठान्तरम् । ‖ श्लोकार्थस्तु - येषां प्रधानपुरुषाणां शास्त्रे शास्त्रश्रवणे मतिः

तृतीयः स्तवकः ।

अथ गृहस्थस्तवकानन्तरं गृहस्थोपयोगित्वादाह्निकमारभ्यते ।

तत्र विष्णुः ।

गृहमेधिनि यत्प्रोक्तं स्वर्गसाधनमुत्तमम् ।
ब्राह्मे मुहूर्त्ते चोत्थाय तत्सर्व्वं सम्यगाचरेत् ॥

मनुरपि ।

ब्राह्मे मुहूर्त्ते बुध्येत धर्म्मार्थौ चानुचिन्तयेत् ।
कायक्लेशांश्च तन्मूलान्वेदतत्त्वार्थमेव च ॥

विष्णुपुराणे* ।

मैत्रं प्रसाधनं स्नानं दन्तधावनमञ्जनम् ।
पूर्व्वाह्ण एव कुर्व्वीत देवतानाञ्च पूजनम् ॥

मैत्रञ्च मित्रदैवत्यं मूत्रपुरीषोत्सर्गः । प्रसाधनं केशानाम्, अञ्जनं

बुद्धिः प्रकृत्या स्वभावेन रमणीया, व्यवहृतिः स्वभावः परा येषां ग्राह्यं शीलं शीलता च प्रशंसनीयं ते प्रधानपुरुषाः जगति जगन्मध्ये ऋजवः सारल्ययुक्ताः कतिपये कियन्तः । व्यासारण्यप्रवरमुनिशिष्यस्येति उपाधिविशिष्टगुरोः शिष्यस्य ग्रन्थरचयितुरिदं भणितिरूक्तिः तेषां प्रधानपुरुषाणां सुकृतलभ्यं निर्मलं चित्तं मनसि चिरं स्थितिं यथात् स्थानम् वाप्नुयात् ।

---

* एतद्वचनं मनोरिति ज्ञात्वा ग्रन्थकारैर्लिखितं मनुसंहितायामतुर्थाध्याये वचनं लभ्यते च ।

सौवीराद्यञ्जनम्। ब्राह्ममुहूर्त्तलक्षणं ब्रह्मवारिप्रकरणेऽभिहितम्।

विष्णुः।

उत्थायोत्थाय बोद्धव्यं महद्भयमुपस्थितम्।
मरणव्याधिशोकानां किमद्य निपतिष्यति* ॥

इति सञ्चिन्त्येष्टदेवतां स्मरेत्।

शयनादुत्थितो यस्तु कीर्त्तयेन्मधुसूदनम्।
कीर्त्तनात्तस्य पापानि नाशमायान्ति शेषतः ॥

स्कन्दपुराणे।

अविमुक्तचरणयुगलं दक्षिणमूर्त्तेश्च कुक्कुटचतुष्कम्।
स्मरणमपि वाराणस्याः निहन्ति दुःस्वप्नमपशकुनम्† ॥

कात्यायनः।

रोचनां चन्दनं गन्धं मृदङ्गं दर्पणं मणिम्।
गुरुमग्निं रविम्पश्येन्नमस्येत्प्रातरेव हि ॥
श्रोत्रियं सुभगामग्निं गां मृगं‡ धार्म्मिकं महीम§।
प्रातरुत्थाय यः पश्येत्स आपद्भ्यः प्रमुच्यते ॥

---

* मरणव्याधिशोकानां महद्भयं किमद्य उपस्थितं निपतिष्यति भविष्यति इति उत्थाय उत्थाय प्रबुध्य प्रबुध्य बोद्धव्यं चिन्तनीयम्। † अविमुक्तचरणयुगलमविमुक्तेश्वरचरणयुगलं, दक्षिणमूर्त्तेः शिवमूर्त्तिविशेषस्य स्मरणं कुक्कुटचतुष्कं कुक्कुटनामद्विजचतुष्कं वाराणस्याः स्मरणमपि अपशकुनं अनिष्टसूचकं दुःस्वप्नं निहन्ति। तथाच—वाराणस्युत्तरे तीरे कुक्कुटो नाम वै द्विजः। तस्य स्मरणमात्रेण दुःस्वप्नः विनश्यति इति काशीखण्डम्। ‡ नृपमिति पाठान्तरम्। § नदीमिति पाठान्तरम्।

मूत्रपुरीषोत्सर्गादिविधिषु ब्रह्मचारिप्रकरणेऽभिहितः ।

अथ दन्तधावनम् ।

विष्णुः ।

कण्टकीक्षीरवृक्षोत्थं द्वादशाङ्गुलमव्रणम् ।
कनिष्ठिकाग्रवत्स्थूलं कूर्चाग्रमग्रपर्व्वकम्* † ॥

दन्तकाष्ठाग्रं भक्षयित्वा प्रक्षिथिलावयवं कर्त्तव्यमित्यर्थः । यद्यर्थिक्रतकूर्चकमित्यपि पाठः । यदि दन्तकाष्ठं पर्व्वयुक्तभवति तदा पर्व्वद्वयमध्यभागं छित्वा तत्र कूर्चकम् प्रक्षिथिलावयवं कर्त्तव्यमिति तात्पर्य्यम् । दन्तधावनं चाग्रेण कर्त्तव्यम् ।

तथाच कूर्म्मपुराणे ।

मध्याङ्गुलसमस्थौल्यं द्वादशाङ्गुलसम्मितम् ।
सत्वचं दन्तकाष्ठं स्यात्तदग्रेण तु धावयेत् ॥

मनुः ।

तिक्तं कटुकषायं वा सुगन्धं कण्टकान्वितम् ।
क्षीरवृक्षात्तथा गुल्माद्भक्षयेद्दन्तधावनम् ॥

कात्यायनः ।

उत्थाय नित्ये प्रक्षाल्य शुचिर्भूत्वा समाहितः ।
परिजप्य च मन्त्रेण भक्षयेद्दन्तधावनम् ॥

मन्त्रमाह विष्णुः ।

---

* दलितायम् । † पर्व्वायम् । विष्णुसंहितायान्तु - कनीयसमसमस्थौल्यं सक्तुं द्वादशाङ्गुलम् । प्रातर्भूत्वा च यतवाक् भक्षयेद्दन्तधावनमित्येवं पाठो दृश्यते ।

आयुर्बलं यशो वर्चः प्रजाः पशुवसूनि च।
ब्रह्मप्रज्ञाञ्च मेधाञ्च त्वन्नो धेहि वनस्पते॥ इति।

गर्गः।

दशाङ्गुलन्तु विप्राणां क्षत्रियाणां नवाङ्गुलम्।
अष्टाङ्गुलन्तु वैश्यानामितरेषां षड़ङ्गुलम्॥
चतुरङ्गुलमानन्तु नारीणां नात्र संशयः।

विष्णुः।

द्वादशाङ्गुलकं विप्रे काष्ठमाहुर्मनीषिणः।
क्षत्रविट्शूद्रजातीनां नवषट्चतुरङ्गुलम्॥

एवं विकल्पः परिमाणे, तथान्योऽपि विशेषस्तेनोक्तः।

कनिष्ठिकाग्रवत्स्थूलं पर्व्वार्द्धक्षतकूर्च्चकम्।
दन्तधावनमुद्दिष्टमित्युक्ता
सुसूक्ष्मं हीनदन्तस्य समदन्तस्य मध्यमम्।
स्थूलं विषमदन्तस्य त्रिविधं दन्तधावनम्॥

गर्गः।

प्राङ्मुखस्य धृतिः सौख्यं शरीरारोग्यमेव च।
दक्षिणेन तथा कष्टं पश्चिमेन पराजयः॥
उत्तरेण गवां नाशः स्त्रीणां परिजनस्य च।

मार्कण्डेयः।

उदङ्मुखः प्राङ्मुखो वा कषायं तिक्तकण्टकम्। इति।

उदङ्मुखः प्रागुदङ्मुख* इत्यर्थः। अन्यथा गर्गवचनविरोधात्।

* ईशानकोणाभिमुख इति यावत्।

अनेनैवाभिप्रायेणैव कात्यायनः ।

पूर्वोत्तरे तु दिग्भागे सर्व्वान् कामानवाप्नुयात् । इति ।

महाभारते दन्तधावनप्रकरणे ।

प्रक्षाल्य हस्तौ पादौ च प्राङ्मुखः सुसमाहितः ।

दक्षिणं बाहुमुद्धृत्य कृत्वा जान्वेतरा ततः ॥

मनुः ।

प्रक्षाल्येदं शुचौ देशे दन्तधावनमुत्सृजेत् ।

पतितेऽभिमुखे सम्यक् भोज्यमाप्नोत्यसंशयः ॥

यमः ।

आम्रपलाशविल्वानामपामार्गशिरीषयोः ।

भक्षयेत्प्रातरुत्थाय वाग्यतो दन्तधावनम् ॥

पौलस्त्यः ।

आम्रातक*पलाशाम्रविल्वापामार्गचीरिणाम् ।

भक्षयेद्दन्तधवनं दन्तमांसान्यबाधयन् ॥ इति ।

मार्कण्डेयोऽपि ।

प्रातर्भूत्वा च यतवाक् भक्षयेद्दन्तधावनम् ।

प्रक्षाल्य भक्षयेत्पूर्व्वं प्रक्षाल्यैवञ्च सन्त्यजेत् ॥

नारदः ।

खादिरञ्च करञ्जञ्च करवीरकदम्बयोः ।

सर्व्वकण्टकिनः पुण्याः चीरिणो ये च शाखिनः ॥

---

* आमड़ा इति प्रसिद्धिः ।

जम्बूनिम्बकचूताश्च कदम्बो लोध्रचम्पकाः ।
वदरीतिन्दुका*स्त्वेके† प्रशस्ता दन्तधावने ॥
कोविदारः करञ्जश्च कुटजः प्लक्षमालती ।
शालोर्कश्च प्रियङ्गुश्च तमालः शाक एव च ॥

शाकः शाकवृक्षः, शाकवन इति लोके प्रसिद्धः ।

आम्रातकोऽरिमेदश्च प्रशस्ता वापि ये द्रुमाः ।
वर्ज्यास्तु शाल्मलीपीलुभव्यकिंशुकतिन्दुकाः ॥
अरिष्टोच्चः‡ पारिभद्रो गुग्गुलुस्तिन्तिड़ी तथा ।
आसने शयने याने पादुके दन्तधावने ॥
पलाशाश्वत्थकौ वृक्षौ सर्व्वकर्म्मसु कुत्सितौ ।
अभावे दन्तकाष्ठानां निषिद्धायां तिथौ तथा ॥
अपां द्वादशगण्डूषैः पञ्चैर्वा दन्तधावनम् ।
चतुर्दश्यष्टमीदर्शपूर्णिमासंक्रमेषु च ॥
नन्दासु च नवम्याञ्च दन्तकाष्ठं विवर्ज्जयेत् ।
श्राद्धे यज्ञे च नियमे तथा प्रोषितभर्तृका ॥

विष्णुः ।

प्रतिपद्दर्शषष्ठी च चतुर्दश्यष्टमीषु च ।
नवम्यां भानुवारे च दन्तकाष्ठञ्च वर्ज्जयेत् ॥

मरीचिः ।

नाद्याद्जीर्णवमथुकाश्वासज्वरार्दितः ।

---

* गाव यस्य प्रसिद्धः । † एते इति पाठान्तरम् । ‡ अरिष्टो निम्बवृक्षः, अच्चः शीतकवृक्षः वयड़ा इति प्रसिद्धः ।

तृष्णास्यपादहृन्नेत्रशिरःकर्णामयी* तथा ॥

हृदयाज्ञवल्क्यः ।

इष्टकालोष्ट्रपाषाणैर्नखैरङ्गुलिभिस्तथा ।
मुक्त्वा चानामिकाङ्गुष्ठौ वर्ज्जयेद्दन्तधावनम् ॥

वराहपुराणे ।

अज्ञातपूर्व्वाणि च दन्तकाष्ठा-
न्यायान्न पत्रैश्च समन्वितानि ।
न युग्मवर्णानि† न पाटितानि
न चोर्द्धशुष्काणि विना त्वचा वा ॥

व्यासः ।

यो मोहात्स्नानवेलायां भक्षयेद्दन्तधावनम् ।
निराशास्तस्य गच्छन्ति देवताः पितृभिः सह ॥

एतच्च मध्याह्नस्नानविषयम् ।

तथाच यमः ।

मध्याह्नस्नानवेलायां भक्षयेद्दन्तधावनम् ।
निराशास्तस्य गच्छन्ति देवताः पितृभिः सह ॥

इति दन्तधावनम् ।

---

* तृष्णा तृष्णातुरः आस्यामयी मुखरोगी पादामयी हृदयामयी नेत्रामयी शिरःआमयी कर्णामयी । † वर्णद्वयविशिष्टानि ।

अथ केशप्रसाधनादिमाङ्गल्यविधिः।

तत्र विष्णुपुराणे।

स्नातकश्च ततः पश्येद्दीर्घायुश्चिरजीविनम्।
प्रातःस्नानं ततः कुर्यात्संक्षेपेण यथोदितम्* ॥
सन्ध्याञ्चापि ततः कुर्यात्। इति प्रातःसन्ध्यानन्तरम्।

याज्ञवल्क्यः।

हुत्वाग्नीन् सूर्यदैवत्याञ्जपेन्मन्त्रान् समाहितः।
वेदार्थानधिगच्छेच्च शास्त्राणि विविधानि च ॥

प्रातःसन्ध्यावन्दनानन्तरमग्नीनावहनीयादीनौपासनाग्निं वा विधिवत् हुत्वा सूर्यदैवत्यानुदुत्यं जातवेदसमित्यादिकान् जपेत्। प्रातःसन्ध्यादिकं ब्रह्मचारिस्तवके प्रपञ्चितम्।

नरसिंहपुराणे।

दिवसस्याद्यभागे तु सर्वमेतत्समाचरेत्।

दिवसस्याद्यभागे पूर्वाह्णस्याद्यभागे।

दक्षः।

द्वितीये च तथा भागे वेदाभ्यासो विधीयते।
वेदस्वीकरणम्पूर्वं विचारोऽध्ययनं† जपः ॥
तदानञ्चैव गिष्येभ्यो वेदाभ्यासो हि पञ्चधा।
समित्पुष्पकुशादीनां स कालः समुदाहृतः ॥

उपादानस्येति विशेषः, द्वितीयभागे पूर्वाह्णस्य द्वितीयभागे।

---

* यथोचितमिति पाठान्तरम्। † अभ्यसनमिति पाठान्तरम्।

अथ पोष्यवर्गचिन्तादि।

तत्र दक्षः।

तृतीये च तथा भागे पोष्यवर्गस्य शोधनम्*।

तृतीयो भागः पूर्व्वाह्णस्यैव।

पोष्यवर्गस्तु।

माता गुरुः पिता भार्य्या प्रजा दीनः समाश्रितः।
अभ्यागतोऽतिथिश्चाग्निः† पोष्यवर्ग उदाहृतः॥

याज्ञवल्क्यः।

उपेयादीश्वरञ्चैव योगक्षेमार्थसिद्धये।

ईश्वरमभिषेकादिगुणयुक्तम्। अन्यं वा श्रीमन्तमकुत्सितम्। अलब्धस्य प्रापणं योगः। लब्धस्य रक्षणं क्षेमः। अष्टाङ्गहृदये गन्तव्यं राजकुलं दृष्ट्वा राजपूजिता लोकाः। यद्यपि न भवन्त्यर्थास्तदप्यर्थास्तदप्यनर्था निवर्त्तन्ते।

विष्णुपुराणे।

ततः सवर्णधर्म्मेण वृत्त्यर्थञ्च धनार्জ্জनम्।
कुर्व्वीत श्राद्धकर्म्मापि यजेत पृथिवीपतिं॥
सोमसंस्था हविःसंस्थाः पाकसंस्थाश्च संज्ञिताः।
धने यत्नान्नानुष्ठाणां यतेत च धनार्জ্জनम्॥
धनमूलाः क्रियाः सर्व्वा यत्नस्तस्यार्জ্জने मतः।

---

* पोष्यवर्गार्थसाधनमिति पाठान्तरम्। शोधनं भरणार्थधनोपार्জ্জनं तथाच मनुः भरणं पोष्यवर्गस्य प्रशस्तं स्वर्गसाधनं। नरकं पीड़नं चास्य तस्मात्तद्यत्नेन तं भरेदिति।
† अतिथिश्चैव इति पाठान्तरम्।

रक्षणं वर्द्धनं मानभोगस्तत्र विधिक्रमात् ॥

महाभारते ।

धर्म्मेनार्थः परीहार्य्यो धर्म्मलभ्यं विधानकम् ।
कर्त्तव्यं धर्म्मपरमं मानवेन प्रयत्नतः ॥
एकेनांशेन कामस्तु एवमंशं विवर्द्धयेत् ।

मार्कण्डेयः ।

पादेन तस्य पारक्यं कुर्य्यात्सञ्चयमात्मवान् ।
अर्द्धेन चात्मभरणनित्यनैमित्तिकान्वितम् ।
पादश्चार्थोऽयमर्थस्य* मूलभूतं विवर्द्धयेत् ॥
तत्पुनस्त्रिविधं ज्ञेयं शुद्धं शबलमेव च ।
क्रयणं तस्य† तु विज्ञेयो विभागः सप्तधा पुनः ॥
श्रुतशौर्य्यतपःकन्याशिष्ययाज्यान्वयागतम् ।
धनं सप्तविधं शुद्धमुदयोऽप्यस्य तद्विधः‡ ॥
कुसीदकृषिवाणिज्यशुल्क§शिल्पानुवृत्तिभिः¶ ।
कृतोपकाराध्ययनं शबलं समुदाहृतम् ॥
पार्ष्णिक‖ञ्चैव चौरार्त्ति**प्रतिरूपक††साहसैः‡‡ ।
व्याजेनोपार्जितं यच्च तत्कृष्णं समुदाहृतम् ॥
यथाविधेन द्रव्येण यत्किञ्चित्कुरुते नरः ।

---

* बहुषु पुस्तकेष्वेवं पाठो दृश्यते परन्तु निरर्थ एव अतः पादस्यार्द्धमर्थस्य इति स्मार्तादिदृतः पाठः साधीयान् । † शुद्धस्य सप्तधा विभागोऽनन्तरोक्त इत्यर्थः । ‡ उदय-उपायोऽपि अस्य सप्तप्रकारागतधनस्य तद्विधः सप्तविधः । § मूल्यम् । ¶ सेवाभिः । ‖ द्यूतम् । ** परपीडनम् । †† परिवर्त्तः । ‡‡ मारणैः ।

तथा विधमवाप्नोति स फलं प्रेत्य चेह च ॥

श्रुतेनाध्ययनेन शौर्य्येण याजनादिना । तपसा जपहोमेन देवतार्च्चनादिना । कन्यागतं कन्यया सहागतं श्वशुरादेर्लब्धं श्रिष्यागतं गुरुदक्षिणादि । व्याजेन दूतव्याजेन तैलादिकन्दत्त्वा यदुपार्ज्जितम् ।

भारद्वाजः ।

तत्पुनर्द्वादशविधं प्रतिवर्णाश्रयान्वितम् ।
साधारणं स्यात्त्रिविधं विदुस्तच्च क्रमागतम् ॥
प्रतिदानन्तथैवाच प्राप्तञ्च सह भार्य्यया ।
अविशेषेण वर्णानां सर्व्वेषान्त्रिविधं धनम् ॥
वैशेषिकन्धनं विद्याद्ब्राह्मणस्य त्रिलक्षणम् ।
प्रतिग्रहेण यल्लब्धं याज्यतः श्रिष्यतस्तथा ॥
त्रिविधं क्षत्रियस्यापि प्राहुर्वैशेषिकन्धनम् ।
युद्धोपलब्धं काराच्च दण्डाच्च व्यवहारतः ॥

कारः करः ।

वैशेषिकं धनं ज्ञेयं वैश्यस्यापि त्रिलक्षणम् ।
कृषिगोरक्षवाणिज्यैः शूद्रस्यापि स्वनुग्रहात् ॥

इतरवर्णानुग्रहदानेन शूद्रस्यापि कृषिगोरक्षवाणिज्यैः वैशेषिकं धनं भवतीत्यर्थः ।

सर्व्वेषामेव वर्णानामेष वर्णोधनागमः ।
विपर्य्ययाद*धमं स्यान्न चेदापद्गरीयसी ॥

---

* वैपरीत्यात् ।

अथ प्रसङ्गाद्वर्णवृत्तिरभिधीयते।

तत्र मनुः।

अद्रोहेण च भूतानामल्पद्रोहेण वा पुनः।
या वृत्तिस्तां समास्थाय विप्रो जीवेदनापदि॥

याज्ञवल्क्यः।

इज्याध्ययनदानानि वैश्यस्य क्षत्रियस्य च।
प्रतिग्रहोऽधिको विप्रे याजनाध्ययने तथा॥

अत्र चकारादिप्रो गृह्यते। ब्राह्मणस्यैव प्रतिग्रहयाजनाध्ययनानि भवन्ति। नान्यस्य, अतएव विप्र इति विषयसप्तमी। अन्यत्र भावश्च विषयः। ब्राह्मणस्यैव प्रतिग्रहादिकं त्रयं वृत्तिरित्यर्थः।

यत्तु गौतमेनोक्तम्।

आपत्कल्पो ब्राह्मणस्या ब्राह्मणाद्विद्योपयोगोऽनुगमनं शुश्रूषा वा समाप्तेः समाप्ते तु ब्राह्मणो गुरुरिति*। तत्तु क्षत्रियवैश्ययोर्ब्राह्मणप्रेरितयोर†ध्यापनमात्रकर्तृत्वाभ्यनुज्ञानम्। न तु वृत्तित्वेनाभिधानम्। अनुगमनं शुश्रूषा अनुगमनमेव शुश्रूषा इत्यर्थः।

मनुः।

षण्णान्तु कर्म्मणामस्य त्रीणि कर्म्माणि जीविका।
याजनाध्यापने चैव विशुद्धाच्च प्रतिग्रहः॥

---

* गुरुवन्माननीयः। † ब्राह्मणो यदा ब्राह्मणाध्यापकाभावे अध्ययनार्थं क्षत्रियादिसमीपं गत्वा प्रार्थयते तदैव ब्राह्मणप्रेरितो भवति।

देवलः ।

द्विविधो गृहस्थो यायावरः शालीनश्च तयोर्यायावरो याजनाध्ययनप्रतिग्रहरिक्थस्य च वर्ज्जनात् । शालीनस्तु प्रेष्यचतुष्पादधनधान्ययुक्तशालायां लोकानुवर्त्ती स चतुर्विधः ।

यथाह मनुः ।

कुशूलधान्यको* वा स्यात्कुम्भीधान्यक† एव वा ॥
त्र्यहैहिको वापि भवेदश्वस्तनिक एव वा ॥
चतुर्णामपि सर्व्वेषां द्विजानां गृहमेधिनाम् ।
यायावरः परो ज्ञेयो धर्म्मतो लोकजित्तमः ॥
षट्कर्म्मको भवेत्तेषां त्रिभिरन्यः प्रवर्त्तते ।
द्वाभ्यामेकश्चतुर्थस्तु ब्रह्मसत्रेण जीवति ॥

एकः कुशूलधान्यः षट्कर्म्मा‡ उञ्छशिलायाचितयाचितकृषिवाणिज्यैः । अन्यः कुम्भीधान्यः त्रिभिरुञ्छशिलायाचितैः । अपरस्त्यहैहिको द्वाभ्यामुञ्छशिलाभ्यां चतुर्थस्त्वश्वस्तनिको ब्रह्मसत्रेण ब्रह्मलोकप्राप्तिहेतुत्वेन सत्रयागतुल्यफलेनोञ्छेन जीवति ।

मनुः ।

ऋतामृताभ्यां जीवेत न श्ववृत्त्या कदाचन ।
ऋतमुञ्छशिलं ज्ञेयममृतं स्यादयाचितम् ॥

---

* त्रिवर्षजीविकानिर्व्वाहोपयोगिधान्यविशिष्टः । † वर्षमात्रजीविकानिर्व्वाहोपयोगिधान्यविशिष्टः । ‡ षट्कर्म्मेति षट् कर्म्माणि गणयति उञ्छशिल इत्यादि ।

ऋतन्तु याचितभैक्ष्यं प्रमृतङ्कर्षणं स्मृतम्।
सत्यानृतन्तु वाणिज्यं तेन चैवोपजीव्यते॥
सेवा श्ववृत्तिराख्याता तस्मात्तां परिवर्जयेत्।

अथापदि प्रतिग्रहवृत्तिः।

याज्ञवल्क्यः।

राजान्तेवासिशिष्येभ्यः सीदन्निच्छेद्धनं क्षुधा।
दम्भिहैतुकपाषण्डवकवृत्तींश्च वर्जयेत्॥

राजा न्यायपरः शिष्यो यथोक्तलक्षणः। याज्यः याजनार्हस्तैवर्षिकः।

शङ्खः।

एतैरेव गुणैर्युक्तं धर्म्मार्ज्जितधनं तथा।
याजयेत सदा विप्रो ग्राह्यस्तस्मात्प्रतिग्रहः॥

एतैरिति जन्मकर्म्मादिभिः शुद्धः।

मनुः।

राजतो धनमन्विच्छेत्सीदन् स्नातकः क्षुधा।
याज्यान्तेवासिनो वापि नत्वन्यत इति स्थितिः॥

नत्वन्यत इति एषां सद्भावे।

व्यासः।

द्विजातिभ्यो धनं लिप्सेच्छिष्टेभ्यो द्विजसत्तमः।
अपि वा द्विजमात्रेभ्यो न शूद्रात्तु कथञ्चन॥

द्विजमात्रेभ्य इति, निर्गुणधर्म्मरहितेभ्योऽपि।

नारदः ।

ब्राह्मणश्चैव राजा च द्वावप्येतौ धृतव्रतौ ।
नैतयोरन्तरं किञ्चित्प्रजाधर्म्माभिरक्षणात् ॥
धर्म्मस्य कृतकृत्यस्य धर्म्मार्थं शासतोऽशुचीन् ।

अशुचीन् कृतापराधान् ।

मध्यमेव धनमाहुस्तीक्ष्णस्यापि महीपतेः ।
शुचीनामशुचीनान्तु सन्निपाता यथाम्भसाम् ॥
समुद्रे समतां याति तद्वद्राज्ञां धनागमः ।
यथाग्नौ संस्थिते दीप्ते शुद्धिमायाति काञ्चनम् ॥
एवं धनागमाः सर्व्वे शुद्धिमायान्ति राजनि ।
अशुचिर्वचनाद्यस्य शुचिर्भवति पूरुषः ॥
शुचिश्चैवाशुचिः सद्यः कथं राजा न दैवतम् ।
विदुर्य एवन्दैवत्यं राज्ञोऽस्तमिततेजसः ॥
तस्य ते प्रतिगृह्णन्तो न लिप्यन्ते कथञ्चन ।

दैवत्यमष्टलोकपालरूपेण ।

मनुः ।

न राज्ञः प्रतिगृह्णीयादराजन्यप्रसूतितः ।
सूनाचक्रध्वजवतां वैशेनैव च जीवताम्* ॥

---

* राजन्यशब्दः क्षत्रियवचनः अक्षत्रियप्रसूतस्य राज्ञो धनं न प्रतिगृह्णीयादिति कुल्लूकभट्टः । सूनावतां चक्रवतां ध्वजवतां सूना प्राणिवधस्थानं, पशुमारणपूर्व्वकमांसविक्रयोपजीवी । चक्रीपजीवी तैलिकः कलु यस्य प्रसिद्धिः । ध्वजवान् सर्व्वोपजीवी शौण्डिकः । वैशः पण्यस्त्रिया भृतिः, तया जीवति यः स वैशवान् ।

न राज्ञ इति लोभात्प्रजापीड़कस्य, अराजन्यप्रसूतित इति ।

सूनाचक्रध्वजवतां वेशेनैव च जीवताम् ।
न राज्ञः प्रतिगृह्णीयाद्बुध्यस्योच्छास्त्रवर्त्तिनः ॥
स पर्य्यायेण यातीमान्नरकानेकविंशतिम् ।

यमश्च ।

अराजन्यप्रसूतस्य राज्ञः स्वच्छन्दवर्त्तिनः ।
घोरप्रतिग्रहस्यापि लब्धास्वादो विषोपमः ॥
तथैव राजमहिषीराजामात्यपुरोहिताः ।
पापेनार्थेन संयुक्ताः सर्व्वे ते राजधर्म्मिणः ॥

याज्ञवल्क्यः ।

प्रतिग्रहे सूनिचक्रिध्वजिवैश्यनराधिपाः ।
दुष्टा दशगुणाः पूर्व्वात्पूर्व्वादेते यथोत्तरम्* ॥

हारीतः ।

दश सूना सहस्राणि अङ्का राजा करोति च ।
तान्येव कुरुते राजी घोरस्तस्य प्रतिग्रहः ॥
अर्द्धेन तु ततोऽमात्या सेनानी दण्डनायकौ ।
ततोऽर्द्धार्द्धतदर्द्धार्द्धमाश्रितोपाश्रितेषु च ॥

यदि यदा कथञ्चिदेतेभ्यो गृह्णाति ।

तत्र बृहस्पतिः ।

---

* सूनिनः मांसविक्रयजीविनः दशगुणं पापं चक्रिणः तैलिकात्प्रतिग्रहे एवं तस्माद्दश-गुणं ध्वजिनः शौण्डिकात्तस्माद्दशगुणं वैश्यतः तस्माद्दशगुणं क्षत्रियभिन्नराजतः ।

असतोऽपि स्वमादाय साधुभ्यः सम्प्रयच्छति ।
धनस्वामिनमात्मानं सन्तारयति दुस्तरात् ॥

अथ प्रतिग्रहविषये आपदनापत्साधारणं किञ्चिदुच्यते ।

तत्र मनुः ।

एधोदकं मूलफलमन्नमभ्युद्यतञ्च यत् ।
सर्वतः प्रतिगृह्णीयान्मध्वथाभयदक्षिणाम् ॥

एध इन्धनमतएव यदक्षिणाव्यतिरिक्तमभ्युद्यतमिति सम्बध्यते । अभ्युद्यतमभ्यर्थदत्तम् । सर्वतः शूद्रादपि अयञ्चोपदेशः प्रतिग्रहवत्तस्यैव न तु निवृत्तस्य अभयदक्षिणान्तु म्लेच्छादिभ्योऽपि ।

शय्यासनं कुयान् गन्धान् पुष्पमन्नं मणीन्दधि ।
धाना मत्स्यान् पयो मांसं शाकञ्चैव न निर्नुदेत् ॥

मणीन् विषादिनिवारकी* धाना लाजा, न निर्नुदेत्प्रत्याख्यायते† ।

तिलो धेनुर्गजो वाजी प्रेतान्नꣳमजिनं मणिम्§ ।
सुरभी सूयमानाश्च घोराः सप्त प्रतिग्रहाः ॥

प्रतिग्राहकः किं गुणविशिष्टोऽधिकारी को वानेत्याकाङ्क्षायां निषेधमुखे नानधिकारिणामर्थादधिकारिणश्चाह ।

---

* प्रस्तरविशेष इति शेषः । † न निषेधं करोति । ‡ प्रेतमुद्दिश्य दत्तमन्नम् । § विषादिनिवारकप्रस्तरभिन्नप्रस्तरविशेषम् । ¶ अर्डप्रसूता धेनुरित्यर्थः । अधिकदोषार्थं [illegible]

याज्ञवल्क्यः।

विद्यातपोभ्यां हीनेन न तु ग्राह्यः प्रतिग्रहः।
गृह्णन् प्रदातारमधो नयत्यात्मानमेव च॥

मनुः।

हिरण्यभूमिमश्वं वा अन्नं वासस्तिलान् घृतम्।
अविद्वान् प्रतिगृह्णीयाद्भस्मीभवति दारुवत्॥

याज्ञवल्क्यः।

ग्रहादीनां नरेन्द्राणामुच्छ्रायाः पतितानि च।
भावाभावौ च जगतस्तस्मात्पूज्यतमा ग्रहाः*॥

महोत्साहः स्थूललक्षः कृतज्ञो वृद्धसेवकः।
विनीतः सत्वसम्पन्नः कुलीनः सत्यवाक् प्रियः॥

स्थूललक्षो बहुदेयार्थदर्शी, बहुप्रद इति यावत्।

अदीर्घसूत्रः स्मृतिमान् अक्षुद्रोऽपरुषस्तथा।
धार्म्मिकोऽव्यसनश्चैव प्राज्ञः शूरो रहस्यवित्॥

अदीर्घसूत्रः, अनारब्धकर्म्मणामारम्भे आरब्धानाञ्च परिसमापने यो न विलम्बते† सः। रहस्यविज्ञापनीयार्थगोपननिपुणः।

स्वरन्ध्रगोप्तान्वीक्षिक्यान्दण्डनीत्यां तथैव च।
विनीतस्त्वर्थवार्त्तायां त्रय्याञ्चैव नराधिपः॥

---

* ग्रहादीनामनुग्रहेणाध्याहारेणान्वयः। जगतः जगति नरेन्द्राणां नृपाणामुच्छ्रायाः उन्नतयः पतितानि पतनानि भावाभावौ च यस्मात्तस्मात्ते ग्रहाः पूज्यतमा इत्यन्वयः। एवं तद्वचनं याज्ञवल्क्यसंहितायां न लभ्यते। † न विलम्बङ्करोति।

आन्वीक्षिकी तर्कविद्या आत्मविद्या च ।

तथाच मनुः ।

त्रैविद्येभ्यस्त्रयीं विद्यां दण्डनीतिञ्च तद्विदः* ।

आन्वीक्षिकीं चात्मविद्यां वार्त्तारम्भाञ्च लोकतः ॥

दण्डनीतिरर्थशास्त्रं वार्त्ता कृषिवाणिज्यपशुपालनादिरूपा ।

त्रयी ऋग्यजुःसामरूपा ।

स मन्त्रिणस्तु कुर्व्वीत प्राज्ञान्मौलान् स्थिरान् शुचीन् ।

तैः सार्द्धञ्चिन्तयेद्राज्यं विप्रेणाथ ततः स्वयम् ॥

मौलान् राज्ये वंशपरम्परायातान् । विप्रेण पुरोहितेन ।

पुरोहितन्तु कुर्व्वीत दैवज्ञन्तु दितोदितम् ।

दण्डनीत्याञ्च कुशलमथर्वाङ्गिरसे तथा ॥

उदितोदितं शास्त्रोदितैर्विद्यादिभिरुदितं समृद्धम् ।

श्रौतस्मार्त्तक्रियाहेतोर्वृणुयादेव ऋत्विजः ।

यज्ञांश्चैव प्रकुर्व्वीत विधिवद्भूरिदक्षिणान् ॥

भोगांश्च दद्याद्विप्रेभ्यो वसूनि विविधानि च ।

अक्षयोऽयं विधीराज्ञां यद्विप्रेषूपपादितम् ॥

भोगान् सुखधनानि ।

अस्खलन्नमव्यथञ्चैव प्रायश्चित्तैरदूषितम्† ।

अग्नेः सकाशादिप्राग्नौ‡ हुतं श्रेष्ठमिहोच्यते ॥

---

* शाश्वतीमिति मूले पाठः । † पूतम् । ‡ अग्नेः सकाशात् अर्थात् साक्षादग्नौ हुतमथवा विप्ररूपाग्नौ हुतं दत्तमित्यर्थः ।

अस्कन्नं क्षररहितम्, अव्ययं पशुहिंसारहितम्।

अलब्धमीहेत्* धर्म्मेण लब्धं धर्म्मेण पालयेत्।
पालयन्वर्द्धयेन्नीत्या वृद्धं पात्रेषु निक्षिपेत्॥
दत्त्वा भूमिं निबन्धं वा कृत्वा लेख्यन्तु कारयेत्।
आगामितत्तन्†ृपतिपरिज्ञानाय पार्थिवः॥

निबध्यत इति निबन्धः पर्णभरकादि। स्वदत्तं परदत्तं वा भूम्यादि नापहरेत्।

स्वदत्तां परदत्ताञ्च यो हरेत वसुन्धराम्।
षष्टिवर्षसहस्राणि विष्ठायां जायते कृमिः॥

इति ब्रह्मपुराणस्मरणात्।

पटे वा ताम्रपट्टे वा समुद्रोपरि चिह्नितम्।
अभिलेख्यात्मनो वंश्यानात्मानञ्च महीपतिः॥
प्रतिग्रहपरीमाणं दानच्छेदोपवर्णनम्।
स्वहस्तकालसम्पन्नं शासनं कारयेत् स्थिरम्।

आत्मानञ्च चशब्दात् प्रतिग्रहीतारमपि। प्रतिगृह्यत इति प्रतिग्रहो निषेधः, तस्य परिमाणम्। दीयते इति दानं क्षेत्रादि तस्य छेदः क्षिप्यत इति छेदो नद्यादिः।

नातः परतरो धर्म्मो नृपाणां यद्रणार्जितम्।
विप्रेभ्यो दीयते द्रव्यं प्रजाभ्यश्चाभयं सदा॥
य आहवेषु वध्यन्ते भूम्यर्थमपरांमुखः।

---

* आर्षप्रयोगः। † भद्रनृपतिरिति पाठान्तरम्।

अकूटैरायुधैर्यान्ति ते स्वर्गं योगिनो यथा ॥
पदानि क्रतुतुल्यानि भग्नेष्वविनिवर्त्तिनाम् ।
राजा सुकृतमादत्ते हतानां विपलायिनाम् ॥
तवाहं वादिनं क्लीवं निर्हेति परमङ्गतम् ।
न हन्यादिनिवृत्तञ्च युद्धप्रेक्षणकादिकम् ॥
कृतरक्षः समुत्थाय पश्येदायव्ययौ स्वयम् ।
व्यवहारांस्ततो दृष्ट्वा स्नात्वा भुञ्जीत कामतः ॥

प्रतिदिनम्प्रातःकाले पुरञ्च आत्मनञ्च रक्षां विधाय स्वयमेवाय-व्ययौ पश्येत् । ततो व्यवहारान् दृष्ट्वा मध्याह्नकाले स्नात्वा यथारुचि भुञ्जीत ।

हिरण्यं व्याकृतानीतं भाण्डागारेषु निःक्षिपेत् ।
पश्येच्चारांस्ततो दूतान् प्रेषयन्मन्त्रिसङ्गतम् ॥

व्याकृता हिरण्याद्यानयने नियुक्ताः ।

ततः स्वैरविहारी स्यान्मन्त्रिभिर्वासमागतः ।
बलानान्दर्शनङ्कृत्वा सेनान्या सह चिन्तयेत् ॥

ततोऽपराह्णे स्वैरविहारी, अन्तःपुरे ।

तथाच मनुः ।

भुक्तवान्विहरेच्चैव स्त्रीभिरन्तःपुरे सह ।
विहृत्य च यथाकामं* पुनः कार्य्याणि चिन्तयेत् ॥ इति ।
सन्ध्यामुपास्य शृणुयाच्चाराणां गूढभाषितम् ।

---

* यथाकालमिति मूले पाठः ।

गीतनृत्यैश्च भुञ्जीत स्वाध्यायञ्च ततः पठेत्* ॥

स्वाध्यायमिति स्मरणार्थं पठेत्।

संविशेत्तूर्य्यघोषेण प्रतिबुध्येत्तथैव च।

शास्त्राणि चिन्तयेद्वृद्धा सर्व्वकर्त्तव्यता तथा ॥

संविशेत् सुप्यात्।

ब्राह्मणेषु क्षमा स्निग्धे†ष्वजिह्मः क्रोधनोऽरिषु।

स्याद्राजा भृत्यवर्गेषु प्रजासु च तथा पिता ॥

पुष्यात् षड्भागमादत्ते न्यायेन परिपालयेत्।

सर्व्वदा नाधिकं यस्मात्प्रजानां परिपालनम् ॥

अन्यायेन नृपो राष्ट्रात्स्वकोषं योऽभिवर्द्धयेत्।

सोऽचिराद्विगतश्रीको नाशमेति सबान्धवः ॥

प्रजापीड़नसन्तापात्समुद्भूतो हुताशनः।

राज्ञः श्रियङ्कुलं प्राणान्नादग्ध्वा विनिवर्त्तते ॥

आह विष्णुः।

निधिञ्च ब्राह्मणोलब्ध्वा सर्व्वमादद्यात्क्षत्रियश्चतुर्थमंशं राज्ञे दद्याच्चतुर्थमंशं ब्राह्मणेभ्योऽर्द्धमादद्याद्वैश्यश्चतुर्थमंशं राज्ञे दद्याद्ब्राह्मणेभ्योंऽशमादद्यात्। स्वनिहिताद्राज्ञेऽ ब्राह्मणवर्ज्जं द्वादशमंशं दद्युः।

आह वशिष्ठः।

अज्ञायमानं वित्तं योऽधिगच्छेद्राजा तद्वरेदधिकन्तु षष्ठ-

---

* रहस्याख्यायिनाञ्चैव प्रणिधीनाञ्च चेष्टितमिति मूले पाठः। † मित्रेषु। ‡ स्वनिहितानिति निहितधनानि इत्यर्थः।

मंशं प्रदाय ब्राह्मणश्चेदधिगच्छेत् षट्कर्मसु वर्त्तमानो न राजा हरेत्।

आह मनुः।

प्रणष्टस्वामिकं रिक्थं राजा अर्द्धं* निधापयेत्।
अर्व्वागब्दात्† हरेत्स्वामी परेण नृपतिर्हरेत्॥

परेण नृपतेर्भोगानुज्ञामात्रमिदमिति व्याचक्षते। स्वाम्यागमने तदर्पणमेव।

मसेदमिति यो ब्रूयात्सोऽनुयोज्यो यथाविधि।
संवाद्य रूपसंख्यादीन् स्वामी तद्द्रव्यमर्हति॥
आददीताथ षड्भागं प्रनष्टाधिगतान्नृपः।
दशमं द्वादशं वापि सतां धर्म्ममनुस्मरन्॥
ममायमिति यो ब्रूयान्निधिं सत्येन मानवः।
तस्यादद्दीत षड्भागं राजा द्वादशमेव वा॥
विद्वांसु ब्राह्मणो दृष्ट्वा पूर्व्वोपनिहितं निधिम्।
अशेषमप्यादद्दीत सर्व्वस्याधिपतिर्हि सः॥
यन्तु पश्येन्निधिं राजा पुराणं निहितं क्षितौ।
तस्माद्द्विजेभ्यो दत्त्वार्द्धमर्द्धं कोशे प्रवेशयेत्॥

आह नारदः।

परेण निहितं लब्ध्वा राजैवोपहरेन्निधिम्।
राजगामी निधिः सर्व्वः सर्व्वेषां ब्राह्मणादृते॥

---

* ब्राह्मणमिति मूले पाठः। † ब्राह्मादिति मूले पाठः।

ब्राह्मणोऽपि निधिं लब्ध्वा क्षिप्रं राज्ञे निवेदयेत्।
तेन दत्तन्तु भुञ्जीत स्तेनः स्यादनिवेदयन्॥

अथ वैश्यवृत्तिः।

मनुः।

वैश्यस्तु कृतसंस्कारः कृतदारपरिग्रहः।
वार्त्तायां* नित्ययुक्तः स्यात्पशूनाञ्चैव रक्षणे॥
मणिमुक्ताप्रबालानां लोहानान्तान्तवस्य† च।

लोहानां धातूनाम्।

गन्धानाञ्च‡ रसानाञ्च§ विद्यादर्घबलाबलम्¶।
बीजोप्तिविधि‖युक्तः स्यात् क्षेत्रबीजगुणस्य** च॥
मानयोगांश्च†† जानीयात्तुलायोगांश्च सर्व्वशः।
सारासारञ्च भाण्डानां देशानाञ्च गुणागुणम्॥

भाण्डानां विक्रेयद्रव्याणाम्।

लाभालाभञ्च पण्यानां पशूनां वृद्धिरर्জ্জनम्‡‡।
भृत्यानाञ्च भृतिं§§ विद्याद्भाषाश्च विविधा नृणाम्॥
द्रव्याणां स्थानयोगांश्च क्रयविक्रयमेव च।

---

* कृषिवाणिज्यादौ। † तन्तुसम्बन्धिवस्त्रस्य। ‡ कर्पूरादीनाम्। § लवणादीनाम्। ¶ उत्कृष्टत्वमपकृष्टत्वम्। ‖ बीजवपनविधिः। ** क्षेत्रगुणस्य बीजगुणस्य च विधिरिति शेषः। †† द्रव्यादीनां परिमाणयोगः। ‡‡ परिवर्त्तनमिति मूले पाठः। वृद्धिवर्জ্জनमिति पाठान्तरम्। §§ कस्मिन् भृत्ये किं वेतनं दातव्यमेतज्जानीयात्। भ्रांतमिति पाठान्तरम्।

धर्म्मेण हि द्रव्यहरौ आतिष्ठेद्यत्नमुत्तमम् ।
विद्याच्च सर्व्वभूतानां भक्ष्यमेव* प्रयत्नतः† ॥

कालिकापुराणे ।

कृषिगोरक्षवाणिज्यमेतद्वैश्यस्य सम्मितम् ।
तथाप्यनड्युग्माभ्यां‡ कृषिं नैव समाचरेत् ॥
द्विगवाभ्यां द्विषट्काभ्यां प्रहरार्द्धप्रमाणतः ।
द्वौ द्वौ योज्यान्तरे चैकं कारयेदर्म्मतो द्विजः§ ॥
पिण्याकं¶ तृणतोयन्तु तेषां यत्नात्स दापयेत् ।
धूमकण्डूयनञ्चैव कृत्वैवं कारयेत्ततः ॥
वैणवीमपि‖ भूमिन्तु अधोमूत्रगमाय च ।
कुर्व्वन्नेवं न सीदेत कृषिं वैश्यो महामुने ॥
राज्ञां षड्भागमुत्सृज्य पञ्चमङ्कर्षकस्य च ।
शिल्पिनः प्रकृतीश्चैव दीनान्धांस्तर्पयेत्ततः ।
शेषमात्मनि युञ्जीत खलु क्षेत्रेष्वयं विधिः ॥

हारीतः ।

---

* कीदृशभूतानां किं भक्ष्यमाहारीयद्रव्यमेतज्ज्ञानीयात् । † दद्याच्च सर्वभूतानामन्न मेव प्रयत्नत इति मूले पाठः । ‡ युग्मसंज्ञाभ्याम् । § द्विषट्काभ्यामष्टसंख्यकाभ्यां द्विगवाभ्यां द्वौ गावौ कृत्वा एकैकयुगे योजिताभ्यां प्रहरार्द्धप्रमाणतः प्रहरार्द्धपर्य्यन्तं कर्म्म कारयेत् । द्वौ द्वाविति अर्द्धप्रहरादूर्द्धं द्वौ द्वौ कृत्वा ततः पुनः योज्य इत्यार्षं योजयित्वा अन्तरे अर्द्धप्रहरमध्येऽपि एकं कारयेत्कर्षणमिति शेषः अर्थात् अर्द्धप्रहरमध्येऽपि पूर्व्वापरपरि वर्त्तितभावेन एकं कर्म्म कारयेदित्यर्थः । ¶ खलीति यस्य प्रसिद्धिः । ‖ वेणुनिर्म्मितं नालम् ।

अष्टागवं धर्म्महलं षड्गवं जीविकार्थिनाम्*।
चतुर्गवं नृशंसानां द्विगवं ब्रह्मघातिनाम्॥
बालानां† दमनञ्चैव वाहनञ्च न शक्यते।
वृद्धानान्दुर्ब्बलानाञ्च प्रजापतिवचो यथा॥
पुंस्त्वोपघातनं नासौ वाहानाङ्कारयेत्ततः।
वृद्धं युग्मे‡ न युञ्जीत जीर्णं व्याधितमेव च॥

अथ कुसीदम्।

तत्र याज्ञवल्क्यः।

अशीतिभागो वृद्धिः स्यान्मासि मासि सबन्धके।
वर्ष्णक्रमाच्छतं द्विचिचतुःपञ्चकमन्यथा॥

अन्यथेति असबन्धके।

मनुः।

नातिसांवत्सरीं वृद्धिं नाभीष्टान्तु§ पुनर्हरेत्।
चक्रवृद्धिः कालिका च कारिका कायिका च या¶॥

याज्ञवल्क्यः।

वृद्धेर्वृद्धिश्चक्रवृद्धिः प्रतिमासन्तु कालिका।
ईहाकृता कारिका स्यात्कायिका कायकर्म्मणि॥

---

* जीवितार्थिनामिति पाठान्तरम्। † गोवत्सानाम्। ‡ हले। § न चादिष्टामिति मूले पाठः। अस्वीकृतपूर्व्वकाभिलषिताम्। ¶ समैकस्मिन्मासि मासद्वये मास चये वा गते तस्य वृद्धिं विगणय्य एकदा दातव्येत्येवंविधिनियमपूर्व्वकवृद्धिग्रहणसूत्तमर्णः संवत्सरपर्य्यन्तं कुर्य्यात्। नातिक्रान्ते संवत्सरे नियमस्य वृद्धिं गृह्णीयादिति कुल्लूकभट्टः।

बृहस्पतिः ।

बहवो वर्त्तनोपाया ऋषिभिः परिकीर्त्तिताः ।
सर्वेषामपि चैतेषां कुसीदमपि तं विदुः ॥
अनावृष्ट्या गजभयान्मूषिकाद्यैरुपद्रवैः ।
वृष्ट्यादिके भवेद्धानिः सा कुसीदेन घातयेत् ॥

अथ शूद्रवृत्तिः ।

तत्र मनुः ।

विप्राणां वेदविदुषां गृहस्थानां यशस्विनाम् ।
शुश्रूषैव तु शूद्रस्य धर्म्मो निःश्रेयसः परः ॥

बृहस्पतिः ।

शौचं ब्राह्मणशुश्रूषा सत्यमक्रोध एव च ।
शूद्रकर्म्म तथा मन्त्रो नमस्कारोऽस्य चोदितः ॥

पराशरः ।

शूद्रस्य द्विजशुश्रूषा प्रथमं धर्म्मलक्षणम् ।
यदन्यत्कुरुते कर्म्म तद्भवेत्तस्य निष्फलम् ॥

द्विजशुश्रूषा त्रिवर्णशुश्रूषा । तस्य निष्फलमिति । द्विजसेवाया विरोधि यदन्यत्कुरुते तन्निरर्थकमित्यर्थः ।

गौतमः ।

चतुर्व्वर्ण एकजातिस्तस्याः सत्यमक्रोधः शौचमाचमनार्थं पाणिपादप्रक्षालनमेके श्राद्धकर्म्म भृत्यभरणं स्वदार-वृत्तिः परिचर्य्या चेतरेषामेभ्यो वृत्तिं लिप्सेत् ।

इतरेषां द्विजातीनाम्।

याज्ञवल्क्यः।

भार्य्यारतिः शुचिर्भृत्यभर्त्ता श्राद्धक्रियारतः।
नमस्कारेण मन्त्रेण पञ्चयज्ञान्न हापयेत्॥

नमस्येतावानेव मन्त्रः।

देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च।
नमः स्वधायै स्वाहायै नित्यमेव नमो नमः॥

इति मन्त्रः। न चानग्नेः शूद्रस्य कथमग्निसाध्यकर्म्माधिकारः। विवाहादाविति चेत्। शूद्रस्य विवाहहोमाभावात्। न ह्यमन्त्रकोऽस्ति होमो न च शूद्रो मन्त्रवान् न च नमस्कारमन्त्रेणैव मन्त्रवत्तेति वाच्यं तस्य पञ्चयज्ञेष्वेव हेतुत्वात्। तस्मादग्निसाध्यकर्म्मसु वक्तव्योऽस्याधिकारहेतुः उच्यते। अनग्नेरपि शूद्रस्य लौकिकेऽग्नौ वैश्वदेवादीनि कर्म्माणि कार्य्याणि तं प्रति साक्षाद्विधानात्। निषादस्थपतीष्टिवत्। किञ्च द्विजातीनामपि न विवाहोऽग्नौ नियतम्। वैश्वदेवकर्म्म किमुत शूद्रस्य एवञ्च शूद्रस्य यत्र यत्र होमस्तत्र तत्र लौकिकाग्नावेव मन्त्रान्तराविधानेन नमस्कारमन्त्र एवेति सिद्धम्।

अथापद्वृत्तिः।

तत्र मनुः।

अजीवंस्तु यथोक्तेन ब्राह्मणः स्वेन कर्म्मणा।
जीवेत्क्षत्रियधर्म्मेण स ह्यस्य प्रत्यनन्तरम्॥

उभाभ्यामप्यजीवंस्तु कथं स्यादिति चेद्भवेत्।
कृषिगोरक्षमास्थाय जीवेद्वैश्यस्य जीविकाम्॥

वैश्यवृत्त्यापि जीवन्तो विक्रेयमाह स एव।

सर्व्वान्नसान् व्यपोहेत कृतान्नञ्च* तिलैः सह।

व्यपोहेत वर्ज्जयेन्न विक्रीणीतेत्यर्थः। व्यपोहेतेति सर्व्वत्रानुषज्यते।

अश्मनो लवणञ्चैव पशवो ये च मानुषाः।
सर्व्वञ्च तान्तवं रक्तं शाणक्षौमाविकानि च॥
अपि चेत्स्युररक्तानि फलमूले तथौषधीः।
अपः शस्त्रं विषं मांसं सोमं गन्धांश्च सर्व्वशः॥
क्षीरं क्षौद्रं दधि घृतं तैलं मधु गुडं कुशान्।
आरण्यांश्च पशून् सर्व्वान्दंष्ट्रिणश्च वयांसि च।
मद्यं नीलं बलाकाञ्च द्विशफैकशफांस्तथा†॥

अत्र रसग्रहणेनैव लवणस्यापि ग्रहणे सिद्धे पुनर्ग्रहणं दोषाधिक्यप्रतिपादनार्थम्‡। एतेनान्यदपि पुनरुक्तं व्याख्यातम्§। क्षौद्रं मधु कल्कसिक्थकं माक्षिकस्य मधुशब्देनैवोपादानात्।

सद्यः पतति मांसेन लाक्षया लवणेन च।
त्र्यहेण शूद्रो भवति ब्राह्मणः क्षीरविक्रयात्॥
इतरेषान्तु पण्यानां विक्रयादिह कामतः।

---

* लड्डुकादि। † द्विशफं गवादिकम्, एकशफमश्वादिकम्। मद्यं नीलिञ्च लाक्षाञ्च सर्व्वांश्चैकशफांस्तथा इति मूले पाठः। ‡ अधिकदोषार्थमेवेति शेषः। § यावत् यस्य प्रसिद्धः।

ब्राह्मणः सप्तरात्रेण वैश्यभावं नियच्छति ॥
रसारसैर्निमातव्या न त्वेव लवणं रसैः।
कृतान्नं वाकृतान्नेन तिला धान्येन तत्समाः ॥

निमातव्याः परिवर्त्तनीयाः। जीवेदेतेन य आपत्।

वैश्योऽजीवन् स्वधर्म्मेण शूद्रवृत्त्यापि वर्त्तयेत्।
अग्रक्षुवंस्तु शुश्रूषां शूद्राः कर्त्तुं द्विजन्मनाम् ॥
पुत्रदारात्ययप्राप्तौ जीवेत्कारुककर्म्मभिः।
यैः कर्म्मभिः प्रचरितैः शुश्रूषन्ते द्विजातयः ॥
तानि कारुककर्म्माणि शिल्पानि विविधानि च।

कुर्व्वीतेति शेषः। आपद्यप्यन्यवृत्तिभ्योऽपि स्ववृत्तिरेव ब्राह्मणस्य ज्यायसीत्याह

मनुरेव।

वरं स्वधर्म्मो विगुणः परधर्म्मात्स्वनुष्ठितात्।
परधर्म्मेण जीवन् हि सद्यः पतति जातितः ॥
वैश्यवृत्तिमनातिष्ठन् ब्राह्मणः स्वे पथि स्थितः।
अवृत्तिकर्षितः सीदन्निमं धर्म्मं समाचरेत्।
सर्व्वतः प्रतिगृह्णीयात् ब्राह्मणस्वनयं* गतः ॥
नाध्यापनाद्याजनाद्वा गर्हिताद्वा प्रतिग्रहात्।
दोषो भवति विप्राणां ज्वलनाम्बुसमा† हि ते ॥

तथा।

जीवितात्ययमापन्नो योऽन्नमत्ति यतस्ततः।

* आपन्नतः। † अग्निजलतुल्याः।

आकाशमिव पङ्केन न स पापेन लिप्यते ॥

तथार्थवादोऽपि ।

क्षुधार्त्तश्चात्तुमभ्यागाद्दिप्सामित्रः श्वजाघनीम् ।

चण्डालहस्तादादाय धर्म्माधर्म्मविचक्षणः ॥

श्वजाघनी श्वश्रोणिः ।

आपद्यत्यन्तागत्या आवश्यककर्म्मणः सम्पत्त्यर्थं चौर्य्यमपि क्व चानुजानाति ।

वानस्पत्यं मूलफलं दार्व्वग्न्यर्थं तथैव च ।

तृणञ्च गोभ्यो ग्रासार्थमस्तेयं मनुरब्रवीत् ॥

वानस्पत्यं पत्रपुष्पादि ।

द्विजोऽध्वगः क्षीणवृत्तिर्दाविक्षू हे च मूलके ।

आददानः परक्षेत्रान्न दण्डं दातुमर्हति ॥

तथैव सप्तमे भक्ते भक्तानि षड़नश्नता ।

अश्वस्तनविधानेन हर्त्तव्यं हीनकर्म्मणः* ॥

ब्राह्मणव्यतिरिक्तः अश्रोत्रियो† हीनकर्म्मेत्यभिधीयते ।

---

* षड़श्नता षड्दिनपर्य्यन्तं भोजनमकुर्व्वता जनेन सप्तमे सप्तमदिने भक्ते भोजने कर्त्तव्ये हीनकर्म्मणः सकाशात् भक्तानि भोजनद्रव्याणि अश्वस्तनप्रमाणेन अश्वस्तनवदल्पपरिमाणेन हर्त्तव्यं चौर्य्यं कर्त्तव्यं हर्त्तव्यमिति आख्यातेतरत्वात् कर्म्मसत्त्व भावप्रत्ययेन साधु ।

† ब्राह्मणः इति पाठान्तरम् । ‡ ब्राह्मणव्यतिरिक्तः क्षत्रियादिः अश्रोत्रियसाहचर्य्यात् सम्यक् स्वस्वधर्म्मानुष्ठानरहित इति ज्ञापितम् । अश्रोत्रियः प्रणवव्याहृतिपूर्व्वकगायत्रीरहितः ब्राह्मणश्च इत्युच्यते । तथाच ओंकारपूर्व्विकास्तिस्रः सावित्रीर्यश्च विन्दति । चरितव्रतचर्य्यश्च स वै श्रोत्रिय उच्यते ॥

उत्कृष्टं वापकृष्टञ्च तयोः कर्म्म न विद्यते।
मध्यमे कर्म्मणी हित्वा सर्व्वसाधारणे हि ते* ॥

तयोर्ब्राह्मणशूद्रयोरुत्कृष्टं ब्राह्मणकर्म्म अपकृष्टं शूद्रकर्म्म न विद्यते। मध्यमे कर्म्मणी क्षत्रवैश्यकर्म्मणी सर्व्वसाधारणे इत्यर्थः। एवमापदं निस्तीर्य्य प्रायश्चित्तं कृत्वा स्वर्गमार्गनिरतो भवेत्।

तथाच याज्ञवल्क्यः।

निस्तीर्य्य तामथात्मानं पावयित्वा पथि न्यसेत्। इति।

तामापदं पावयित्वा प्रायश्चित्तैः पथि स्वर्ग्यधर्म्मे।

स्वर्ग्यधर्म्मनिरतानां फलमाह

पैठीनसिः।

ब्राह्मणस्य प्राजापत्यमैन्द्रमदं क्षत्रियस्य मारुतं वैश्यस्य गान्धर्व्वं शूद्रस्य स्वस्थानं व्रजन्ति स्वे स्वे कर्म्मण्यभिरताश्च ये†।

इति वर्णवृत्तिकथनम्।

अथ प्रासङ्गिकं परिसमाप्य प्रकृतमनुसरामः।

तत्र मध्याह्नविधिः। तत्रादौ तावत्प्ररोचनार्थं स्नानप्रशंसा।

---

* मध्यमे कर्म्मणी क्षत्रियवैश्यकर्म्मणी हित्वा त्यक्त्वा तयोर्ब्राह्मणशूद्रयोः उत्कृष्टं अपकृष्टञ्च कर्म्म न विद्यते अर्थात् ब्राह्मणस्य अपकृष्टं शूद्रकर्म्म शूद्रस्य पुनः उत्कृष्टं ब्राह्मणकर्म्म न विद्यते हि यतः ते क्षत्रियवैश्यकर्म्मणी सर्व्वसाधारणे चतुर्वर्णानां करणीये। † ये ब्राह्मणादयः स्वे स्वे कर्म्मणि अभिरताः स्वस्वकर्म्मानुष्ठानं कुर्व्वन्ति ते स्वस्वलोकं व्रजन्ति। कस्य को वा लोकः ब्राह्मणस्य ब्रह्मलोकः क्षत्रियस्य इन्द्रलोकः वैश्यस्य मरुल्लोकः शूद्रस्य गन्धर्व्वलोक इत्यर्थः। ‖ रुचयुत्पादनार्थम्।

योगियाज्ञवल्क्यः ।

अगम्यागमनात्स्तेयात्पापिभ्यश्च प्रतिग्रहात् ।
रहस्याचरिताच्चैव पापान्मुच्यते स्नानमाचरन् ॥
मनःप्रसादजननं रूपसौभाग्यवर्द्धनम् ।
शौचेन्द्रियस्वप्नहं स्नानं मोदनं ह्लादनं तथा ॥

स्नानभेदानाह

अङ्गिरः ।

स्नानन्तु द्विविधम्प्रोक्तं गौणमुख्यप्रभेदतः ।
तयोस्तु वारुणं मुख्यं तत्पुनः षड्विधम्भवेत् ॥
नित्यं नैमित्तिकङ्काम्यं क्रियाङ्गं मलकर्षणम् ।
क्रियास्नानं तथा षष्ठं षोढास्नानमुदीरितम् ॥

एतेषां लक्षणान्यपि स एवाह ।

अस्नातस्तु पुमान्नार्हो जप्यादिहवनादिषु ।
प्रातःस्नानं तदर्थन्तु नित्यस्नानं प्रकीर्त्तितम् ॥

प्रातरित्युपलक्षणम् । अतो माध्यन्दिनस्यापि नित्यत्वमेव ।

तथाच स्नानप्रकरणे

गोभिलः ।

नित्यं सततनिर्वर्त्त्यमिति ।

वैयाघ्रपादोऽपि ।

प्रातःस्नायी भवेन्नित्यं मध्येस्नानं सदा भवेत् । इति ।

चाण्डालश्वपचसूत्यादि स्पृष्ट्वास्नातां रजस्वलाम् ।

* निर्जनेऽनुष्ठितात् । † आह्लादजनकम् । ‡ षट्प्रकारस्नानम् । § मध्याह्ने । ¶ नित्यम् ।

स्नानार्हेषु यदा स्नाति स्नानं नैमित्तिकं हि तत् ॥
पुष्यस्नानादिकं* यत्तु दैवज्ञविधिनोदितम्† ।
तद्धि काम्यं समुद्दिष्टं नाकामस्तु‡ प्रयोजयेत् ॥
जप्तुकामः पवित्राणि अर्चिष्यन्देवतान् पितॄन् ।
स्नानं समाचरेद्यत्तु क्रियाङ्गं तत्प्रकीर्त्तितम् ॥

पवित्राणि सूक्तानि§ ।

मलापकर्षणं नाम स्नानमभ्यङ्गपूर्व्वकम् ¶ ।
मलापकर्षणार्थात्तु प्रवृत्तिस्तस्य नान्यथा ॥
सरःसु देवखातेषु तीर्थेषु च नदीषु च ।
क्रियास्नानं समुद्दिष्टं स्नानन्तत्र मता क्रिया ॥ इति ।

स्नानमेव तत्र क्रिया कर्त्तव्यतया विहितेत्यर्थः ।

दक्षः ।

चतुर्थे तु तथा भागे स्नानार्थं मृदमाहरेत् ।
तिलपुष्पकुशादीनि स्नानं वाऽक्लिन्नमे जले ॥

---

* आदिना दर्भोदकादिस्नानपरिग्रहः तथाच विष्णुधर्म्मोत्तरे । तथा दर्भोदकैः स्नानं सर्व्वपापप्रनाशनम् । गोमूत्रेण च यत्स्नानं सर्व्वाघविनिसूदनम् । तथा पुष्योदकस्नानं भवेदारोग्यकारकम् । केवलैर्वा तिलैः स्नानमथवा गौरसर्षपैः । स्नानं प्रियङ्गुना प्रोक्तं तथा सौभाग्यवर्द्धनम् । आयुष्यञ्च यशस्यञ्च धर्म्म्यं मेधाविवर्द्धनम् । स्नानं पवित्रं माङ्गल्यं तथा काञ्चनवारिणा । पुष्यस्नानादिकमिति पाठे तु आदिना जन्मनक्षत्रादिपरिग्रहः । तथाच पुष्ये वा जन्मनक्षत्रे व्यतीपाते च वैधृतौ । अमावास्यां नदीस्नानं दृष्ट्वा जन्मदुष्कृतम् । पुष्ये पुष्यानक्षत्रे कृतस्नानादिकम् । तथापरमपि पुष्ये स्नात्वा तु गङ्गायां त्रिकोटिकुलमुद्धरेदिति । † दैवं जानाति दैवज्ञो मुनिलेन उदितम् । ‡ नाकामस्तत्प्रयोजयेदिति पाठान्तरम् । § वेदोक्तमन्त्ररूपाणि । ¶ तैलमर्द्दनपूर्व्वकम् ।

चतुर्थभागो हि पूर्व्वाह्णस्यैव ।

रक्ता गौरा तथा श्वेता त्रिविधा मृत्तिका स्मृता ।
शुचिदेशात्तु संग्राह्या शर्कराश्मादि*वर्ज्जिता ॥

विशेषलक्षणं मृत्तिकायाः शौचप्रकरणे बोद्धव्यम् । तिलाः कृष्णाः पुष्पाणि यथोक्तानि । कुशा वक्ष्यमाणलक्षणाः ।

कुशग्रहणे कालविशेषमाह

कात्यायनः ।

मासे नभस्यमावास्या तस्यां दर्भोच्चयः स्मृतः ।
अयातयामा†स्ते दर्भा नियोक्तव्याः पुनः पुनः ॥

एतच्च प्रतिदिनाशक्तौ बोद्धव्यम् ।

कुशोपादानविधिः ।

शुचौ देशे शुचिर्भूत्वा स्थित्वा पूर्व्वोत्तरामुखः ।
ओंकारेण तु मन्त्रेण सकृदेव कुशं स्पृशेत् ॥

सकृदेव प्रथमत एव ।

दर्भोत्पाटनविधिमन्त्रः ।

विरिञ्चिना सहोत्पन्न परमेष्ठिनिसर्गज‡ ।
नुद सर्व्वाणि पापानि मम स्वस्तिकरो भव ॥
कुशमूले स्थितो ब्रह्मा कुशमध्ये तु केशवः ।
कुशाग्रे शङ्करो देवस्त्रयो देवाः कुशे स्मृताः ॥
अच्छिन्नाग्रान् सप्तपर्णान् समूलान् कोमलान् शुभान्।

---

* खर्परशिलाखण्डादि । † अपरित्यक्तकाठिन्या । ‡ परमेष्ठिवत् स्वभावज इति प्रार्थसार्थमुक्तम् ।

पित्रदेवजपार्थञ्च समादद्यात्कुशान्द्विजः॥
सप्तपर्णाः शुभा दर्भास्तिलक्षेत्रसमुद्भवाः।
ते प्रशस्ता नियोक्तव्या दैवे पित्र्ये च कर्म्मणि॥
जातिमात्रो भवेद्दर्भः साग्रमूलः कुशः स्मृतः।
सप्तपत्रस्तु कुतपश्छिन्नाग्रस्तृणमुच्यते॥
अच्छिन्नाग्रा अशुष्काग्रा ऋजवश्चैव प्रमाणतः।
कुतपा इति विज्ञेयास्तैस्तु श्राद्धं समाचरेत्॥

छन्दोगपरिशिष्टे।

अनन्तर्गर्भिणं साग्रं कौशं द्विदलमेव च।
प्रादेशमात्रं विज्ञेयं पवित्रं यत्र कुत्रचित्॥
कौशेयं बिभृयान्नित्यं पवित्रं दक्षिणे करे।
भुञ्जानस्तु विशेषेण गर्हितान्नस्य शोधनम्॥
द्वौ कुशौ दक्षिणे हस्ते सव्ये त्रीण्यासने सकृत्।
उपवीते शिखायान्तु पादमूले सकृत् सकृत्॥

सकृत् एक इत्यर्थः।

कौशिकः।

पवित्रस्य च नाशौचं आचान्ते तु कदाचन।
पितॄणां तर्पणे त्याज्यमुच्चारे पूजने तथा॥

शङ्खः।

उभयत्र स्थितैर्दर्भैः समाचामति यो द्विजः।
सोमपानफलं तस्य भुक्त्वा यज्ञफलं भवेत्*॥

---

* लभेदिति पाठान्तरम्।

ग्रन्थिर्यस्य पवित्रस्य न तेनाचमनं भवेत् ।
आचामेद्यस्तु मोहाच्च यथा भोक्ता तथा तु सः ॥

यथा भोक्तेति दृष्टान्तः । अतो भोजनकाले ग्रन्थिनिषेधः ।

ब्रह्मयज्ञे जपे चैव ब्रह्मग्रन्थिं विधीयते ।
भोजने वर्त्तुलः प्रोक्तः एवं धर्म्मो न हीयते ॥
वामहस्ते कुशान् कृत्वा दक्षिणोदकं पिबेत् ।
रुधिरं तद्भवेत्तोयं पीत्वा चान्द्रायणं चरेत् ॥
कुशाभावे तथा काशान्दूर्व्वाव्रीहियवानपि ।
तदभावे तु नीवारान्श्यामाकान्वा नियोजयेत् ॥

हारीतः ।

जपे दाने तथा होमे स्वाध्यायेऽपि च तर्पणे* ।
अशून्यन्तु करङ्कुर्य्यात्सुवर्णरजतैः कुशैः ॥

आपस्तम्बः ।

ब्रह्मयज्ञे च ये दर्भा ये दर्भाः पितृतर्पणे ।
धृता मूत्रपुरीषे तु तेषान्त्यागो विधीयते ॥
चितौ† दर्भाश्च ये मार्गे‡ स्वाध्याये§ पितृतर्पणे ।
स्तरणासनपिण्डेषु न ग्राह्याः सप्त वै कुशाः ॥
अपूता गर्भिता दर्भा ये चाग्रे छिन्दिता नखैः ।
क्वथितांश्चाग्निदग्धांश्च कुशान्यत्नेन वर्ज्जयेत् ॥

---

* पितृतर्पण इति पाठान्तरम् । † चितास्थानीयाः । ‡ पथि समुद्भवाः । § यान् दर्भान् हस्ते कृत्वा स्वाध्यायः पितृतर्पणञ्च कृतं ते वर्ज्जनीया इत्यर्थः । ¶ मर्दितान् ।

नीवीमध्ये स्थिता दर्भा ब्रह्मसूत्रेण ये धृताः ।
पवित्रान्तान्विजानीयाद्यथा कायस्तथा कुशाः ॥

अत्र विशेषमाह कात्यायनः ।

हरिता यज्ञिया दर्भाः पीतकाः पाकयज्ञिकाः ।
समूलाः पितृदैवत्याः कल्माषा* वैश्वदेविकाः ॥

पितृदैवत्याः पित्र्यार्थाः ।

गोबालपवित्रं प्रकृत्य कौशिकः ।

गवां बालपवित्रेण धार्य्यमाणेन नित्यशः ।
न स्पृशन्तीह पापानि श्रीश्च गात्रेषु तिष्ठति ॥
गवां बालपवित्रेण वह्नुपास्तिं करोति यः ।
पञ्चाग्नयो हुतास्तेन यावज्जीवं न संशयः ॥
गवां बालपवित्रेण सन्ध्योपास्तिङ्करोति यः ।
स वै द्वादश वर्षाणि कृतसन्ध्यो भवेदिति ॥

हारीतः ।

समित्पुष्पकुशादीनि श्रोत्रियः स्वयमाहरेत् ।
शूद्रानीतैः क्रयक्रीतैः कर्म्म कुर्व्वन् पतत्यधः ॥
कुशपुष्पाणि समिध औषधन्तु विशेषतः ।
निषेधेऽपि च गृह्णीयादमावास्यामपि द्विजः ॥

यत्तु वचनम् ।

अमावास्यां न छिंद्यात्तु कुशांश्च समिधस्तथा ।

---

* कृष्णवर्णाः ।

सर्व्वत्रावस्थिते सोमे हिंसायां ब्रह्महा भवेत् ॥ इति। तत्तु यस्मिन्काले वनस्पत्यादिषु सोमो वसति तन्मुहूर्त्तनिषेधपरं सर्व्वत्रावस्थित इति हेतूपादानात्।

सर्व्वत्र वनस्पतिकुम्यादिषु अवस्थानकालविशेषञ्च सौपर्णेनाभिहितः।

त्रिमुहूर्त्तं वसेद्भस्मे त्रिमुहूर्त्तं जले वसेत्।
त्रिमुहूर्त्तं वसेद्गोषु त्रिमुहूर्त्तं वनस्पतौ ॥
वनस्पतिगते सोमे यस्तु हिंस्याद्वनस्पतिम्।
घोरायां भ्रूणहत्यायां युज्यते नात्र संशयः ॥ इति।

वनस्पतिरिति कुम्यादीनामपि प्रदर्शनार्थम्।

इति कुम्यादिविधिः।

अथ वाशिष्ठे स्नानविधिः।

अथ स्नानविधिङ्कृत्स्नं प्रवक्ष्याम्यनुपूर्व्वशः।
येन स्नानादिवं यान्ति यज्ञधाना द्विजोत्तमाः ॥
नदीषु देवखातेषु तडागेषु सरःसु च।
स्नानं समाचरेन्नित्यं गर्त्तप्रस्रवणेषु* च ॥
पारक्येषु† निधानेषु‡ न स्नायाद्वि कदाचन।

---

* गर्त्तः द्वाविंशत्सहस्रहस्तन्यूनजलाशयः। तथाच धनःसहस्राण्यष्टौ च गतिर्यासां न विद्यते। न ता नदीशब्दवहा गर्त्तास्ताः परिकीर्त्तिता इति। प्रस्रवणं पर्व्वतीयजलनिर्गमस्थानम्। † परस्वामिकेषु। ‡ जलाशयेषु।

निपानकर्त्तुः स्नात्वा तु दुष्कृतांशेन लिप्यते ॥
अलाभे देवखातानां सरसां सरितान्तथा ।
उद्धृत्य चतुरः पिण्डान् पारक्ये स्नानमाचरेत् ॥

याज्ञवल्क्यः ।

पञ्च पिण्डाननुद्धृत्य न स्नायात्परवारिषु ।

योगियाज्ञवल्क्यः ।

अरुग्दिवा चरेत्स्नानं मध्याह्नात्प्राग्विशेषतः ।
प्रयतो मृदमादाय दूर्व्वामाद्रवगोमयम् ॥

अरुग् नातुरः । विशेषत इति वचनादपराह्णेऽप्यनुज्ञानमस्तीति गम्यते ।

स्थापयित्वा* तथाचम्य ततः स्नानं समाचरेत् ।
प्रक्षाल्य हस्तौ पादौ च शिखाबन्धं समाचरेत् ॥

शिखाबन्धनप्रकारमाह व्यासः ।

स्मृत्वोङ्कारञ्च गायत्रीं निबध्नीयाच्छिखां ततः† ।
पुनराचम्य हृदयमबाह्य स्कन्धौ च संस्पृशेत् ॥ इति ।
मृदैकया शिरः स्नात्वा द्वाभ्यां नाभेरथोपरि ।
अथ चतसृभिः कायं षड्भिः पादौ तथैव च ॥
प्रक्षाल्य सर्व्वकायञ्च द्विराचम्य यथाविधि ।
ततः सम्मार्ज्जनङ्कुर्य्यान्मृदापूर्व्वन्तु मन्त्रवित् ॥

अङ्गान्युक्तविधिना मृदाङ्गं मार्ज्जयेदित्यर्थः ।

---

* कुशमृत्तिकादीनीति शेषः । † यथाविधीति पाठान्तरम् ।

अश्वक्रान्ते रथक्रान्ते विष्णुक्रान्ते वसुन्धरे ।
उद्धृतासि वराहेण कृष्णेन शतबाहुना ॥
मृत्तिके त्वाञ्च गृह्णामि प्रजया च धनेन च ।
मृत्तिके ब्रह्मदत्तासि काश्यपेनाभिमन्त्रिता ॥
मृत्तिके दह तत्सर्व्वं यन्मया दुष्कृतङ्कृतम् ।
मृत्तिके देहि मे पुष्टिं त्वयि सर्व्वं प्रतिष्ठितम् ॥
ततश्च गोमयेनैवमग्रमग्रमिति ब्रुवन् ।
अग्रमग्रं चरन्तीनां रसं यन्निर्गतं वनैः* ॥
तासामृषभपत्नीनां पवित्रङ्गोमयौषधम् ।
तन्मे रोगांश्च शोकांश्च नुद गोमय सर्व्वदा ॥

ततो दूर्व्वया ।

काण्डात्काण्डात्प्ररोहन्ती परुषः परुषः परि ।
एवा नो दूर्व्वे प्रतनु सहस्रेण शतेन च ॥
या शतेन प्रतनोसि सहस्रेण विरोहसि ।
तस्य मे देवि दूर्व्विके विधेम हविषा वयम् ॥
कृत्वैवं मार्ज्जनं मन्त्रैरश्वक्रान्तादिभिस्ततः ।
ईहेत देवीरमृतं पारावतस्य राविषु ॥

देव्याः परः पारावतः राविष्वित्यादि मन्त्रैर्देवीरापोऽमृतमीहेत† । एभिरभिमन्त्रितात्रमृष्टं भवतीत्यर्थः ।

ये ते शतमिति द्वाभ्यां तीर्थान्यावाहयेत्ततः ।

---

* ओषधीनां वने वन इति पाठान्तरम् । † भावयेदित्यर्थः ।

कुरुक्षेत्रादीन्यावाहयेत् ।

कुरुक्षेत्रं गयागङ्गां प्रभासम्पुष्कराणि च ।
तथा महाव्याहृतिभिर्गायत्र्या वाभिमन्त्रयेत् ॥
आपो हिष्ठादयः* पश्चाद्रुपदादिव† इत्यपि ।
तथा हिरण्यवर्णाभिः पावमानीभिरन्ततः ।
ततोऽर्कमीक्ष्य वौङ्कारं निमज्याच्चिर्जले बुधः ॥
प्राणायामांश्च कुर्वीत गायत्रीञ्चाघमर्षणम् ।
यथोक्तैः क्षोभितस्तैस्तु मज्जेद्विर्दण्डवत्ततः ॥

यथोक्तैः प्राणायामादिभिः क्षोभितः क्षुब्धः पूर्वावस्थामतिक्रान्तो विगतपाप इति यावत् । अन्येऽपि स्नानविधयो बहवः सन्ति ते ग्रन्थगौरवभयान्न प्रदर्शिताः । एतच्च स्नानं सर्वसाधारणम् । विशेषः स्वस्वशाखाभ्यो विज्ञेयः ।

अत्र चापवादः ।

भानौ भौमे त्रयोदश्यां नन्दाभृगुमघासु च ।
पिण्डदानं मृदा स्नानं न कुर्य्यात्तिलतर्पणम् ॥ इति ।

पिण्डदानन्तु काम्यं न नित्यम् ।

योगियाज्ञवल्क्यः ।

मृदा स्नानं न कुर्वीत रात्रिसन्ध्यागृहेषु च ।

---

* ॐ आपो हिष्ठा मयोभुवस्ता न ऊर्जे दधातन महेरणाय चक्षसे । ॐ योवः शिवतमो रसस्तस्य भाजयतेह न उशतीरिव मातरः । ॐ तस्मा अरङ्गमाम वो यस्य क्षयाय जिन्वथ आपोजनयथाच नः । † ॐ द्रुपदादिव मुमुचानः स्विन्नः स्नातो मलादिव पूतं पवित्रेणेवाज्यमापः शुन्धन्तु मैनसः ।

विधिज्ञः स्नानकालेषु तथा भौमार्कवारयोः ॥

तिलतर्पणस्य प्रतिप्रसवस्तर्पणप्रकरणे वक्ष्यते ।

संक्षेपस्नानविधिमाह योगियाज्ञवल्क्यः ।

एष विस्तरतः प्रोक्तः स्नानस्य विधिरुत्तमः ।
असामर्थ्यान्न कुर्य्याच्चेत्तचायं विधिरुच्यते ॥
स्नानमन्तर्ज्जले चैव मार्ज्जनाचमने तथा ।
जलाभिमन्त्रणञ्चैव तीर्थस्य परिकल्पनम् ॥
अघमर्षणसूक्तेन त्रिराहृत्तेन नित्यशः ।
स्नानाचरणमित्येतदुपदिष्टं स्वयम्भुवा ॥

जाबालिः ।

प्रवाहाभिमुखो मज्ज्येद्यापः प्रवहन्ति वै ।
स्थावरेषु* च सर्व्वेषु आदित्याभिमुखस्तथा ॥

विष्णुपुराणे ।

कूपेषु धृततोयेन† स्नानं कुर्व्वीत वा भुवि‡ ।
स्नायीतोद्धृततोयेन यदि वा भुव्यसम्भवे§ ॥

मनुः ।

न स्नानमाचरेद्भुक्ता नातुरो न महानिशि ।
न वासोभिः सहाजस्रं नाविज्ञातं जलाशये ॥

व्यासः ।

अनुत्सृष्टेषु न स्नायात्तथैवासंस्कृतेषु च ।

---

* प्रवाहरहितेषु । † कूपादुद्धृतजलेन । ‡ भुवि संस्थित इत्यर्थः । § भुवि अवगाह्य स्नानासम्भवे इत्यर्थः ।

असंस्कृतमप्रतिष्ठितम् । अनुत्सृष्टमदत्तं* परकीयमिति यावत् ।

जाबालिः ।

न पारक्ये सदा स्नायान्न भुक्त्वा न महानिशि ।
नार्द्रमेकञ्च वसनं परिदध्यात्† कथञ्चन ॥

देवलः ।

राहुदर्शनसंक्रान्तिविवाहात्ययवृद्धिषु ।
स्नानदानादिकङ्कुर्य्यान्निशि काम्यव्रतेषु च ॥

भरद्वाजः ।

विद्यमानेन सूर्य्येण सङ्गृहीतन्तु यज्जलम् ।
तत्सुवर्णोदकङ्कृत्वा स्नायात्स्याद्यात्मनोऽन्तिके ॥

पराशरः ।

अपो रात्रौ न गृह्णीयात्प्रविष्टा वरुणालयम् ।
आवश्यकेऽथ मन्त्रेण धाम्नो धाम्न इति स्वयम् ॥

धाम्नो धाम्न इति मन्त्रेण स्वयमेव गृह्णीयादित्यर्थः ।

योगियाज्ञवल्क्यः ।

दर्शे स्नानं न कुर्व्वीत मातापित्रोश्च जीवतोः ।
त्रयोदश्यां तृतीयायां दशम्याञ्च विशेषतः ॥
शूद्रविट्क्षत्रियाः स्नानं नाचरेयुः कथञ्चन ।

---

* सर्व्वभूतीद्देशे यन्न दत्तं—तथाच यन्न सर्व्वाय चोत्सृष्टं यच्चाभोज्यनिपानजं, तद्वर्ज्जं सलिलं तात सदैव पितृकर्म्मणीति वचनात् । † आर्द्रं वसनं परिधाय न स्नायीत एकं वसनं परिधाय न स्नायादित्यर्थः ।

एतन्नित्यनैमित्तिकादिस्नानव्यतिरिक्तविषयम् ।

अतएव भरद्वाजः ।

भोगार्थं क्रियते यत्तु स्नानं याट्टच्छिकञ्च यत् ।
दृश्यस्यान्तु प्रकर्त्तव्यं न तु याट्टच्छिकं* क्वचित् † ॥

याट्टच्छिकलक्षणं गर्गेणोक्तम् ।

क्रियतां वा न कुर्य्याद्वा शास्त्रयत्नणया‡ विना ।
मलव्यपोहनफलं§ स्नानं याट्टच्छिकन्तु तत् ॥

पैठीनसिः ।

पुत्रजन्मनि संक्रान्तौ श्राद्धे ज्वरादिने तथा ।
नित्यस्नाने च कर्त्तव्ये तिथिदोषो न विद्यते ॥ इति ।

मार्कण्डेयपुराणे ।

मातरं पितरं जायाभ्रातरं सुहृदङ्गुरुम् ।
यमुद्दिश्य निमज्जेत अष्टभागं लभेत सः ॥
नादशैकेनवस्त्रेण¶ स्नायात्कौपीनकाद्दते ।
नान्यदीयेन नार्द्रेण न सूच्या ग्रथितेन च ॥
स्नानङ्कृत्वार्द्रवासास्तु विण्मूत्रं कुरुते यदि ।
प्राणायामत्रयं कुर्य्यात्पुनः स्नानेन शुध्यति ॥

---

* रागप्राप्तम् । † बहुषु पुस्तकेषु दर्शनात् रक्षितं परन्तु हेमाद्रिप्रभृतिधृतपाठः एव साधीयान् । यथा, भोगाय क्रियते यत्तु स्नानं याट्टच्छिकं भवेत् । तन्नित्यैषु दशम्यादौ काम्यनैमित्तिकेषु न तु । ‡ शास्त्रविहितेन । § गात्रमलमात्रनाशकम् । ¶ अदशेन दशारहितेन एकवस्त्रेण च ।

मनुः ।

स्नातस्य वह्नितप्तेन तथैव परवारिणा ।
शरीरशुद्धिर्विज्ञेया न तु स्नानफलं लभेत् ॥

यत्तु षट्त्रिंशन्मते ।

आपः स्वभावतो मेध्याः किम्पुनर्वह्निसंयुताः ।
तेन सन्तः प्रशंसन्ति स्नानमुष्णेन वारिणा ॥ इति ।

तदातुरविषयम् अनातुरस्यापि नद्याद्यसम्भवे उष्णोदकस्नानमविरुद्धमित्याह ।

यमः ।

नित्यं नैमित्तिकञ्चैव क्रियाङ्गं मलकर्षणम् ।
तीर्थाभावे तु कर्त्तव्यमुष्णोदकपरोदकैः ॥

अत्र मलापकर्षणं स्नानं तीर्थे कर्त्तव्यमिति न विधीयते । अपि तु प्रायश्च उष्णोदकसाध्यत्वादुष्णोदकप्रकरणे परिगणितम् ।

उष्णोदकस्नाने कर्त्तव्ये व्यासः ।

शीतास्वपि निशि चोष्णमन्त्रसम्भारसम्भृतम् ।
गृहेऽपि शस्यते स्नानं तद्दीनमफलम्भवेत्* ॥

सम्भारा मृदादयः ।

अग्राह्यास्त्वागता ह्यापो नद्याः प्रथमवेगजाः† ।
प्रक्षोभिताश्च केनापि तथा तीर्थादिनिर्गताः ॥

---

* बहुषु पुस्तकेषु दर्शनादेतद्रचितं परन्तु पराशरभाष्ये माधवाचार्यधृतपाठः साधीयान् । यथा शीतास्वापी निषेध्योष्णमन्त्रसम्भारसंस्कृताः । गेहेऽपि शस्यते स्नानं तद्दीनमफलं स्मृतमिति ॥ † प्रथमवेगिका इति पाराशरभाष्ये ।

तथा।

प्रत्यावृत्तोदके* स्नानं वर्ज्यं नद्यां द्विजातिभिः।
तस्यां रजकतीर्थेषु दशहस्तेन† वर्ज्जयेत्॥
प्रतिस्रोतो रजोयोगो रथ्याजलनिवेगनम्।
गङ्गायान्न प्रदुष्यन्ति सा हि धर्म्मद्रवी स्वयम्॥

देवलः।

नभोनभस्ययोर्मध्ये‡ सर्व्वा नद्यो रजस्वलाः।
तासु स्नानं न कुर्व्वीत वर्ज्जयित्वा समुद्रगाः॥

कात्यायनः।

नभोनभस्ययोर्मध्ये सर्व्वा नद्यो रजस्वलाः।
तासु स्नानं न कुर्व्वीत देवर्षिपितृतर्पणम्॥

श्रावणभाद्रपदयोर्मध्ये सर्व्वासु नदीषु स्माननिषेधे प्रसक्ते क्वचिद्विशेषोऽभिहितो भविष्यपुराणे।

आदौ कर्कटके देवि महानद्यो रजस्वलाः।
त्रिदिनन्तु चतुर्थेऽह्नि शुद्धा स्याज्जाह्नवी यथा॥ इति।

नद्यश्च ब्रह्मपुराणे प्रदर्शिताः।

गोदावरी भीमरथी तुङ्गभद्रा च वेणिका§।

---

* स्रोतोविपरीतमुखे। † यत्र तीरे रजकौ वस्त्रं धौतं करोति तत्रजकतीर्थं तत्तीरस्थं तीर्थमारभ्य दशहस्तपर्य्यन्तं वर्ज्जयेदित्यर्थः। अतएव तत्र स्थाने निन्दामाह कर्म्मलोचनः। स्नानं रजकतीर्थेषु भोजनं गणिकालये। शयनं पूर्व्वपादे च ब्रह्महत्या दिने दिने॥ ‡ यत्यदयं श्रावणादिरिति देशान्तरीयपाठः। § वेणिका इति पाठान्तरम्।

तापी पयोष्णी विन्ध्यस्य दक्षिणे तु प्रकीर्त्तिताः ॥
भागीरथी नर्म्मदा च यमुना च सरस्वती ।
विशोका च विहस्ता च विन्ध्यस्योत्तरतः स्थिताः ।
द्वादशैता महानद्यो देवर्षिचेत्तसम्भवाः ॥ इति ।

एवं गङ्गादिष्वपि प्रसक्तावपवादमाह देवलः ।

गङ्गा च यमुना चैव प्लक्षजाता सरस्वती ।

कुरुक्षेत्रे या सरस्वती सा प्लक्षजाता ।

रजसा नाभिभूयन्ते ये चान्ये नदसंज्ञकाः ॥
शोणसिन्धुहिरण्याक्षकोकलोहितघर्घराः ।
शतद्रुश्च नदाः सप्त पावनाः ब्रह्मणः सुताः ॥

निगमाः ।

गङ्गाधर्म्मद्रवाः पुण्या यमुना च सरस्वती ।
अन्तर्गतरजोयोगाः सर्व्वावस्थासु चामलाः ॥

गङ्गारजस्वलेत्यादि गङ्गायमुनासरस्वतीनां रजोदोषप्रापकाणि यानि तान्यपि अन्तर्गतरजोविषयाणि । अतो न दोषः ।

ततः ।

कर्क्कटादौ रजोदुष्टा गोमती वासरत्रयम् ।
चन्द्रभागा सती सिन्धुः सरयूर्नर्म्मदा तथा ॥

यासु नदीषु रजोदोषोऽस्ति तासु तत्तीरवासिनां न दोषः ।

तथा निगमः ।

न तु तत्तीरवासिनामिति ।

अत्र विशेषमाह व्याघ्रपादः ।

अभावे कूपवापीनामनपाश्रितपयोभृताम्* ।
रजोदुष्टेऽपि पयसि स्नानभागो न दुष्यति ॥ इति ।

वशिष्ठः ।

उपाकर्म्मणि चोत्सर्गे प्रेतस्नाने तथैव च ।
चन्द्रसूर्य्यग्रहे चैव रजोदोषो न विद्यते ॥

याज्ञवल्क्यः ।

न स्नायादुभवेऽतीते मङ्गलं विनिवर्त्त्य च ।
अनुव्रज्य सुहृदन्यूनर्त्विगिष्टदेवताम् ॥

प्रसङ्गात्प्रत्यग्रदुष्टं प्रति कश्चन विशेषः कथ्यते । तत्र स्मृतिसङ्ग्रहे ।

काले नवोदकं शुद्धं प्रत्यग्रमपि चाग्रहम् ।
अकाले तु दशाहन्तु पीत्वा नाद्याद्द्विजो निशम् ॥ इति ।

काले वर्षाकाले । अकाले तद्विपरीते ।

अत्रापि विशेषो भविष्योत्तरे ।

महदम्बु समं† वाऽत्र यदि तिष्ठेत्पुरातनम् ।
नवांशुमिश्रितं तेन न दुष्टमिति सूरयः ॥

इति उक्तं नित्यस्नानम् ।

---

* उपायान्तरेण जलप्राप्तिरहितानाम् । † समं सहितम् ।

अथ नैमित्तिकानि स्नानानि।

याज्ञवल्क्यः।

उदक्याऽशुचिभिः स्नायात्संस्पृष्टस्तैस्तु संस्पृशेत्।
अब्लिङ्गानि जपेच्चैव गायत्रीं मनसा सकृत्॥

उदक्या रजस्वला। अशुचयः शवपतितचाण्डालसूतिकाशावाशौचिनः। एतैः स्पृष्टः स्नायात्। तैरुदक्यादिस्पृष्टैरुपस्पृष्टमाचमेत्। आचम्य चाब्लिङ्गानि आपो हिष्ठेत्येवमादीनि त्रीणि सूक्तानि वाक्यानि जपेत्। त्रिष्वेव बहुवचनस्य कार्पिञ्जलाधिकरणन्यायेन चरितार्थत्वात् सूक्तवाक्ययोर्दैग्मकालानुसारेण व्यवस्था। ततो गायत्रीं मनसा सकृज्जपेत्।

पराशरः।

दुःस्वप्ने मैथुने वान्ते विरक्ते* क्षुरकर्मणि।
चितियूपश्मशानास्थ्नां स्पर्शने स्नानमाचरेत्॥

मैथुन इति ऋतुकाले, अऋतुकाले बृहस्पतिना शौचमात्रविधानात्।

अनृतौ† तु यदा गच्छेच्छौचं मूत्रपुरीषवदिति।

अनृतावपि कालविशेषे स्नानमेव च।

तथाच स्मृतिः।

अष्टम्याञ्च चतुर्दश्यां दिवा पर्व्वणि मैथुनम्।

---

* विगतरक्ते रक्तस्रावे इति यावत्। † ऋतुभिन्नकाले।

कृत्वा सचेलं स्नात्वा तु वारुणीभिश्च* मार्ज्जयेत् ॥ इति। अष्टमीचतुर्दशीपर्व्वसु रात्रावपि अन्यत्र दिवा। अत्र गोबली-वर्द्दन्यायेन अष्टमीचतुर्दशीव्यतिरिक्तामावास्यादिषु पर्व्वशब्दो वर्त्तते।

अजीर्णादिषु स्नानमात्रमेव न च सचेलस्नानम्।

यथाह यमः।

अजीर्णेऽभ्युदिते वान्ते तथाप्यस्तमिते रवौ।

दुःस्वप्ने दुर्ज्जनस्पर्शे स्नानमात्रं विधीयते ॥ इति।

अजीर्णे स्नानं तदुपशमे सति। अभ्युदित इति निद्रायां निद्रायां क्रियमाणायां रवावभ्युदिते तथा चास्तमिते च एतत्सर्व्वमकामतः स्पर्शे वेदितव्यम्।

शवस्पर्शं चितिं यूपं† रजस्वलाम्।

स्पृष्ट्वा त्वकामतो विप्रः स्नानङ्कृत्वा विशुध्यति ॥ इति।

बृहस्पतिना अकामत इत्युपादानात् कामतस्तु च्यवनोक्तं द्रष्टव्यम्।

श्वानं श्वपाकं प्रेतधूमं देवद्रव्योपजीविनं ग्रामयाजिकं सोमविक्रयिणं यूपं चितिं चितिकाष्ठं मद्यभाण्डं सस्नेहं मानुषास्थिस्पर्शं रजस्वलां महापातकिनं शवं स्पृष्ट्वा सचेलमम्भो वगाह्योत्तीर्य्याग्निमुपस्पृश्य गायत्र्याष्टशतं जपेत्। घृतं प्राश्य पुनः स्नात्वा त्रिराचमेदिति।

---

* इमं मे वरुण इत्यादिमन्त्रैः अथवा सोमु वरुण इत्यादि ऋग्वेदीयमन्त्रैः। † बहुषु पुस्तकेषु दर्शनादेवं रचितं परन्तु पतितञ्च रजस्वलामित्येव साधु।

काश्यपः ।

उदयास्तमथो क्रन्दित्वाच्चिस्नन्दने कर्णक्रोथने* चित्वारोहणे यूपसंस्पर्शने† सचेलं स्नात्वा पुनर्मैति जपेत् । महाव्याहृतिभिः सप्ताहुतीर्जुहुयादिति ।

तथा ।

स्पृष्ट्वा देवलकञ्चैव सवासा जलमाविशेत् ।
देवार्चनपरो विप्रो वित्तार्थी त्रसरत्रयम् ।
असौ देवलको नाम हव्यकव्येषु गर्हितः ॥

ब्रह्माण्डपुराणे ।

शैवान् पाशुपतान् स्पृष्ट्वा लोकायतिकनास्तिकान्‡ ।
विकर्मस्थान्द्विजान् शूद्रान् सवासा जलमाविशेत् ॥

अधिकारे अविद्यमाने ये शैवाः पाशुपता वा भवन्ति । संस्पर्शने स्नानमित्यवगन्तव्यम् । अन्यथा तद्दीक्षाविधायकपुराणनिचयविरोधात् । अथवा श्रोत्रियादीनां साक्षिवदननिषेधो यथा वाचनिकः श्रोत्रियादिषु दोषाभावेऽपि तथा वाचनिकस्पर्शनिषेधः । विकर्मस्थानित्येतद्द्विजानित्यनेनैव सम्बध्यते । शूद्रानित्यनेन अस्वर्ग्या ह्याहुतिः साम्याच्छूद्रसंस्पर्शदूषिता इति शूद्रमात्रस्पर्शेनास्वर्ग्यत्वप्रतिपादनसामर्थ्यात् ।

व्याघ्रपादः ।

चाण्डालम्पतितञ्चैव दूरतः परिवर्जयेत् ।

---

* कर्णस्यन्दने । † यूपः क्षुरीस्रुगादौ निर्म्मितक्षुरमौलियूपादिः । ‡ लोकायतिकाश्च नास्तिकाश्च ते तान् । लोकायतिकाश्चार्व्वाकमतावलम्बिनः ।

गोबालव्यजनादर्व्वाक्* सवासा जलमाविशेत् ॥

एतच्चातिसङ्कीर्णस्थानविषयम् ।

असङ्कीर्णे तु बृहस्पत्युक्तम् ।

युगञ्च द्वियुगञ्चैव त्रियुगञ्च चतुर्युगम् ।

चाण्डालसूतिकोदक्यापतितानामधःक्रमात् ॥ इति ।

अधःक्रमात्प्रतिलोमक्रमात् । चतुर्युगं† चाण्डाले त्रियुगं सूतिकायामित्येवम् ।

पैठीनसिः ।

अनुदकसूतकरणे सचेलस्नानं व्याहृतिहोमश्च ।

एतच्च शौचमकृत्वा चिरकालावस्थितौ वेदितव्यम् ।

भासवायसमार्জ্জারखरोष्ट्रश्वानशूकरान् ।

अमेध्यानि च संस्पृशन् सचेलो जलमाविशेत् ॥

मार्জ্জारस्य स्पर्शने स्नानमुद्दिष्टं समये कर्म्मकाले ।

मार्জ্জारश्चैव दर्व्वी च मार्জ্জितश्च सदा शुचिः ।

इति यमस्मरणात् । संस्पर्शे नाभेरूर्द्ध्वं स्नानम् ।

नाभेरूर्द्ध्वं करौ मुक्त्वा शुना यद्युपहन्यते ।

तत्र स्नानमधस्ताच्चेत्प्राक्षाल्याचम्य शुध्यति ॥

इति अङ्गिरःस्मरणात् ।

अस्पृश्यपक्षिस्पर्शे जातूकर्णिः ।

---

* एतेन चाण्डालादयो यदा सङ्कीर्णस्थाने गोबालचामरेण व्यजनं कुर्वन्ति तदा दूरतः स्पर्शे न दोष इति ज्ञापितम् । † युगं चतुर्हस्तमानं चतुर्युगं षोडशहस्तम् ।

ऊर्द्धं नाभेः करौ मुक्त्वा यदङ्गं संस्पृशेत्खगः* ।
स्नानं तत्र प्रकुर्व्वीत शेषं प्रक्षाल्य शुध्यति ॥

अमेध्यस्पर्शे तु शौचप्रकरणे विशेषो दर्शितः पूर्व्वमेव ।

शङ्खः ।

रथ्याकर्दमवर्षासु प्रविश्य ग्रामसङ्करम् ।
जङ्घयोर्मृत्तिकास्तिस्रः पादयोर्द्विगुणास्ततः ॥

ग्रामसलिलप्रवाहदेशो ग्रामसङ्करः तं सकर्दमं प्रविश्य ।

मनुः ।

नारं स्पृष्ट्वास्थि सस्नेहं स्नात्वा विप्रो विशुध्यति ।
आचम्यैव तु निस्नेहं गां स्पृष्ट्वा वीक्ष्य वा रविम् ॥

एतच्च द्विजातिविषयम् । अन्यत्र तु मानुषास्थि स्निग्धं स्पृष्ट्वा त्रिरात्रमशौचम् । अस्निग्धे त्वहोरात्रमिति वशिष्ठोक्तम् । मानुषेऽमानुषे त्वस्थि विष्णूक्तम् ।

भक्ष्यवर्জ্যं पञ्चनखं† शवं तदस्थि च सस्नेहं स्पृष्ट्वा
स्नानपूर्व्वं वस्त्रं स्वयं प्रक्षालितं बिभृयादिति ।

अन्येष्वेवंविधाः स्नानार्हाः स्मृत्यन्तरेऽवगन्तव्याः ग्रन्थगौरवभयान्नेह लिखिताः । उदक्यादिभिः स्पृष्टानां मनुष्याणां स्नानम् । अचेतनानां पीठादीनां प्रक्षालनम् । तत्रोदक्यादिं स्पृष्ट्वा चेतनस्पर्शवतामाचमनम् ।

उदक्याशुचिभिः स्नायात्संस्पृष्टस्तैरुपस्पृशेत् ।

---

* कुक्कुटादिः न तु सामान्यतः पक्षी । † कुक्कुरादि ।

इति याज्ञवल्क्यस्मरणात्। उदक्यादिस्पृष्टचेतनस्पर्शे तु द्वितीयस्यापि स्नानमेव।

तथाच मनुः।

दिवाकीर्त्तिमुदक्यां च पतितं सूतिकां तथा।
शवं तत्स्पृष्टिनञ्चैव स्पृष्ट्वा स्नानेन शुध्यति॥

स्नानार्हचेतनस्पर्शे द्वितीयस्य क्वचित्स्नानापवादमाह संग्रहकारः।

शवधूमं स्पृशन्वान्त्यं विरक्तं क्षुरकर्म्मणि।
मैथुनाचरितारञ्च स्पृष्ट्वा स्नानं न विद्यते॥ इति।

एतदुपलक्षणम्। अतो यस्य स्नानमात्रमेव प्राप्तं न सचेलं तत्स्पर्शे द्वितीयस्याप्येवमेव सिद्धम्।

तृतीये त्वाचमनं यथाह संवर्त्तः।

तत्स्पृष्टिनं स्पृशेद्यस्तु स्नानं तस्य विधीयते।
ऊर्द्ध्वमाचमनं प्रोक्तं द्रव्याणां प्रोक्षणं तथा॥ इति।

एतच्चाकामकारिविषयम्। कामकृते तु तृतीयस्यापि स्नानमेव।

पतितचाण्डालसूतिकोदक्याशवस्पृष्टितत्स्पृष्ट्युपस्पर्शे सचेलमुदकोपस्पर्शनात्।

इति गौतमस्मरणात्।

चतुर्थस्याचमनं यथा देवलः।

उपस्पृष्टाशुचिस्पृष्टं तृतीयं वापि मानवः।
हस्तौ पादौ च तोयेन प्रक्षाल्याचम्य शुध्यति॥

यत्तु कूर्म्मपुराणे।

तत्स्पृष्टस्पृष्टिनं स्पृष्ट्वा शुद्धिपूर्वं द्विजोत्तमाः ।
आचमेत्तस्य शुद्ध्यर्थं प्राह देवः पितामहः ॥ इति ।
एतद्दुर्बलत्वेन स्नानाशक्तत्तृतीयविषयम् । अन्यथा गौतमादिवचनविरोधादथवा च तत्स्पृष्टपीठादिस्पर्शविषयम् । एवं सर्वत्र विषयविवेकोऽवगन्तव्यः ।

स्वयमशुचिना उदक्यादिस्पर्शे कृते देवलः ।
अशुद्धान् स्वयमप्येतानशुद्धस्तु यदि स्पृशेत् ।
विशुद्ध्यत्युपवासेन तथा कृच्छ्रेण वा पुनः ॥

कृच्छ्रः श्वपाकादिविषयः । उपवासः श्वादिविषयः ।

आतुरस्नानं प्रति पराशरोक्तौ विशेषः ।
आतुरे स्नानमुत्पन्ने दशकृत्वो ह्यनातुरः ।
स्नात्वा स्नात्वा स्पृशेदेनं ततः शुध्येत्स आतुरः ॥
स्नाने नैमित्तिके प्राप्ते नारी यदि रजस्वला ।
पात्रान्तरिततोयेन स्नानङ्कृत्वा व्रतञ्चरेत् ॥
सिक्तगात्रा भवेद्यद्धिः साङ्गोपाङ्गं कथञ्चन ।
न वस्त्रपीड़नं कुर्य्यान्नान्यद्वासश्च धारयेत् ॥

उशना ।

ज्वराभिभूता या नारी रजसा च परिप्लुता ।
कथन्तेभ्यो भवेच्छुद्धिः शौचं स्यात्केन कर्म्मणा ॥
चतुर्थेऽहनि सम्प्राप्ते स्पृशेदन्या तु तां स्त्रियम् ।
सा सचेला वगाह्यापः स्नात्वा स्नात्वा पुनः स्पृशेत् ॥
दश द्वादशकृत्वो वा आचामेच्च पुनः पुनः ।

अन्ये च वाससां त्यागस्ततः शुद्धा भवेत्तु सा ॥
दद्याच्छक्त्या ततो दानं पुण्याहेन विशुध्यति ।

सूतिकामरणे रजस्वलामरणे पूर्ववत्स्नानं कारयित्वा पञ्चगव्येन स्नापयेत् ।

तथाच संग्रहकारः ।

सूतिकायां मृतायान्तु कथं कुर्वन्ति याज्ञिकाः ।
कुम्भे सतिलमादाय पञ्चगव्यं तथैव च ॥
पुण्याद्भिरभिमन्त्र्यापो वाचा शुद्धिं लभेत्ततः ।
तेनैव स्नापयित्वा तु दाहं कुर्याद्यथाविधि ॥
पञ्चभिः स्नापयित्वा तु गर्भ्यः प्रेतां रजस्वलाम् ।
वस्त्रान्तराङ्कृताङ्कृत्वा* दाहयेद्विधिपूर्वकम् ॥ इति ।

ह्यङ्गयातातपस्तु ।

रजस्वलायाः प्रेतायाः संस्कारादीनि नाचरेत् ।
ऊर्द्धं त्रिरात्रात्स्नातायाः शवधर्म्मेण† दाहयेत् ॥

इति त्रिरात्रानन्तरं दाहादिसंस्कारमाह । अत्र देशकालानुसारादवस्थाः‡ विज्ञेया ।

यातातपः ।

ग्रामे तूभयसंस्पृष्टिर्§याचायां कलहादिषु ।

---

* वस्त्रान्तरेण आच्छादितां कृत्वेत्यर्थः । † गयादीनि च तीर्थानीत्यादुक्तविधिना स्नाताया इत्यर्थः । ‡ यस्मिन्देशे रजस्वलामरणे त्रिरात्रात्परं दाहो व्यवस्थ्यते तद्देशविषयिणीयं व्यवस्था । § परस्परस्पर्शे ।

ग्रामसन्दूषणे* चैव सृष्टिदोषो न विद्यते ॥

ग्रामे राजमार्गादौ।

षट्त्रिंशन्मते।

देवयात्राविवाहेषु यज्ञेषु प्रकृतेषु† च।
उत्सवेषु च सर्व्वेषु सृष्टास्पृष्टि न विद्यते ॥

बृहस्पतिः।

तीर्थे विवाहे यात्रायां संग्रामे देशविप्लवे।
नगरग्रामदाहे च सृष्टास्पृष्टि न दुष्यति ॥

एतच्च यत्राहमनेन स्पृष्ट इति प्रत्यक्षज्ञानं नास्ति तद्विषयम्। तन्मात्रापवादेऽपि वचनान्तरितार्थत्वात्‡।

शातातपः।

रात्रौ स्नानं न कुर्व्वीत स्नानन्दानञ्च§ रात्रिषु।
नैमित्तिकञ्च कुर्व्वीत स्नानन्दानञ्च रात्रिषु ॥

एतन्मध्यमयामद्वयाभिप्रायम्।

तथाच पराशरः।

महानिशा तु विज्ञेया मध्यमप्रहरद्वयम्।
प्रदोषपश्चिमौ¶ यामौ दिनवत्स्नानमाचरेत् ॥

एतदप्यापद्विषयं यतः स एव।

---

* दाहादिनेति शेषः। † आरब्धेषु। ‡ वचनान्तरस्य चरितार्थत्वादित्येव पाठः साधुः। § बहुषु पुस्तकेषु दर्शनादेतद्रचितम्। तथा दानञ्च रात्रिषु इत्येव पाठः साधुः। ¶ प्रदोषः अस्तमयादूर्द्धं प्रथमप्रहररूपः पश्चिमः शेषप्रहरः उदयात्प्राक् प्रहररूपः प्रदोषस्य पश्चिमश्च तौ।

दिवाकरकरैः पूतं दिवास्नानमुदाहृतम् ।
अप्रशस्तं निशि स्नानं राहोरन्यत्र दर्शनात् ॥

राहुदर्शनादिति पुत्रजन्मादिप्रदर्शनार्थम् ।

तथाच पराशरः ।

पुत्रजन्मनि यज्ञे च तथा संक्रमणे रवेः ।
राहोश्च दर्शने स्नानं प्रशस्तं नान्यथा निशि ॥ इ।

इति नैमित्तिकस्नानानि ।

अथ काम्यस्नानानि ।

तत्र पुलस्त्यः ।

पुष्ये तु जन्मनक्षत्रे व्यतीपाते च वैधृतौ ।
अमावास्यां* नदीस्नानं पुनात्यासप्तमङ्कुलम् ॥
चैत्रकृष्णचतुर्दश्यां यः स्नायाच्छिवसन्निधौ ।
न प्रेतत्वमवाप्नोति गङ्गायान्तु विशेषतः ॥

भविष्यपुराणे ।

शिवलिङ्गसमीपे तु यत्तोयं पुरतः स्थितम् ।
शिवगङ्गेति तज्ज्ञेयं तत्र स्नात्वा शिवं व्रजेत् ॥

यमः ।

कार्त्तिक्यां पुष्करे स्नातः सर्व्वपापैः प्रमुच्यते ।
माघ्यां स्नातः प्रयागे तु मुच्यते सर्व्वकिल्बिषैः ॥

---

* अमायाञ्चेति पाठान्तरम् ।

ज्येष्ठे मासि सिते पक्षे दशम्यां हस्तसंयुते।
दशजन्माघहा गङ्गा तेन पापहरा स्मृता* ॥
यमुनायां तथा स्नात्वा माघकृष्णचतुर्दशीम्।
वैशाखशुक्लपक्षे तु तृतीयायां तथैव च।
गङ्गातोये नराः स्नात्वा मुच्यन्ते सर्व्वकिल्बिषैः ॥
कार्त्तिके नवमी शुक्ला पितृणामुत्सवाय च†।
तस्यां स्नानं हुतन्दानमनन्तफलदम्भवेत् ॥

विष्णुः।

सूर्य्यग्रहेण तुल्या तु शुक्ला माघस्य सप्तमी।
अरुणोदयवेलायां तस्यां स्नानं महाफलम् ॥
पुनर्व्वसौ बुधोपेता चैत्रे मासि सिताष्टमी।

तथा।

स्रोतःसु विधिवत्स्नात्वा वाजपेयफलं लभेत् ॥
कार्त्तिकं सकलं मासं नित्यस्नायी जितेन्द्रियः।
जपन्हविष्यभुक् स्नातः सर्व्वपापैः प्रमुच्यते ॥
तुलामकरमेषेषु प्रातःस्नायी सदा भवेत्।
हविष्यं ब्रह्मचर्य्यञ्च महापातकनाशनम् ॥

यमः।

य इच्छेद्विपुलान् भोगांश्चन्द्रसूर्य्यग्रहोपमान्।
प्रातःस्नायी भवेन्नित्यं मासौ द्वौ माघफाल्गुनौ ॥

---

* तस्माद्दशहरा स्मृतेति देशान्तरीयः पाठः। † सेति पाठान्तरम्।

मत्स्यपुराणे ।

आषाढ्यादिचतुर्मासं प्रातःस्नायी भवेन्नरः ।
विप्रेभ्यो भोजनं दत्त्वा कार्त्तिक्यां गोप्रदो भवेत् ।
स वैष्णवपदं याति विष्णुव्रतमिदं स्मृतम् ॥

मार्कण्डेयः ।

गवां कोटिसहस्रस्य सम्यग्दत्तस्य यत्फलम ।
तत्फलं जाह्नवीस्नाने राहुग्रस्ते दिवाकरे ॥

ब्रह्मवशिष्ठः ।

रविसंक्रमणे पुण्ये न स्नायाद्यदि मानवः ।
सप्तजन्मान्तरं रोगी दुःखभागी सदा भवेत् ॥

मार्कण्डेयः ।

तृप्त्यामलकैर्विष्णोरेकादश्यां विशेषतः ।
स्त्रीकामः* सर्व्वदा स्नानं कुर्व्वीतामलकैर्नरः ।
सप्तमीं नवमीञ्चैव सर्व्वकाले च वर्ज्जयेत् ॥
कुर्य्यान्नैमित्तिकं स्नानं गीतादेः काम्यमेव च ।
नित्यं यादृच्छिकञ्चैव यथारुचि समाचरेत् ॥

मार्कण्डेयपुराणे ।

नित्यं नैमित्तिकं काम्यं त्रिविधं स्नानमुच्यते ।
तर्पणन्तु भवेत्तस्य अङ्गत्वेन प्रकीर्त्तितम् ॥
अङ्गतर्पणं भूदेवांस्तर्पयामि इत्यादिकं याजुर्वेदिकम् ।

इति काम्यस्नानानि ।

---

* स्त्रीकाम इति पाठान्तरम् ।

नारदीयपुराणे ।

सम्प्राप्ते माघमासे तु तपस्विजनवल्लभे ।
क्रोशन्ति* सर्व्वतीर्थानि समुद्गच्छन्ति भास्करे† ।
पुनीमः सर्व्वपापानि त्रिविधानि‡ न संशयः ॥
तड़ागेषु तु वा स्नायात्कूपे भाण्डाश्रिते तथा ।
माघमासे वरारोहे प्रशस्तं निम्नगाजलम् ॥

भाण्डाश्रितेषु विशेषः ।

सरित्तोयं महावेगं नवकुम्भस्थितं तथा ।
वायुना ताड़िता रात्रौ गङ्गास्नानसमं स्मृतम् ॥

अधिकवेगयुक्तायाः सरितः आनीतं तोयमित्यर्थः ।

स्नातो वह्निं न सेवेत अस्नातो वा कथञ्चन ।
सेवेतापि तु होमार्थं न शीतार्थं कथञ्चन ॥

विष्णुः ।

दर्शं वा पूर्णमासं वा प्रारभ्य स्नानमाचरेत् ।
पुण्यान्यहानि त्रिंशत्तु मकरस्थे दिवाकरे ।
अत्र चोत्थाय नियमं गृह्णीयादिधिपूर्व्वकम् ॥
माघमासमिमं पुण्यं स्नास्ये§ऽहं देव माधव ।
तीर्थस्यास्य जले नित्यमिति सङ्कल्प्य चेतसि ॥
ततः स्नात्वा शुभे तीर्थे दत्त्वा शिरसि वै मृदम् ।

---

* क्रोशन्ति आह्वानं कुर्व्वन्ति जनानिति शेषः क्रुश रोदनाह्वानयोरिति धात्वनुसारात् ।
† भास्करे भास्करक्षेत्रे प्रयागे । ‡ कायिकवाचिकमानसिकानि । § स्नास्येऽहमिति पाठान्तरम् ।

वेदोक्तविधिना राजन् सूर्यस्यार्घ्यं निवेदयेत् ॥
पितॄणां तर्पयित्वा तु अवतीर्य ततो जलात् ।
काष्ठापानान्नं संस्कृत्य* पूजयेत्पुरुषोत्तमम् ।
शङ्खचक्रधरन्देवं नामभिः परिपूजयेत् ॥
वह्निं† हुत्वा विधानेन ततस्त्वेकाग्रनाः‡ भवेत् ।
भूम्यां ब्रह्मचर्य्येण शक्तः स्नानं समाचरेत् ॥
अशक्तस्याधनाढ्यस्य स्वेच्छा सर्व्वत्र कथ्यते ।
अवश्यमेव कर्त्तव्यं माघस्नानमिति श्रुतिः ॥
तिलस्नायी तिलोद्वर्त्ती तिलहोमी तिलोदकी§ ।
तिलदस्तिलभोक्ता च षट्तिली नावसीदति ॥
तैलमामलकायैव तीर्थे देयाच्च¶ नित्यशः ।
तथा प्रज्वालयेद्वह्निं भवनार्थं द्विजन्मनाम् ॥
एवं स्नात्वावसाने तु भोज्यं देयमवारितम् ।
भोजयेद्विजदाम्पत्यं भूषयेदम्बभूषणैः ॥
कम्बलाजिनरत्नानि वासांसि विविधानि च ।
चोलकानि‖ च देयानि प्रच्छादनपटांस्तथा ॥
उपानहौ तथा गुप्तमोचकौ पापमोचकौ ।
अनेन विधिना दद्यान्माधवः प्रीयतामिति ॥

अत्र समापनमन्त्रः ।

---

* काष्ठा उत्कृष्टं पानं पानीयद्रव्यं अन्नञ्च संस्कृत्य प्रसृज्य । † वह्नाविति पाठान्तरम् । ‡ एकभक्तव्रतं कुर्य्यात् । § तिलवापीति देशान्तरीयः पाठः । ¶ तैलं देयमामलका देया ब्राह्मणायेति शेषः । ‖ घाघरा यस्य प्रसिद्धिः ।

सवित्रे प्रसवित्रे तु परं धाम जले मम ।
तत्तेजसा परिभ्रष्टं पापं यातु सहस्रधा ॥
दिवाकर जगन्नाथ प्रभाकर नमोऽस्तु ते ।
परिपूर्णङ्कुरुष्वेदं माघस्नानं तवाज्ञया ॥
अहन्यहनि दातव्यास्तिला वा शर्करान्विताः* ।
माघावसाने शुभगे षड्रसं भोजनं तया ।
सूर्यो मे प्रीयतान्देवो विष्णुमूर्त्तिर्निरञ्जनः ॥
दम्पत्योर्वाससी सूक्ष्मे सप्तधान्यसमन्विते ।
चिंशत्तु मोदका देयाः शर्करातिलसंयुता: ॥
भागत्रयं तिलानान्तु चतुर्थः शर्करांशकः ।
स नाभ्यङ्क्षी† वरारोहे सर्व्वमासं नयेद्व्रती ॥

इति माघस्नानम् ।

क्रियाङ्गस्नानलक्षणं प्रागभिहितं तत्तु तत्रैव व्याख्यातम् ।

अथ मलापकर्षणं स्नानम् ।

तत्र गार्ग्यः ।

पञ्चमी चैव नवमी तृतीया च त्रयोदशी ।
एकादशी द्वितीया च पञ्चयोरुभयोरपि ॥
अभ्यङ्गस्पर्शपानाद्यैर्यत्र तैलं निषेवते ।

---

* शर्करयान्विता इति पाठान्तरम् । † अनभ्यङ्क्षीति पाठान्तरम् । ‡ मूर्द्धि दत्तं यदा तैलमित्याद्युक्तमभ्यङ्गं स्पर्शस्तैलस्पर्शः पानं तैलपानमित्यादिभिः ।

चत्वारि तस्य नश्यन्ति आयुः प्रज्ञा यशो बलम् ॥

तथा ।

पञ्चदश्यां चतुर्दश्यामष्टम्यां रविसंक्रमे ।
द्वादश्यां सप्तमीषष्ठ्योस्तैलस्पर्शमपि त्यजेत् ॥

गार्ग्यः ।

त्रयोदश्यां तृतीयायां प्रतिपद्दर्शमीद्वये ।
तैलाभ्यङ्गं न कुर्वीत स्पृशेद्वा नवमीं विना ॥
मोहात्प्रतिपदं षष्ठीं कुहुं रिक्तातिथिं तथा ।
तैलेनाभ्यङ्गयेद्यस्तु चतुर्भिः परिहीयते ॥

व्यासः ।

आदित्यादिषु वारेषु तापः कान्तिर्मृतिर्धनम् ।
दारिद्र्यं सुभगत्वञ्च कामप्राप्तिरतः क्रमात् ॥

गार्ग्यः ।

मांसाशने पञ्चदशी तैलाभ्यङ्गे चतुर्दशी ।
अष्टमी ग्राम्यधर्मे च ज्वलन्तमपि पातयेत् ॥
षष्ठ्यष्टमी त्वमावास्या उभे पक्षे चतुर्दशी ।
अत्र सन्निहितं पापं तैले मांसे क्षुरे भगे ॥

अत्र प्रतिप्रसवमाह प्रचेताः ।

सार्षपं तैलगन्धञ्च* यत्तैलं पुष्पवासितम् ।
अन्यद्रव्ययुतं तैलं न दुष्यति कदाचन ॥

---

* गन्धद्रव्ययुक्ततैलम् ।

तैलाभ्यङ्गनिषेधे तु तिलतैलं निषिध्यते ।
अभ्यङ्गस्य निषेधे तु सार्षपादेरपीष्यते ॥
स्नेहाभ्यङ्गो भवत्येव सस्नेहः सार्षपादिकः ।
न भोजनाय तैलस्य निषेधोऽभ्यङ्ग एव सः ॥
तैलशब्दस्तिलस्नेहे सुरूढो नैव यौगिकः ।
अतस्तिलविकारेऽपि पिण्याकतिलमोदके ।
शष्कुलीक्षुरादौ च निषेधो नैव जायते* ॥

मनुः ।

शिरःस्नातस्तु तैलेन नाङ्गं किञ्चिदुपस्पृशेत् ।

अस्यार्थः । तैलेन शिरःस्नातः सन् स्वाङ्गमन्यदपि तैलेन न संस्पृशेन्न प्रक्षालयेदिति । एतच्च तस्मिन्दिन एव ।

न रात्रौ विद्यते स्नानं हृद्दिसर्व्वोत्सवेषु च ।
स्नेहमात्रसमायुक्तं मध्याह्नात्प्राग्विशिष्यते ॥

निषिद्धतिथिशुभवारयोगे तैलस्नानं कार्य्यम् । तिथ्यपेक्षया वारस्य प्राबल्यात्तदुक्तं ब्रह्मसिद्धान्ते ।

तिथिरेकगुणा प्रोक्ता नक्षत्रञ्च चतुर्गुणम् ।
करणं षड्गुणञ्चैव वारस्त्वष्टगुणः स्मृतः ॥ इति ।
तिलैः स्नानं सदा पुण्यं कुर्य्यादामलकैः प्रिये ।

---

* तिलस्नेहे द्रवीभूततिलनिर्य्यासे, सुरूढो योगरूढ़ित्यर्थः न तु यौगिकः न योगबलेन तिलसम्बन्धिपिण्याकादिसमस्तवाचकः । अतस्तिलतैलमात्रनिषेधादित्यर्थः । शष्कुली भाजी तिलतैलेनेति शेषः क्षुरः तिलमिश्रितखेचरान्नं तिलघटितलेऽपि तैलनिषेधे एतन्न निषिद्धमिति तात्पर्य्यम् ।

सप्तमी नवमी दर्शरविसंक्रमणाष्टमे ॥

व्यासः ।

तथा दर्शे च सप्तम्यां संक्रान्तौ च रवेर्दिने ।
चन्द्रसूर्य्योपरागे च स्नानमामलकैस्त्यजेत् ॥
सर्व्वकालं तिलैः स्नायादिति व्यासोऽब्रवीन्मुनिः ।
गिरःस्नानं तटे कृत्वा मज्जेदप्सु यथाविधि ॥

अथ क्रियाङ्गस्नानम् ।

तत्र शङ्खः ।

क्रियास्नानं प्रवक्ष्यामि यथावद्विधिपूर्व्वकम् ।
मृद्भिरद्भिश्च कर्त्तव्यं शौचमादौ यथाविधि ॥
जले निमग्नस्तून्मज्जा उपस्पृश्य यथाविधि ।
तीर्थस्यावाहनङ्कुर्य्यात्तत्प्रवक्ष्याम्यतः परम् ॥
प्रपद्ये वरुणन्देवमब्भमां पतिमृत्त्विजम् ।
याचितन्देहि मे तीर्थं सर्व्वपापापनुत्तये ॥
सान्निध्यमस्मिंस्तोये तु स्थीयतां मदनुग्रहात् ।
रुद्रान्प्रपद्ये वरदान् सर्व्वानप्सुषद*स्त्वहम् ॥
सर्व्वानप्सुषदश्चैव प्रपद्ये प्रणतः स्थितः ।
देवमप्सुषदं वह्निं प्रपद्ये त्वनिसूदनम् ॥
आपः पुण्याः पवित्राश्च प्रपद्ये शरणं तथा ।

---

* अप्सु सीदन्ति प्रविशन्ति इत्यप्सुषदः ।

रुद्राश्चाग्निश्च सर्पाश्च वरुणश्चाप एव च।
शमयन्त्वशुभम्मापं रक्षन्तु च सदा शुभम्॥
इत्येवमुक्त्वा कर्त्तव्यं ततः सम्मार्ज्जनङ्कुशैः।
आपो हिष्ठेति तिसृभिर्यथावदनुपूर्व्वशः॥
हिरण्यवर्णाः* इति च ऋग्भिश्चतसृभिस्तथा।
शन्नो देवीरितिः† तथा शन्न आपश्‍चस्तथैव च।
इदमापः प्रवहतेः‡ त्येवं सर्व्वमुदीरयन्॥
एवं सम्मार्ज्जनङ्कृत्वा छन्द आर्षञ्च दैवतम्।
अघमर्षणसूक्तस्य¶ संस्मरेत्प्रयतः सदा॥
ततोऽम्भसि निमग्नस्तु त्रिःपठेदघमर्षणम्।
प्रपद्यान्मूर्द्धनि तथा महाव्याहृतिभिर्जलम्॥

इति क्रियाङ्गस्नानम्।

---

* हिरण्यवर्णाशुचयः यासां राजा यासां देवः शिवेन मावक्षुषा इति। † शन्नोदेवीरभीष्टये आपोभवन्तु पीतये शंयोरभिस्रवन्तु नः इति। ‡ शन्नः आपोधन्वन्याः शमनः सन्तु नूप्याः शन्नः समुद्रिया आपः शमनः सन्तु कूप्या इति। § इदमापः प्रवहत यत्किञ्चिदुरितं मयि यद्वाहं अभिदुद्रोहयद्वाश्रेप उतानृतमिति। ¶ अघमर्षण ऋषिः भाववृत्तीदेवता अनुष्टुप्छन्दोऽश्वमेधावभृथे विनियोगः ऋतञ्च सत्यञ्चाभीद्धातपसो अध्यजायत ततो रात्रिरजायत ततः समुद्रोऽर्णवः समुद्रादर्णवादधिसंवत्सरोऽजायत अहोरात्राणि विदधद्विश्वस्य मिषतोवशी सूर्य्याचन्द्रमसौ धाता यथापूर्व्वमकल्पयद्दिवञ्च पृथिवीञ्चान्तरीक्षमथो स्वः इति।

अथ गौणस्नानविधिः ।

तत्र जाबालिः ।

असामर्थ्याच्छरीरस्य देशकालाद्यपेक्षया ।
मन्त्रस्नानादिकाः सप्त केचिदिच्छन्ति सूरयः ॥

योगियाज्ञवल्क्यः ।

मान्त्रभौमं तथाग्नेयं वायव्यन्दिव्यमेव च ।
वारुणं मानसञ्चैव सप्त स्नानान्यनुक्रमात् ॥
आपो हिष्ठादिभिर्मान्त्रं मृदालम्भेन पार्थिवम् ।
आग्नेयं भस्मना स्नानं वायव्यङ्गोरजः स्मृतम् ॥
यत्तु सातपवर्षेण स्नानं तद्दिव्यमुच्यते ।
वारुणञ्चावगाह्यञ्च मानसं विष्णुचिन्तनम् ।
कालदेशाद*सामर्थ्यात्सर्व्वन्तुल्यफलं स्मृतम् ॥

कूर्म्मपुराणे ।

सुस्थस्य वारुणं† स्नानं ब्राह्मं‡ व्याधेः§ जलक्षये¶ ।
दिव्यं अद्यावताम्मुख्यं वायव्यमुपपापिनाम् ॥

जाबालिः ।

अशिरस्कभवेत्स्नानं स्नानाशक्तौ तु कर्म्मिणाम् ।
आर्द्रेण वाससा वापि मार्ज्जनं दैहिकं विदुः ॥

---

* कालेन सह देशः कालदेशः तस्मात्कालदेशात्, कालाद्यपेक्षात्कालप्रयुक्तात् श्लेष्मलदेशप्रयुक्ताच्चेत्यर्थः । कालदोषादिति देशान्तरीयः पाठः । † मन्त्ररहितावगाहनमात्रम् । ‡ ब्रह्म वेदः मन्त्ररूपः तेन क्रियमाणं ब्राह्मं मान्त्रिकस्नानमिति यावत् । § स्नानसंवर्द्धनव्याधौ । ¶ स्नानयोग्यजलाभावे ।

नाभेरधः प्रविश्यास्तु कटिं प्रक्षाल्य मृज्जलैः ।
आर्द्रेण कर्पटेनाङ्गं* कपिलं शोधनं स्मृतम् ॥
विहत्सरस्वतीस्नानं प्राप्तं सारस्वतं मतम् ।

विहद्वाक्येन पावित्र्यापादनं सारस्वतस्नानमित्यर्थः । गात्राणां हृत्तं प्रासङ्गिकं सम्प्रति प्रकृतं प्रक्रम्यते । एवं स्नात्वा वस्त्रादिभिरङ्गं न प्रमृज्यात् ।

तथाच शातातपः ।

अपमृज्यान्न च स्नातो गात्राण्यम्बरपाणिभिः† ।
न वा विधूनयेत्केशान्वाससी न विधूनयेत् ॥
तिस्रः कोट्योऽर्द्धकोटी च यावद्रोमाणि मानवे ।
स्रवन्ति सर्व्वतीर्थानि तस्मान्न परिमार्ज्जयेत् ॥

देवलः ।

देवाः पिबन्ति शिरसो मुखस्य पितरस्तथा ।
रक्षसोऽपि च गन्धर्व्वा अधस्तात्सर्व्वजन्तवः ॥

अतः ।

अङ्गानि शक्तो वस्त्रेण पाणिना न प्रमार्ज्जयेत् ।

प्रमार्ज्जयेदिति गोदोहमात्रं तिष्ठेत् । एतच्च‡ शिष्टाचारादवगम्यते । ततो वाससी परिधायोरू प्रक्षालयेत् ।

तथाच योगियाज्ञवल्क्यः ।

---

* आर्द्रजीर्णवस्त्रेण । † अम्बरेण परिधानवस्त्रेण पाणिना च अङ्गानि न प्रमृज्यादित्यर्थः । अतएव स्नानसाध्या न पाणिना इत्यन्वयोक्तम् । ‡ गोदोहनकालश्चेत्यर्थः ।

स्नात्वैवं वाससी धृते अक्लिन्ने परिधाय च ।
प्रचाल्योरू मृदा वाद्भिर्हस्तौ प्रक्षालयेत्तथा ॥

अथ वस्त्रविधिः ।

तत्र भृगुः ।

ब्राह्मणस्य सितं वस्त्रं नृपतेः रक्तमुल्बणम् ।
पीतं वैश्यस्य शूद्रस्य नीलं मलवदिष्यते ॥

उल्बणं निविड़ं रक्तम् । रक्तं धातुरक्तम् ।

शातातपः ।

ईषद्धौतं नवं श्वेतं सदग्धं यत्र धारितम् ।
आहतं तद्विजानीयात्सर्व्वकर्म्मसु पावनम् ॥

ईषद्धौतं जलमात्रप्रक्षालितं यत्क्षादुत्तोल्यं यदप्रक्षालितं तदाहतम् ।

यथाह शातातपः ।

आहतं यत्क्षनिर्मुक्तमुक्तं वासः स्वयम्भुवा ।
श्रस्तं तन्माङ्गलिक्येषु तावत्कालं न सर्व्वदा ॥

माङ्गलिक्यं विवाहादि ।

प्रागग्रमुदग्रं वा धौतं वस्त्रं प्रसारयेत् ।
पश्चिमाग्रं दक्षिणाग्रं पुनःप्रक्षालनाच्छुचिः ॥
अन्यदेव भवेद्वासः शयनीये नराधिप ।
अन्यद्रथास्तु देवानामर्च्चायामन्यदेव हि ।
अन्यच्च लोकयात्रायामन्यदीश्वरदर्शने ॥

बौधायनः।

उत्तरं वासः कर्त्तव्यं पञ्चस्वेतेषु कर्म्मसु।
स्वाध्यायोत्सर्गदानेषु भुक्ताचमनयोः स्मृतम्॥

उत्सर्गो मूत्रादेः। स्वाध्यायग्रहणं विहितसकलकर्म्मोपलक्षणार्थम्।

योगियाज्ञवल्क्यः।

अभावे धौतवस्त्रस्य पट्टचौमाजिनानि च।
कृतपं* यज्ञसूत्रं वा द्विवासा येन वा भवेत्॥
यज्ञोपवीते द्वे धार्य्ये श्रौते स्मार्त्ते च कर्म्मणि।
तृतीयमुपवीतं स्याद्वस्त्राभावे† तदिष्यते॥

जातूकर्ण्यः।

वस्त्रोत्तरीयाभावे द्व्यङ्गुलं त्र्यङ्गुलं वा चतुरङ्गुलं वा सूत्रैर्वस्त्राकृतिपरिमण्डलमुत्तरीयं कुर्य्याद्वन्यं‡ चीवरं§ वा¶। उत्तरीयाभावे तु धौतवस्त्रस्योर्द्ध्वभागेनोत्तरीयं कुर्य्यात्।

तथाच पारस्करः।

एकच्छेदासो भवति तस्यैवोत्तरवर्गेण प्रच्छादयतीति। उत्तरवर्गेण उत्तरार्द्धेनेत्यर्थः।

योगियोगीश्वरः।

---

* सप्तपञ्चकृत्वम्। † वस्त्राभाव इति पाठान्तरम्। ‡ वनसम्बन्धि वल्कलादि। § खण्डवस्त्रम्। ¶ वस्त्रस्य चीवरं वेति पाठान्तरम्।

नार्द्रवासा नार्द्रवासा नैकवासा स्थले जपेत् ।
कषायकृष्णवस्त्रञ्च मलिनं केशदूषितम् ।
छिन्नाग्रन्थ्युपवस्त्रञ्च सूच्या ग्रथितमेव वा ॥

वर्ज्जयेदित्यर्थः । एतच्च सति विभवे ।

विष्णुपुराणे ।

होमदेवार्च्चनाद्यासु क्रियासु स्नानभोजने ।
नैकवस्त्रः प्रवर्त्तेत द्विजो वाचनिके जपे ॥

जातूकर्णः ।

परिधानाहिः कक्षा निवसा ह्यासुरी मता ।
धर्म्मकर्म्मणि विद्वद्भिर्वर्ज्जनीया प्रयत्नतः ॥
परिधाय नवं वस्त्रमुत्तरीयञ्च मन्त्रतः ।
आचमेच्च द्विजो वस्त्रे धौते विपरिधाय च ॥

तत्रापूर्व्वग्रहण एवं[1] मन्त्रः ।

पारस्करेण परिधास्ये यशोधास्येदीर्घायुष्टाय जरदष्टि-
रस्मि । शतञ्च जीवामि शरदः पुरुचीरायस्पोषमभि-
वर्द्धयिषे[2] । इति ।

उत्तरीयेऽपि ।

---

* वस्त्रसदृशम् । † पूर्व्वाभावे अभिनवग्रहणे एवेत्यर्थः । ‡ पुरुचीरायस्पो-
षमभिवर्द्धयिषे इत्येव पाठः बहुषु पुस्तकेषु दृश्यते परन्तु हेमाद्रिधृत ब्राह्मणसर्व्वस्वे अत्र
अन्यप्रकारपाठो दर्शितो व्याख्यातश्च यथा सुवसो रायस्पोषमभिसंव्ययिष्ये इति रायस्पोषाय
धनसङ्घाय अभिसंव्ययिष्ये अभि सर्व्वतोभावेन सम्यरणं करिष्यामि अत्र सम्यरणं इत्यस्य
रूपम् ।

यशसा मा द्यावापृथिवी यशसामिन्द्राबृहस्पती। यशसां भगश्च भावि द्व्यादमशो-
र्भामा प्रतिपद्यतामिति*।

तथा वासच्छत्रोपानहश्चापूर्व्वाणि† चेन्मन्वत इति।

नववस्त्रपरिधाने वारदोषो ज्योतिःशास्त्रे प्रदर्शितः।

तत्र सुरेश्वरः राजमार्त्तण्डे च।

मार्त्तण्डे च धनं व्रणः शशधरे क्लेशः सदा भूमिजे
वस्त्रं लाभकरञ्बुधे सुरगुरौ विद्यागमः सम्पदः।
नानायोगरतिप्रमोदवनिताशय्यादिलाभो भृगौ
दैन्यं शाश्वतरोगवान् किल नरो धृत्वाम्बरं सौरिणा‡॥

श्रीपतिः।

रोहिणीषु करपञ्चके शुभे तूत्तरेऽपि च पुनर्व्वसुद्वये।
रेवतीषु वसुदैवते च मे नववस्त्रपरिधानमिष्यते॥

---

* बहुषु पुस्तकेषु यथा दृष्टं तथा रचितं परन्तु हलायुधकृते ब्राह्मणसर्व्वस्वे वैलक्षण्य-पाठो दृश्यते साधुमन्यते च यथा। यशसा मा द्यावापृथिवी यशसेन्द्राबृहस्पती यशो भगश्च माऽविदद्यशो मा प्रतिपद्यतामस्यार्थः। द्यावापृथिवी द्यावापृथिव्यौ मा मां छादयेतामिति क्रियापदमध्याहृतं बोद्धव्यम्। केन यशसा। किञ्च इन्द्राबृहस्पती यशसा मां छादयेताम्। किञ्च यशो मा मां अविदत् प्राप्नोतु। न केवलं यशो भगश्च मामविदत् प्राप्नोतु। किञ्च मा मां प्रतिपद्यतामभिगच्छतु। पुनः पुनरभिधानमादरार्थम्। मदीय-वस्त्राच्छादनेनाकाशादयो मां यशसा आच्छादयन्तु। उत्तरोत्तरं यशश्च सौभाग्यञ्च मम भवत्वित्याशंसा वाक्यार्थः। † पूर्व्वाग्रहीतानि चेत् अभिनवगृहीतानि चेदित्यर्थः। ‡ विशेषणे तृतीया शनिवारविशिष्ट इत्यर्थः।

अथ क्रमप्राप्ततिलकविधिः ।

ब्रह्माण्डपुराणे भगवानुवाच ।

अङ्गुष्ठः पुष्टिदः प्रोक्तो मध्यमायुष्करी भवेत् ।
अनामिकाव्रदा नित्यं मुक्तिदा च प्रदेशिनी ॥
एतैरङ्गुलिभेदैस्तु कारयेन्न नखैः स्पृशेत् ।
वर्त्तिदीपाकृतिं वापि शङ्काकारमतःपरम्* ॥
दशाङ्गुलप्रमाणन्तु उत्तरोत्तरमुच्यते ।
नवाङ्गुलं मध्यमं स्यादष्टाङ्गुलमतःपरम् ॥
सप्तषट्पञ्चभिः पुण्ड्रं मध्यमं त्रिविधं स्मृतम् ।
चतुस्त्रिद्व्यङ्गुलैः पुण्ड्रं कनिष्ठं त्रिविधं† भवेत् ॥
ललाटे केशवं विद्यान्नारायणमथोदरे ।
माधवं हृदि विन्यस्य गोविन्दङ्गण्ठकूपके ॥
विष्णुञ्च दक्षिणे कुक्षौ तद्भुजे मधुसूदनम् ।
त्रिविक्रमङ्गण्ठदेशे वामकुक्षौ तु माधवम् ॥
श्रीधरञ्च तथा न्यस्य वामबाहौ नरः सदा ।
पद्मनाभं पृष्ठदेशे ककुदामोदरं स्मरेत् ।
वासुदेवं स्मरेन्मूर्द्धि तिलकङ्कारयेत्क्रमात् ॥

व्यासः ।

जाह्नवीतीरसम्भूतां मृदं मूर्द्धि‡ बिभर्त्ति यः ।

---

* वेणुपत्राकृतिन्तथा इति पाठान्तरम् । † त्रिविधमिति पाठान्तरम् । ‡ मूः इति देशान्तरीयः पाठः ।

बिभर्त्ति रूपं सोऽर्कस्य तमोनाशाय केवलम् ॥

सत्यतपाः।

गोमतीतीरसम्भूतां गोपीदेहसमुद्भवाम्।
यदं मूर्द्ध्नां धरेद्यस्तु सर्व्वपापैः प्रमुच्यते ॥

ब्रह्माण्डपुराणे।

श्यामं शान्तिकरं प्रोक्तं रक्तं वश्यकरम्भवेत्।
श्रीकरम्पीतमित्याहुर्वैष्णवं श्वेतमुच्यते ॥

ब्रह्माण्डपुराणे।

योगो दानं तपो होमः स्वाध्यायः पितृतर्पणम्।
भस्मीभवति तत्सर्व्वमूर्द्ध्वपुण्ड्रं विना कृतम् ॥
ऊर्द्ध्वपुण्ड्रं तथा कुर्य्यात्त्रिपुण्ड्रं भस्मना सदा।
तिलकं वै द्विजः कुर्य्याच्चन्दनेन यदृच्छया ॥
ऊर्द्ध्वपुण्ड्रं द्विजः कुर्य्यात्क्षत्रियस्तु त्रिपुण्ड्रकम्।
अर्द्धचन्द्रन्तु वैश्यस्य वर्त्तुलं शूद्रजातिषु ॥
अथ माध्याह्निकां सन्ध्यां पूर्व्वोद्दिष्टां समाचरेत्।
उपस्थानञ्च तत्रोक्तं जपञ्च त्रिविधस्तथा* ॥

अथ ब्रह्मयज्ञः।

तत्र श्रुतिः।

उदित्यमादित्यं उपस्थायोपविश्य हस्तावबनिज्य त्रिरा-

---

* मानसिकोपांशुवाचनिकरूपः।

चमेत् । द्विः परिमृज्य सकृदुन्मृज्य शिरश्चक्षुषी नासिके श्रोत्रे हृदये आलभ्येत ।

अथमाचमनप्रकारः ।

ब्रह्मयज्ञानुष्ठानप्रकारः श्रौनकेनोक्तः ।

प्राग्वोदग्वा ग्रामाद्विक्रम्याप आचम्य यज्ञोपवीत्याचम्याक्लिन्नवासा दर्भाणां महदुपस्तीर्य प्राक्कूलानग्रेषु प्राङ्मुख उपविश्योपस्थं कृत्वा दक्षिणोत्तरौ पाणी सन्धाय पवित्रवन्तौ विज्ञायतेऽपां वा एष ओषधीनां रसोयदर्भाणामेवमेव तद्ब्रह्म करोति । द्यावापृथिव्योः सन्धिमीक्षमाणः संमील्य वा यथा वा युक्तमात्मानं मन्येत यथा युक्तोऽधीयीत स्वाध्यायमोङ्कारपूर्व्वा व्याहृतीः सावित्रीमन्वाहपच्छोऽङ्त्रिंशः । सर्व्वामिति तृतीयकम् । यावन्मन्येत तावदधीत्येतया परिदधाति नमो ब्रह्मणे इति । अक्लिन्नवासा अनार्द्रवासाः महदुपस्तीर्य प्राक्कूलैर्दर्भैर्भुवं निविड़ं यथा भवति तथाच्छाद्य वाम उपस्थं कृत्वा वामपादाङ्गुष्ठे दक्षिणपादाङ्गुष्ठं निधाय पादपार्ष्णिसम्मीलने कृते मध्य उपस्थाकृतिरिव भवति तदुपस्थमित्युच्यते । इतरेतरपादव्यत्या संस्थापनेनोपवेशनमुपस्थकरणमिति मञ्जर्याम् । अथवा यथोपदेशं कुर्य्यात्तेन तथा वा युक्तात्मानं यथा समाहितमात्मानं मन्यते । ओङ्कारपूर्व्वा भूरादिव्याहृतित्रयं क्रमेण गायत्री पादादौ क्रमेण ततस्तथैव च । भूरादिव्याहृतिद्वयमर्द्धादौ क्रमेण ततस्तथैव च । तृतीयव्याहृति-

पूर्विकां सर्व्वां गायत्रीं पठेद्यावन्मन्येत तावद्गायत्रीजपानन्तरं ऋग्यजुःसामादिषु यावत्पठितुं मन्यते तावदधीत्य नमो ब्रह्मणे नमोऽग्नय इत्येतया परिदधाति परिधानं त्रिःपठनम् ।

योगियाज्ञवल्क्यः ।

आदावारभ्य वेदन्तु स्वालोपर्य्युपरिक्रमात् ।
यदधीतेऽन्वहं शक्त्या स स्वाध्याय इति स्मृतः ॥
ब्रह्मयज्ञप्रसिद्ध्यर्थं विद्यात्स्वाध्यात्मिकीं जपेत् ।
जप्त्वा च प्रणवं वापि ततस्तर्पणमाचरेत् ॥

मनुः ।

अपां समीपे नियतो नैत्यिकीं विधिमास्थितः ।
सावित्रीमप्यधीयीत गत्वारण्यं समाहितः ॥

अरण्यं गत्वेति यथा कुर्दिनं दृश्यते तथारण्यं गत्वेत्यर्थः । तथाच श्रुतिः ।

ब्रह्मयज्ञेन वक्ष्यमाणः प्राच्यां दिशि ग्रामादहिर्गच्छेद्-
च्छर्दिर्दर्शं उदीच्यां प्रागुदीच्यां रोदित आदित्य इति ।

उदित आदित्य इत्युदयोत्तरकालः । स कालोऽपि गृह्यते न प्रातःकाल एव ।

अतएव बृहस्पतिः ।

स चार्वाक्तर्पणात्कार्य्यः पश्चाद्वा प्रातराहुतेः ।
वैश्वदेवावसाने वा नान्यत्रेति निमित्ततः ॥ इति ।

स ब्रह्मयज्ञ इत्यर्थः । वैश्वदेवावसान इति मनुष्ययज्ञानन्तरं

मनुष्ययज्ञस्य सनकाद्युद्देशेन हन्तकारो यो दीयते स। एव श्रुतिरपि मनुष्ययज्ञानन्तरं ब्रह्मयज्ञं दर्शयति। नातिथिपूजा। देवयज्ञः पितृयज्ञो भूतयज्ञो मनुष्ययज्ञो ब्रह्मयज्ञ इति।

कूर्मपुराणे।

यदि स्यात्तर्पणादर्वाग् ब्रह्मयज्ञः कृतो न हि।
मनुष्ययज्ञकृत्वैव ततः स्वाध्यायमारभेत्॥

यदि देवादिनिमित्तेनोक्तकाले ब्रह्मयज्ञो न कृतस्तदा कालान्तरेऽपि भवति। यदा ग्राममध्ये तदा मनसा पठेत्।

तथाच श्रुतिः।

ग्रामे न स्वाध्यायमधीयीत दिवा नक्तं वेति।

मनुः।

नैत्यिके* नास्त्यनध्यायो ब्रह्मसत्रं हि तत्स्मृतम्।
ब्रह्माहुतिहुतं† पुण्यमनध्यायवषट्कृतम्॥

तथा।

वेदोपकरणे चैव स्वाध्याये चैव नैत्यिके।
नानुरोधस्त्वनध्याये होममन्त्रेषु चैव हि॥

वेदोपकरणं वेदाङ्गम्‡।

अत्र विशेषो गौतमेनोक्तः।

अथ यदि वातो वायादग्नेर्वा विद्युत्यतेर्वा अवस्फु§-

---

* नित्यवेदाध्ययने। † ब्रह्मणा वेदोक्तमन्त्रेणाहुत्या हुतम्। ‡ शिक्षा कल्पो व्याकरणं निरुक्तं छन्दसाचितिः, ज्योतिषामयनञ्चैव वेदाङ्गानि वदन्ति षट्। § विपत्तिं गच्छेदित्यर्थः।

ज्जैहा वा एकं* ऋचामेकं वा यजु†रेकमेकं सामा‡ भिव्याहरेत्। भूर्भुवः स्वः सत्यं तपः अद्वायां जुहोमीति।

अत्र वातो वायादित्याद्यनध्यायोपलक्षणम्।

अतोऽनध्यायेऽप्येकर्चादिकमेव पठेन्नाधिकमिति गम्यते। तथा

आदावेवोक्तं§ पूर्वं¶ परस्ताच्च‖ विरम्यते।
कुशानुत्तरतः क्षिप्त्वा यथाचमनमाचरेत्॥
इति विद्या तपो योनिर्वियोनि**र्विष्णुरीरितः।
वाग्यज्ञेनार्चितो देवः प्रीयतां मे जनार्दनः॥

इति ब्रह्मयज्ञविधिः।

अथ तर्पणम्।

तत्र हरहस्पतिः।

ब्रह्मयज्ञप्रसिद्ध्यर्थं विद्याद्याध्यात्मिकीं जपेत्।
जप्त्वाथ प्रणवं वापि ततस्तर्पणमाचरेत्॥

शातातपः।

---

* अग्निमीले पुरोहितं यज्ञस्य देवमृत्विजं होतारं रत्नधातममिति ऋग्वेदमन्त्रः। † इशे त्वोर्ज्जे त्वा वायवः स्थ देवोवः सविता प्रार्पयतु श्रेष्ठतमाय कर्म्मणे इति यजुर्वेदमन्त्रः। ‡ अग्न आयाहि वीतये गृणानो हव्यदातये निहोता सत्सि बर्हिषि इति सामवेदमन्त्रः। § ओंकारपूर्वकमादौ पठनीयम्। ¶ पूर्वं पूर्ववत्। ‖ ओंकारपूर्वकं विरम्यते इत्यर्थः। ** वियोनिः विराम इत्यर्थः। अयोनिरिति पाठान्तरम्।

तर्पणन्तु शुचिः कुर्य्यात्प्रत्यहं स्नातको द्विजः ।
देवेभ्यश्च पितृभ्यश्च ऋषिभ्यश्च यथाक्रमम् ॥

अत्राञ्जलिनियममाह ।

एकैकमञ्जलिं देवा ह्रीं ह्रीं तु सनकादयः ।
अश्नन्ति पितरस्त्रींस्त्रीन् स्वयम्भ्येकैकमञ्जलिम् ॥

विष्णुपुराणे ।

विरूपः प्रीणनार्थाय देवानामपवर्जयेत् ।
ऋषीणान्तु यथान्यायं सकृन्नापि प्रजायते ॥

यथान्यायमित्यनेन देवानामिव विरित्यर्थोऽवगम्यते । चशब्दो वाशब्दार्थेऽपिशब्दाद्ञ्जलिद्वयं गृह्यते । अत्राञ्जलिसंख्यायां स्वस्वगृह्यानुसारेण व्यवस्था । येषां स्वगार्ह्यायां न कोऽपि विशेष आम्नातस्तेषां विकल्पः ।

योगियाज्ञवल्क्यः ।

अन्वारब्धेन सव्येन नाम्ना गोत्रेण वाप्यथ ।

कूर्म्मपुराणे ।

अन्वारब्धेन सव्येन पाणिना दक्षिणेन तु ।
देवर्षींस्तर्पयेद्धीमानुदकाञ्जलिभिः पितॄन् ॥

अत्रापि पूर्ववदेव व्यवस्था ।

एवञ्च ।

एकहस्तेन तोयेन न कुर्य्यात्पितृतर्पणम् ।
पितरो न प्रशंसन्ति न प्रशंसन्ति देवताः ॥
उभाभ्यामपि हस्ताभ्यामुदकं यः प्रयच्छति ।

स मूढ़ो नरकं याति कालसूत्रमवाक्शिराः* ॥

इति योगियाज्ञवल्क्यव्याघ्रादिवचनानि तानि तत्तच्छाखाप्रयुक्तानि† निषेधकानि न तु सर्व्वसाधारणेन । अतो न काप्यनुपपत्तिः ।

तत्र अन्वारब्धेन सव्येन पाणिना दक्षिणेन तु । देवर्षीं स्तर्पयेदिति कूर्म्मपुराणवचने देवर्षीनिति विशेषोपादानादितराण्यप्येकहस्ततर्पणवचनानि सामान्यानि विशेषविषयकूर्म्मपुराणवचनविषयानि देवर्षितर्पणे तु प्रविशन्ति इति चेन्नैवम् अन्वारब्धेन सव्येन नामगोत्रेण वाप्ययेति योगियाज्ञवल्क्येन नामगोत्रसहितसव्यहस्तान्वारब्धदक्षिणहस्ततर्पणविधानात् । गोत्रोच्चारणं पितृणामेव न देवानां नाप्यृषीणामिति । एकहस्ततर्पणं देवर्षिपितृतर्पणसाधारणम् अत्र पूर्व्वोक्तैव व्यवस्था‡ ज्यायसी । विवाहादावेकहस्तेनैव । तथाच

कार्ष्णाजिनिः ।

विवाहे श्राद्धकाले च पाणिनैकेन दीयते§ । इति ।

हारीतः ।

वसित्वा¶ वसनं शुष्कं स्थले विस्तीर्य्यबर्हिषि ।
विधिवत्तर्पणङ्कुर्य्यान्न तु पात्रे‖ कदाचन ॥

---

* अधःशिराः । † यस्य स्वशाखायामेकहस्तौ विहितः तस्य शाखिनोविहस्तनिषेधकं वचनम् । एवं यस्य स्वशाखायां द्विहस्तौ विहितौ तस्य शाखिन एकहस्तनिषेधकमित्यर्थः । ‡ शाखिभेदेन व्यवस्था इत्यर्थः । § विवाहे वरपाद्यादिकं श्राद्धे कुशासनादिकमिति शेषः । ¶ परिधाय । ‖ जलं निक्षिपेदिति शेषः ।

एतच्चानुद्धृतोदकस्थलतर्पणविषयम् ।

उद्धृतोदके तु स एव ।

पात्राद्वा जलमादाय शुभे पात्रान्तरे क्षिपेत् ।

जलपूर्णेऽथवा गर्त्ते न स्थले न तु बर्हिषि* ॥

पात्रञ्चात्र पितामहेनोक्तम् ।

हैमरूप्यमयं पात्रं ताम्रङ्कांस्यसमुद्भवम् ।

पितॄणां तर्पणे पात्रं मृण्मयन्तु परित्यजेत् ॥ इति ।

अत्र योगियाज्ञवल्क्यः ।

यद्युद्धृतेन सिञ्चेत्तु तिलान् संमिश्रयेज्जले ।

अन्यथा वामहस्तेन ततस्तर्पणमाचरेत् ॥

अन्यथा अनुद्धृते । अतोऽन्यथाचरेत्मध्ये तिलान्क्षिप्त्वा विचक्षण इत्यपि पाठः । अतोऽन्यथा तु मध्येन इत्यपि पाठः । येषां शाखिनां वामहस्तान्वारभ्येन दक्षिणहस्तेन तर्पणं तेषां वामहस्तेन तिलग्रहणमित्यनुसन्धेयम् ।

अत्रापि विशेषस्तेनोक्तः ।

आवाह्य पूर्ववन्मन्त्रैरास्तीर्य च कुशान् शुभान् ।

प्रागग्रेषु सुरान् सर्व्वान्दक्षिणाग्रेषु वै पितॄन् ॥

देववद्दैवर्षीणामपि ।

कूर्म्मपुराणे ।

देवान् ब्रह्मर्षीश्चैव तर्पयेदुत्तरोदकैः† ।

पितॄभक्त्या तिलैः क्षौमैः स्वशाखोक्तविधानतः ॥

---

* कुशोपरि । † यावोदकैः ।

गोभिलः।

शुक्लैस्तु तर्पयेद्देवान्मनुष्यान् शबलै*स्तिलैः।
पितॄंस्तु तर्पयेत्कृष्णैस्तर्पयेत्सर्व्वदा द्विजः† ॥

तिलग्रहणे तु विशेषमाह मरीचिः।

मुक्तहस्तेन दातव्यं न मुद्रां तत्र दर्शयेत्।
वामहस्ते तिला ग्राह्या मुक्तहस्तस्तु दक्षिणः ॥

प्रदेशिन्यङ्गुष्ठाग्रसंयोगो मुद्रा। अतएव तर्ज्जन्याङ्गुष्ठेन वा तिला ग्राह्याः। तच्चोभयं दक्षिणहस्तस्थमेव। अतएव मुक्तहस्तेन दातव्यमित्युक्ता मुक्तहस्तस्तु दक्षिण इति पुनरभिहितं मरीचिना। एतच्च येषामञ्जलिना तर्पणं तद्विषयम्। विषयान्तरे‡ तु पूर्व्वमभिहितम्§।

तिलस्थापनस्थानन्तु स्मृत्यर्थसारे।

वामहस्ते तिलान् क्षिप्त्वा जलमध्ये तु तर्पयेत्।
स्थले शाद्यन्तने¶ पात्रे रोममूले न कुत्रचित् ॥

जलतर्पणे 'रोमरहितप्रदेशे वामपाणौ तिलान् संस्थाप्य मुद्रारहितदक्षिणतर्ज्जन्यङ्गुष्ठयोरन्यतरेण तिलान् गृहीत्वा वामहस्ततले स्थापयित्वा तर्पयेदित्यर्थः। वामबाहुसलिलसंस्थापनव्यतिरिक्तमन्यजलतर्पणेऽपि समानम्। एवमुक्तप्रकारेण

---

* नानावर्णयुक्तैः। † क्वचिदिति पाठान्तरम्। ‡ वामहस्तान्वारब्धदक्षिणहस्ततर्पणे। § येषां शाखिनां वामहस्तान्वारब्धदक्षिणहस्तेन तर्पणं तेषां वामहस्तेन तिलग्रहणमित्यभिहितमित्यर्थः। ¶ नवतृणयुक्ते।

स्थले स्थित्वा स्थले पात्रे वा तर्पणङ्कुर्यात् । न तु जल इति सिद्धम् ।

तथाच यदुक्तं कार्ष्णाजिनिना ।

देवतानां पितॄणाञ्च जले दद्याज्जलाञ्जलिम् ।

असंस्कृतप्रमीतानां जलस्थितस्येति वचनानां विरोधः परिहरणीयः ।

विष्णुस्तु स्थलस्थितस्यापि जलतर्पणं क्वचिदनुजानीते ।

यत्राशुचिस्थलं वा स्यादुदकं देवताः पितॄन् ।

तर्पयेत्तु यथाकाममप्सु सर्व्वमतिष्ठितम् ॥ इति ।

हारीतः ।

आर्द्रवासा जले कुर्य्यात्तर्पणाचमनं जपम् ।

अत्र च अमुकस्तृप्यतु तृप्यतामिति वा । अमुकं तर्पयामीति वा प्रयोगो भवति ।

तथाच योगियाज्ञवल्क्यः ।

तृप्यत्विति समुच्चार्य्य तृप्यतामित्यथापि वा ।

विधिज्ञः प्रक्षिपेत्तोयं देवादीनामयेषतः ॥

बौधायनः ।

अथ दक्षिणतः प्राचीनावीती पितॄन् स्वधा नमस्तर्पयामि पितामहानित्यादि ।

तथाच स्मृत्यर्थसारेऽपि ।

ब्रह्मादयो ये देवास्तान्देवांस्तर्पयामि भूर्देवांस्तर्पयामि भुवर्देवांस्तर्पयामि स्वर्देवांस्तर्पयामि । भूर्भुवःस्वर्देवां-

स्तर्पयामि । एवमृषीन् भूः पितॄनित्यादि ।

यमः ।

द्वौ हस्तौ युग्मतः कृत्वा पूरयेदुदकाञ्जलिम् ।
गोशृङ्गमात्रमुद्धृत्य जलमध्ये जलक्षिपेत् ॥

गोशृङ्गस्यानियतप्रमाणत्वात्* विवक्षितं प्रमाणमाह

दक्षः ।

प्रादेशमात्रमुद्धृत्य सलिलं प्राङ्मुखः सुरान् ।
उदङ्मनुष्यांस्तर्पयेत्† पितॄन् दक्षिणतस्तथा ॥
अग्रैस्तु तर्पयेद्देवान्मनुष्यान् कुशमध्यतः ।
पितॄंस्तु कुशमूलाग्रैर्विधिः कौशो यथाक्रमम् ॥

मरीचिः ।

विना रूप्यसुवर्णेन विना ताम्रतिलैस्तथा ।
विना मन्त्रैश्च दर्भैश्च पितॄणां नोपतिष्ठते ॥

नात्र रजतादिसमुच्चयो विवक्षितः ।

अतएव सत्यव्रतः ।

खड्गमौक्तिकहस्तेन कर्त्तव्यं पितृतर्पणम् ।
मणिकाञ्चनदर्भैर्वा न शुध्येन कदाचन ॥ इति ।

शुध्येन केवलेन खड्गादिरहितेनेति यावत् । अत्र वाशब्दोपादानान्न समुच्चय इत्यर्थः ।

---

* गवां क्षुद्रबृहद्भेदादिति शेषः । † उदङ्मनुष्यानिति सामगभिन्नविषयकं सामगानां पश्चिममुखेन मनुष्यतर्पणविधानात् । तथाच सामवेदीयषट्त्रिंशद्ब्राह्मणं मनुष्याणामेषा दिग्या प्रतीचीति ।

तथाच मरीचियोगियाज्ञवल्क्यावपि ।

तिलानामप्यभावे तु सुवर्णरजतान्वितम् ।

तदभावे निषिञ्चेत्तु दर्भैर्मन्त्रेण वा पुनः ॥ इति ।

अथ खड्गादिभिरशून्यो हस्तः कार्य्यो न तु खड्गादिपात्रस्वीकरणम्* । तथा सति एकैकमञ्जलिर्देवा इत्याद्यञ्जलिविधायकवाक्यबाधापत्तेः† । एवं तर्हि खड्गादिपात्रप्रशंसापराणां वाक्यानां विध्येकवाक्यतायाअभावादप्रामाण्यं स्यादिति चेन्नैवं अर्घ्यदाने खड्गपात्रविधायकवाक्येकवाक्यत्वेन प्रशंसावाक्यानां सार्थकत्वान्नाप्रामाण्यम् ।

यच्च मनुनाभिहितम् ।

राजतैर्भाजनैरेषामथवा रजतान्वितैः ।

वार्य्यपि श्रद्धया दत्तमक्षय्योपकल्पते ॥ इति ।

एतदपि श्राद्धप्रकरणपरिपठितत्वादर्घ्यदानविषयमेव । अतश्च तर्पणे खड्गादिमुद्रिकाभियुक्तो हस्तः कार्य्यः ।

तथाच याज्ञवल्क्यः ।

अनामिकाधृतं हेम तर्ज्जन्यां रूप्यमेव च ।

कनिष्ठिकाधृतङ्ताम्रं तेन पूतो भवेन्नरः ॥ इति ।

यच्च शङ्खेन तर्पणप्रकरण एवाभिहितम् ।

सौवर्णेन पात्रेण राजतेनोडुम्बरेण खड्गपात्रेणान्यपात्रेण वोदकं पितृतीर्थं स्पृशन्दद्यादिति ।

---

* खड्गादिपात्रेण तर्पणकरणमित्यर्थः । † तौ युतावञ्जलिः पुमानित्यमरोक्तेः करद्वयसम्पुटेन तर्पणं प्रतीयते ।

तदपि तर्पणप्रकरणादुत्कृष्टार्घ्यप्रकरणे योज्यमञ्जलिवाक्यापेक्षया प्रकरणस्य दुर्ब्बलत्वात्। अथवा वाक्यप्रकरणशिष्टाचाराणामविरोधाय यस्मिन् पात्रे धृते अञ्जलिः शिथिलो न भवेत्तादृक्पात्रे शिष्टेनाञ्जलिना पितृतीर्थस्थोदकं तर्पणेऽपि दद्यात्।

लिखितः।

प्राङ्मुखो यज्ञोपवीती प्राग्यैः कुशैर्देवतातर्पणं देवतीर्थेन कुर्य्यात्।

देवाश्च योगियाज्ञवल्क्येनोक्ताः।

ब्रह्माणं तर्पयेत्पूर्व्वं विष्णुं रुद्रम्प्रजापतिम्।
देवांश्छन्दांसि वेदांश्च ऋषींश्चैव सनातनान्॥
आचार्य्यांश्चैव गन्धर्व्वानाचार्य्यतनयांस्तथा।
संवत्सरं सावयवन्देवीश्चाप्सरसस्तथा॥

आचार्य्यान् व्यासादीन् सावयवमवयवा मासादयः।

यदा* देवानुगान्नागान् सागरान् पर्व्वतानपि।
सरितोऽथ मनुष्यांश्च यक्षान्रक्षांसि चैव हि॥
पिशाचांश्च सुपर्णांश्च भूतानथ पशूंस्तथा।
वनस्पतीनोषधीश्च भूतग्रामचतुर्व्विधम्†॥

विष्णुसमुच्चये।

ततः कृत्वा निवीतन्तु यज्ञसूत्रमतन्द्रितः।
प्राजापत्येन‡ तीर्थेन मनुष्यांस्तर्पयेत्पृथक्॥

---

* तथेति पाठान्तरम्। † पिशाची गुह्यकः सिद्धीभूतोऽमी देवयोनय इत्यमरोक्तः। भूतग्रामचतुर्विधमित्यनेन एतच्चतुर्विधं परिगृह्यते। ‡ कनिष्ठाङ्गुलिमूलदेशस्थेन।

कार्णाजिनिः ।

सनकश्च सनन्दश्च तृतीयश्च सनातनः ।
कपिलश्चासुरिश्चैव वोढुः पञ्चशिखस्तथा ।
एते ब्रह्मसुताः सप्त मनुष्याः परिकीर्त्तिताः ॥

ततः स्वस्वशाखानुसारेण मण्डलऋषीन्* प्राजापत्यादिकान् ऋषींश्च तर्पयित्वा पितृतर्पणमारभेत् ।

तत्र योगियाज्ञवल्क्यः ।

अपसव्यं ततः कृत्वा भूत्वा च पितृदिङ्मुखः† ।
पितॄन्दिव्यानदिव्यांश्च पितृतीर्थेन‡ तर्पयेत् ॥

दिव्या वस्वादयः । अदिव्याश्च पित्रादयः ।

ते च दिव्यास्तेनैव दर्शिताः ।

ध्रुवोऽध्रुवश्च सोमश्च आपश्चैवानिलोऽनलः ।
प्रत्यूषश्च प्रभासश्च वसवोऽष्टौ प्रकीर्त्तिताः ॥
अजैकपादहिर्ब्रध्नो विरूपाक्षोऽथ रैवतः ।
हरश्च बहुरूपश्च त्र्यम्बकश्च सुरेश्वरः ॥
सावित्रश्च जयन्तश्च पिनाकी चापराजितः ।
एते रुद्राः समाख्याता एकादश सुरोत्तमाः ॥
इन्द्रो धाता भगः पूषा मैत्रोऽथ वरुणो यमः ।

---

* ऋषिमण्डलान् मरीच्यादिसप्तर्षीनित्यर्थः । तथाच देवीपुराणे ग्रहगतिर्नामाध्यायः यथा सर्वेषाञ्च ग्रहाणाञ्च अधस्ताच्चरते रविः । रवेरधः स्थितः सोमः सोमान्नक्षत्रमण्डलम् । नक्षत्रेभ्योबुधसूर्द्धं बुधादूर्द्धन्तु भार्गवः । तस्मादङ्गारकस्योर्द्धं तस्य चोर्द्धं बृहस्पतिः । तस्मात् शनैश्चरस्योर्द्धं तस्योर्द्धमृषिमण्डलमित्यादि । † दक्षिणदिङ्मुखः । ‡ तर्जन्यङ्गुष्ठयोर्मध्यदेशरूपेण ।

अर्च्चिर्विवस्वान्त्वष्टा च सविता विष्णुरेव च।
एते वै द्वादशादित्या देवानां प्रवरा मताः॥

अत्र वस्वादितर्पणं पृथक् स्वपित्रादितर्पणञ्च पृथगुपात्तमिति वसुरूपं पितरं तर्पयामीत्येवं तर्पणम्।

स्मृत्यर्थसारे।

वसुरूपादित्यरूपान् श्राद्धार्थे तर्पयेत्पितॄन्।
नामगोत्रे समुच्चार्य्य तिलैस्तीर्थेषु संयताः॥ इति।

अथवा श्राद्धशब्दो गौण्या वृत्त्या तर्पणेऽपि वर्त्तत इति। वस्वादिनामसहितानामेव पित्रादीणां तर्पणमस्तु। यतः शिष्टाचार एवमेव प्रायशो दृश्यते।

उदकग्रहणे विशेषमाह योगियाज्ञवल्क्यः।

दक्षिणे पितृतीर्थेन जले सिञ्चेद्यथाविधि।
दक्षिणेनैव गृह्णीयात्पितृतीर्थेन संयतः॥

तथा।

सवर्णेभ्यो जलं देयं नासवर्णेभ्य एव च।
गोत्रनामस्वधाकारैस्तर्पयेदनुपूर्व्वशः॥ इति।

अनुपूर्व्वशः पित्रादिक्रमेण। अत्र यद्यपि असवर्णेभ्य इत्यत्र विशेषोपादानङ्कृतं तथाप्युत्तमवर्णेन हीनवर्णं प्रति न कार्य्यं हीनवर्णेनोत्तमवर्णोद्देशेन कृते न दोषः। यतस्तद्वर्णतापत्ति-दोषत्वेनाभिहिता स्मृतिषु। हीनस्योत्कृष्टत्वं* न दुष्टम्। उत्कृ-

* उत्कृष्टवर्णत्वेन तर्पणम।

ष्टम्य क्रौनत्वन्न दृष्टमेव। सवर्णशब्दो मुख्याभिषिक्तादिजातीनामु-
पलक्षणार्थम् यद्यप्यसवर्णमातृभ्रातृभ्रात्रादयोऽप्यसवर्णाः
तथापि तत्तर्पणद्वारा समन्त्रना तेषां मात्रादिममत्वप्रतिपाद-
नात्। पितृपत्न्यः सर्व्वा मातरस्तद्भ्रातरो मातुलास्तद्दुहितरश्च
भगिन्यस्तदपत्यानि भागिनेयानि इति। यत्र ममत्वोपादानं
तत्र मुख्यापेक्षया किञ्चिन्यूनता भवतीति। नात्र तत्राधान्य-
मपि स्वमन्त्रविहितसवर्णतर्पणानन्तरमेव तत्तर्पणमिति विवेकः।
ननु समन्त्रवचनेऽपि सवर्णानामेव† मातृत्वं मास्तु भवतु मा
नाम भूदसवर्णानामिति चेन्न तथा सति पितृपत्न्यः सर्व्वा
मातर इति न ब्रूयादुपात्तत्वात् सर्व्वशब्दो न पितृपत्नीवत्‡।
अतः सर्व्वशब्दासङ्कोचाय पृथक्तिलतर्पणमेव युक्तं पक्षे। एतेन
भीष्मतर्पणमपि तथा।

अग्निष्वात्ताः सोमपाश्च तथा बर्हिषदोऽपि च।
यदि स्याज्जीवत्पितृक एतान्विद्यात्तदा पितॄन्॥
येभ्यो वापि पिता दद्यात्तेभ्यो वापि प्रदापयेत्।
एतांश्चैव प्रमीतांश्च प्रमीतपितृको द्विजः॥ इति।

तथा।

न जीवत्पितृकः कुर्य्यात्तिलैस्तर्पणमाचरेत्।

उक्ततिलतर्पणस्य क्वचिदपवादो मरीचिनोक्तः।

सप्तम्यां रविवारे च गृहे जन्मदिने तथा॥

---

* सवर्णपितृपत्नीनामेवेत्यर्थः। † विहितश्चेत्यर्थः। ‡ पितृपत्नीमात्राणामित्यर्थः।

मृत्यपुत्रकलत्रार्थी न कुर्य्यात्तिलतर्पणम् ॥

तथा ।

पक्षयोरुभयो राजन् सप्तम्यां निशि सन्ध्ययोः ।
विद्यापुत्रकलत्रार्थी तिलान् पञ्चसु* वर्ज्जयेत् ॥
भानौ भौमे त्रयोदश्यां नन्दाभृगुमघासु च ।
पिण्डदानं मृदा स्नानं न कुर्य्यात्तिलतर्पणम् ॥

स्मृत्यर्थसारे ।

विवाहे चोपनयने चौले सति यथाक्रमम् ।
वर्षमर्द्धं तदर्द्धञ्च† नेत्येके तिलतर्पणम् ॥
तिथितीर्थविशेषेषु कार्य्यं प्रेतेऽथ सर्व्वदा ।
पिण्डान् सपिण्डा नो दद्युः प्रेतपिण्डं विनात्र तु ॥

अत्र विवाहादौ ।

पितृयज्ञे च यज्ञे च गयायां दद्युरेव ते ।
गयासाम्यं मृताहस्य केचिदाहुः पुराणगाः ॥

तथा ।

तीर्थे तिथिविशेषे च गयायां‡ प्रेतपक्षके ।
निषिद्धेऽपि दिने कुर्य्यात्तर्पणं तिलमिश्रितम् ॥
अकृत्वा तर्पणं यस्तु वस्त्रं निष्पीड़येन्नरः ।
निराशाः पितरो यान्ति शापं दत्त्वा सुदारुणम् ॥

---

* सप्तमीद्वयं निशा सन्ध्याद्वयमिति पञ्च । † विवाहे सति एकवर्षं तिलतर्पणं न कार्य्यम् उपनयने षण्मासं चूड़ायां त्रिमासमिति एकेषां मतम् । ‡ गङ्गायामिति देशान्तरीयः पाठः ।

पराशरः ।

द्वादश्यां पञ्चदश्याञ्च संक्रान्तौ श्राद्धवासरे ।
वस्त्रं निष्पीड्येन्नैव न च तारेण योजयेत् ॥

यमुः ।

एवं यः सर्व्वभूतानि तर्पयेदन्वहन्द्विजः ।
स गच्छेत्परमं स्थानं तेजोरूपमनामयम् ॥

इति तर्पणम् ।

अथ यमतर्पणम् ।

तत्र स्कन्दपुराणे ।

कृष्णपक्षचतुर्दश्यामङ्गारकदिनं यदा ।
तदा स्नात्वा शुभे तोये तर्पयेद्यमनामभिः ॥

तन्त्रमनुः ।

याङ्गाङ्गिरसमाप्य कृष्णपक्षे चतुर्दशीम ।
यमुनाञ्च विशेषेण नियतो नियतेन्द्रियः ॥
यमाय धर्म्मराजाय मृत्यवे चान्तकाय च ।
वैवस्वताय कालाय सर्व्वभूतक्षयाय च ॥
औडुम्बराय दध्नाय नीलाय परमेष्ठिने ।
वृकोदराय चित्राय चित्रगुप्ताय वै नमः ॥

इति तर्पयेदिति शेषः । यमाय नमः यमं तर्पयामीति प्रयोगः ।

गद्यव्यासोऽपि।

क्षणत्रयोदश्यां चतुर्दश्यां वा।

यमाय धर्म्मराजाय मृत्यवे चान्तकाय च।

वैवस्वताय कालाय सर्व्वभूतक्षयाय च॥ इति।

एभिः सप्तभिर्नमस्कारमन्त्रैः सप्तोदकाञ्जलीन्दद्यात्सर्व्वपापैः प्रमुच्यते। इति।

द्रुह्यमनुः।

एकैकस्य तिलैर्मिश्रांस्त्रींस्त्रीन् कुर्य्याज्जलाञ्जलीन्।

तथा।

दीपोत्सवचतुर्दश्यां कार्य्यञ्च यमतर्पणम्।

अपरोऽपि विशेषः स्कन्दपुराणे।

दक्षिणाभिमुखो भूत्वा तिलैः सव्यं समाहितः।

दैवतीर्थेन देवत्वात्तिलैः प्रेताधिपो यतः॥

इति यमतर्पणम्।

अथ देवतार्च्चनम्।

एवं तर्पणानन्तरं सूर्य्यार्घ्यं निवेद्य जलदेवं नमस्कृत्वाचम्याभ्युक्ष्य गृहङ्गत्वा विष्णादिपूजां कुर्य्यात्।

योगियाज्ञवल्क्यः।

ततः सूर्य्यमुपस्थाय सम्यगाचम्य च स्वयम्।

अभ्युक्षणं समादाय संयतात्मा गृहं व्रजेत्॥

तथाच नृसिंहपुराणे ।

ततोऽर्घ्यं भानवे दद्यात्तिलपुष्पजलान्वितम् ।
उत्थाप्य मूर्द्धपर्य्यन्तं हंसः शुचिषदुच्चरेत् ।
जलदेवं नमस्कृत्य ततो गच्छेद्गृहम्मुधः ।
पौरुषेण तु सूक्तेन ततो विष्णुं समर्च्चयेत् ॥ इति ।

हारीतः ।

कुर्व्वीत देवतापूजां जपयज्ञादनन्तरम् ।

जपयज्ञो ब्रह्मयज्ञः ।

मरीचिः ।

विधाय देवतापूजां प्रातर्होमादनन्तरम् ।
पूर्व्वाह्ण एव कुर्व्वीत देवतानाञ्च पूजनमिति ॥

अत्र पूर्व्वाह्णो देवतार्च्चने मुख्यः कालः ।

एवकारस्मरणान्माध्याह्निकानन्तरं कालोऽपि मुख्यसदृशः ।

तथा कूर्म्मपुराणे ।

पौरुषेण तु सूक्तेन ततो विष्णुं समर्च्चयेत् ।
वैश्वदेवं ततः कुर्य्याद्बलिकर्म्म तथैव च ॥ इति ।

तथा ।

कुर्व्वीत देवतापूजां जपयज्ञादनन्तरम् ।

करोति तदा पूर्व्वाह्ण एव । अथ तर्पणात्पूर्व्वकाले करोति

---

* हंसः शुचिषदसुरन्तरीक्ष सद्धोता वेदिषदतिथिर्दुरोणसत् नृषदवरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रिजा ऋतम् ।

तदा तर्पणानन्तरमेव। जलदेवतानमस्कारानन्तरं गृहं गत्वा विष्णुपूजायाः नृसिंहपुराणे विधानात्।

पूज्यदेवता निगमे दर्शिताः।

ब्रह्माणं विष्णुमीशानं सूर्य्यमग्निं गणाधिपम्।
दुर्गां सरस्वतीं लक्ष्मीं गौरीं वा नित्यमर्च्चयेत्॥

पद्मपुराणे।

आदित्यं गणनाथञ्च देवीं रुद्रं यथाक्रमम्।
नारायणं विशुद्धाख्यमन्ते च कुलदेवताम्॥

योगियाज्ञवल्क्याः।

देवानां सवनं कुर्याद्ब्रह्मादीनाममत्सरः॥
विष्णुर्ब्रह्मा च रुद्रश्च विष्णुर्देवो दिवाकरः।
तस्मात्पूज्यतमं नान्यमहं मन्ये जनार्द्दनात्॥
दद्यात्पुरुषसूक्तेन यः पुष्पान्यप एव वा।
अर्चितं स्याज्जगदिदं तेन सर्व्वं चराचरम्॥
अम्बुग्नौ हृदये सूर्य्ये स्थण्डिले प्रतिमासु च।
षट्स्वेतेषु हरेः सम्यगर्च्चनं मुनिभिः स्मृतम्॥
आनुष्टुभस्य सूक्तस्य त्रिष्टुभं तस्य देवता।
पुरुषो यो जगद्बीजमृषिर्नारायणः स्मृतः॥
प्रथमां विन्यसेद्यामे हितीयां दक्षिणे करे।
तृतीयां वामपादे तु चतुर्थीं दक्षिणे न्यसेत्॥
पञ्चमीं वामजानौ तु षष्ठीं वा दक्षिणे न्यसेत्।
सप्तमीं वामभागे तु अष्टमीं दक्षिणे न्यसेत्॥

नवमीं नाभिमध्ये तु दशमीं हृदये तथा ।
एकादशीं कण्ठदेशे वामबाहौ ततः परम् ॥
त्रयोदशीं दक्षिणे तु आस्यदेशे चतुर्दशीम् ।
अक्ष्णोः पञ्चदशीञ्चैव षोडशीं मूर्द्ध्नि विन्यसेत् ॥
एवं न्यासविधिं कृत्वा पश्चाद्योगो विधीयते ।
आद्यया वाहयेद्देवं कृत्वा तु पुरुषोत्तमम् ॥
द्वितीययासनं दद्यात्पाद्यं चैव तृतीयया ।
अर्घ्यञ्चतुर्थ्या दातव्यः पञ्चम्याचमनीयकम् ॥
षष्ठ्या स्नानं* प्रदातव्यं सप्तम्या वस्त्रमेव च ।
यज्ञोपवीतमष्टम्या नवम्या चन्दनेपनम् ॥
पुष्पं दशम्या दातव्यं एकादश्या तु धूपकम् ।
द्वादश्या दीपकं दद्यात्त्रयोदश्या निवेदनम्† ॥
चतुर्दश्या नमस्कारं पञ्चदश्या प्रदक्षिणम् ।
अर्चयित्वा तु देवेशं षोडश्या‡ तु विसर्जयेत् ।
स्नाने वस्त्रे च नैवेद्ये दद्यादाचमनीयकम्§ ॥ इति ।

एवमितरेषामपि ब्रह्मादीनां पूजनं कार्यं तत्तत्प्रकारैर्वैदिकै-र्मन्त्रैः । तदशक्तौ¶ तन्नामचतुर्थ्यन्तैर्नमोऽन्तैः‖ पूजयेत् । अथवा वेदाविरुद्धस्वदीक्षानुसारेण** वा देवतार्चनम् ।

इति देवतार्चनम् ।

---

* स्नानार्थं जलम् । † निवेदनं निवेदनीयद्रव्यं नैवेद्यमिति यावत् । ‡ षोडश्या इत्यनया ऋचा इति शेषः । § स्नानीयं जलं दत्त्वा आचमनीयं जलं दद्यात् एवं वस्त्रादि दत्त्वापि । ¶ वैदिकमन्त्राज्ञाने । ‖ ओं ब्रह्मणे नम इत्यादिमन्त्रैरित्यर्थः । ** तन्त्रोक्त-मन्त्रानुसारेण ।

अथ पूजोपयुक्तपुष्पाणि ।

तत्र नृसिंहपुराणे ।

पुष्पैररण्यसम्भूतैः पत्रैर्वा वारिसम्भवैः ।
अपर्य्युषितनिच्छिद्रैः प्रोषितैः*र्जन्तुवर्जितैः ।
आत्मारामोद्भवैर्वापि पुष्पैः सम्पूजयेद्धरिम् ॥

हरिरित्युपलक्षणम् ।

शमीपुष्पं विल्वपुष्पं चम्पकं तगरन्तथा ।
करवीरं तथा श्वेतं पालाशं कुशपुष्पकम् ॥
वनमालाप्यशोकञ्च सेवन्ती कुब्जमालती ।
त्रिसन्ध्यञ्च तथा श्वेतं कुन्दञ्च शतपत्रकम् ।
मल्लिका चैव जाती च सर्व्वपुष्पाद्विशिष्यते ॥
जातीपुष्पसहस्रेण यच्छेन्माल्यं सुशोभनम् ।
विष्णवे विधिवद्भक्त्या तस्य पुण्यफलं शृणु ॥
कल्पकोटिसहस्राणि कल्पकोटिशतानि च ।
वसेद्विष्णुपुरे श्रीमान्विष्णुतुल्यपराक्रमः ॥

पत्राण्यपि ।

अपामार्गं भृङ्गराजं शमीपत्रञ्च खादिरम् ।
दूर्व्वां च कुशपत्रञ्च दमनं मरुवकन्तथा ॥
ततः श्रेष्ठं विल्वपत्रं ततस्तु तुलसी वरा ।

---

* प्रस्फुटितैः ।

एतेषाञ्च यथालाभं पत्रैर्यस्तार्च्चयेद्धरिम् ।
सर्व्वपापविनिर्मुक्तो विष्णुलोके महीयते ॥
येषां न सन्ति पुष्पाणि प्रशस्तान्यर्च्चने हरेः ।
पल्लवान्यपि तेषां स्युः प्रशस्तान्यर्च्चविधौ हरेः ॥
वीरुधानामभावे तु वर्हिषा चार्च्चयेद्धरिम् ।
सर्व्वपापविनिर्मुक्तो विष्णुलोके महीयते ॥
अपराधसहस्राणि अपराधशतानि च ।
पद्मेनैकेन देवेशमभ्यर्च्च्य कमलापतिम् ।
वर्षायुतसहस्रस्य पापस्य कुरुते क्षयम् ॥
अगस्त्यवृक्षसम्भूतैः कुसुमैरमितैः सितैः ।
येऽर्च्चयन्ति च देवेशं ते प्राप्नुवन्ति परमं पदम् ॥
सुवर्णकेतकीपत्रं यो ददाति जनार्द्दने ।
कोटिजन्मार्ज्जितं पापं दहते गरुड़ध्वजः ॥
सकृत्कदम्बपुष्पेण हेलया हरिरर्च्चितः ।
सप्तजन्मानि देवर्षे तस्य लक्ष्मीर्न दूरगा ॥
कुम्भीपुष्पन्तु देवर्षे यः प्रयच्छति केशवे ।
सुवर्णपलमात्रन्तु पुष्पे पुष्पे भवेन्मुने ॥

गरुड़पुराणे ।

धात्रीफलेन यत्पुण्यं जयन्त्याः समुपोषणे ।
खगेन्द्र स लभेन्मर्त्यस्तुलसीपूजनेन तत् ॥

---

* लतापुष्पाणाम् ।

यथाकथञ्चिदाहृत्य कुसुमैः पूजयेद्धरिम्।
नाकपृष्ठमवाप्नोति नात्र कार्य्या विचारणा॥

स्कन्दपुराणे।

विष्णुमूर्द्ध्नि स्थितं पुष्पं शिरसा यो वहेन्नरः।
अपर्य्युषितपापः* स्याद्यावद्युगचतुष्टयम्॥
पुष्पाभावेऽथ पत्राणि देयानि च सुरार्च्चने।
पत्राभावे पयो देयं तेन पुण्यश्रुतेः ध्रुवम्।

वर्ज्यानि च विष्णुधर्म्मे अभिहितानि।

उग्रगन्धीन्यगन्धीनि कुसुमानि न दापयेत्।
अन्यायतनजातानि कीटकानि† तथैव च॥
रक्तान्यकालजातानि चैत्यवृक्षोद्भवानि च।
श्मशानजातपुष्पानां दानं देवे विवर्ज्जयेत्॥
क्रकराख्यस्य पुष्पाणि तथान्धकरकस्य च।
क्षणञ्च कूटजं चार्कं नैव देयं जनार्द्दने॥

क्रकरः करीरः‡।

प्राक्षलञ्च शिरीषञ्च वृहतीं गिरिमल्लिकाम्।
सर्ज्जकञ्चैव कुष्माण्डं काञ्चनारिञ्च वर्ज्जयेत्॥

अथ शिवे वर्ज्यानि प्रासाददीपिकायाम्।

जवाबन्धूकसिन्दूरं तथा त्रैसन्ध्यकीयुते।
दमनी केतकी यूथी मालती कुटजानि च॥

---

* अक्षयपापः स्यादित्यर्थः। † कीटविद्धानि। ‡ कण्टकवृक्षः।

घुसृणञ्च* खमारभ्य प्रमादेनापि नार्पयेत् ।
वर्व्वरी सर्ज्जपत्री च तथा च कुमुद्द्वयम् ॥
अतिपक्वान्यपक्वानि पतितानि विवर्जयेत् ।
आरण्यान्यप्यगन्धीनि सकीटं चोपगन्धि यत् ॥
अशुद्धपात्रपाणिभ्यां वामाभिः कुत्सितात्मभिः ।
आनीतं नार्पयेच्छम्भौ प्रमादादपि दीपकृत् ॥

देवीपुराणे ।

शिवे विवर्ज्जयेत्कुन्दमुन्मत्तञ्च हरेः सदा ।
देवीनाञ्चार्कमन्दारौ आदित्ये तगरं तथा ॥

विष्णुरहस्ये ।

न शुक्लैः पूजयेद्विष्णुं कुसुमैर्न महीगतैः† ।
न विशीर्णदलैर्मुक्तैर्न वा चासुरिकान्वितैः ॥

आसुरिकान्वितैः बलादिकान्वितैः ।

तथा ।

जलं पर्य्युषितन्त्याज्यं पत्राणि कुसुमानि च ।
तुलस्यगस्त्यविल्वानि‡ गाङ्गं वारि न दुष्यति§ ॥
स्नानं कृत्वा तु यः कश्चित्पुष्पं वै चिनुते द्विजः ।
देवतास्तन्न गृह्णन्ति भस्मीभवति दारुवत् ॥

एतच्च मध्यन्दिनस्नानोत्तरपरं वेदितव्यम् ।

---

* कुङ्कुमम् । † सर्व्वं भूमिगतं दुष्टं शिफालीं वकुलं विनेति शिष्टपरिगृहीतवचनात् एतद्व्यतिरिक्तं दुष्टम् । ‡ अगस्त्यपुष्पं वकपुष्पम् । § न पर्य्युषितं भवति ।

अथ नित्यश्राद्ध-पञ्चमहायज्ञानां स्वरूपाणि।

तत्र यमः।

पञ्चसूना गृहस्थस्य वर्त्तन्ते वहवः सदा।
कण्डनी पेषणी चुल्ली जलकुम्भ उपस्करः॥
एता निवाहयेद्विप्रो वध्यते वै मुहुर्मुहुः।
एतासां पावनार्थाय पञ्चयज्ञाः प्रकीर्त्तिताः॥

सूना हिंसास्थानं कण्डन्युदूखलादि पेषणी दृषदादि चुल्ली पाकस्थानं जलकुम्भ उदाधानमुपस्करः शूर्पादि। वध्यते पापेन युज्यते इत्यर्थः। न च कण्डन्यादिनिमित्तश्रवणान्नैमित्तिकत्वं पञ्चमहायज्ञानां पञ्चयज्ञविधानन्तु गृही नित्यं न हापयेदिति शङ्खेन नित्यत्वाभिधानात्।

ते च यज्ञाः के इत्याकाङ्क्षायां यमः।

ब्रह्मयज्ञो देवयज्ञः पितृयज्ञस्तथैव च।
भूतयज्ञो नृयज्ञस्तु पञ्चयज्ञाः प्रकीर्त्तिताः॥

एतच्च लक्षणमाह मनुः।

अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम्।
होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम्॥

अध्यापनमध्ययनं तर्पणं पितृश्राद्धमिति यावत्।

यतः स एवाह।

स्वाध्यायेनार्चयेदृषीन् होमैर्देवान्यथाविधि।
पितॄन् श्राद्धेन नृनन्नै*र्भूतानि बलिकर्म्मणा॥ इति।

---

* तृप्त्यैर्दै इति पाठान्तरम्।

पितृयज्ञे विकल्पमाह कात्यायनः ।

श्राद्धं वा पितृयज्ञः स्यात्पिण्डो बलिरथापि वेति ।

नित्यश्राद्धं वा पितृयज्ञः । अथवा वैश्वदेवमध्ये पितृभ्यः स्वधास्त्विति यो बलिर्दीयते स पितृयज्ञ इत्यर्थः । बह्वृचां मते देवपितृभूतमनुष्यब्रह्मयज्ञाः पञ्च महायज्ञा आधानवत्कार एव वैश्वदेविकं बलिकर्म चेत्याहुः । अथवा पृथगिति ।

बौधायनोऽपि ।

अग्नये स्वाहा इत्यादि षडाहुतीः एष वैश्वदेवः सन्तिष्ठते । धर्माय स्वाहेत्यादि नमो रुद्राय नमः पशुपतये इत्यादिभिर्बलिहरणं बलवान् हरत्येतत् सन्तिष्ठते । देवेभ्यः स्वाहेत्यग्नौ जुहोत्येष देवयज्ञः सन्तिष्ठते । पितॄनुद्दिश्य एकं ब्राह्मणं भोजयेदपि वा दक्षिणेनाग्निं दक्षिणान्दर्भान् संस्तीर्य तेषु पिण्डं ददाति पितृभ्यः स्वधास्त्वित्यपि वा आपस्तत्पितृयज्ञः सन्तिष्ठते । उत्तरेणाग्निं शुचौ देशे प्रागग्रान्दर्भान् संस्तीर्य गन्धपुष्पधूपदीपैरलङ्कृत्य बलिमुपहरति भूतेभ्यो नम इति भूतेभ्यः तद्भूतयज्ञः सन्तिष्ठते । मनुष्ययज्ञार्थमतिथिं भोजयेदपि वा हन्तकारं* ब्राह्मणेभ्यो ददाति मनुष्येभ्यो हन्तेति । हन्तकारः पर्य्याप्तान्नदानसमर्थश्च ।

कार्ष्णाजिनिः ।

---

* मनुष्येभ्यो यद्दीयते तद्धन्तकारेण दीयते हन्तकारस्त्यागार्थकः ।

भिक्षां वा पुष्कलं वापि हन्तकारमथापि वा ।

पुष्कलमग्रिममिति पर्य्यायः ।

भिक्षादिलक्षणञ्च मनुनाभिहितम् ।

ग्रासमात्रं भवेद्भिक्षा अग्रं ग्रासचतुष्टयम् ।

अग्रं चतुर्गुणीकृत्य हन्तकारो विधीयते ॥ इति ।

आपस्तम्बपरिशिष्टेऽपि ।

वैश्वदेवबलिहरणानन्तरमग्रं दत्त्वा देवयज्ञार्थमुद्धृतान्ना-
देवताभ्यः स्वाहेत्येकाहुतिमन्तौ जुहुयुः पितृयज्ञार्थमपि
वैश्वदेवबलिहरणशिष्टादन्नाद्प्राचीनावीतिना दक्षि-
णतोऽग्नेः पितृतीर्थेन पितृभ्यः स्वधास्त्विति बलिं हरेयु-
र्भूतयज्ञार्थं वैश्वदेवशिष्टान्ना*देवोत्तरतोऽग्नेर्दैवतीर्थेन
बलिं दद्युरिति ।

एवंविधान्यन्यान्यपि विरुद्धवचनानि† ग्रन्थगौरवभयान्न लिखि-
तानि । अत्र च‡ सर्व्वत्र स्वशाखाभ्यः§ व्यवस्था ।

इति पञ्चयज्ञस्वरूपनिर्णयः ।

अथ नित्यश्राद्धम् ।

मनुना दद्यादहरहः श्राद्धमिति नित्यश्राद्धं विधाय वैश्व-
देवस्य सिद्धस्य गृह्याग्नौ विधिपूर्व्वकमित्यादिना पश्चाद्वैश्व-

---

* वैश्वदेवावशिष्टादन्नादित्यर्थः । † विरुद्धवचनेषु चेत्यर्थः । ‡ स्वस्वशाखानुसारेणेत्यर्थः ।

देवविधानात्। प्रथमं नित्यश्राद्धं पश्चाद्वैश्वदेव इति केचित्। अत्रापि पक्षे येषान्तु नित्यश्राद्धमेव पञ्चयज्ञान्तःपाति तेषां स्वशाखानुसारेण क्रमः केचन वैश्वदेवादनन्तरं कुर्व्वन्ति।

पाठक्रममनादृत्य श्राद्धविषये

मार्कण्डेयपुराणे।

कुर्य्यादहरहः श्राद्धमन्नाद्येनोदकेन वा।
पितॄनुद्दिश्य विप्रांस्तु भोजयेदिप्रमेव च॥ इति।

अत्र विशेषमाह प्रचेताः।

नामन्त्रणं न होमश्च नावाहनविसर्জ্জনে।
न पिण्डदानं न सुरान्नित्ये कुर्य्याद्विजोत्तमः॥
उपवेश्यासनं दत्त्वा सम्पूज्य कुसुमादिभिः।
निर्दिश्य भोजयित्वा तु किञ्चिद्दत्त्वा विसर्জयेत्॥

न सुरान्न वैश्वदेवान् किञ्चिद्दत्त्वा इति दक्षिणार्थम्।

व्यासः।

नावाहनं स्वधाकारः पिण्डाग्नौकरणादिकम्।
ब्रह्मचर्य्यादि नियमो वैश्वदेवास्तथैव च॥

तथा।

तत्तु षट्पुरुषं ज्ञेयं दक्षिणापिण्डवर्জ্জितम्।

मत्स्यपुराणे।

यद्येकं भोजयेद्विप्रन्त्रीनुद्दिश्य पितॄंस्तथा। इति।

त्रीनिति मातामहादीनामपि प्रदर्शनार्थम्।

तत्र कात्यायनोऽनुकल्पमाह।

एकमप्याशयेद्विप्रं पित्र्ययज्ञार्थसिद्धये*।
अदैवं नास्ति वेदेभ्यो† भोक्तुं भोज्यमथापि वा॥
अभ्युद्धृत्य यथाशक्ति किञ्चिदन्नं यथाविधि।
पित्रभ्य इदमित्युक्त्वा स्वधाकारमुदाहरेत्॥

एतदुद्धृतान्नं ब्राह्मणायैव दद्यात्तदभावे गोभ्यः।

तथाच कूर्म्मपुराणे।

उद्धृत्य वा यथाशक्ति किञ्चिदन्नं समाहितः।
वेदतत्त्वार्थविदुषे द्विजायैवोपपादयेत्॥

तथा।

सर्व्वेषामप्यलाभे तु दत्तं गोभ्यो निवेदयेत्। इति।

यदा गवामप्यभावस्तदा विष्णूक्तम्।

दद्यादहरहः श्राद्धमन्नाद्येनोदकेन वा।

अन्नाद्येनोदकेन श्राद्धोत्सृष्टेनोदकेन।

पयोमूलफलैर्व्वापि पितॄणां प्रीतिमावहन्॥ इति।

पयः क्षीरम्। एतच्च नित्यश्राद्धं श्राद्धान्तरे नियतम्‡।

तथाच मार्कण्डेयः।

नित्यक्रियां पितॄणान्तु केचिदिच्छन्ति मानवाः।
न पितॄणां तथैवान्ये शेषं पूर्व्ववदाचरेत्॥ इति।

नित्यक्रिया नित्यश्राद्धं शेषं वैश्वदेवादिकम्।

अत्रैवं व्यवस्था यत्रामावास्यानान्दीमुखश्राद्धादिनित्यश्राद्धदेवता

---

* नित्यश्राद्धसिद्धये इत्यर्थः। † वैश्वदेवेभ्यः। ‡ श्राद्धान्तरे कृतेऽपि अवश्यं कर्त्तव्यम्।

दृष्टा भवन्ति न तत्र नित्यश्राद्धं यत्र च सांवत्सरिकादिषु नष्टा नित्यश्राद्धदेवतास्तत्र कर्त्तव्यमिति ।

तथाच चमत्कारखण्डे ।

नित्यश्राद्धं न कुर्व्वीत प्रमत्तोऽपि यत्र सिध्यति ।
श्राद्धान्तरात्तदान्यत्र नित्यत्वात्तत्र हापयेत्* ॥

इति नित्यश्राद्धविधिः ।

अथ वैश्वदेवविधिः ।

तत्र प्रथमोपक्रमे आपस्तम्बः ।

तेषां मन्त्राणामुपयोगं ब्राह्मणाद्गृह्यमन्त्रयोरधीत्य ब्रह्मचर्य्यं क्षारलवणवर्জ্জनं चोत्तमस्यैकरात्रमुपवास इति ।

तेषां वैश्वदेवशब्दार्थमन्त्राणामुपयोगः प्रथमोपक्रमः । उत्तमस्य ये भूताः प्रचरन्तीत्यस्य मन्त्रस्य† उपयोग एकरात्रमुपवास इति प्रतिवचनमिति । ततो वैश्वदेवादिकं कर्म्म कुर्य्यात् । एतच्च सायं प्रातः ।

तथाच कात्यायनः ।

सायं प्रातर्वैश्वदेवः कर्त्तव्यो बलिकर्म्म च ।
अनश्नतापि सततमन्यथा किल्बिषी भवेत् ॥

---

* न त्यजेत् । † ये भूताः प्रचरन्ति दिवा बलिमिच्छन्तो वितुदस्य प्रेषाः तेभ्यो बलिं पुष्टिकामो ददामि मयि पुष्टिं पुष्टिपतिर्ददातु इति मन्त्रः ।

एतेन पुरुषार्थमुक्तं भवति वैश्वदेवस्य।

अतएव परिशिष्टे प्रवासस्थितस्याप्यवश्यकर्त्तव्यता दर्शिता।

प्रवसेदाहिताग्निश्चेत्कदाचित्कालपर्य्ययात्*।

यस्मिन्नग्नौ भवेत्पाको वैश्वदेवस्तु तत्र वै॥

मनुरपि पुरुषार्थत्वमेवाह।

वैश्वदेवे तु निर्वृत्ते यद्यन्योऽतिथिरा व्रजेत्।

तस्याप्यन्नं यथाशक्ति प्रदद्यान्न बलिं हरेत्॥

वैश्वदेवानन्तरमतिथिपूजायां कृतायां द्वितीयोऽतिथिर्यदा-गच्छति अन्नञ्च पक्वं नास्ति तदा पुनः पाकं कृत्वा तस्मै दद्यान्न बलिं हरेत्। वैश्वदेवं न कुर्य्यादित्यर्थः। यद्यन्नसंस्कारार्थत्वं वैश्वदेवस्य तदा पुनःकरणे निषेधो युज्यते इति तात्पर्य्यम्। केचनान्नसंस्कारत्वं पुरुषार्थत्वञ्चेत्युभयार्थमिच्छन्ति। अस्मिन् पक्षे उभयात्मकस्य आग्नेयीतिसंज्ञा नान्यपूर्व्वविषयाणि द्रव्य-संस्कारकारीणि च कर्म्मास्विष्टिकृदुत्तमप्रयाजादीनि नान्या-न्यपि संज्ञकानीति व्यवहरन्ति मीमांसकाः एतच्च लौकिके विवाहाग्न्यादिषु कुर्व्वीत।

तथाच याज्ञवल्क्यः।

स्मार्त्तं कर्म्म विवाहाग्नौ कुर्व्वीत प्रत्यहं गृही।

दायकालाहृते† वापि श्रौतं वैतानिकाग्निषु॥

---

* कालदोषेण संस्कृताग्न्यलाभात्। † विभागकालाहृते इति मिताक्षरा। आहृते आरब्धे।

प्रातातपः ।

लौकिके वैदिके वापि हुतोच्छिष्टे जले क्षितौ* ।

इत्याहृत्य उत्सृज्य जुहुयात् लौकिकाग्नेः पात्रान्तरकरण-माहरणं स्मार्त्ताग्नेस्तु अग्न्युद्दीपनमाहरणमुन्मज्जनं भस्मापकरणम् ।

विवाहिकेऽग्नौ कुर्व्वीत गृह्यकर्म्म यथाविधि ।

पञ्चयज्ञविधानन्तु पङ्क्तिं चान्वाहिकीं† गृही ॥

अत्र विशेषयत्तुर्विंशतिमते ।

प्रतिहोमन्तु निर्व्वर्त्य समुद्धृत्य हुताशनम् ।

शेषं महानसे क्षिप्त्वा तत्र पाकं समाचरेत् ।

समुद्धृत एव शेषः तं महानसे क्षिप्त्वेत्यर्थः ।

यस्मिन्नग्नौ पाकस्तत्रैव होमः ।

तथाच कूर्म्मपुराणे ।

यदि स्याल्लौकिके पाकस्ततोऽन्नं तत्र हूयते ।

शालाग्नौ तत्र चेदन्नं विधिरेष सनातनः ॥ इति ।

एतदनुसारेणान्यान्यपि वचनानि व्यवस्थापनीयानि ।

स होमः कथमित्याङ्क्षायाम्

शौनकः ।

सायम्प्रातः सिद्धस्य हविष्यस्य जुहुयादग्निहोत्रं देवताभ्यः

---

* अपराह्णमन्यत्र दृश्यते यथा वैश्वदेवं प्रकुर्व्वीत स्नानादीपापशान्तये । † प्रतिदिनकरणीयाम् ।

सोमाय वनस्पतये अग्नीषोमाभ्यामिन्द्राग्निभ्यान्यावा-
पृथिवी धन्वन्तरये इन्द्राय विश्वेभ्यो देवेभ्यो ब्रह्मणे
स्वाहेति ।

हवष्यं हविषे योग्यम् । अग्निहोत्रदेवताः सूर्याग्निप्रजापतयः ।

आपस्तम्बः ।

उपासने पाचने* वा षड्भिराद्यैः प्रतिमन्त्रं हस्तेन
जुहुयादुभयतः परिषेचनं यथा पुरस्तादिति ।

आद्यैः अग्नये स्वाहेत्यादिभिः स्विष्टिकृदन्तैः उभयतः परिषेचनं कर्मादावन्ते च ।

कात्यायनः ।

वैश्वदेवादन्नात्पर्युक्ष्य स्वाहाकारैर्जुहुयाद्ब्रह्मणे प्रजापतये
गृह्याभ्यः कश्यपायानुमतय इति ।

गोतमः ।

अग्नावग्निर्धन्वन्तरिर्विश्वेदेवाः । प्रजापतिः स्विष्टिकृत्
इति होमः इति ।

अत्र व्यवस्थामाह श्लोकैः कात्यायनः ।

उद्धृतं हविरासिच्य हविष्येण घृतादिना ।
स्वशाखाविधिना हुत्वा तच्छेषेण बलिं हरेत् ॥

इति हविष्येण घृतादिना उद्धृतं हविरासिच्य तेन हविषा जुहुयादित्यर्थः । घृताभावे दध्यभ्यक्तं† हविर्जुहुयात् ।

---

* पाके । † दधिमिश्रितम् ।

तथाच व्यासः ।

जुहुयात्सर्पिषाभ्यक्तं तैलचारविवर्ज्जितम् ।

दध्यक्तं पयसाभ्यक्तं तद्भावेऽम्भसापि वा ॥ इति ।

हविष्याभावे चतुर्विंशतिमते विशेषो दर्शितः ।

अलाभे येन केनापि फलशाकोदकादिभिः ।

पयोदधिघृतैः कुर्य्याद्देवं युवेण तु ।

हस्तेनान्नादिभिः कुर्य्यादङ्गिरञ्जलिना जले ॥ इति ।

अत्रापरो विशेषः

परिशिष्टे ।

शाकं वा यदि वा पत्रं मूलं वा यदि वा फलम् ।

संकल्पयेद्यदाहारे तेनाग्नौ जुहुयादपि ॥

पयःप्रभृतिरसद्रव्याणान्तु विशेषोऽभिहितः

परिशिष्टे ।

उत्तानेन तु हस्तेन अङ्गुष्ठाग्रेण पीड़ितम् ।

संहताङ्गुलिपाणिस्तु वाग्यतो जुहुयाद्धविः ॥ इति ।

हविष्येष्वपि मुख्यहव्यमाह

कात्यायनः ।

हविष्ये तु यवा मुख्यास्तदनु व्रीहयः स्मृताः ।

माषकोद्रवगौरादीन् सर्व्वालाभेऽपि वर्ज्जयेत् ॥

गौराः गौरसर्षपाः ।

आपस्तम्बः ।

न चारलवणैर्होमो विद्यते तथा परान्नसंसृष्टहोम-

उदीचीन*मुष्णं भस्मापोह्यास्मिन् जुहुयाद्धुतमहुताघ्नी भवती। क्षारलवणपरान्नसंसृष्टेन हविष्येणाग्नौ होमो न कार्य्यः। अपितूष्णं भस्माग्न्यायतनादुत्तरतोऽपोह्यास्मिन् होतव्यम्।

उष्णं भस्मेति अङ्गारमिश्रितं भस्मेत्यर्थः।

अतएव बौधायनः।

अङ्गारान् भस्ममिश्रांस्तु उद्धृत्योत्तरतोऽनलात्।
जुहुयादैश्वदेवं तु यदि क्षारादिमिश्रितम्† ॥ इति।

तथा।

परोक्षमन्त्रमसंस्कृत‡मग्नावधिश्रित्याद्भिः प्रोक्षेत्तदेव पवित्रमित्याचक्षत इति। अधिश्रयणं पुनरग्नेरुपरिस्थापनमात्रमन्त्रसहितस्य वैश्वदेवपात्रस्य अधिश्रित्य संस्कृतं कृत्वा प्रोक्षेदित्यन्वयः। तच्च सायं प्रातः कर्त्तव्यमित्युक्तं तच्च प्रातरुपक्रमः सायमपवर्गः। यदा सायं मन्त्रकर्म्मकर्त्तृणामभावस्तदा पत्नी सायममन्त्रकं बलिं हरेत्।

तथाच मनुः।

सायमन्नस्य सिद्धस्य पत्नीमन्त्रबलिं हरेत्।
वैश्वदेवं हि नामैतत्सायं प्रातर्विधीयते ॥ इति।

---

* उत्तरदिग्विभागभवम्। † बहुषु पुस्तकेषु दर्शनादेव रचितः परन्तु यद्यत्क्षारादिमिश्रितमित्येव पाठः साधुः। ‡ संस्कृतमिति क्वचित्पाठः।

अत्र वैश्वदेवं हि नामैतदित्येतत्पर्य्यन्तमेकं वाक्यं सायम्प्रातर्विधीयते इत्येतदपरं वैश्वदेवस्य कालद्वयेऽपि कर्त्तव्यताविधायकम्। अतः सायमेव पत्न्या बलिहरणरूपवैश्वदेवकर्म्माधिकारः। केचन बलिग्रहणं वैश्वदेवस्याप्युपलक्षणार्थमिति वर्णयन्ति।

एवं कृतवैश्वदेवस्य बहिर्बलिमाह मनुः।

शुनाञ्च पतितानाञ्च श्वपचां पापरोगिणाम्।
वायसानां कृमीणाञ्च शनकैर्निर्वपेद्भुवि॥

अत्र मन्त्रः।

ये भूताः प्रचरन्ति दिवा नक्तं बलिमिच्छन्तो विदुरदस्य प्रेष्ठाः* तेभ्यो बलिं पुष्टिकामोहरामि मयि पुष्टिं पुष्टिपतिर्दधातु।

अत्र दिवेति दिने नक्तमिति रात्रौ दिवाचारिभ्य इति दिवा नक्तंचारिभ्य इति नक्तमित्याश्वलायनस्मरणात्। एतच्च वैश्वदेवाख्यं कर्म्म दिवा हिस्तथा रात्रावपि हिर्न तु कर्त्तव्यम्।

धर्म्मविन्नाचरेत्स्नानमाह्निकन्तु पुनः पुनः।
तर्पणं ब्रह्मयज्ञञ्च वैश्वदेवं चरेदिति॥

विष्णुपुराणेऽभिधानाद्वैश्वदेवबलिहृतौ सायं प्रातः पञ्चयज्ञास्तु दिवैव।

---

* प्रेष्ठा इति पाठान्तरम्।

यथाह यमदग्निः ।

वैश्वदेवं तथा रात्रौ कुर्य्याद्बलिहृतिं तथा ।

महतः पञ्चयज्ञांस्तु दिवैवेत्याह धर्म्मविदिति ॥

येषान्तु शाखिनां ब्रह्मयज्ञव्यतिरिक्तान्यमहायज्ञानां वैश्वदेवबलिहृतौ चान्तर्भावः तेषां दिवैव वैश्वदेवाख्यं कर्म्म न रात्रौ यदि स्वशाखायां कालद्वयेऽपि विधानं नास्ति अथास्ति तदा द्विरपि भवति निर्णयः द्विविधं हि वैश्वदेवादिकं कर्म्म एकं मन्वादिस्मृत्युक्तसाधारणमपरं स्वस्वगृह्योक्तसाधारणं स्वशाखाऽविरुद्धं सर्व्वैरपि कार्य्यं कर्म्मणः सर्व्वशाखाधिकरणन्यायेनैकत्वात् । अत्राशक्तश्चेत् स्वस्वगृह्योक्तमेव तावता शास्त्रार्थस्य निष्पन्नत्वात् । एतच्च संसृष्टिनां मध्ये ज्येष्ठ एव कुर्य्यात् । तदशक्त्यादिना तदनुज्ञयेतरस्यापि कर्त्तृत्वमस्ति ।

अनग्निकस्य विशेषमाह

वशिष्ठः ।

अनग्निकस्तु यो विप्रः सोऽन्नं व्याहृतिभिः स्वयम् ।

हुत्वा शाकलमन्त्रैस्तु मिष्टान्नृतबलिं हरेत् ॥

अनग्निकः श्रौतस्मार्त्ताग्निरहितः । यदा वैश्वदेवादर्व्वाक् भिक्षुरागच्छति तदा वैश्वदेवार्थमन्नमुद्धृत्य वैश्वदेवार्थं भिक्षां दत्त्वा विसर्ज्जयेत् । भिक्षुका अपि तेनैव दर्शिताः ।

ब्रह्मचारी यतिश्चैव विद्यार्थी गुरुपोषकः ।

अध्वगः क्षीणवृत्तिश्च षडेते भिक्षुकाः स्मृताः ॥

इति वैश्वदेवविधिः ।

अथ वैश्वदेवपाकनिर्णयः ।

तत्र नित्यश्राद्धस्य वैश्वदेवस्य चैक एव पाकः नित्यश्राद्धे नित्यं विशेषाभावात् न च श्राद्धेष्वेकपाकग्रहणमेव नास्ति। अशौचमध्ये वैश्वदेवनिषेधादेकादशाहादिकश्राद्धे तु पृथक् पाकः श्राद्धशिष्टान्नस्य ब्राह्मणभ्यो देयत्वात् ।

तथाच देवलः ।

एकोद्दिष्टे तु शेषन्तु ब्राह्मणेभ्यः समुत्सृजेत् । इति।

दर्शश्राद्धं प्रकृतिः अतस्तन्निर्णयेनैव तद्विकृतीनामपि निर्णयः इति प्रकृतौ विचार्य्यते किं श्राद्धार्थं वैश्वदेवार्थमेक एव पाकः उत पृथगिति तत्र पृथगिति ब्रूमः ।

तथाच लोकाक्षिः ।

पित्र्यं निर्वपेत्पाकं वैश्वदेवार्थमेव च । इति ।

इयमुक्तिः पाकस्य पृथक्त्वे एकत्वे चैकरूपेति विशेषापरिज्ञानाभिप्राया । विवृणोति स एवोत्तरार्द्धेन ।

वैश्वदेवं न पित्र्यं न दार्शं वैश्वदेविकमिति ।

इतरदितरार्थं न भवतीति पृथक् पाकः कर्त्तव्य इत्यर्थः न दार्शमित्यत्र दार्शशब्देन तद्विकृतयो नित्यनैमित्तिककाम्यश्राद्धानि लक्ष्यन्ते वैश्वदेविकमित्यत्र वैश्वदेविकशब्देन भूतयज्ञादयः। अयन्तु पृथक् पाको वैश्वदेवस्य श्राद्धात्पूर्व्वं मध्ये वा वैश्वदेवानुष्ठानेतरत्रानुष्ठाने ।

तथाच पैठीनसिः ।

पित्रपाकात्समुद्धृत्य वैश्वदेवं करोति यः।

आसुरं तद्भवेच्छ्राद्धं पितॄणां नोपतिष्ठति॥ इति।

नन्वेतद्वचनमुत्तरकालेऽपि निषेधकं तदापि पित्रपाकत्वात्। मैवमुत्तरकालं पित्रसम्बन्धस्य निवृत्तत्वात्। यदुद्देशेन परिकल्पितं यद्धविस्तस्य तदुद्देशेन त्यागेन कृतेन तदुपभोगसमनन्तरमेव तत्सम्बन्धनिवृत्तेर्न्याय्यत्वात्। एवमेव शिष्टाचारो दृश्यते।

अनेनाभिप्रायेण पैठीनसिरेवाह।

श्राद्धं निर्व्वर्त्त्य विधिवद्वैश्वदेवादिकं ततः।

कुर्य्याद्भिक्षां ततो दद्याद्वन्तकारादिकं तथा॥

अत्र प्रथमस्तच्छब्दो हेतुपरः द्वितीयस्तु श्राद्धावशिष्टान्नपरः एवञ्चायमर्थः सम्पद्यते।

पित्रपाकात्समुद्धृत्य वैश्वदेवं करोति यः।

आसुरं तद्भवेच्छ्राद्धमिति॥

यतः श्राद्धात्पूर्व्वं मध्ये वा निषेधः। ततस्तस्माद्धेतोः श्राद्धं निर्व्वर्त्त्य तच्छिष्टाद्वैश्वदेवादिकं कर्त्तव्यमिति। अत्र वचनस्थादिशब्देन नित्यश्राद्धमपि गृह्यते तेन यच्छाखायां नित्यश्राद्धस्य पञ्चयज्ञान्तःपातित्वं नास्ति तच्छाखीयानां श्राद्धपाकशेषेण पृथग्वाक्येन वा नित्यश्राद्धं वैश्वदेवात्प्रागेव।

अत्रोभयत्रापि मार्कण्डेयः।

ततो नित्यक्रियां कुर्य्यादिति।

ततः श्राद्धशेषान्नित्यक्रिया नित्यश्राद्धादि।

तथा ।

पृथक्पाकेन नैत्यं स्यादिति ।

यदि ब्राह्मणविसर्जनान्ते वैश्वदेवस्तदा तच्छेषेण, इतरत्र पृथगिति निर्णयः ।

इति वैश्वदेवपाकनिर्णयः ।

अथ वैश्वदेवकालनिर्णयः ।

तत्र साग्निः याद्यात्पूर्व्वमेव वैश्वदेवं कुर्व्वीत तदाह लौकाक्षिः ।

पचान्त्यकर्म्म निर्व्वर्त्त्य वैश्वदेवञ्च साग्निकः ।

पिण्डयज्ञं ततः कुर्य्यात्ततोऽन्वाहार्य्यकम्बुधः ॥

इति पचान्त्यमन्नाधानमन्वाहार्य्यकं दर्शयाद्यं ननु वैश्वदेवस्य पचान्तपिण्डपितृयज्ञयोर्मध्यविधिबलादेव साग्निककर्त्तृत्वावगतेः पुनः साग्निकशब्दोपादानमपार्थकमिति चेन्नैवम् । अन्नाधानपिण्डपितृयज्ञकर्त्तुरौपासनाग्निनिर्व्वृत्त्यर्थत्वेन सार्थकत्वात् ।

देवलोऽपि वैश्वदेवानन्तरमेव पिण्डपितृयज्ञादिकर्त्तव्यतामाह ।

अकृते वैश्वदेवे तु स्थालीपाकः प्रकीर्त्तितः ।

अन्यच्च पिण्डयज्ञात्तु सोऽपराह्णे विधीयते ॥ इति ।

स्थालीपाकशब्देन स्थालीपाकसाध्यकर्म्माण्युच्यन्ते । एतानि

पत्न्यन्तादीनि कर्म्माणि वैश्वदेवात्पूर्व्वमेव कर्त्तव्यानि। पिण्डपितृयज्ञस्यापि स्थालीपाकसाध्यत्वे तस्यापि पूर्व्वत्र कर्त्तव्यतायां प्राप्तायामपवादः अन्यत्रेति पिण्डपितृयज्ञादन्यत्रेत्यर्थः।

दर्शश्राद्धस्य पिण्डपितृयज्ञानन्तर्य्यमाह

मनुः।

पिण्डयज्ञन्तु निर्वर्त्त्य विप्रश्चन्द्रक्षयेऽग्निमान्।
पिण्डान्वाहार्य्यकं श्राद्धङ्कुर्य्यान्मासानुमासिकम्॥

एवञ्च यानि श्राद्धात्पूर्व्वं वैश्वदेवकर्त्तव्यतापादकानि वचनानि तानि सर्व्वाणि लोकाक्षिमनुवचनानुसारेण श्रौताग्निमद्विषयानि व्यवस्थापनीयानि। साग्निकस्याप्येकादशाहश्राद्धपश्चादेव।

सम्प्राप्ते पार्व्वणे श्राद्धे एकोद्दिष्टे तथैव च।
अग्रतो वैश्वदेवः स्यात्पश्चादेकादशेऽहनि॥ इति।

परिशिष्टे विशेषविधानात्।

तथा सालङ्कायनोऽपि।

श्राद्धे प्रागेव कुर्व्वीत वैश्वदेवन्तु साग्निकः।
एकादश्यादिकं मुक्त्वा तच्च ह्यन्ते विधीयते॥ इति।

एवं वैदिकाग्नेः श्राद्धात्प्रागेव नियमादौपासनाग्नेरनग्नेश्च यानि प्रतिषेधाश्च* यानि श्राद्धमध्ये विकिरान्ते ब्राह्मणत्रिस-

---

* सर्व्वेषु आदर्शपुस्तकेषु एकरूपपाठदर्शनादेवं रचितः परन्तु यान्यप्रतिषिद्धानीत्येव पाठो भवितुमर्हति।

र्व्जनान्ते च वैश्वदेवविधायकानि तान्यौपासनाग्निविषये अनग्निविषये च व्यवतिष्ठन्ते यानि श्राद्धादौ निषेधकानि तान्यपि तद्विषय* एव। अथवा साग्नेरपि श्राद्धपाकविषये अतएवास्य पृथक्पाको वैश्वदेवार्थनिषेधश्च।

षट्त्रिंशन्मते।

प्रतिवासरिको होमः श्राद्धादौ क्रियते यदि।
देवा हव्यं न गृह्णन्ति कव्यानि पितरस्तथा॥ इति।

हृद्गौतमोऽपि।

पित्र्यश्राद्धमकृत्वा तु वैश्वदेवङ्करोति यः।
अकृतं तद्भवेच्छ्राद्धं पितॄणां नोपतिष्ठते॥

वशिष्ठः।

वैश्वदेवमकृत्वा तु श्राद्धङ्कुर्य्यादनग्निकः।
लौकिकेऽग्नौ हुते शेषं पितॄणां नोपतिष्ठते॥

अनग्निको वैदिकाग्निरहितोऽपि तस्यौपासनाग्नावपि वैश्वदेवो निषिद्धः। अयमर्थो लोकाग्निवचने साग्निकपदस्य सार्थकत्वप्रतिपादने दर्शितः। अतएवात्र लौकिकाग्निरिति स्मार्त्ताग्नेरप्युपलक्षणम्। औपासनाग्नेरनग्निकस्य च त्रयः काला वैश्वदेवे एकः श्राद्धमध्ये अपरो विकिरान्ते अन्यो ब्राह्मणविसर्जनान्ते।

तत्र मध्यकर्त्तव्यता

ब्रह्माण्डपुराणे।

---

* औपासनाग्निरग्निविषय एव।

वैश्वदेवाहुतीरग्नावर्व्वाक् ब्राह्मणभोजनात्।

जुहुयाद्भूतयज्ञादि*श्राद्धं कृत्वा तु तत् स्मृतम्॥ इति। ब्राह्मणभोजनादर्व्वाक् अग्नौकरणानन्तरमित्यर्थः। अत्र भूतयज्ञादेः श्राद्धानन्तरकर्त्तव्यताभिधानादस्मिन् प्रयोगे यानि भूतयज्ञोत्तरभावीनि कर्म्माणि सम्बन्धक्रमाणि तानि तदाद्युत्कर्षन्यायेनोत्कृष्टानि† श्राद्धान्ते कर्त्तव्यानि न तु भूतयज्ञात् पूर्व्वभावीन्युत्कृष्टानीति§। यच्छाखायां बलिहरणादिकमेव भूतयज्ञादिकं तेषां बलिहरणादिकस्यैवोत्कर्षः येषान्तु बलिहरणादिव्यतिरिक्ता भूतयज्ञास्तेषां बहिर्बलिव्यतिरिक्तभूतयज्ञावधिकानां बलिहरणादीनामपि श्राद्धमध्ये कर्त्तव्यता भवतीति विवेकः। न चैवं मन्तव्यं प्रारब्धे पित्र्ये कर्म्मण्यसमाप्ते तन्मध्ये कर्म्मान्तरकरणायुक्तमिति निशीष्टिन्यायेना§विरोधात् अतएव

---

* बलिहरणादि। † आदीनां कर्त्तव्यतायां तदन्तस्यापि कर्त्तव्यता इति तदाद्युत्कर्षन्यायार्थः। तान्युत्कर्षज्ञानेनैवोत्कृष्टानीति पाठान्तरम्। § तदाद्युत्कृष्टन्यायेन करणीयानि इत्यर्थः। § निशियज्ञे दर्शतन्त्रं नीतास्वतन्त्रदर्शिके।

तन्त्रमध्ये विध्यभावादन्त्यर्थोक्तविधानतः॥

अग्नये रक्षोघ्ने पुरोडाशमष्टाकपालं निर्वपेद्यो रक्षोभ्यो बिभीयादिति विधायेदमामनन्ति। अमावास्यायां यजेतेति। एतस्मिन् यज्ञे दर्शयागस्याङ्गतन्त्रं न प्रसज्यते। कुतः दर्शकर्म्मणस्तन्त्रमध्येऽस्य रक्षोघ्नस्य विध्यभावात्। यत्तु अमावास्यायामिति पदं तत्कालपरं कर्म्मपरत्वे लक्षणापत्तेः। अतो न वाक्यात् तन्त्रमध्ये विधिः प्रकरणन्तु भिद्यते काम्येष्टिकाण्ड एतस्य पाठादिति प्राप्ते ब्रूमः। मा भूद्वाक्येन वा प्रकरणेन वा तन्त्रमध्ये विधिः। तथाप्यमावास्याकाले दर्शकर्म्मणः प्रक्रान्तत्वेन निशि क्रियमाणीयागोऽर्थवशाद्दर्शकर्म्मतन्त्रमध्यपाती भवति तस्मादत्रापि प्रसङ्गसिद्धिः इति निशीष्टिन्यायः।

दृश्यते पूर्व्वेद्युर्निमन्त्रितेषु ब्राह्मणेषु श्राद्धापरिसमाप्तावेव सा प्रातर्होमकरणम् ।

द्वितीयः कालो भविष्यपुराणे ।

पितॄन् सन्तर्प्य विधिवद्बलिं दत्त्वा विधानतः ।
वैश्वदेवं ततः कुर्य्यात्पश्चाद्ब्राह्मणभोजनम् ॥

बलिश्च विकिरसंज्ञकः ।

यतस्तत्रैव ।

ये अग्निदग्धा मन्त्रेण* भूमौ यत्रिक्षिपेद्बुधः ।
जानीहि तं बलिं वीर श्राद्धकर्म्मणि सर्व्वदा ॥ इति ।

पश्चाद्ब्राह्मणभोजनं भूरिभोजनम् ।

तृतीयकालोब्राह्मणविसर्जनान्ते स च मत्स्यपुराणे दर्शितः ।

उच्छेषणन्तु† तत्तिष्ठेद्यावद्विप्रा विसर्जिताः ।
वैश्वदेवं ततः कुर्य्यान्निवृत्ते पिण्डकर्म्मणि ॥

मनुरपि ।

पूर्व्वार्द्धं तदेव ।
ततो गृहबलिं कुर्य्यादिति धर्म्मो व्यवस्थितः ॥ इति ।

---

* ओं येऽग्निदग्धा येऽनग्निदग्धा मध्येदिवः स्वधया मादयन्ते । तेभिः स्वराड्सूनीति मेतां यथावतंसं तनुं कल्पयस्व । ओं असंस्कृतप्रमीतानां त्यागिन्यो याः कुलस्त्रियः । ददामि तेभ्योविकिरमन्नाभ्यर्थ पैण्डकम् । ओं असीमपाश्च ये जीवा यज्ञभागवहिष्कृताः । तेषामन्नं प्रदातव्यं विकिरं वैश्वदैविकम् । ओं येषां न माता न पिता न बन्धुर्नैवान्नसिद्धि र्न तथान्नमस्ति । तत्तृप्तयेऽन्नं भुवि दत्तमेतत् प्रयान्तु लोकाय सुखाय तद्वदिति । † सर्व्वेषु आदर्शपुस्तकेषु एकपरुषपाठदर्शनादेवं रचितः परन्तु उच्छेचनमिति पाठो भवितुमर्हति ।

बलिशब्दो वैश्वदेवप्रदर्शनार्थ इति मतं मेधातिथेः ।

भविष्यपुराणे ।

कृत्वा श्राद्धं महाबाहो ब्राह्मणांश्च विसर्ज्जयेत् ।
वैश्वदेवादिकं कर्म्म ततः कुर्य्यान्नराधिप ॥ इति ।

इति वैश्वदेवकालनिर्णयः ।

अथातिथिपूजा ।

तत्र विष्णुपुराणे ।

ततो गोदोहमात्रन्तु तिष्ठेत्कालं गृहाङ्गने ।
अतिथिग्रहणार्थाय तदूर्द्ध्वञ्च यथेच्छया ॥

वैयाघ्रपद्यः ।

अनिन्दितमनाहूतं वैश्वदेवेष्ववस्थितम् ।
अतिथिं तं विजानीयान्नैकग्रामनिवासिनम् ॥
क्षुधार्त्तस्तृषितश्चैव स्नातो गृहमुपागतः ।
प्रयत्नेन तु सम्पूज्य सोऽतिथिः स्वर्गसंक्रमः* ॥
इष्टो वा यदि वा द्वेष्यो मूर्खः पण्डित एव च ।
सम्प्राप्ते वैश्वदेवान्ते सोऽतिथिः स्वर्गसंक्रमः ॥
न पृच्छेद्गोत्रचरणं† न स्वाध्यायं व्रतानि च ।
चित्तेन भावयेत्तन्तु सर्व्वदेवमयो हि सः ॥

---

* स्वर्गप्रापकः । † चरणं शाखा गोत्रञ्च चरणञ्च द्वयोः समाहार इति समासे दीर्घः ।

विष्णुः ।

अतिथिर्यस्य भग्नाशो गृहात्प्रतिनिवर्त्तते ।
स तस्य दुष्कृतं दत्त्वा पुण्यमादाय गच्छति ॥

याज्ञवल्क्यः ।

दिनेऽतिथौ तु विमुखे गते यत्पातकं भवेत् ।
तदेवाष्टगुणं प्रोक्तं सूर्य्यीढे* विमुखे गते ॥

ऋष्यशृङ्गः ।

गवां ग्रासञ्च कुर्व्वीत नित्यमेव समाहितः ।
गवाङ्गरूयनं स्वर्गं ग्राममाङ्गिकमेव च ॥

मार्कण्डेयपुराणे ।

अस्नाताशी मलं भुङ्क्ते अजापी पूयशोणितम् ।
अहुत्वान्नं कृमीन् भुङ्क्ते अदत्त्वा विषभोजनम् ॥
आत्मार्थं पचनं यस्य रत्यर्थं यस्य मैथुनम् ।
हत्त्यर्थं यस्य चाधीतं निष्फलं तस्य जीवितम् ॥

अथ भोजनविधिः ।

तत्र देवलहारीतौ ।

आहारन्तु रहः कुर्य्यान्निर्हारञ्चैव सर्व्वदा ।
गुप्ताभ्यां लक्ष्मणोपेतः स्वात्माकाङ्क्षी हीयते श्रिया ॥

---

* सूर्य्यीढे इत्यर्थः ।

मनुः ।

उपस्पृश्य द्विजो नित्यमन्नमद्यात्समाहितः ।

आपस्तम्बः ।

यस्तु भोजनशालायां भोक्तुकामः सन्नासनस्थो वा अन्यत्र आसनस्थो वा न चोपस्पृशेत् यस्तूपस्पृशेत् स पङ्क्ति-दूषक इत्यन्वयः ।

याज्ञवल्क्यः ।

बालं सुवासिनी*र्द्वद्गर्भिण्यातुरकन्यकाः ।
सभोज्यातिथिभृत्यांश्च दम्पत्योः शेषभोजनम् ॥

यमः ।

विप्रः स्वर्गपरो नित्यमर्चयेत्पितृदेवताम् ।
गुरूनतिथिबालांश्च तर्पयेत्पूर्वमेव तु ॥
आत्मानं तर्पयेत्पश्चान्नियतो वाग्यतः शुचिः ।
स्त्रीशूद्रं तर्पयेत्पश्चादेष धर्मः सनातनः ॥

व्यासः ।

पञ्चार्द्रौ भोजनं कुर्यात्प्राङ्मुखो मौनमास्थितः ।
हस्तौ पादौ तथैवास्यमेषां पञ्चार्द्रता मता ॥

बौधायनः ।

प्राङ्मुखोऽन्नानि भुञ्जीत शुचिः पीठमधिष्ठितः ।

विष्णुः ।

---

* नवोढ़ा इत्यर्थः ।

न भुवि आसनान्तरितायां क्षितावुपविशेदिति ।

आसने वर्ज्यान्याह प्रचेताः ।

गोगजक्रव्मृगमयं भिन्नं तथा पालाशपैप्पलम् ।
लौहरङ्कं सदैवार्कं वर्ज्ययेदासने बुधः ॥

ब्रह्मपुराणे ।

उपलिप्ते समे स्थाने शुचौ सिद्धासनान्विते ।
मण्डलं गोमयेनैयाद्यवा गोरमृगमया ॥

अत्र विशेषमाह शङ्खः ।

चतुष्कोणं द्विजाग्रस्य त्रिकोणं क्षत्रियस्य च ।
मण्डलाकृति वैश्यस्य शूद्रस्याभ्युक्षणं स्मृतम् ॥

व्यासस्तु शूद्रस्यार्द्धचन्द्राकृति मण्डलं प्राह ।

चतुरस्रं त्रिकोणञ्च वर्त्तुलञ्चार्द्धचन्द्रकम् ।
कर्त्तव्यमानुपूर्व्वेण ब्राह्मणादिषु मण्डलम् ॥

हारीतः ।

न कार्ष्णायसे मृण्मये वा पात्रे नाश्नीयात् ।

मनुः ।

न पादौ धावयेत्कांस्ये कदाचिदपि भाजने ।
न भिन्नभाण्डे भुञ्जीत न भावप्रतिदूषिते ॥

भिन्नभाण्डे निषेधस्ताम्रादिव्यतिरिक्तविषयः ।

तथाच पैठीनसिः ।

ताम्ररजतसुवर्णशङ्खमुक्ताश्मस्फाटिकानां भिन्नमभिन्नमिति ताम्रपात्रं यतिविषयं गृहस्थस्य निषिद्धत्वात् ।

तथाच वृद्धमनुः ।

ताम्रपात्रे न भुञ्जीत भिन्नकांस्ये मलाविले ।
पलाशपद्मपात्रेषु गृही भुङ्क्तेन्दवच्चरेत् ॥

पलाशो वल्लीपलाश इति ।

स्मृत्यर्थसारे ।

एक एव तु यो भुङ्क्ते विमले कांस्यभाजने ।
चत्वारि तस्य वर्द्धन्ते आयुः प्रज्ञा यशो बलम् ॥

अत्रिः ।

आसने पादमारोप्य यो भुङ्क्ते ब्राह्मणः क्वचित् ।
मुखेन वान्नमश्नाति तुल्यं गोमांसभक्षणे ॥

मुखेन गवादिवदित्यर्थः ।

बौधायनः ।

भोजनं वन्दनन्दानमुपहारं प्रतिग्रहः ।
बहिर्जानु न कार्य्याणि तद्वदाचमनं स्मृतम् ॥

हारीतः ।

मार्जनाचमनबलिकर्म्मभोजनानि देवतीर्थेन कुर्य्यात् ।

वृद्धमनुः ।

न पिबेन्न च भुञ्जीत द्विजः सव्येन पाणिना ।
एकहस्तेन न जलं शूद्रेणावर्जितं पिबेत् ॥

मार्कण्डेयपुराणे ।

पादप्रसारणं कृत्वा न च वेष्टितमस्तकः ।

विष्णुः ।

नाश्नीयाद्भार्य्यया सार्द्धं नाकाशे न तथोत्थितः।
शयानः प्रौढ़पादश्च कृत्वा चैवावसक्थिकम्॥

आकाशे मञ्चादौ।

अत्र विशेषमाह मार्कण्डेयः।

न्यस्तपात्रस्तु भुञ्जीत पञ्च ग्रासान् महामुने।
शेषमुद्धृत्य भोक्तव्यमिति।

उद्धृत्य मञ्चादौ पात्रं निक्षिप्येत्यर्थः। पित्र्यर्थभोजने तु भूमौ पात्रस्थापनमावश्यकम्। पित्र्यार्थन्तु न लुप्यत इति अत्रैव वाक्यशेषे तेनैवाभिधानात्। पादावारोपितपादः प्रौढ़पादः।

ब्रह्मपुराणे।

पञ्च ग्रासांस्तु भुञ्जीत क्वचिदेश्मनि सङ्करे।
पात्रमुद्धृत्य शेषन्तु भक्षयेत्सङ्करान्नयात्।
पित्र्ये कर्म्मणि भुञ्जानो भूमौ पात्रं न चालयेत्॥

विष्णुः।

न भिन्नभाजनोत्सङ्गे न भुवि न पाणौ।

उत्सङ्गे ऊर्व्वोरुपरि पात्रं स्थापयित्वा।

वशिष्ठः।

सर्व्वाभिरङ्गुलीभिरश्नीयात्पाणिञ्च नावधुनीयात्।

मार्कण्डेयः।

यस्तु पाणितले भुङ्क्ते यः सवायुं समश्नुते।
अङ्गुलिच्छोदरेद्यस्तु गोमांसाशनवत्स्मृतम्॥

सवायुं सशब्दमित्यर्थः।

विष्णुः।

नोच्छिष्टं घृतमाद्यात्।

आदित्यपुराणे।

नोच्छिष्टो ग्राहयेदाज्यं जघ्रशिष्टं न सत्यजेत्।

शूद्रभुक्तावशिष्टन्तु नाद्याद्भाण्डस्थितन्त्वपि॥

तथा।

न सन्ध्ययोर्न मध्याह्ने नार्द्ररात्रे कदाचन।

नार्द्रवासा नार्द्रशिरा न चायज्ञोपवीतवान्॥

एवञ्च।

सायम्प्रातर्द्विजातीनामशनं श्रुतिचोदितम्।

नान्तरा भोजनङ्कुर्याद्दग्निहोत्रसमो विधिः॥ इति।

मनुना यत्सायम्प्रातरित्युपात्तं* तत्तु रात्रिदिनयोर्ग्रहणार्थं न तु सन्ध्याकालनिर्णयार्थं न सन्ध्ययोरिति निषेधात्। अग्निहोत्रसाम्यविधानाद्दिवा रात्रौ वा द्विर्भोजनं निषिद्धमेव। एवं पूर्वोक्तप्रकारेण शुचौ देशे उपविष्टः उक्तनियमयुक्तो भूत्वा व्याहृतिभिः गायत्र्या चान्नमभिमन्त्र्याभ्युक्ष्य परिषिच्य धर्म्मराजादिबलिन्दत्वा आपोशानक्रियाङ्कृत्वा पञ्च ग्रासान् गृहीत्वा भोजनान्तर†मग्नीकरणादिकं विधायाचमनङ्कुर्यात्।

तथाच गोभिलः।

अथातः प्राणाहुतिकल्पो व्याहृतिभिर्गायत्र्या चाभिमन्त्र्य ऋतञ्च सत्येन परिषिञ्चामीति सायं सत्यं त्वर्त्तेन

* उपादानं कृतम्। † भोजनमध्ये।

परिषिञ्चामीति । प्रातः ।

अन्तश्चरसि भूतेषु गुहायां विश्वतोमुखः ।

त्वं यज्ञस्त्वं वषट्कारः त्वं ब्रह्मा त्वं प्रजापतिः ।

आपो ज्योती रसोऽमृतं ब्रह्म भूर्भुवः स्वरोम् ।

अमृतोपस्तरणमसीत्यपः पीत्वा दग्धहोतारं मनसानु स्मृत्यात्वरन् पञ्चग्रासान् गृह्णीयात् । प्राणाय स्वाहेति गार्हपत्यमेव जुहोत्यपानाय स्वाहेत्यन्वाहार्य्यपचनमेव तेन जुहोति व्यानाय स्वाहेति आहवनीयमेव जुहोत्युदानाय स्वाहेति सत्यमेव तेन जुहोति समानाय स्वाहेत्यावसथ्यमेव तेन जुहोतीति ।

शौनकस्तु विशेषमाह ।

स्वाहान्ताः प्रणवाद्याश्च नाम्ना मन्त्रास्तु वायवः ।

जिह्वयैव ग्रसेदन्नं दग्धेन न संस्पृशेत् ॥

तर्जनीमध्यमाङ्गुष्ठलग्नः प्राणाहुतौ भवेत् ।

मध्यमानामिकाङ्गुष्ठैरपाने जुहुयाद्बुधः ।

समाने सर्व्वहस्तेन समुदायाहुतिर्भवेत् ॥

भविष्यपुराणे ।

भोजनाल्लिञ्चिदन्नाग्रं धर्म्मराजाय वै बलिम् ।

चित्राय* चित्रगुप्ताय प्रेतेभ्यश्चेदमुच्चरेत्† ॥

---

* दत्त्वेति पाठान्तरम् । † उच्चरेदिति पाठान्तरम् । प्रेतेभ्यश्चेदमुच्चरेत्—यत्र क्वचनसंस्थानां क्षुत्तृष्णोपहतात्मनाम् । प्रेतानां तृप्तयेऽन्नमिदमस्तु यथासुखम् ॥ इत्याचारमयूखे विशेष उक्तः ।

ब्रह्मपुराणे।

हस्तेन लङ्घयेन्नान्नं* सोदकेन कदाचन।
दन्ताद्यो लङ्घयेदन्नं तेनान्नं न हितभवेत्† ॥

विष्णुपुराणे।

अश्नीयात्तन्मना भूत्वा पूर्व्वन्तु मधुरं रसम्।
लवणाम्लौ तथा मध्ये कटुतिक्तादिकांस्ततः ॥
प्राग्द्रवं पुरुषोऽश्नीयान्मध्ये तु कठिनाशनम्।
अन्ते पुनर्द्रवाशी तु बलारोग्येण मुञ्चति ॥
जठरं पूरयेदर्द्धमन्नैर्भागञ्जलस्य‡ च।
वायोः सञ्चरणार्थाय चतुर्थमवशेषयेत् ॥

आदिपुराणे।

एकपङ्क्तेरनुच्छाय§मध्ये चेदाचमेत्परः।
तदा शेषं विहायैव¶ विप्रः सम्यगपः स्पृशेत् ॥

एकपङ्क्तिस्थितानां सर्व्वेषां भोजने अपरिसमाप्ते इत्यर्थः।

पङ्क्तिभेदानाह बृहस्पतिः।

अग्निना भस्मना चैव स्तम्भेन सलिलेन च।
द्वारेणैव च मार्गेण पङ्क्तिभेदो बुधैः स्मृतः ॥

---

* सोदकेन हस्तेन अन्नं न लङ्घयेत् न त्यजेत् अर्थाद्भुञ्जीयादित्यर्थः। † हस्तेन लङ्घयेन्नान्नं नोदकेन कदाचन। हस्ताद्यो लङ्घयेद्भुञ्जेनान्नं निहितं भवेत्। हतन्नान्नमभक्ष्यत्वं तस्य याति दुरात्मनः ॥ इति ब्राह्मणसर्व्वस्वे हलायुधधृतः पाठः। ‡ भागं तृतीयभागरूपं जलस्य पानेन पूरयेदित्यनुषङ्गेणान्वयः। § पङ्क्तिभेदमकृत्वा। ¶ विधायैवेति पाठान्तरम्।

ग्रासनियममाह आपस्तम्बः ।

अष्टौ ग्रासा मुनेर्भक्ष्यं षोड़शारण्यवासिनः ।
द्वात्रिंशतं गृहस्थस्य अमितं ब्रह्मचारिणः ॥
आहिताग्निरनड्वांश्च ब्रह्मचारी च ये त्रयः ।
अश्नन्त एव सिध्यन्ति नेषां सिद्धिरनश्नताम् ॥

यदा गृहस्थस्योपवासः प्राप्तस्तदा बौधायनोक्तम् ।

प्राणाग्निहोत्रमन्त्रांश्च निरुद्धो भोजने जपेत् ।
चेताग्निहोत्रं मन्त्रांश्च निरुद्धो भोजने जपेत् ।
चेताग्निहोत्रमन्त्रांस्तु द्रव्यालाभे जपेदिति ॥

निरुद्धो भोजन इति उपवासेन भोजनरहित इत्यर्थः ।

पुलस्त्यः ।

भोजने तु न निःशेषं कुर्य्यात्प्राज्ञः कथञ्चन ।
अन्यत्र दधिशक्राज्यपललक्षीरमध्वपः ॥

भोजनानन्तरं देवलः ।

भुक्तोच्छिष्टं समादाय सर्व्वस्मात्किञ्चिदाचमन् ।
उच्छिष्टभागधेयेभ्यः सोदकं निर्वपेद्भुवि ॥

अत्र मन्त्रः ।

रौरवे पुण्यनिलये पद्मार्व्बुदनिवासिनाम् ।
अर्थिनामुदकं नित्यमक्षय्यमुपतिष्ठतु ॥

गद्यव्यासः ।

ततस्तृप्तः सन्नमृतापिधानमसीत्यपः प्राश्य तस्माद्दे
शान्मनागपास्त्य विधिवदाचमेत् ।

अपां प्राशने श्लोकव्यासः।

हस्तं प्रक्षाल्य गण्डूषं यः पिबेत्यापमोहितः।
स देवत्वैव पित्र्यञ्च आत्मानञ्चैव सादयेत्॥
अर्द्धम्मीलां तु गण्डूषमर्द्धन्त्याज्यं महीतले।
रसातले गता नागास्तेन प्रीणन्ति नित्यशः॥

देवलः।

आचम्य तु ततः कार्य्यं दन्तकाष्ठस्य भक्षणम्।
भोजने दन्तलग्नानि निर्हृत्वाचमनं चरेत्॥
दन्तलग्नमसंस्कार्य्यं लग्नं*मन्येत दन्तवत्।
न तत्र बहुशः कुर्य्याद्यत्नमुद्वरणम्प्रति॥

दन्तलग्नङ्गालान्तरे स्थानाच्चुतं यत्तु त्यक्त्वैव शुचिर्नाचमेत्।

तथाच याज्ञवल्क्यः।

श्मश्रु चास्यगतं दन्तसक्तन्त्यक्त्वा ततः शुचिः।

निगरन्नपि तु तच्छुचिरित्याह

मनुः।

दन्तवद्दन्तलग्नेषु जिह्वास्पर्शे शुचिर्न तु।
परिच्युतेषु च स्थानान्निगिरन्नेव तच्छुचिः॥

परित्यागनिगरयोर्विकल्पः।

स्थानचलनात्प्राग्जिह्वाघट्टनेऽपि शुचिरित्याह

गौतमः।

---

* लेपमिति देशान्तरीयः पाठः।

दन्तश्लिष्टेषु दन्तवदन्यत्र जिह्वाभिमर्शनात्प्राक्च्युतेरेक इति ।

प्राक्च्युतेर्जिह्वाभिमर्शने दोषो नास्तीत्यर्थः ।

एवं दन्तधावनानन्तरम्

देवलः ।

आचान्तो हृदयदेशमभिस्पृशति प्राणानां ग्रन्थीरुद्भाविशन्ति कस्तेनान्नेनाप्यायस्वेति ।

पुनराचम्य दक्षिणे पादाङ्गुष्ठे पाणिं निस्तारयति ।

अङ्गुष्ठमाचः पुरुषो अङ्गुष्ठं वा समाश्रितः ।

ईशः सर्व्वस्य जगतः प्रभुः प्रीणातु विश्वभुक् ॥

ततः करादिमुपस्पृशेत् । जानू संस्पृशेत् ।

तथाच व्यासः ।

मा करेण करं स्प्राक्षीर्मा जङ्घे मा च चक्षुषी ।

ऊरू संस्पृश कौन्तेय भर्त्तव्यस्ते महाजनः ॥

ऊरू जानुनी । जानुनी स्पृश राजेन्द्र भर्त्तव्यो बहुरापदीति तेनैवाभिधानात् ।

मार्कण्डेयः ।

भूयोऽप्याचम्य कर्त्तव्यं ततस्ताम्बूलभक्षणम् ।

श्रवणञ्चेतिहासस्य ततः कुर्य्यात्समाहितः ॥

याज्ञवल्क्योऽपि ।

अहःशेषं सहासीत मिष्टैरिष्टैश्च बन्धुभिः । इति ।

इति भोजनविधिः ।

अथ भोज्याभोज्यद्रव्याणि ।

याज्ञवल्क्यः ।

अनर्चितं हृथामांसं केशकीटसमन्वितम् ।
शुक्तं पर्य्युषितोच्छिष्टं श्वस्पृष्टम्पतितेक्षितम् ॥
उदक्यास्पृष्टसङ्घृष्टपर्य्यायान्नानि वर्ज्जयेत् ।
गोघ्रातं शकुनोच्छिष्टं पदा स्पृष्टञ्च कामतः ॥

अनर्चितं अवज्ञापूर्व्वकं दत्तं हृथामांसमनिषिद्धेष्वपि मांसेष्वविहितकालसम्पादितम् । शुक्तङ्कालेनाम्लीभूतम् । पर्य्युषितं रात्र्यन्तरितम् । एतच्च दध्यादिव्यतिरिक्तम् । न शुक्तं न पर्य्युषितमन्यत्र रागखण्ड*चुक्रदधि गुड़ गोधूम यवपिष्टविकारेभ्य इति शङ्खस्मरणात् । यदुद्वोथ दीयते तदाघुष्टान्नम् ।

अन्ने प्रतिप्रसवः ।

अन्नं पर्य्युषितम्भोज्यं स्नेहाक्तं विरसंस्थितम् ।
अस्नेहा अपि गोधूमयवगोरसविक्रियाः ॥

शङ्खः ।

अपूपाः शक्तवो धानास्तक्रं दधि घृतं मधु ।
एतत्पक्वेषु भोक्तव्यं मण्डलेपो न चेद्भवेत् ॥

भक्ष्याणि ।

भक्ष्याः पञ्चनखा मेध्या गोधाकच्छपखड्गकाः ।

---

* रागशाड़व इति पाठान्तरम् । अस्यार्थः अवलीढद्रव्यम् ।

शशस्य मत्स्येष्वपि हि सिंहतुण्डकरोहिताः ॥

भक्षणकालमाह ।

प्राणात्यये तथा श्राद्धे प्रोक्षितं द्विजकाम्यया ।

देवान् पितॄन् समभ्यर्च्य खादन्मांसं न दोषभाक् ॥

प्रोक्षितं योगप्रोक्षणाख्यसंस्कारेण स्मृतम् । द्विजकाम्यया ब्राह्मणभोजनार्थं यत्सम्पादितमतिथिपूजादौ तदुच्यते ।

यत्तु निगमवचनम् ।

क्षेत्रजं गोऽपगोघातं श्राद्धे मांसं तथा मधु ।

देवराच्च सुतोत्पत्तिः कलौ पञ्च विवर्ज्जयेत् ॥

मांसं विवर्ज्जयेदिति निषेधः कलियुगे ब्राह्मणकर्त्तृकश्राद्धविषयः ।

सुन्वन्नं ब्राह्मणस्योक्तं मांसं क्षत्रियवैश्ययोः ।

मधुप्रधानं शूद्रस्येति

श्राद्धप्रकरणे पुनस्तेन विशेषाभिधानात् । द्विजदेवतापित्रुद्देशेन कृतस्य यः शेषस्तस्य त्ववश्यभक्षता नास्ति । न दोषभागित्वपादानाद्भक्षणे प्रत्यवायो नास्तीति यतोऽवगम्यते ।

उक्तप्रकारव्यतिरेकेण भक्षणे दोषमाह ।

वसेत्स नरके घोरे दिनानि पशुरोमभिः ।

यंसितानि दुराचारो यो हन्त्यविधिना पशून् ॥

परित्यक्तमांसस्य फलमाह ।

---

* क्षुता इति पाठान्तरम् । अक्षता गोपतिश्चैवेति पाठान्तरम् ।

सर्व्वान् कामानवाप्नोति हयमेधफलं तथा।
गृहेऽपि निवसन्विप्रो मुनिर्मांसं विवर्ज्जयेत्॥

इति भोज्याभोज्यद्रव्याणि।

अथ भोज्याभोज्यद्रव्यप्रसङ्गाद्भोज्याभोज्यान्ना अपि प्रदर्श्यन्ते।

तत्र गौतमः।

प्रसक्तानां स्वकर्म्मसु द्विजातीनां ब्राह्मणो भुञ्जीत इति। प्रशस्तानामित्यपि पाठः। स्वकर्म्मसु प्रसक्तानां निष्णातानां स्वकर्म्मनिरतानामिति यावत्।

याज्ञवल्क्योऽपि।

परपाकरुचिर्न स्यादनिन्दामन्वणाट्टते। इति।

यमदग्निपैठीनसी।

ब्राह्मणस्य सदाश्नीयात्क्षत्रियस्य च पर्व्वसु।
प्रक्रतेषु च वैश्यस्य शूद्रस्य न कदाचन॥

अत्रापि ब्राह्मणादयः स्वकर्म्मनिष्ठा एव, पर्व्वसु पूर्णिमादिषु। प्रक्रतेषु प्रक्रमविशेषेषूत्सवेषु गोमङ्गलादिषु।

तथा।

अमृतं ब्राह्मणस्यान्नं क्षत्रियान्नं पयः स्मृतम्।
वैश्यस्य क्षत्रमेवान्नं शूद्रस्य रुधिरं स्मृतम्॥

अभोज्यान्नाः याज्ञवल्क्येन दर्शिताः।

अग्निहीनस्य विप्रस्य नान्नमद्यादनापदि ।
कदर्य्यबद्धचौराणां क्लीवरङ्गावतारिणाम् ॥
वैणाभिगस्तवार्द्धुष्यगणिकागणदीक्षिणाम् ।
एषामन्नं न भोक्तव्यं सोमविक्रयिणस्तथा ॥ इति ।

अग्निहीनः श्रौतस्मार्त्ताग्निरहितः* शूद्रादिः । सत्यपि अधिकारे अग्निहीनो ब्राह्मणादिश्च† । कदर्य्यो लुब्धः । बद्धो निगड़ादिना वैणो वीणावादनजीवी वार्द्धुष्यं निषिद्धत्वेनोपजीवनमात्मनः स्तुतिः परनिन्दाकरणम् ।

तथाच विष्णुः ।

यस्तु निन्देत्परं जीवं प्रशंसत्यात्मनो गुणान् ।
स वै वार्द्धुषिको नाम ब्रह्मवादिषु गर्हितः ॥

गणदीक्षी बहुयाजकः ।

शूद्रस्य न कदाचन‡ । अग्निहीनस्य विप्रस्य नान्नमद्यादनापदीत्यादिभिः शूद्रस्याभोज्यत्वे प्राप्ते प्रतिप्रसवमाह याज्ञवल्क्यः ।

शूद्रेषु दासगोपालकुलमित्रार्द्धसीरिणः ।
भोज्यान्ना नापितश्चैव यश्चात्मानं निवेदयेत् ॥

दासा गर्भदासादयः । गोपालो गोपरिपालनजीवी । कुल-

---

* स्वभावतः श्रौतस्मार्त्ताग्निरहित इत्यर्थः । † विप्रपदस्योपलक्षणत्वेन अग्निहीनपदस्यानुषङ्गेणान्वयस्वीकारेण चाभिप्रेत्य उक्तं ब्राह्मणादिश्चेति । ‡ ब्राह्मणस्य सदाग्नीयादित्यादि यमदग्निपैठिनसिवचनस्थस्येति शेषः ।

मित्रं वंशपरम्परायातः। अर्द्धशीरी सम्भूयसमुत्थायितया सह कर्षकः अथवा शीरोपलक्षितकृषिफलार्द्धग्राही। नापितो गृहे व्यापारकारयिता क्षौरकर्त्तापि। यश्च शूद्रः क्रीत एव वाङ्मनःकायकर्म्मभिरात्मानं द्विजाय निवेदयति तवाहमिति ददाति स आत्मनिवेदयिता। एते दासादयो यदीयास्तस्यैव ते भोज्यान्नाः।

हारीतः।

कुलमित्रं कुलपुत्रो भेत्तदः शित्तकः सुहृत्।
भवेद्यस्य सुखं लाभो भयत्राता च यो भवेत्॥

कुलपुत्रः कुलमित्रपुत्रः। भवेद्यस्य यस्य सम्बन्धी भवेत् इत्यर्थः। अत्र स्वशब्दः* सर्व्वत्रान्वेति एते दासादयोऽपि स्वविहितनित्यकर्म्मनिरता एव भोज्यान्नाः।

तथाच मनुः।

नाद्याच्छूद्रस्य पक्वान्नं विद्वानश्राद्धिनो द्विजः।
आद्दीताममे वास्माद्वृत्तावेकरात्रिकम्†॥

अश्राद्धी नित्यश्राद्धरहितः। एतच्च नित्यकर्म्मप्रदर्शनार्थम्। अस्माद्श्राद्धिनः। एकरात्रिकमेकाहपर्य्याप्तम्।

पक्वान्नान्यपि विशेषात्‡।

---

* स्वसम्बन्धित्वेन। † अश्राद्धिनः श्राद्धादिपञ्चयज्ञशून्यस्य शूद्रस्य शास्त्रविद्विजः पक्वान्नं न भुञ्जीत। किन्त्वन्नान्तराभावे सति एकरात्रानिर्व्वाहोचितमाममेवान्नमस्माद्गृह्णीयात् न तु पक्वान्नमिति कुल्लूकभट्टः। ‡ क्वचित् पुस्तके पक्वान्नान्यपि विशिष्टमिति पाठो दृश्यते वस्तुतस्तु एकाहपर्य्याप्तसामान्नं न तु पक्वान्नमित्येव पाठो युक्तः।

सुमन्त्वङ्गिरसौ ।

गोरसञ्चैव शक्तुंश्च तैलं पिण्याकमेव च ।

अपूपान् भक्षयेच्छूद्राद्यश्चान्यत्पयसा शृतम्* ॥

हारीतः ।

कन्दुपक्वं स्नेहपक्वं पायसं दधि शक्तवः ।

एतान्यशूद्रान्नभुजो भोज्यानि मनुरब्रवीत् ॥

एवञ्च यानि शूद्रान्ननिषेधकानि वचनानि तानि शूद्रपरिगणितपक्वान्नव्यतिरिक्तविषयाणि । यानि च दासादिलक्षणानि पराशरस्मृतावभिहितानि तानि च न शूद्राभिप्रायेण । तथा सति परस्परविरोधात् । लक्षणानि च ।

शूद्रकन्यासमुत्पन्नो ब्राह्मणेन तु संस्कृतः ।

संस्कारे तु भवेद्दासः असंस्कारे तु नापितः ॥

क्षत्रियाच्छूद्रकन्यायां सुतो जातस्तु नामतः ।

गोपालस्तु स विज्ञेयो भोज्योविप्रैर्न संशयः ॥

वैश्यकन्यासमुत्पन्नो ब्राह्मणेन तु संस्कृतः ।

तदर्द्धिकस्तु विज्ञेयो भोज्यो विप्रैर्न संशयः ॥

गोपालस्य क्षत्रियो जनकः अन्येषान्तु ब्राह्मणः । अत्र यद्यपि दासनापितगोपालानां माहिष्यारापि शूद्रत्वं तथापि कुलमित्यार्द्धशीरिणैर्न माहिष्यारापि ततः क्वचिन्माहिष्या शूद्रत्वं क्वचिन्नेति एते शूद्रेषु भोज्यान्ना इत्यनेन विरोधः स्यात्किञ्च

* पक्वमित्यर्थः ।

मूर्द्धावसिक्तजात्यन्तःपातित्वादेतेषां न शूद्रत्वं तथा चैतेषां शूद्रत्वे मूर्द्धावसिक्तादिजातिप्रतिपादकवचनैः सह विरोधः स्यात्तत्तद्वाक्यानान्वयमभिप्रायः शूद्रत्वेपदासादीनां भोज्यान्नत्वकथनं प्रसङ्गात्। डित्यडपित्यसंज्ञान्तराणीव दासादिसंज्ञा अपि सन्तीति प्रदर्शनार्थमिति। अतएव सुतो जातस्तु नामतः गोपालस्तु स विज्ञेय इयत्र नामत इति ग्रहणं कृतम्। किञ्च आत्मनिवेदकस्य कुम्भकारादेश्च केवलशूद्रतान्यायेनेतरेषामपि शूद्रत्वमेव युक्तम्।

इति भोज्याभोज्यान्ननिर्णयः।

अथ शयनविधिः।

तत्राङ्गिरास्तथा याज्ञवल्क्योऽपि।

उपास्य पश्चिमां सन्ध्यां हुत्वाग्नींस्तानुपास्य च।
भृत्यैः परिवृतो भुक्त्वा नातिहृष्टश्चाथ संविशेत्॥

चकारो विश्वेदेवादिसमुच्चयार्थः। एतच्च पाकान्तरेण न दिवावशिष्टेन।

तथाच विष्णुपुराणे।

पुनः पाकमुपादाय साध्यमप्यवनीपते।
वैश्वदेवनिमित्तं वै पत्न्या सार्द्धं बलिं हरेत्॥

---

* यथा शूद्रता तद्वदित्यर्थः। † नातिहृष्टोऽथ इति पाठान्तरम्।

व्यासः ।

शुचौ देशे विविक्ते तु गोमयेनोपलेपिते ।
प्रागुदक्प्लवने चैव संविशेत्तु सदा बुधः ॥

तथा ।

मङ्गल्यमूर्णकुम्भन्तु शिरःस्थाने निधाय तु ।
वैदिकैर्गारुडैर्मन्त्रैरक्षाङ्कृत्वा स्वपेत्ततः ॥

विष्णुपुराणे ।

गच्छेच्छय्यामधिष्ठाय रात्रिसूक्तं जप्त्वा विष्णुं नमस्कृत्य सर्पाय सर्पभद्रं ते इत्येतच्छ्लोकद्वयं जप्त्वेष्टदेवतास्मरणङ्कृत्वा समाधिमास्थायान्यांश्च वैष्णवदैविकान्मन्त्रान्सावित्रीञ्जप्त्वा मङ्गलयुतिशब्दञ्च शृण्वन्दक्षिणाशिराः स्वपेदिति।

दक्षिणाशिरा इति प्रदर्शनार्थम् । अतएव

पुराणे ।

प्राच्यां दिशि शिरः शस्तं याम्यायामथवा नृप ।
सदैव स्वपतः पुंसो विपरीतन्तु रोगदम् ॥ इति ।

मार्कण्डेयः ।*

शून्यालये श्मशाने च न वह्निसमीपे न वेदसमासौ नाशुचिर्न नग्नो न विशीर्णखट्वायां न भूतयक्षगृहायतनेषु श्मशानवल्मीकमहावृक्षच्छायासु च इति ।

---

* शून्यालये श्मशाने च एकवस्त्रे चतुष्पथे । महादेवगृहे वापि मातृवेश्मनि न स्वपेदिति पुस्तकान्तरे पाठः ।

विष्णुः ।

नार्द्रपादः स्वपेन्न पलाशशयने न पक्वदारुक्लृप्ते न विधु-
इग्धक्लृप्ते नाग्निपुष्टे न पटसिक्तद्रुमजे न बालमध्ये
नारिमध्ये न धान्यगोगुरुहुताशसुराणासुपरि नोच्छिष्टे
न दिवेति ।

तथा ।

निद्रासमयमासाद्य ताम्बूलं वदनात्त्यजेत् ।
पर्य्यङ्कात्प्रमदां भालात्*तृणड्म्मुष्णि मस्तकात् ।
गदप्रमादयच्छाहिभयदाः सर्व्वदा इमे ॥

इति शयनविधिः ।

इह मदनपारिजाते मदनक्षितिपालदानजलरूढ़े ।
स्तवकस्तृतीय आसीदामोदाकृष्टपण्डितभ्रमरः ॥
मतिर्येषां शास्त्रे प्रकृतिरमणीया व्यवहृतिः
परं शीलं श्लाघ्यं जगति ऋजवस्ते कतिपये ।
चिरं चित्ते तेषां मुकुरतलभूते स्थितिमिया-
दियं व्यासारण्यप्रवरमुनिशिष्यस्य भणितिः ॥

इति पण्डितपारिजातभट्टारमल्लेत्यादिविरुदराजीविराजमानस्य
श्रीमदनपालस्य निबन्धे मदनपारिजाताभिधेये
तृतीयस्तवकः ।

---

* बालामिति पाठान्तरम् ।

चतुर्थः स्तवकः ।

अथ श्रवणानन्तरं प्राप्तगर्भाधानादिसंस्काराः । तत्र गर्भाधानोपयुक्तत्वेन प्रथममृतुकालो निरूप्यन्ते ।

याज्ञवल्क्यः ।

षोड़शर्त्तुनिशाः स्त्रीणां तासु युग्मासु संविशेत् ।
ब्रह्मचार्य्येव पर्व्वाण्याद्याश्चतस्रस्तु वर्ज्जयेत् ॥

स्त्रीणां षोड़शनिशा ऋतुः गर्भाधानयोग्यकालस्तत्रोक्तविधिना गच्छन् ब्रह्मचार्य्येव ।

चतुर्दश्यष्टमी चैव अमावस्या च पूर्णिमा ।
चत्वार्य्येतानि* पर्व्वाणि रविसंक्रान्तिरेव च ॥

मनुः ।

अमावास्यामष्टमीञ्च पौर्णमासीञ्चतुर्दशीम् ।
ब्रह्मचारी भवेन्नित्यमप्यृतौ स्नातको द्विजः ॥

तथा ।

तासामाद्याश्चतस्रश्च निन्दितैकादशी तथा ।
त्रयोदशी च शेषाः स्युः प्रशस्ता दशरात्रयः ॥

एकादशीत्रयोदश्यावृतोर्न† पञ्चस्य ।

हारीतस्तु ।

चतुर्थरात्रावपि गर्भाधानमिच्छति चतुर्थेऽहनि स्नातायां

---

* पर्व्वाण्येतानि राजेन्द्रेति पाठान्तरम् । † स तु प्रथमर्त्तुदिनमारभ्य एकादशनिशात्रयोदशनिशे त्याज्ये इत्यर्थः ।

युग्मासु च गर्भाधानं तदुपेतम् । ब्रह्मगर्भं सन्दधाति इति ।

तथा ।

शुद्धा भर्तुश्चतुर्थेऽह्नि स्नानेन स्त्री रजस्वला* ।
दैवे कर्म्मणि पित्र्ये च पञ्चमेऽहनि शुध्यति ॥ इति ।

तथा ।

ततश्चतुर्थ्यां स्त्रीगमनस्य परिहितप्रतिषेधत्वाद्विकल्पः स च व्यवस्थितः रजोनिवृत्तौ चतुर्थ्यां विधिस्तद्-निवृत्तौ प्रतिषेधः अनेनैवाभिप्रायेण ।

मनुः ।

रजस्युपरते साध्वी स्नानेन स्त्री रजस्वला । इति ।

साध्वी गर्भाधानादिविहितकर्म्मयोग्येत्यर्थः ।

याज्ञवल्क्यः ।

एवं गच्छन्स्त्रियङ्कामां मघां मूलञ्च वर्ज्जयेत् ।
सुस्थ इन्दौ सकृत्पुत्रलक्षणं जनयेत्पुमान् ॥

एवं सकृद्रात्रावेकवारमेव गच्छेदित्यर्थः । पुमानेकनियमयुक्तः अप्रतिहतपुंस्को भवेत् ।

ज्योतिःशास्त्रे ।

पित्र्यं पौष्णं नैर्ऋतं वा निधिरूपत्यक्षीति ।

पित्र्यं मघा पौष्णं रेवती नैर्ऋतं मूलम् ।

---

* अशुद्धा दैवपैत्र्ययोरिति क्वचित्पाठः ।

ऋतुगमने स्नानमाहापस्तम्बः ।

ऋतौ तु गर्भगङ्गित्वात्स्नानं मैथुनिनः स्मृतम् ।
अनृतौ तु सदा कार्य्यं शौचं मूत्रपुरीषवत् ॥
द्वावेतावशुची स्यातान्दम्पती शयनङ्गतौ ।
शयनादुत्थिता नारी शुचिः स्यादशुचिः पुमान् ॥

प्रसङ्गाद्रजस्वलाव्रतानि ।

तत्र वशिष्ठः ।

चिरात्रं रजस्वलाऽशुचिर्भवति । सा नाञ्जयान्नाभ्यञ्जा-
न्नापु स्नायादधः शयीत न दिवा सुप्यान्न रज्जुं प्रमृजेत्
दन्तान्नावधेन्न मांसमश्नीयान्न ग्रहान्निरीक्षेत न हसेत्
किञ्चिदाचरेन्नाञ्जलिना जलं पिबेन्न खर्व्वेण पात्रेण
लोहितायसेन वेति ।

खर्व्वो वामहस्तः । अयञ्च वामहस्तस्य निषेधः केवलस्यैव अथवा खर्व्वपात्रम् । लोहितायसं ताम्रम् ।

स्नानानन्तरं पुनरपि रजोदर्शने विशेषमाह हारीतः ।

रजस्वला यदि स्नाता पुनरेव रजस्वला ।
अष्टादशदिनादूर्ध्वमशुचित्वं न विद्यते ॥
एकोनविंशतेरूर्ध्वमेकाहं स्यात्ततो द्वयहम् ।
विंशत्यादित्युत्तरेषु चिरात्रमशुचिर्भवेत् ॥ इति ।

अष्टादशदिनादूर्ध्वाक् सप्तदशदिनाभ्यन्तरे इत्यर्थः । एवमुत्तरत्रापि । इयञ्च गणना रजोदर्शनदिनादारभ्य ।

यत्तूक्तम्।

चतुर्दशदिनादर्वागशुचित्वं न विद्यते। इति।

तत्तु स्नानप्रभृति इति न विरोधः। प्रौढ़यौवनायासु अष्टादशदिनाभ्यन्तरे रजोदर्शनेऽपि चिराच्चमशुचित्वम्।

इति ऋतुकालनिर्णयः।

अथ गर्भाधानम्।

तत्र विष्णुपुराणे।

ऋतावुपगमः शस्तः स्वपत्न्यां मन्त्रतो द्विजः। इति।

मन्त्र इति द्विजातिविषयः। तत्र मन्त्रा गोभिलेनोक्ताः। ऊर्द्धं चिराच्चं सम्भवे इत्येके। यदर्त्तुमती भवत्युपरतशोणिता तदा सम्भवकाले इत्युपक्रम्य दक्षिणेन पाणिना उपस्थमभिस्पृशेत्। विष्णुर्योनिं कल्पयत्वित्येतयर्चा गर्भं धेहि सिनीबालीति च समाहृचौ सम्भवतः।

स्त्रीणां बहुत्वे ऋतुयौगपद्ये गमनक्रममाह देवलः।

यौगपद्ये तु तीर्थानां विप्रादिक्रमशो व्रजेत्।

रक्षणार्थमपत्यानां ग्रहणक्रमशोऽपि च॥ इति।

तीर्थमृतुर्विप्रादिक्रमो वर्णक्रमः ग्रहणक्रमो विवाहक्रमः। ननु वर्णक्रमेणैव विवाहोऽपीति पुनरपि ग्रहणक्रमोपादानमनर्थकमिति चेन्नैवं प्रथमतः स्वजात्यादिक्रमेणोढदारस्य

दैवादन्यतरवर्णदारान्तरितस्य पुनस्तद्वर्णकन्यकापरिणीतस्य सवर्णापुत्रवतो दारेषु ऋतुकालयोगपद्ये विवाहक्रमेण गमनं नियम्यत इति ग्रहणक्रमोपादानस्य सार्थकत्वात् ।

पराशरः ।

ऋतुस्नातान्तु यो भार्यां सन्निधौ नोपगच्छति ।
घोरायां भ्रूणहत्यायां युज्यते नात्र संशयः ॥

अत्रासन्निधौ तु न दोषः । सन्निधानेऽपि सुप्तस्येवायं नियमः ।

यः स्वदारानृतुस्नातां सुप्तः सन्नोपगच्छति ।

इति स्मरणात् । अयञ्च ऋतुगमननियमोऽजातपुत्रस्यैव मनुना ज्येष्ठस्य प्राशस्त्याभिधानादितरेषां कामजत्वनिर्देशाच्च ।

ज्येष्ठेन जातमात्रेण पुत्री भवति मानवः ।
यस्मिन्नृणं सन्नयति येन चानन्त्यमश्नुते ।
स एव धर्म्मजः पुत्रः कामजानितरान्विदुरिति ॥

इति गर्भाधानम् ।

अथ पुंसवनम् ।

तत्र याज्ञवल्क्यः ।

गर्भाधानऋतौ पुंसः सवनं स्पन्दनात्पुरेति ।

पुंसवनमित्यनुवृत्तौ

पारस्करः ।

मासे द्वितीये वा यदहः पुंसां नक्षत्रेण चन्द्रमाः स्यादिति ।

पुंसां नक्षत्रेण पुंनक्षत्रेण तानि च रत्नकोषे दर्शितानि।

हस्तो मूलं श्रवणः पुनर्व्वसुर्मृगशिरस्तथा।

पुष्यः पुंसंज्ञितेषु कार्य्येषु ह्येतानि शुभानि धिष्ण्यानीति॥

बृहस्पतिस्तु जातगर्भे स्यन्दने पुंसवनमाह।

सवनं स्यन्दिते शिशाविति।

अत्र यथाशाखं व्यवस्था।

इति पुंसवनम्।

अथ सीमन्तोन्नयनम्।

गोभिलः।

प्रथमे गर्भे चतुर्थे मासीति।

बौधायनः।

अथ सीमन्तोन्नयनं मासि चतुर्थे षष्ठे पञ्चमे वेति।

लोकाक्षिः।

तृतीये गर्भमासे तु सीमन्तोन्नयनङ्कारयेत्। इति।

अत्र विशेषमाह शौनकः।

आपूर्य्यमाणे पक्षे यदा पुंसां नक्षत्रेण चन्द्रमा युक्तः

स्यादिति पुंसवनसीमन्तोन्नयने स्त्रीसंस्कारौ।

अतएव सकृत्कर्त्तव्याविति केचन।

पारस्करः।

पुंसवनसीमन्तोन्नयनमप्रथमगर्भे। इति।

तथाच देवलोऽपि ।

सकृच्च संस्कृता नारी सर्व्वगर्भेऽपि संस्कृतेति ।

हारीतः ।

सकृत्संस्कृतसंस्कारा* सीमन्तेन द्विजस्त्रियः† ।

यं यं गर्भं प्रसूयन्ते स गर्भः‡ संस्कृतो भवेत् ॥ इति ।

विष्णुः ।

सीमन्तोन्नयनं कर्म्म न स्त्रीसंस्कार इष्यते ।

कैश्चिद्§ गर्भस्य संस्कारात्गर्भं गर्भमयुञ्जते¶ ॥ इति ।

अत्रापि स्वस्वगृह्यानुसारेण व्यवस्था ।

अकृतसीमन्तायाः प्रसवे सत्यव्रतोक्तो विशेषः ।

स्त्री यदाऽकृतसीमन्ता प्रसूते तु कथञ्चन ।

गृहीतपुत्रा विधिवत्पुनः संस्कारमर्हति ॥ इति ।

इति सीमन्तोन्नयनम् ।

अथ जातकर्म्म ।

तत्र विष्णुः ।

जातकर्म्म ततः कुर्य्यात्पुत्रे जाते यथोदितम् । इति ।

यथोदितं स्वस्वगृह्योक्तविधिनेत्यर्थः । तच्च स्नानानन्तरम् ।

जाते पुत्रे पितुः स्नानं सचेलन्तु विधीयते ।

---

* सकृच्च कृतसंस्कारा इति पुस्तकान्तरे पाठः । † कुलस्त्रिय इति पुस्तकान्तरे पाठः ।

‡ सर्व्वेति पाठान्तरम् । § किञ्चिदिति पाठान्तरम् । ¶ गर्भं गर्भ इति पाठान्तरम् ।

इति संवर्त्तस्मरणात्। एतच्च स्नानं रात्रावपि भवति।

यथाह व्यासः।

रात्रौ स्नानं न कुर्व्वीत दानञ्चैव विशेषतः।
नैमित्तिकन्तु कुर्व्वीत स्नानन्दानञ्च रात्रिषु॥ इति।

नैमित्तिकदानान्यपि स एवाह।

ग्रहणोद्वाहसंक्रान्तियात्रार्त्तिप्रसवेषु च।
दानं नैमित्तिकं ज्ञेयं रात्रावपि न दुष्यति॥

जातकर्म्म च नाभिनालभेदनात्* पूर्व्वमेव।

तथाच मनुः।

प्राग्नाभिवर्द्धनात्पुंसो जातकर्म्म विधीयते। इति।

जैमिनिः।

यावन्न छिद्यते नालं तावन्नाप्नोति सूतकम्।
छिन्ने नाले ततः पश्चात्सूतकन्तु विधीयते॥

यच्च विष्णुधर्म्मोत्तरे।

अच्छिन्ननाभ्याङ्कर्त्तव्यं आद्यं वै पुत्रजन्मनि।
अशौचोपरमे कार्य्यमथवा नियतात्मभिः॥ इति।

तत्तु कर्त्तृप्रधानाद्यपेक्षया† वेदितव्यम्।

तथाच वैजवापः।

जन्मनोऽनन्तरङ्कार्य्यं जातकर्म्म यथाविधि।
दैवादतीतकालञ्चेदतीते सूतके भवेत्॥ इति।

---

* नाभिनालच्छेदनादिति पाठान्तरम्। † कर्त्तृप्रधानाद्यभाव इति पाठान्तरम्। कर्त्तुः प्रधानस्य पितुर्विदेशगमनादिना सन्निधानाभावे तदपेक्षयेत्यर्थः।

तच्च श्राद्धमामेन ।

अतएव प्रचेताः ।

स्त्री शूद्रः श्वपचश्चैव जातकर्म्मणि चाप्यथ ।

आमश्राद्धं सदा कुर्य्यादविधिना पार्व्वणेन तु ॥ इति ।

आमाभावे हेम्ना ।

तथाच व्यासः ।

द्रव्यालाभे द्विजालाभे प्रवासे पुत्रजन्मनि ।

हेमश्राद्धमकुर्व्वीत यस्य भार्य्या रजस्वला ॥

द्रव्याभावे आमद्रव्यालाभे यस्य भार्य्येत्ययं पक्षः श्राद्धसूत्रे व्याख्यास्यते । प्रतिग्रहश्च नाभिवर्द्धनात्पूर्व्वं तदूर्द्ध्वं वा ।

यथाह गर्गः ।

कुमारप्रसवे नाभ्यामच्छिन्नायां गुडतिलहिरण्यवस्त्र-

गोधान्यादिप्रतिग्रहेष्वदोषमेवदृष्ट्वैकं कुर्व्वत इति ।

सर्व्वेषां सकुल्यानां द्विपदचतुष्पदो धान्यानि हिरण्यानि दद्यात् ।

अशौचमध्येऽप्येतत्कार्य्यमित्याह

प्रजापतिः ।

अशौचे तु समुत्पन्ने पुत्रजन्म यदा भवेत् ।

कर्त्तुस्तात्कालिकी शुद्धिः पूर्व्वाशौचेन शुध्यति ॥ इति ।

यत्तु ज्योतिःशास्त्रे ।

मृदुध्रुवक्षिप्रचरेषु मेष्वेषामुदयेऽपि वा ।

गुरौ शुक्रेऽथवा केन्द्रे जातकर्म्म च नाम वा ॥ इति ।

तदैवाज्जातकर्म्मनामकरणोत्कर्षे* वेदितव्यम्। अनुत्कर्षे तु नायं नियमः। नित्यस्नानोत्तरभावित्वान्नैमित्तिकस्य।

इति जातकर्म्म।

अथ नामकरणम्।

तत्र मनुः।

नामधेयं दशम्यान्तु द्वादश्यां वास्य* कारयेत्।
पुण्ये तिथौ मुहूर्त्ते वा नक्षत्रे वा गुणान्विते॥

याज्ञवल्क्यः।

अहन्येकादशे नामेति।

भविष्यपुराणे।

नामधेयन्दशम्यान्तु केचिदिच्छन्ति पार्थिव।
द्वादश्यामपरे रात्रौ मासे पूर्णे तथा परे।
अष्टादशेऽहनि तथा वदन्त्यन्ये मनीषिणः॥

गृह्यपरिशिष्टे।

जननाद्दशरात्रे व्युष्टे† शतरात्रे संवत्सरे चेति।

---

* स्वकालादुत्तरकाले कर्त्तव्ये इत्यर्थः।

---

* वाथ कारयेदिति अन्यत्र पाठः। † गते।

शङ्खः ।

अशौचे तु व्यतिक्रान्ते नामकर्म्म विधीयते । इति ।
न चायं नियमः, तथाच नामधेयं दशम्यामित्यादिवचनविरोधात् । ततश्चाहन्येकादशे नामेत्यादीनां विवक्षितार्थत्वमेव तेनाशौचमध्येऽपि कार्य्यं स्वगृह्यानुसारेण वेति पक्षा व्यवस्थिता* विज्ञेयाः ।

शङ्खलिखितौ ।

दशम्यामुत्थाप्य पिण्डवर्द्धनं पितृणां तत्र सान्निध्यमिति श्रुतेः । ब्राह्मणे चाहुतिमग्र्यं पितृननुमान्य तदहरेव नामकरणं कुर्य्याद्देवतानक्षत्रादिसम्बद्धं पिता नाम कुर्य्यादन्यो वा कुलवृद्धयनुरूपं द्व्यक्षरं वा घोषवदाद्यन्तस्थं पुंसामीकारान्तं स्त्रीणामेवं कृते नास्मिन् शुचि तत्कुलं भवतीति ।

अयमर्थः । दशमेऽहनि सूतिकां पूर्व्वगव्याद्युत्थाप्य पिण्डवर्द्धनमिति नाम कर्म्म तत्कुर्य्यात् । तत्र चायं क्रमः । ब्राह्मणे पूर्व्वमाहुतिं पितृननुमान्याभ्युदयश्राद्धेन पूजयित्वा पिता तदभावे सान्निध्यादिना अन्यो नाम कुर्य्यात् । तत्र नियमः चतुरक्षरमित्यादि । वर्गद्वितीयचतुर्थान्यक्षराणि गकारघकारादीनि तान्यादौ कृत्वा यरलवा अन्तस्थास्तन्मध्ये कुर्य्यादिति ।

* व्यवस्थितविकल्पाः । । स्वरवर्णयुताद्यन्तस्थम् ।

वैजवापः ।

पिता नाम करोत्येकाक्षरं द्व्यक्षरं त्र्यक्षरं चतुरक्षरं परिमितञ्चेति ।

अत्र समसंख्या पुंसः ।

शङ्खः ।

अयुग्माक्षरमाकारान्तं स्त्रियै तद्धितमपि ।

ईकारान्तं स्त्रीणामिति स्वकुलसम्बद्धं कुर्य्यात् ।

तथाच शङ्खः ।

कुलदेवतासम्बद्धं पिता नाम कुर्य्यादिति ।

कुलसम्बद्धं देवतासम्बद्धं वेत्यर्थः ।

मनुः ।

मङ्गल्यं ब्राह्मणस्य स्यात्क्षत्रियस्य बलान्वितम् ।

वैश्यस्य धनसंयुक्तं शूद्रस्य तु जुगुप्सितम् ॥

मङ्गलबलधननिन्द्याप्रतिपादकानि क्रमेण नामानि भवन्तीत्यर्थः । यथा रुद्रशर्म्मा शक्तिपालो धनपुष्टो हीनदास इति ।

यमस्तूत्तरपदनियममाह ।

शर्म्मा देवश्च विप्रस्य वर्म्मा त्राता च भूभुजः ।

भूतिर्दत्तश्च वैश्यस्य दासः शूद्रस्य कारयेत् ॥

त्रातेति रक्षशब्दप्रदर्शनार्थम् । अत्र शक्तिपालेत्यादिशब्दा भवन्ति ।

इति नामकरणम् ।

अथ निष्क्रमणम् ।

भविष्यपुराणे ।

उत्तरार्द्धे मनुरपि ।

द्वादशेऽह्नि* राजेन्द्र शिशोर्निष्क्रमणं गृहात् ।
चतुर्थे मासि कर्त्तव्यं यथान्येषां मतं विभो ॥

अत्र विशेषमाह यमः ।

ततस्तृतीये† कर्त्तव्यं मासि सूर्यस्य दर्शनम् ।
चतुर्थे मासि कर्त्तव्यं शिशोश्चन्द्रस्य दर्शनम् ॥

लोकाक्षिः ।

तृतीये मासे आदित्यस्य दर्शनमिति ।

अत्रापि पूर्ववदेव‡ व्यवस्था ।

सुरेश्वरः ।

जीवभार्गवसौम्यानां शिशुनिष्क्रमणक्रिया ।
दिवसे शस्यते नित्यमायुर्वृद्धिर्बलं प्रजा ॥
अश्विनी रेवती हस्ता धनिष्ठा रोहिणी तथा ।
श्रवणं पुष्यसंयुक्तं मृगेणोत्तरफल्गुनी§ ॥
अनुराधोत्तराषाढा तथाचैव पुनर्व्वसुः ।
इमानि भानि शस्तानि शिशुनिष्क्रमणे विधौ ॥

इति निष्क्रमणम् ।

---

* नाम कुर्य्यादिति पूर्ववचनानुपपन्नान्वयः । † तृतीये मासि इति सामवेदिविषये ज्ञेयः । चतुर्थे मासि इति ऋग्वेदियजुर्वेदिविषये ज्ञेय इति स्मार्ताः । ‡ कुलानुसारिणी व्यवस्था । § मृगशिरसा सह उत्तरफल्गुनी ।

अथ कर्णवेधः ।

ज्योतिःशास्त्रे ।

कार्त्तिके पौषमासे* वा चैत्रे वा फाल्गुनेऽपि वा ।
कर्णवेधं प्रशंसन्ति शुक्लपक्षे शुभे दिने ॥
सुनक्षत्रे शुभे चन्द्रे सुस्थे शीर्षोदये शुभे ।
दिनच्छिद्रेऽव्यतीपाते विष्टिवैधृतिवर्जिते† ॥
गिरीरजातदन्तस्य मातुरुत्सङ्गसर्पिणः ।
सौचिको वेधयेत्कर्णौ सूच्या द्विगुणसूत्रया ॥
हस्ताश्विनीस्वातिपुनर्व्वसौ च
तिष्येन्दुचित्राहरिरेवतीषु ।
चन्द्रेऽनुकूले गुरुशुक्रवारे
कर्णौ तु वेध्यौ प्रवरेज्यलग्नेः ॥

अयञ्च कर्णवेधः कुलक्रमागतकाले कर्त्तव्यः ।

इति कर्णवेधः ।

---

* पौर्णमासे वा इति संस्कारमयूखे पाठः ।

† पौषादिविधिः मुख्यकाले कर्णवेधे विज्ञेयः अन्यच्च पौषादिनिषेधात् । शीर्षोदयो यथा

अजगोपतियुग्मञ्च कर्किधन्विस्थगास्तथा ।
निशासंज्ञाः स्मृताश्चैते शेषाश्चान्ये दिनात्मकाः ॥
निशासंज्ञाविमिथुनाः स्मृताः पृष्ठोदयास्तथा ।
शेषाः शीर्षोदया ह्येते मीनश्चोभयसंज्ञकः ॥

इति । दिनञ्च छिद्रञ्च दिनच्छिद्रं तस्मिन् छिद्रे अष्टमलग्ने छिद्राख्यमष्टमस्थानमिति स्मरणात् ।

† प्रवरे प्रशस्ते ज्यलग्ने बृहस्पतियुक्तलग्ने ।

अथान्नप्राशनम् ।

तत्र मनुः ।

षष्ठेऽन्नप्राशनं मासि यद्वेष्टं मङ्गलं कुले ।

लोकाक्षिः ।

षष्ठे मासेऽन्नप्राशनं जातदन्तेषु वेति ।

यमः ।

ततोऽन्नप्राशनं मासि षष्ठे कार्यं यथाविधि ।

अष्टमे वाथ कर्त्तव्यमिति ।

शङ्खः ।

संवत्सरेऽन्नप्राशनमिति । व्यवस्था च पूर्ववत्* ।

अत्र विशेषो मार्कण्डेयपुराणे ।

देवतापुरतस्तस्य धात्र्यात्सङ्गतस्य च ।

अलङ्कृतस्य दातव्यमन्नं पात्रे हिरण्मये ।

मध्वाज्यकनकोपेतं प्राशयेत्पायसं युतम् ॥

तदनन्तरं गिर्योर्जीविकापरीक्षाप्रकारमाह

स एव ।

देवाग्रतोऽथ विन्यस्य शालिभाण्डानि सर्व्वशः ।

शस्त्राणि चैव शास्त्राणि ततः पश्येत्तु लक्षणम् ॥

प्रथमं यत्स्पृशेद्बालस्तत्तो भाण्डं स्वयं तदा ।

जीविका तस्य बालस्य तेनैव च भविष्यति ॥ इति ।

इत्यन्नप्राशनम् ।

* कुलाचारानुरूपेणेत्यर्थः ।

अथ चूड़ाकर्म्म।

तत्र मनुः।

चूड़ाकर्म्म द्विजातीनां सर्व्वेषामेव धर्म्मतः।
प्रथमेऽब्दे तृतीये वा कर्त्तव्यं श्रुतिचोदनात्॥

यमः।

तथा संवत्सरे पूर्णे चूड़ाकर्म्म विधीयते।
द्वितीये वा तृतीये वा कर्त्तव्यं श्रुतिचोदनात्॥

शङ्खलिखितौ।

तृतीये वर्षे चूड़ाकर्म्म विधीयते।
द्वितीये वा तृतीये वा कर्त्तव्यं श्रुतिचोदनात्॥

शङ्खलिखितौ।

तृतीये चूड़ाकर्म्म पञ्चमे वा।

लोकाक्षिः।

तृतीयस्य वर्षस्य भूयिष्ठे गते चूड़ां कारयेत्। दक्षिणतः कमुजा वशिष्ठानामुभयतोऽत्रिकश्यपानां मुण्डा भृगवः पञ्चचूड़ा अङ्गिरसो राजिमेके मङ्गलार्थं शिखिनोऽन्ये च वटपत्रवद्यथा कुलधर्म्मं वा शुक्लपक्षस्य पुण्याहे पर्व्वणि चेति।

कमुजा चूड़ा राजिं केशपङ्क्तिं मङ्गलार्थमिति अन्ये तु मङ्गलार्थं शिखामात्रं वटपत्राकृतिं केचन कुर्व्वन्ति। अत्रापि यथाम्नायं व्यवस्था।

व्यासः ।

अश्विनी श्रवणा स्वाती चित्रा पुष्यपुनर्व्वसू ।
धनिष्ठारेवतीज्येष्ठामृगहस्तेषु कारयेत् ॥

चौरमिति शेषः ।

तथा ।

नक्षत्रे न तु कुर्व्वीत यस्मिञ्जातो भवेन्नरः ।
न प्रौष्ठपद्योः कार्य्यं नैवाग्नेये च भारत ।
दारुणेषु च सर्व्वेषु दुष्टतारांश्च वर्ज्जयेत् ॥

अन्ये सत्तिथिवारादयो विशेष उपनीयते तत्प्रकरणोक्ता अत्र द्रष्टव्याः ।

इति चूडाकर्म्म ।

अथ स्त्रीसंस्काराः ।

तत्र मनुः ।

अमन्त्रिता तु कार्य्या च स्त्रीणामाहदशेषतः ।
संस्कारार्थं शरीरस्य यथाकालं यथाक्रमम् ॥

आहज्जातकर्म्मादिक्रिया । यथाक्रममित्यभिधानात् क्रमातिक्रमो न कर्त्तव्य इत्युक्तं भवति ।

अतएव कालातिक्रमणे कात्यायनेन प्रायश्चित्तमभिहितम् ।

देवतानां विपर्य्यासे जुहोतिषु कथं भवेत् ।
सर्व्वप्रायश्चित्तं हुत्वा क्रमेण जुहुयात्पुनः ॥

संस्कारा अतिपत्येरन् स्वकालाच्चेत्कथञ्चन।
हुत्वा तदेव कर्त्तव्या ये तूपनयनादधः॥

सर्व्वप्रायश्चित्तमपि स एवाह।

सर्व्वप्रायश्चित्तञ्च पञ्चभिः प्रत्यृचं त्वन्नो अग्न इति।
द्वाभ्यामयाश्चाग्नेयेति शतमुत्तममिति वेति।

उपनयनकालातिपत्तौ तु व्रात्यस्तोमाद्येव। एतेष्वेकैकलोपे पादकृच्छ्रः चौड़लोपेष्वर्द्धकृच्छ्रम्।

स्त्रीसंस्कारे गोभिलो विशेषमाह।

तूष्णीमेताः क्रियाः स्त्रीणां मन्त्रेण तु होम इति।

अथ विद्यारम्भः।

तत्र मार्कण्डेयः।

प्राप्तेऽथ पञ्चमे वर्षे अप्रसूते जनार्द्दने।
षष्ठीम्प्रतिपदञ्चैव वर्জ्जयित्वा तथाष्टमीम्॥
रिक्तां पञ्चदशीञ्चैव सौरभौमदिनं तथा।
एवं सुनिश्चिते काले विद्यारम्भन्तु कारयेत्॥
पूजयित्वा हरिं लक्ष्मीं देवीञ्चैव सरस्वतीम्।
स्वविद्यासूत्रकारांश्च स्वां विद्याञ्च विशेषतः॥
एतेषामेव देवानां नाम्ना तु जुहुयाद्घृतम्।
दक्षिणाभिर्द्विजेन्द्राणां कर्त्तव्यञ्चाच पूजनम्॥
प्राङ्मुखो गुरुरासीनो वारुणाभिमुखं शिशुम्।

अध्यापयेत प्रथमं द्विजाग्रीर्भिः प्रपूजितम् ॥

ततःप्रभृत्यनध्यायान्वर्ज्जनीयानि* वर्ज्जयेदिति ॥

अस्य गिरोश्च कामचारवादभक्षः† ।

यथाह गौतमः ।

प्रागुपनयात्कामचारवादभक्ष इति ।

कामचारोऽप्यपतनीयकर्म्मस्वेव । तत्र पादो बालेषु दातव्य इत्यादिप्रायश्चित्तस्मरणात् ।

इति गर्भाधानादिसंस्काराः ।

अथ तृतीयाश्रमः ।

ब्रह्मचर्य्याश्रमो गृहस्थाश्रमश्चेति द्वावाश्रमौ धर्म्मौ विस्तरेण प्रतिपादितौ । अथ तृतीयाश्रमः प्रस्तूयते ।

तत्र गुरुः ।

गृहस्थस्तु यदा पश्येद्वलीपलितमात्मनः ।

अपत्यस्यैव चापत्यं तदारण्यं समाश्रयेत् ॥

पुत्रे दारान्विनिक्षिप्य तया वानुगतो वने ।

अग्नीनुपाचरेन्नित्यं वन्यमाहारमाहरेत् ॥

यदाहारो भवेत्तेन पूजयेत्तिदेवताम् ।

---

* वर्ज्जनीयानिति पाठान्तरम् । † कामचारवादेन यदृच्छाचारानुगुण्येन भक्षः भक्षणं निषिद्धान्नादेरिति शेषः ।

तेनैव पूजयेद्विद्वानतिथिं समुपागतम् ॥
ग्रामादाहृत्य वाश्नीयादष्टौ ग्रासान् समाहितः।
स्वाध्यायञ्च तथा कुर्य्याज्जटाश्च बिभृयात्तथा ॥
तपसा शोषयेन्नित्यं स्वकञ्चैव कलेवरम्।
आर्द्रवासास्तु हेमन्ते ग्रीष्मे पञ्चतपास्तथा ॥
प्रावृष्याकाशशायी* च नक्ताशी च सदा वसेत्†।
चतुर्थकालिको‡ वा स्यात् षष्ठकालिक§ एव वा ॥
कृच्छ्रैर्वापि नयेत्कालं ब्रह्मचर्य्यञ्च पालयेत्।
एवं नीत्वा वने कालं द्विजो ब्रह्माश्रमी¶ भवेत् ॥ इति।

अथ चतुर्थाश्रमः।

तत्र‖ प्रथमं चैवर्णिकेषु कोऽधिक्रियत** इति विचार्य्यते। तत्र छन्दोगसूत्रकारः।

त्रयाणामधिकृतिः।

ब्राह्मणः क्षत्रियो वाथ वैश्यो वा प्रव्रजेद्गृहात्।

धर्म्मविप्लवावपि।

ब्राह्मणः क्षत्रियो वैश्यस्ततो गच्छेदनङ्कृती।
सन्न्यसेदासनाशान्तः सर्व्वभूतदयापरः ॥ इति।

---

* अनाहृतस्थलशायी। † भवेदिति पाठान्तरम्। ‡ एकदिनोपवासानन्तरं नक्ताभोजनम्। § दिनद्वयाभोजनानन्तरं नक्ताभोजनम्। ¶ वानप्रस्थाश्रमी। ‖ चतुर्थाश्रमे। ** शास्त्रेरिति शेषः।

त्रैवर्णिकस्याधिकारमेतानि वाक्यानि विदधति। अतस्त्रैवर्णिकानामपि तुर्य्याश्रमेऽस्त्येवाधिकारः। या तु जाबालश्रुतिः। ब्राह्मणाः प्रव्रजन्तीति तस्येयं गतिः ब्राह्मणशब्दः प्रदर्शनार्थः। अतः क्षत्रियवैश्यावप्युपलक्षयति तेन न विरोध इति। अथ ब्रह्म वेदस्तन्निष्ठस्तदधीतवान् ब्राह्मण इति व्युत्पत्त्या ब्राह्मणशब्दो वर्णत्रयपरः। एतेन

आत्मन्यग्नीन् समारोप्य ब्राह्मणः प्रव्रजेद्गृहात्।

इत्यादि मन्वादिवचनान्यपि व्याख्यातानि।

यच्च दक्षत्रेयवचनम्।

मुखजानामयं धर्म्मो यद्दण्डोल्लिङ्गधारणम्।

बाहुजातोरुजातानामयं धर्म्मो न विद्यते॥ इति।

तथा।

गतिस्तुर्य्याश्रमे नास्ति बाहुजोरुजयोः क्वचित्।

तुर्य्याश्रमे गतिः प्रोक्ता मुखजानां स्वयम्भुवा॥ इति।

एतच्च वचनद्वयं वस्तुतो न विरुध्यते। मुखजाः ब्राह्मणाः। बाहुजाः क्षत्रियाः। ऊरुजाः वैश्याः। परेषामयं धर्म्मो लिङ्गधारणात्मको न विद्यते। लिङ्गं लक्षणं चिह्नं त्रिदण्डैकदण्डरूपम्।

तथाच दक्षः।

मेखलाजिनदण्डेन ब्रह्मचारीति लक्ष्यते।

गृहस्थो यष्टिवेदाद्यैर्नखरोमैर्वनाश्रितः।

त्रिदण्डेन यतेश्चैव लक्षणानि पृथक् पृथक्॥ इति।

त्रिदण्डग्रहणमेकदण्डस्यापि प्रदर्शनार्थम्। एवंविधं क्षत्रिय-वैश्ययोर्नेति दण्डधारणनिषेध एव नाश्रमनिषेधः। तथाच गतिस्तुर्याश्रमे नास्तीत्यस्याप्ययमर्थः गतिर्ज्ञानं सर्वे गत्यर्था ज्ञानार्था इति स्मरणात्। ज्ञानञ्च ज्ञापकनिष्ठाद्यमतएव ज्ञापककार्य्यं तत्तेन ज्ञापकरूपेण कार्य्येण कारणं लक्ष्यते। तथाचैतदुक्तं भवति क्षत्रियवैश्ययोर्ज्ञापकं दण्डधारणं नास्तीति लिङ्गनिषेध एव नत्वाश्रमनिषेध इति दण्डधारणं वहिरङ्गं विषयविराग एव मुख्यः विरागाभावे अधिकाराभावात्। यच्च धर्म्मविहितावेव वचनान्तरम्।

सन्यसेद्ब्राह्मणः सम्यक् वानप्रस्थो भवेन्नृपः।
वानप्रस्थो भवेद्वैश्य एवं वर्णक्रमः स्मृतः॥ इति।

अत्रापि ब्राह्मणः सम्यक् न्यसेदिति सम्यक्शब्दोपादानात् ब्राह्मणस्य वहिरङ्गभूतदण्डधारणोपेत एव सन्यासो न तु तद्रहित इति गम्यते। तथाच क्षत्रियवैश्ययोस्तद्रहित आश्रमो भवतीत्यर्थादुक्तभवति अन्यथा छन्दोगसूचकारादिवचनविरोधापत्तेः। अयञ्च तात्पर्य्यार्थः। अबाधेनोपपत्तौ बाधेन न्याय्य इति न्यायेन श्रुतिस्मृतिवाक्यविरोधपरिहाराय विधिवाक्यानामाश्रमस्वरूपविधौ* तात्पर्य्यम्। निषेधवाक्यानान्तु दण्डग्रहणमात्रनिषेधे तात्पर्य्यम्। तस्मात् क्षत्रियवैश्ययोर्दण्डग्रहणमात्रनिषेधो न त्वाश्रमनिषेध इति। एवं प्राप्तेऽभिधीयते।

श्रुतिस्मृतिविरोधे तु श्रुतिरेव गरीयसी। इति।

अतः श्रुत्यनुसारेण व्यवस्थाच विधीयते। ब्राह्मणाः प्रव्रजन्ति इति श्रूयन्ते। अत्र ब्राह्मणशब्दस्य ब्राह्मणत्वं जातिर्वाचोऽर्थः*। ब्राह्मणोद्देशेन च प्रव्रज्या अभिधीयते। उद्देश्यविशेषणमेवाविवक्षितं हविरुभयत्ववदुद्देश्यमविवक्षितं† तस्मादिह ब्राह्मणोद्देशेन सन्यासविधानादुद्देश्यस्य ब्राह्मणत्वस्येह विवक्षितत्वात्तस्यैव प्रव्रज्याधिकारो नान्यस्य। ननु यदि भवेद्ब्राह्मणशब्दस्य ब्राह्मणत्वं जातिर्वाचार्थः तर्हि तस्योद्देश्यत्वेन विवक्षितत्वात्क्षत्रियवैश्ययोः प्रव्रज्यायां माभूदधिकारः न च तथा ब्राह्मणत्वजातिरर्थः। अपि तु ब्रह्म वेदस्तन्निष्ठास्तदध्ययनवन्तो ब्राह्मणा इति वेदाध्ययनवत्त्वमेकोऽनुगतो धर्मः। स च ब्राह्मणशब्दस्यार्थः। तथाच वेदाध्ययनवत्त्वरूपेणैकेनोपाधिना ब्राह्मणक्षत्रियवैश्यास्त्रयोऽपि क्रोडीभूताः भवेयुः। एवञ्च ब्राह्मणोद्देशेन प्रव्रज्याविधानात्त्रयाणामपि वर्णानां तत्राधिकारोऽस्विति चेन्नैवम्। यथा क्षत्रियशब्दस्य क्षत्रियत्वं वैश्यशब्दस्य वैश्यत्वं गोशब्दस्य च गोत्वमर्थः तथा ब्राह्मणशब्दस्यापि ब्राह्मणत्वमेवार्थ इति शेषः जैमिनिबादरायणादिभिरङ्गीकृतं तद्व्याहन्येत। तथोक्तव्याघातभयात् ब्राह्मणशब्दस्य ब्राह्मणत्वं वेदाध्ययनवत्त्वं वोभयमिति वाच्यत्वेन परिकल्पेत तदन्यायश्चानेकार्थ इति तान्त्रिकैरनेकार्थत्वमेकशब्दस्य निषिद्धं तेन न्यायेन सह विरोधः प्रसज्यते।

---

* अर्थात् ब्राह्मणत्वजात्यवच्छिन्नव्यक्तिर्वाच्या। † बहुषु पुस्तकेषु एकरूपपाठदर्शनात्

अथैवं ब्रूषे अन्यायश्चानेकार्थत्वमिति न्याये जाग्रत्यपि गवादिशब्दानां यथानेकार्थत्वमेवं ब्राह्मणशब्दस्यापि अनेकार्थत्वमस्तिति। न चैतदुचितमगतिका ह्ीयं गतिर्यदनेकशक्तिपरिकल्पनयानेकार्थत्वस्वीकरणं शब्दार्थज्ञाने हि वृद्धव्यवहारः प्रमाणम्। वृद्धाश्च गवादिशब्दानामनेकशक्तिकल्पनयाप्यनेकार्थत्वमङ्गीकुर्व्वते न ब्राह्मणशब्दस्य। अतएवाभिधानकारैरपि गवादिशब्दा अनेकार्थवर्गे परिगणितास्तेषा*मपि व्यवहारः शब्दश्लेषादिष्वेव शास्त्रं निर्णीय शास्त्रार्थपरिज्ञाने तु प्रसिद्धस्यैव ग्रहणं नेतरस्य† इतरस्यापि ग्रहणे गोपशुविधायकवाक्येऽपि सास्नाद्युपेतगोपिण्डव्यतिरिक्तस्यापि ग्रहणं स्यान्न च गृह्यते। तस्माच्छास्त्रार्थनिर्णयेषु प्रसिद्धार्थस्यैव ग्रहणं युक्तं विपरीतार्थद्योतकवाक्यशेषाभावादतोऽनेकार्थशक्तिकल्पनादोषभयाद्ब्राह्मणशब्दस्य ब्राह्मणत्वजातिरेवार्थः। ननु च जायमानो वै ब्राह्मणस्त्रिभिर्ऋणवान् जायत इत्यत्र ब्राह्मणशब्दो यथा वर्णत्रयपर एवमत्रापीत्यस्तिति चेन्नैवम्। दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यात्तथाहि ब्रह्मचर्य्येण ऋषिभ्यो यज्ञेन देवेभ्यः प्रजया पितृभ्य इति वाक्यशेषे ब्रह्मचर्य्यादिभिर्ऋष्यादृणत्रयापकरणप्रतीतेर्ब्रह्मचर्य्यादिषु च त्रैवर्णिकस्याधिकारात्। फलचमसवन्मुख्यान्तरेण‡ जायमानो वै ब्राह्मण इत्यत्रापि त्रैवर्णि-

---

* अनेकार्थानाम्। † अप्रसिद्धस्य। ‡ फलचमसवत् प्रीङ्गातॄणां भक्ष्यः फलचमस इत्यत्र ह्रीचादीनामपि भक्षणाकाङ्क्षितत्वात् यथा प्रीङ्गाद्यपदं ह्रीचादिग्राहकं तद्वदित्यर्थः।

कानुप्रवेशाद्युज्यते तत्र चैवर्णिकपरत्वम्। प्रकृते तु वाक्यशेषाद्यभावात्तत्रैवान्यो ब्राह्मणशब्देन प्रत्याख्यास्यते* ततः पूर्वमेव लब्धार्थिकाया रूढेः प्राबल्यादनुपपत्त्यभावाच्च रूढ्या ब्राह्मणत्वमेव प्रत्याय्यते।

अतश्च प्रथमप्रतीतब्राह्मणोद्देशेन प्रव्रज्याविधेश्चरितार्थत्वात् न चरमप्रतीतयौगिकार्थस्वीकरणमुचितम्। ततश्च औडुम्बरीं स्रष्टीङ्गायेत् इति श्रुत्या विरुद्धमौडुम्बरी† सर्वा वेष्टयितव्येति स्मृतिवचनं यथा विरोधाधिकरणे‡ अप्रमाणमित्युक्तं एवं ब्राह्मणाः प्रव्रजन्तीति जाबालश्रुतिविरुद्धं तत्र त्रयाणां वर्णानां वेदमधीत्य चत्वार आश्रमा इत्यादिकं स्मार्त्तवचनजातमप्रमाणमेव स्मार्त्तवचननिचयस्य सर्व्वथा प्रामाण्यपरिजिहीर्षया श्रुत्यनुकूलएवार्थः परिकल्पनीयः त्रयाणां वर्णानां वेदमधीत्य चत्वार आश्रमा इति छन्दोगसूत्रस्यायमर्थः। त्रयाणां वर्णानां यथोचितं चत्वार आश्रमा इति। औचित्यं च श्रुतिविरोधाद्ब्राह्मणस्यैव तुर्य्याश्रमाधिकारविधौ नान्यथा§।

त्रैवर्णिकानां सन्यासो विद्यते नात्र संशयः।
शिखायज्ञोपवीतानां त्यागपूर्व्वैकदण्डयुक्॥ इति

ब्रह्माण्डपुराणवचनमपि छन्दोगसूत्रेण समानार्थः।

---

* निषिद्ध्यते। † तामयी प्रतिमा। ‡ विरोधमधिकृत्य यत्र विचार्य्यते तद्विरोधाधिकरणम्। § श्रुतिविरोधाद्ब्राह्मणमात्रस्य चतुर्थाश्रमाधिकारविधाने औचित्यञ्च न अन्यथा क्षत्रियादिसाधारण्येनेत्यर्थः।

यच्च ब्रह्मवैवर्त्तवचनम्।

वैराग्योत्पत्तिमात्रे च सन्यासे परियुज्यते।

रागवान्न तु विप्रोऽपि वेदवेदाङ्गवित्तमः॥ इति।

वेदवेदाङ्गवित्तमोऽपि विप्रो रागवांश्चेत्स सन्यासे न परियुज्यत इत्यन्वयः। एवञ्च विप्रस्य विरक्तस्यैवाधिकारोऽभिहितो भवेन्न क्षत्रियादेः।

यच्च स्मृत्यन्तरम्।

ऋणत्रयमपाकृत्य निर्ममो* निरहङ्कृतिः।

ब्राह्मणः क्षत्रियो वाथ वैश्यो वा प्रव्रजेद्गृहात्॥

इत्यस्यायमभिप्रायः गृहात्प्रव्रजेत् वानप्रस्थाश्रमङ्गच्छेत्। प्रव्रज्याशब्दो यद्यपि सन्यासे रूढ़स्तथापि श्रुतिविरोधपरिहारार्थमत्र तृतीयाश्रमपरः अस्यापि† वैराग्यहेतुकत्वात्‡। यदा ब्राह्मणः स्ववृत्तावजीवन् क्षत्रियवृत्तिमाश्रितः। तत्राप्यजीवन् वैश्यवृत्तिं ततश्च तामापदं निस्तीर्य्यापि न वर्णान्तरवृत्तिं परित्यजति किन्तु तत्रैव वृत्तावस्थितः तदा तत्तत्क्षत्रियादिवृत्तिः क्षत्रिय इति वैश्य इति च व्यपदिश्यते§ शास्त्रानभ्यनुज्ञानकालेऽपि क्षत्रियादिवृत्तिनिरतत्वात् ततः सोऽपि प्रव्रजेद्गृहादिति प्रव्रज्याधिकारं दर्शयति। अतएव

---

* ममतामून्यः। † वानप्रस्थस्यापि। ‡ विषयविरागजन्यत्वात्। § क्षत्रियवृत्त्युपजीवी ब्राह्मणः क्षत्रियत्वेन व्यपदिश्यते एवं वैश्यवृत्त्युपजीवी ब्राह्मणः वैश्यत्वेन व्यपदिश्यते

ब्राह्मणः क्षत्रियो वाथ वैश्यो वा प्रव्रजेद्गृहात्।

इत्यथशब्द उपात्तः। ब्राह्मण एव अनन्तरं क्षत्रवृत्त्या श्रवणात् क्षत्रियः अथ वैश्य इत्यानन्तर्यप्रतिपादनादयमर्थो गम्यत इत्यर्थः। एतेन

ब्राह्मणः क्षत्रियो वैश्यस्तपो गच्छेदनङ्कृती।

सख्यसेद्वाथ वा शान्त

इत्येतदपि व्याख्यातम्। एवञ्च मनुदक्षाद्येयादिवचनान्यथानुकूल्यानि नेयानि।

यच्च जड़भरतम्प्रत्युपदेशः

पैङ्गिरहस्ये।

यदि मृत्योः परं शान्तमनामयं शाश्वतं पदमिच्छुरसि तत्परमहंसो भवाहेति।

अत्रेदं चिन्त्यं किं जड़भरतं प्रत्येवोपदेश उत लक्षणया क्षत्रियमात्रम्प्रति। आद्ये जड़भरतस्यैवेति नेतरक्षत्रियप्राप्तिः। किञ्च जड़भरतोऽपि प्रैषोच्चारणपूर्व्वकमाश्रमं* न गृहीतवान् इति न क्वापि श्रूयते। ततो ब्राह्मणाः प्रव्रजन्ति इति एतदनुरोधात् परमहंसो भवेत्यस्यायमर्थः परमहंस इव निर्ममो भवेति। नापि द्वितीयः तत्र हि लक्षणा सा च न युक्ता न विधौ लक्षणेति भट्टगुरुप्रभृतिभिर्विधौ लक्षणानिषेधात्। विधि-

* ब्रह्मसूत्रमहंसेव विहितवान् विहितमूत्रं त्यजेदित्यारुणिश्रुत्युक्तमन्त्रोच्चारणपूर्व्वकमाश्रमम्।

रिति वदन् वादी प्रष्टव्यः किं विशिष्टविधिः उत प्राप्ते कर्म्मण्यधिकारिविधिरिति।

पक्षद्वयेऽपि* लक्षणाप्रसक्तिर्दुर्व्वारा। ननूद्देश्ये लक्षणा न विधेये अतो न दोष इति चेत्तर्हि लक्षणोद्देश्येऽपि न युक्तेति ब्रूमः। तथाहि सम्बन्धानुपपत्तिभ्यां† हि लक्षणा। न चानुपपत्तिः पूर्व्वोक्तरीत्या वाक्यस्यार्थान्तरपरतयाप्युपपत्तेः‡। या च जाबालिश्रुतिर्जनकयाज्ञवल्क्यसंवादे तत्र परमहंस-रामसंवर्त्त कारुणि श्वेतकेतु दुर्व्वासो रिभु निदाघ जड़भरत दत्तात्रेय रैवतकप्रभृतय इति। अत्रापि विधायकप्रत्ययाभावात्§ परमहंससदृशधर्म्मवन्त इति। अहङ्कारममतयोरभावात्परमहंसा इति व्यपदिश्यन्ते। तस्मात्त्रिदो ब्राह्मणस्यैवाधिकार इति।

अथ यतिधर्म्माः।

तत्र याज्ञवल्क्याः।

सर्व्वभूतहितः शान्तस्त्रिदण्डी सकमण्डलुः।
एकावासः¶ परिव्रज्य भिक्षार्थी ग्राममाश्रयेत्॥

त्रिदण्डीत्यनेनैकदण्डोऽपि गृह्यते।

---

* विशिष्टविधिपक्षे अधिकारिविधिपक्षेऽपीत्यर्थः। † शक्यसम्बन्धतात्पर्य्यानुपपत्तिभ्यामित्यर्थः। ‡ त्वत्रियवत्त्युपजीवित्वरूपार्थान्तरस्वीकारेणाप्युपपत्तेरित्यर्थः। § विधि

अनेनैवाभिप्रायेण मनुः ।

वाग्दण्डोऽथ मनोदण्डः कर्मदण्डस्तथैव च ।
यस्यैते नियताः दण्डाः स त्रिदण्डीति कथ्यते ॥

बौधायनः ।

एकदण्डी त्रिदण्डी वेति ।

चतुर्विंशतिमते ।

एकदण्डी त्रिदण्डी वा सर्वसङ्गविवर्जितः ।

ते च दण्डाः वैष्णवाः ।

तथाच स्मर्यते ।

प्राजापत्येष्वनन्तरं त्रीन् वैष्णवदण्डान्मूर्ध्नप्रमाणान्त्रिगुणेन पाणिना धारयेत् । सत्येन सोदकं कमण्डलुमिति ।

वशिष्ठः ।

सुण्डोऽममोऽपरिग्रह इति ।

सशिखान् केशान्निकृत्य विसृज्य यज्ञोपवीतमिति काठकश्रुतिः ।

तथा परिशिष्टेऽपि ।

अथ यज्ञोपवीतमप्सु जुहोति भूः स्वाहेत्यथ दण्डमादत्ते सखे मा गोपायेति ।

देवलः ।

काषायी मुण्डस्त्रिदण्डी कमण्डलुपवित्रपादुकासनकन्थामात्र इति ।

कण्वः।

एकरात्रं वसेद्ग्रामे नगरे पञ्चरात्रकम्।
वर्षाभ्योऽन्यत्र वर्षासु मासांस्तु चतुरो वसेत्॥

मत्स्यपुराणे।

अष्टौ मासान्विहारः स्याद्यतीनां संयतात्मनाम्।
एकत्र चतुरोमासान्वार्षिकान्निवसेत्पुनः॥
अविमुक्तप्रविष्टानां विहारस्तु न विद्यते।
न देहो भविता तत्र दृष्टं शास्त्रे पुरातने॥ इति।

मनुः।

विधूमे सन्नमुषले व्यङ्गारे भुक्तवज्जने।
वृत्ते शरावसम्पाते नित्यं भिक्षां यतिश्चरेत्*॥
एककालञ्चरेद्भिक्षां प्रसज्जेन्न तु विस्तरे।
भैक्षप्रसक्तो हि यतिर्विषयेष्वपि मज्जति॥

तत्राशक्तं प्रति वशिष्ठः।

ब्राह्मणकुले वा यल्लभेत तद्भुञ्जीत सायम्प्रातर्मधुमांस-
वर्ज्जमिति। तथा सप्तागाराण्यसङ्कल्पितानि चरेत्।

संवर्त्तः।

अष्टौ भिक्षाः† समादाय स मुनिः पञ्च सप्त वा।

---

* विधूम इत्यादि विगतपाकधूमे निवृत्तावहनमुषले निर्व्वाणपाकाङ्गारे गृहस्थपर्य्यन्त-भुक्तवज्जने उत्सृष्टशरावेषु त्यक्तेषु सर्व्वदा यतिर्भिक्षां चरेत्। एतच्च दिनशेषमुहूर्त्तचतुष्टय-सायाह्नोपलक्षणम्। यथाह याज्ञवल्क्यः। अप्रमत्तश्चरेद्भैक्षं सायाह्ने नाभिसन्धितः इति

अद्भिः प्रक्षाल्य ताः सर्व्वास्ततोऽग्नीयाच्च वाग्यतः ॥
यथोक्तान्यपि कर्म्माणि परिहाय द्विजोत्तमः ।
आत्मज्ञाने समाचत्त वेदाभ्यासे च यत्नवान् ॥

अत्र वेदः प्रणवः ।

अतएव स्मृत्यन्तरम् ।

एकाक्षरं परं ब्रह्म प्राणायामः परं तपः ।
उपवासात्परं भैक्ष्यं दया दानाद्विशिष्यते ॥ इति ।

तथा ।

नाभिनन्देत मरणं नाभिनन्देत जीवनम् ।
कालमेव प्रतीक्षेत निर्व्वेशभृतको* यथा ॥
अतिवादांस्तितिक्षेत† नावमन्येत कञ्चन ।
न चेमं देहमाश्रित्य वैरङ्कुर्व्वीत केनचित् ॥

याज्ञवल्क्यः ।

यतिपात्राणि मृद्वेणुदार्व्वलाबुमयानि च ।
सलिलं सुचिरे‡ तेषां गोबालैश्चावकर्षणम् ॥

इयञ्च शुद्धिर्भिक्षाचरणादिप्रयोगाङ्गभूता न पुनरमेध्याद्युपहतिविषया । अमेध्याद्युपहतौ तु द्रव्यशुद्धिप्रकरणे वक्ष्यमाणमनुसन्धेयम् । अतश्चैतदुक्तं भवति । यदा भिक्षाचरणादिकङ्कर्म्म करिष्यमाणस्तदा तत्कर्म्मोपयुक्तमृदादिपात्राणि गोबालैश्चावकृष्य प्रक्षाल्य तत्कर्म्म कुर्य्यादिति ।

* निर्व्वेशं वेतनं भृतको दासः । † अप्रियोक्तिं सहेत । ‡ चिरतरस्थायिपात्रे ।
§ गोबालैः मार्ज्जनरूपा ।

मनुरपि ।

अतैजसानि पात्राणि तस्य स्युर्निर्व्रणानि च ।
तेषामद्भिः स्मृतं शौचञ्चमसानामिवाध्वरे ॥

भोजनमपि पात्रान्तराभावे तत्रैव कार्य्यम् ।

तथाच देवलः ।

तद्वैच्यं गृहीत्वैकान्ते* तेन पात्रेणान्येन वा तूष्णीं भुञ्जीतेति ।

एवङ्कुर्व्वतः फलमाह

याज्ञवल्क्यः ।

सन्निरुद्धेन्द्रियग्रामं रागद्वेषौ प्रहाय च ।
भयं हित्वा च भूतानामृतीं† भवति द्विजः ॥ इति ।

इह मदनपारिजाते मदनक्षितिपालदानजलरूढ़े ।
स्तवकश्चतुर्थ आसीदामोदाकृष्टपण्डितभ्रमरः ॥
मतिर्येषां शास्त्रे प्रकृतिरमणीया व्यवहृतिः
परं शीलं श्लाघ्यं जगति ऋजवस्ते कतिपये ।
चिरं चित्ते तेषां सुकृतलभूते स्थितिमिया-
दियं व्यासारण्यप्रवरमुनिशिष्यस्य भणितिः ॥

इति पण्डितपारिजातभट्टारमल्लेत्यादिविरुदराजीविराजमानस्य श्रीमदनपालस्य निबन्धे मदनपारिजाताभिधेये चतुर्थस्तवकः ।

पञ्चमः स्तवकः ।

उक्ता वर्णाश्रमधर्म्मा अधुना तद्धर्म्मसंकोचे सति तेषामशौच-कालो निरूप्यते । तत्र च प्रथमं गर्भस्रावादिकालः ।

मासचतुष्टयाभ्यन्तरे स्रावः पञ्चमषष्ठयोश्च पातः ।

सप्तमादिषु प्रसवः ।

तथाच स्मृत्यन्तरे ।

आचतुर्थाद्भवेत्स्रावः पातः पञ्चमषष्ठयोः ।

अत ऊर्द्ध्वं प्रसूतिः स्याद्गर्भाहं सूतकं भवेत् ॥ इति ।

तत्र मासत्रयादर्व्वाक् स्रावे त्रिरात्रमशौचम् । स्रंसने गर्भस्य त्र्यहं चेति गौतमस्मरणात् ।

मरीचिरपि ।

गर्भस्रावे यथामासमचिरे तूत्तमे त्रयम् ॥

राजन्ये तु चतूरात्रं वैश्ये पञ्चाहमेव तु ।

अष्टाहेन तु शूद्रस्य शुद्धिरेषा प्रकीर्त्तिता ॥ इति ।

अचिरे मासत्रयाभ्यन्तरगर्भस्रावे उत्तमे ब्राह्मणे । अत्र राजन्ये तु चतूरात्रमित्यार्द्धमपि विवक्षितम् ।

स्रावे मातुस्त्रिरात्रं स्यात्सपिण्डाशौचवर्জ্জनम् ।

पाते मातुर्यथामासं पित्रादीनां दिनत्रयम् ॥ इति तेनैवाभिधानात् । यद्यचिरस्रावे राजन्यादिषु चतूरात्रादि-

पाते मातुर्यथामासमित्युक्तं स्यात्। वैश्यशूद्रयोरचिरस्रावे पञ्चाहाष्टाहाशौचं पञ्चमसासपाते तु पञ्चाहमेवेति विप्रतिषिद्धं न तु पाते मातुर्यथा मासमिति द्वितीयं मरीचिवचनं ब्राह्मणव्यतिरिक्तविषयमस्तु। एवं क्षत्रियादिष्वेकाहाशौचं परिकल्प्यते ततश्च मरीचिवचनयोः परस्परविरोधः। अतएव

ऋष्यशृङ्गोऽपि।

यत्र त्विरात्रं विप्राणामशौचं सम्प्रदृश्यते।
तत्र शूद्रे द्वादशाहं षड्रहः* क्षत्रवैश्ययोः॥

इति कल्पनाप्रकारमुपदिशति। नैतत्समञ्जसं मरीचिवचनाभ्यामेव विरोधान्तरस्य दुष्परिहार्यत्वात्।

तथाहि।

गर्भस्रावे यथामासमचिरे तूत्तमे त्रयः। इति

स्रावे तु त्विरात्रं स्यादिति च वाक्यद्वयम्। तत्र स्रावे मातुरित्येतच्च विरोधपरिहाराय अचिरे तूत्तमे त्रय इत्येतद्विषय एवोपसंहरणीयम्। तथाच चतुर्थे मासि स्रावे त्विरात्रापेक्षयाधिकं सार्द्धत्विरात्रमशौचं कल्पनीयमचिरस्रावत्वाभावात्। पाते मातुर्यथामासमिति पञ्चमषष्ठयोर्यथामासाशौचाभिधानाच्च। ततश्च गर्भस्रावे यथामासमिति चतुर्थे मासेऽपि दिनचतुष्टयाशौचाभिधानं विरुध्येत। अथात्र स्रावशब्दः पातपरः तर्हि पाते मातुरित्यनेन पौनरुक्त्यं स्यात्।

अतः स्रावचनविरोधपरिहाराय

रात्रिभिर्मासतुल्याभिर्गर्भस्रावे विशुध्यति ।

इत्यादिमन्वादिवचनानुसारेण राजन्ये तु चतूरात्रमित्यादि-वचनशेषस्य विवक्षितार्थत्वमिच्छतापि मरीचिनाङ्गीकर्त्तव्यम् ।

अतश्च सर्व्ववर्णसाधारणमासत्रयादर्वाग्गर्भस्रावे त्रिरात्र-मशौचम् । अथवा आपदि न्यूनकल्पानुस्मरणं*मनापदि चतू-रात्रादिकमिति व्यवस्था विज्ञेया । स्रावे तु सपिण्डानाम-शौचं नास्ति पितुस्तु स्नानमेव । सपिण्डाशौचवर्ज्जनमिति मरीचिस्मरणात् । स्नानमात्रं पुरुषस्येति बृहद्वशिष्ठस्मरणाच्च । चतुर्थमासप्रभृति सप्तममासपर्य्यन्तं यावन्तो गर्भधारणमासा-स्तावन्ति दिनानि शुद्धिहेतुः ।

तथाच याज्ञवल्क्यः ।

गर्भस्रावे मासतुल्या निशाः शुद्धेस्तु कारणम् ।

तत्र स्रवति इवाद्रवसाधारणः पतन इति† ।

अत्र च पातरूपे पञ्चमषष्ठमासस्रावे पित्रादीनां दिनत्रय-मशौचम् ।

पाते मातुर्यथामासं पित्रादीनां दिनत्रयम् । इति मरीचिस्मरणात् ।

यदुक्तं यमेन ।

---

* चिरात्रकल्पना । † एषोऽतिरिक्तः पाठः क्वचित् क्वचित् प्रामाणिकपुस्तके दृश्यते ।

अजातदन्ते तनये मृते गर्भस्रुते* तथा।
सपिण्डानान्तु सर्व्वेषामेकरात्रमशौचकम्॥ इति।
एतच्च गर्भपात एकाहविधानम् गुणवत्पित्रादिविषयम्।
यत्तूक्तमादिपुराणे।

सद्यःशौचं सपिण्डानां गर्भस्य पतने सति। इति।
तत्तु द्रवरूपगर्भस्य† मासचतुष्टयाभ्यन्तरपतने। एवमन्यान्यपि वचनान्यनुसन्धेयानि।

इति गर्भस्रावाशौचम्।

अथ जननाशौचम्।

सप्तममासप्रभृति प्रसवरूपत्वात्‡ पूर्णाशौचमेव भवति। तत्र मृतजाते जातमृते वा सपिण्डानां दशाहमशौचमिति दशाहमिति तत्तत्पूर्णाशौचोपलक्षणम्§। यच्च जाते मृते कुलस्य सद्यःशौचमिति ह्रस्वहिंसुवचनम् तत्तु शिशुमरणनिमित्ताशौचाभावप्रतिपादनपरं न प्रसवहेतुकस्य¶। मरणनिमित्ताशौचमपि स्नानादपैति सपिण्डानां न स्वरूपतोऽभावः‖।

---

* च्युत इति पाठान्तरम्। † अनाकारितस्येत्यर्थः। ‡ प्रसवकालत्वादित्यर्थः। § क्षत्रियवैश्यशूद्राणां पूर्णाशौचबोधकत्वम्। ¶ न जन्मनिमित्ताशौचस्याभावप्रतिपादनमित्यनुषङ्गेणान्वयः। ‖ न स्वभावतोऽशौचाभावः परन्तु स्नानादेव अशौचस्य नाश इत्यर्थः।

सद्यःशौचमिति प्राप्तस्य शुद्ध्यभिधानात्। नाभिच्छेदाग्राङ्मरणे मातुः सम्पूर्णसूतकम्। पित्रादीनान्तु जन्मनिमित्ताशौचं त्रिरात्रम्।

तथाच बृहन्मनुः।

जीवज्जातो यदि ततो मृतः सूतक एव तु।
सूतकं सकलं मातुः पित्रादीनां त्रिरात्रकम्॥

ततस्तदनन्तरमेव नाभिवर्द्धनादर्व्वागित्यर्थः। अत्राप्यग्निहोत्रार्थं सद्यःशौचमस्त्येव अग्निहोत्रार्थं स्नानोपस्पर्शनात् सद्यःशौचमिति शङ्खस्मरणात्। नाभिवर्द्धनोत्तरकालं त्रिशूपरमे पित्रादीनां जननाशौचं सम्पूर्णमेव।

तथाच जैमिनिः।

यावन्न छिद्यते नालं तावन्नाप्नोति सूतकम्।
छिन्ने नाले ततः पश्चात्सूतकन्तु विधीयते॥ इति।

जननिमित्तमस्पृश्यत्वं मातुर्दशाहादिकं पितुस्तु सचेलस्नानादस्पृश्यत्वमपगच्छति।

तथा च संवर्त्तः।

जाते पुत्रे पितुः स्नानं सचेलन्तु विधीयते।
माता शुध्येद्दशाहेन स्नानात्तु स्पर्शनं पितुः॥

अत्र पुत्र इत्यपत्यपरम्। अतस्त्वपत्ये पितुः स्नानं भवति। यथा गर्भाधानशङ्कायामृतुकालगमने स्नानमेवं जनेरपि समानं पितुरपि स्नानादस्पृश्यत्वं निवृत्तमित्यभिधानात्सपिण्डानामस्पृश्यत्वं नास्त्येव ततो न तेषां स्नानमपि।

तथा चाङ्गिराः ।

सूतके सूतिकावर्ज्जं संस्पृशो* न निषिध्यते । इति ।

अदृष्टार्थकार्य्येषु पैठीनसिर्विशेषमाह ।

सूतिकां पुत्रवतीं विंशतिरात्रेण† कर्म्माणि कारयेत् ।

मासेन स्त्रीजननवतीति‡ ।

प्रथमषष्ठदशमदिवसेषु दानप्रतिग्रहाधिकारमाह व्यासः ।

सूतिकावासनिलया जन्मनामादिदेवताः§ ।

तासां यागनिमित्तन्तु शुद्धिर्जन्मनि कीर्त्तिता ॥

प्रथमे दिवसे षष्ठे दशमे चैव सर्व्वदा ।

त्रिष्वेतेषु न कुर्व्वीत सूतकं पुत्रजन्मनि ॥

वृद्धयाज्ञवल्क्योऽपि ।

तत्र सर्व्वं प्रतिग्राह्यं कृतान्नन्तु न भक्षयेत् ।

भक्षयित्वा तु तन्मोहाद्द्विजश्चान्द्रायणं चरेत् ॥

मार्कण्डेयः ।

रक्षणीया तथा षष्ठी निशा तत्र विशेषतः ।

रात्रौ जागरणं कार्य्यं जन्मदानां तथा बलिः ॥

---

* संस्पर्शं इति पाठान्तरम् । संस्पर्शो नैव दुष्यतीति देशान्तरीयः पाठः । † स्नातां सर्व्वकर्म्माणीति देशान्तरीयः पाठः । ‡ स्त्रीजननीमिति पाठान्तरम् । § जन्मदा नाम देवतेति पाठान्तरम् ।

पुरुषाः शस्त्रहस्ताश्च नृत्यगीतेश्च योषितः ।
रात्रौ जागरणं कुर्य्युर्दशम्यां चैव सूतके ॥ इति ।

इति जननाशौचम् ।

अथानुपनीताशौचम् ।

तत्र नामकरणात्प्राक् सद्यःशौचमेव ।

यदाह शङ्खः ।

प्राङ्नामकरणात्सद्यः शुद्धिरिति ।

नामकरणानन्तरमग्न्युदकदानं वैकल्पिकम् ।

तथाच मनुः ।

नाब्दवर्षस्य कर्त्तव्या बान्धवैरुदकक्रिया ।
जातदन्तस्य वा कुर्य्यान्नाग्नेर्वापि कृते सति ॥

उदकक्रियेत्येतत्साहचर्य्यादग्निदानमपि लक्षयति । ततश्च नामकरणादूर्द्ध्वं दन्तजननादर्व्वागग्निसंस्कारे कृतेऽप्यकृतेऽपि मातापित्रोस्त्रिरात्रम् । बालानामदन्तजातानां चिरात्तेन शुद्धिरिति काश्यपस्मरणात् ।

तथा ।

वैजिकादभिसम्बन्धादनूनव्याद्दशत्र्यहम् ।

इत्यत्र वैजिकादितिविशेषोपादानाच्च । एवमुपनयनपर्य्यन्तं मातापित्रोस्त्रिरात्रमेव । इतरेषां सपिण्डानामग्निसंस्कारे कृते एकाहमशौचम् ।

अदन्तजाते तनये शिशोर्गर्भच्युते तथा।
सपिण्डानान्तु सर्वेषां एकरात्रमशौचकम्॥

इति यमस्मरणात्। स च संस्कारस्तूष्णीमेव।

तूष्णीमेवोदकङ्कुर्य्यात्तूष्णीं संस्कारमेव च।

इति लोकाक्षिस्मरणात्।

जातारणिश्चेद्भवति तदा तन्मथिताग्निना।

तदभावे त्वनिषिद्धलौकिकाग्निना दाहः अग्निसंस्काराद्यभावे सद्यःशौचम्। आदन्तजननात्सद्य इति याज्ञवल्क्यस्मरणात्। अग्निसंस्काररहितस्योनद्विवर्षस्य निखननमेव।

तथाच याज्ञवल्क्यः।

ऊनद्विवर्षं निखनेन्न कुर्य्यादुदकं ततः।
आश्मशानादनुव्रज्य इतरो ज्ञातिभिर्वृतः॥

इतरः पूर्णद्विवर्षः।

अत्र विशेषमाह।

ऊनद्विवार्षिकम्प्रेतं निर्दहुर्बान्धवा बहिः।
अलङ्कृत्य शुचौ भूमावस्थिसञ्चयनादृते॥ इति।

बहिः ग्रामाद्बहिः। अस्थिसञ्चयनादृते अस्थिसञ्चयनरहितायां भुवीत्यर्थः। अन्ये त्वेवं वर्णयन्ति। अस्थिसञ्चयनप्राप्तेरेवाभावादुपपादितश्चेत्प्रायश्चित्तश्चास्माभिर्मिताक्षराटीकायां सुबोधिन्याम्।

यमः।

ऊनद्विवार्षिकम्प्रेतं घृताक्तं निखनेद्भुवि।

पुरुषाः शस्त्रहस्ताश्च नृत्यगीतेश्च योषितः ।
रात्रौ जागरणं कुर्य्युर्दिगभ्यां चैव सूतके ॥ इति ।

इति जननाशौचम् ।

अथानुपनीताशौचम् ।

तत्र नामकरणात्प्राक् सद्यःशौचमेव ।

यदाह शङ्खः ।

प्राङ्नामकरणात्सद्यः शुद्धिरिति ।

नामकरणानन्तरमग्न्युदकदानं वैकल्पिकम् ।

तथाच मनुः ।

नाग्निवर्षस्य कर्त्तव्या नान्यवैरुदकक्रिया ।
जातदन्तस्य वा कुर्य्यान्नाग्नि वापि कृते सति ॥

उदकक्रियेत्येतत्साहचर्य्यादग्निदानमपि लक्षयति । ततश्च नामकरणादूर्द्धं दन्तजननादर्व्वागग्निसंस्कारे कृतेऽप्यकृतेऽपि मातापित्रोस्त्रिरात्रम् । बालानामदन्तजातानां त्रिरात्रेण शुद्धिरिति कश्यपस्मरणात् ।

तथा ।

वैजिकादभिसम्बन्धादनूनत्वादवन्ध्यत्वम् ।

इत्यत्र वैजिकादितिविशेषोपादानाच्च । एवमुपनयनपर्य्यन्तं मातापित्रोस्त्रिरात्रमेव । इतरेषां सपिण्डानामग्निसंस्कारे कृते एकाहमशौचम् ।

अदन्तजाते तनये शिशोर्गर्भच्युते तथा।
सपिण्डानान्तु सर्व्वेषां एकरात्रमशौचकम्॥

इति यमस्मरणात्। स च संस्कारस्तूष्णीमेव।

तूष्णीमेवोदकङ्कुर्य्यात्तूष्णीं संस्कारमेव च।

इति लोकाक्षिस्मरणात्।

जातारणिश्चेद्भवति तदा तन्मथिताग्निना।

तदभावे त्वनिषिद्धलौकिकाग्निना दाहः अग्निसंस्काराद्यभावे सद्यःशौचम्। आदन्तजननात्सद्य इति याज्ञवल्क्यस्मरणात्। अग्निसंस्काररहितस्योनद्विवर्षस्य निखननमेव।

तथाच याज्ञवल्क्यः।

ऊनद्विवर्षं निखनेन्न कुर्य्यादुदकं ततः।
आश्मशानादनुव्रज्य इतरो ज्ञातिभिर्वृतः॥

इतरः पूर्णद्विवर्षः।

अत्र विशेषमाह।

ऊनद्विवार्षिकम्प्रेतं निदध्युर्बान्धवा बहिः।
अलङ्कृत्य शुचौ भूमावस्थिसञ्चयनादृते॥ इति।

बहिः ग्रामाद्बहिः। अस्थिसञ्चयनादृते अस्थिसञ्चयनरहितायां भुवीत्यर्थः। अन्ये त्वेवं वर्णयन्ति। अस्थिसञ्चयनप्राप्तेरेवाभावादुपपादितश्चेत्प्रायश्चित्तञ्चास्माभिर्मिताक्षराटीकायां सुबोधिन्याम्।

यमः।

ऊनद्विवार्षिकम्प्रेतं घृताक्तं निखनेद्भुवि।

वैवस्वतं सङ्गमनं जनानां यमं राजानं हविषा दुवस्य ॥ १ ।
यमी नो गातुं प्रथमो विवेद नैषा गव्यूतिरपभर्त्तवा उ ।
यत्रा नः पूर्वे पितरः परेयुरेना जज्ञानाः पथ्या ३अनु स्वा. ॥ २ ।
मातली कव्यैर्यमो अङ्गिरोभिर्बृहस्पतिर्ऋक्वभिर्वावृधानः ।
यांश्च देवा वावृधुर्ये च देवान्त्स्वाहान्ये स्वधयान्ये मदन्ति ॥ ३ ।
इमं यम प्रस्तरमा हि सीदाङ्गिरोभिः पितृभिः संविदानः ।
आ त्वा मन्त्राः कविशस्ता वहन्त्वेना राजन् हविषा मादयस्व ॥ ४ ।
अङ्गिरोभिरागहि यज्ञियेभिर्यम वैरूपैरिह मादयस्व ।
विवस्वन्तं हुवे यः पिता तेऽस्मिन्यज्ञे बर्हिष्या निषद्य ॥ ५ ।
अङ्गिरसो नः पितरो नवग्वा अथर्वाणो भृगवः सोम्यासः ।
तेषां वयं सुमतौ यज्ञियानामपि भद्रे सौमनसे स्याम् ॥ ६ ।
प्रेहि प्रेहि पथिभिः पूर्व्येभिर्यत्रा नः पूर्वे पितरः परेयुः ।
उभा राजाना स्वधया मदन्ता यमं पश्यासि वरुणञ्च देवम् ॥ ७ ।
सं गच्छस्व पितृभिः सं यमेनेष्टापूर्त्तेन परमे व्योमन् ।
हित्वा यावद्यं पुनरस्तमेहि सङ्गच्छस्व तन्वा सुवर्चाः ॥ ८ ।
अपेत वीत वि च सर्पतातोऽस्मा एतं पितरो लोकमक्रन् ।
अहोभिरद्भिरक्तुभिर्व्यक्तं यमो ददात्यवसानमस्मै ॥ ९ ।
अति द्रव सारमेयौ श्वानौ चतुरक्षौ शबलौ साधुना पथा ।
अथा पितॄन्त्सुविदत्रां उपेहि यमेन ये सधमादं मदन्ति ॥ १० ।
यौ ते श्वानौ यमरक्षितारौ चतुरक्षौ पथिरक्षी नृचक्षसौ ।
ताभ्यामेनं परि देहि राजन्त्स्वस्ति चास्मा अनमीवञ्च धेहि ॥ ११ ।
उरूनसावसुतृपा उदुंबलौ यमस्य दूतौ चरतो जनाँ अनु ।
तावस्मभ्यं दृशये सूर्य्याय पुनर्दातामसुमद्येह भद्रम् ॥ १२ ।
यमाय सोमं सुनुत यमाय जुहुता हविः ।
यमं ह यज्ञो गच्छत्यग्निदूतो अरं कृतः ॥ १३ ।
यमाय घृतवद्धविर्जुहोत प्र च तिष्ठत ।
स नो देवेष्वा यमद्दीर्घमायुः प्र जीवसे ॥ १४ ।
यमाय मधुमत्तमं राज्ञे हव्यं जुहोतन ।
इदं नम ऋषिभ्यः पूर्वजेभ्यः पूर्वेभ्यः पथिकृद्भ्यः ॥ १५ ।
त्रिकद्रुकेभिः पतति षळुर्वीरेकमिद्बृहत् ।
त्रिष्टुब्गायत्रीछन्दांसि सर्वा ता यम आहिता ॥ १६ । ऋग्वेदसंहिता १०म, १४सू।

जातदन्तस्य प्रथमे वर्षे अकृतचूड़स्य वर्षत्रयाभ्यन्तरे मृतस्याग्नि-संस्कारे सद्यःशौचप्येकाहः। दन्तजातेऽप्यकृतचूड़े त्वहोरात्रेण शुद्धिरिति विष्णुस्मरणात्। प्रथमवर्षचूड़ाकरणे त्वग्निसंस्कारस्य चूड़ाकरणानन्तरं नियतत्वात्त्रिरात्रमेव।

अतएव वशिष्ठः।

ऊनद्विवर्षे प्रेते गर्भपतने वा सपिण्डानां त्रिरात्रमेवेति। वर्षत्रयादूर्द्धं चूड़ाभावेऽपि अग्निसंस्कारो नियतस्तथा त्र्यहमशौचम्।

नाद्विवर्षस्य कर्त्तव्यं बान्धवैरुदकक्रिया। इति।

मनुना द्विवर्षन्यूनस्य संस्कारनिषेधे नाद्विवर्षस्याभ्यनुज्ञानात्। अङ्गिरसा च न्यूनद्विवर्षरूपकालापेक्षया नैगिक्यभिधानादतऊर्द्धं त्र्यहाभिधानाच्च।

विप्रे न्यूनद्विवर्षे तु तेषां* शवदिग्म नैगिकी। इति।

यद्यप्यकृतचूड़ो वै जातदन्तस्तु संस्थितः।

दाहयित्वा तथाप्येनमशौचं त्र्यहमाचरेत्॥

स्त्रीणामकृतचूड़ानां मृतौ सद्यःशौचम्। अकृतचूड़ायान्तु कन्यायां सद्यःशौचमित्यापस्तम्बस्मरणात्। कृतचूड़ानामपि वाग्दानाद्वर्गीकाहः।

यदाह याज्ञवल्क्यः।

अहस्त्वदत्तकन्यासु बालेषु च विशोधनम्। इति।

* मृत इति पाठान्तरम्।

अदत्ता वाग्दानरहिता। कन्यासापिण्ड्यं* पुरुषत्रयपर्य्यन्तमेव।

तथाच वशिष्ठः।

अप्रत्तानाञ्च स्त्रीणां त्रिपुरुषी विज्ञायते। इति।

त्रिपुरुषानन्तरं समानोदकाशौचङ्कल्प्यम्। एतच्चाशौचमविवाहितविषयमेव। विवाहे त्वन्यथा तथैव पूर्व्वं प्रतिपादितत्वात्। वाग्दानादूर्द्धं विवाहसंस्कारात्प्राक् पतिकुले पितृकुले च त्रिरात्रम्।

यथाह मरीचिः।

वारिपूर्व्वमदत्ता तु या नैव प्रतिपादिता।

असंस्कृता तु सा ज्ञेया त्रिरात्रमुभयोः स्मृतम्॥ इति।

या तु प्रतिपादिता वाग्दत्ता वारिपूर्व्वं नैव प्रतिपादितेत्यन्वयः। उभयोः पतिपितृपक्षयोः।

विवाहानन्तरं विष्णुः।

संस्कृतासु स्त्रीषु नाशौचम्पितृपक्षे तत्प्रसवमरणे चेत्पितृगृहे स्यातां तदैकरात्रञ्चेति।

प्रसव एकरात्रं मरणे त्रिरात्रमिति विवेकः। एतच्च वयोविशेषकृतमशौचं सर्व्ववर्णसाधारणम्।

तथाचाङ्गिराः।

अविशेषेण वर्णानामर्व्वाक्संस्कारकर्म्मणः।

---

* कन्यकानां सापिण्ड्यमिति पाठान्तरम्।

त्रिरात्रन्तु भवेच्छुद्धिरिति ॥

व्याघ्रपादोऽपि ।

तुल्यवयसि सर्व्वेषामिति ।

यत्त्वङ्गिरसाभिहितम् ।

विप्रे न्यूने त्रिभिर्वर्षैर्मृते शुद्धिस्तु नैगिकी ।

द्वाहेन क्षत्रिये शुद्धिस्त्रिभिर्वैश्येऽस्मृते तथा ॥

तथान्यदपि तेनैव ।

निवृत्तचूडके विप्रे त्रिरात्राच्छुद्धिरिष्यते ।

निवृत्ते क्षत्रिये षड्भिर्वैश्ये नवभिरुच्यते ॥

शूद्रे त्रिवर्षन्यूने तु मृते शुद्धिस्तु पञ्चभिः ।

अत ऊर्द्धं मृते शूद्रे द्वादशाहो विधीयते ॥

षड्वर्षान्तमतीतो यः शूद्रः संम्रियते यदि ।

मासिकन्तु भवेच्छौचमित्यङ्गिरसभाषितम् ॥ इति ।

षड्वर्षान्तमतीतो य इत्यनेन च हारीतवचनं विरुध्यते ।

वचनन्तु ।

आमौञ्जिबन्धनाद्विप्रः क्षत्रियश्च धनुर्ग्रहात् ।

आप्रतोदग्रहाद्वैश्यः शूद्रो वस्त्रद्वयग्रहात् ॥ इति ।

मौञ्जिबन्धनाद्यनन्तरं मृतः पूर्णाशौचनिमित्तं भवतीत्यर्थः ।

शूद्रो वस्त्रद्वयग्रहणयोग्यो द्वादशादिवर्षदेशीय* एव न षड्वर्ष-

---

* ईषन्न्यूनार्थे देशीयप्रत्ययविधानात् आदिपदाच्च द्वादशवर्षमारभ्य पोडशवर्षादी-षन्न्यूनकालिक इत्यर्थः ।

देशीय इति। शूद्रस्य षड्वर्षानन्तरं मासिकाशौचाभिधानमाङ्गिरसहारीतेन विरुध्यते। तस्माद्बहुनामनुग्रहे त्याज्या इति मन्वाद्यनेकस्मृतिपर्य्यालोचनया विश्वरूपधारेश्वरमेधातिथिविज्ञानेश्वरप्रभृतिभिराचार्य्यैर्वयोऽवस्थाशौचं* सर्व्ववर्णसाधारणमेवेति व्याख्यातम्। अथवाङ्गिरसक्रत्थशृङ्गवचनान्यधिकाशौचप्रतिपादकान्यनापद्विषयतया व्यवस्थापनीयानि।

अथ जननमरणाशौचे वर्णनियमेन कालनिर्णयः†।

तत्र मनुः।

दशाहं शावमाशौचं सपिण्डेषु विधीयते।
जननेऽप्येवमेवं स्याद्विधुलां शुद्धिमिच्छताम्॥ इति।

महागुरौ खाश्वलायनोक्तो विशेषः।

द्वादशरात्रं महागुरुषु दानाध्ययने वर्ज्जयेरन्निति। पुत्रानुत्पाद्य संस्कृत्य वेदार्थङ्ग्राहयित्वा वृत्तिञ्च‡ यो ददाति स महागुरुः। एतच्च विप्रविषयम्। क्षत्रियादिविषये तु याज्ञवल्क्यः।

क्षत्रस्य द्वादशाहानि विशः पञ्चदशैव तु।
त्रिंशद्दिनानि शूद्रस्य तदर्द्धं न्यायवर्त्तिनः॥ इति।

पाकयज्ञद्विजशुश्रूषादिरतः शूद्रो न्यायवर्त्ती तस्य तदर्द्धं मासार्द्धम्।

---

* बाल्यादिभेदेनाशौचकल्पनम्। † कालनियम इति पाठान्तरम्। ‡ भक्तादिकम्।

हतानां नृपगोविप्रैरन्यत्तत्त्वात्मघातिनाम्।

अन्यत्वं सद्यःशौचमित्यर्थः। नृपेण प्रमादहते दशाहादिकमेव। क्रोधाद्युद्यहते सद्यःशौचम्। युद्यत्तेन कालान्तरहतस्यैकाहः।

अत्र च गौतमः।

गोब्राह्मणहतानामन्यत्वं क्रोधाच्चायुध्यतः*। इति।

क्रोधग्रहणम्प्रमादव्यापादितनिरासार्थम्।

तथा।

ब्राह्मणार्थं विपन्ना ये योषितां गोग्रहेऽपि वा।

आहवेऽपि हतानाञ्च एकरात्रमशौचकम्॥

क्षत्रधर्म्मेण सङ्ग्रामाङ्गनमृतस्य सद्यःशौचम्।

तदाह मनुः।

उद्यतैराहवे शस्त्रैः क्षत्रधर्म्महतस्य च।

सद्यः सन्तिष्ठते यज्ञस्तथाशौचमिति स्थितिः॥

यज्ञः पिण्डदानादिरूपः सन्तिष्ठते समाप्तो भवतीत्यर्थः। दत्तेन दश पक्षाः सूतके मृतके चोपन्यस्ताः।

सद्यःशौचमथैकाहस्त्र्यहश्चतुरहस्तथा।

षड्दशद्वादशाहश्च पक्षो मासस्तथैव च।

मरणान्तं तथा चान्यद्दशपक्षास्तु सूतके॥

सूतकशब्दोऽशौचोपलक्षणार्थः। अत्र सद्यःशौचादि षड्ह-

---

* युद्धमकुर्व्वतः।

अर्द्धरात्रावधिः कालः सूतकादौ विधीयते ॥
रात्रिङ्कुर्य्यात्त्रिभागन्तु द्वौ भागौ पूर्व्व एव तु ।
उत्तमोऽयः प्रभातेन युज्यते मृतसूतके ॥
रात्रावेव समुत्पन्ने मृते रजसि सूतके ।
पूर्व्वमेव दिनङ्ग्राह्यं यावन्नाभ्युदितो रविः ॥ इति ।

अत्र देशाचारः प्रमाणम् ।

अत्र जनने पूर्व्वेतिकर्त्तव्यता विहिता साम्प्रतमितरत्राभिधीयते ।

तत्र मनुः ।

न विप्रं स्वेषु* तिष्ठत्सु मृतं शूद्रेण हारयेत्† ।
अस्वर्ग्या ह्याहुतिः सा स्याच्छूद्रसंस्पर्शदूषिता ॥

स्वेषु तिष्ठत्स्वित्यविवक्षितार्थमस्वर्ग्यत्वादिदोषकथनात् ।

तथा ।

दक्षिणेन मृतं शूद्रं पुरद्वारेण निर्हरेत् ।
पश्चिमोत्तरपूर्व्वैस्तु यथायोगं द्विजातयः ॥

यथायोगमिति वैश्यप्रतिलोमक्रमेण । अतएव स्वाभिप्रायप्रकटनार्थं प्रथमतः शूद्र एवोपात्तो वचने ।

हारीतः ।

न ग्रामाभिमुखं प्रेतं निर्हरेयुः ।

---

* सजातीयेषु । † वाहयेदिति पाठान्तरम् । सजातीयसत्त्वे शूद्रेण कर्त्रा मृतं विप्रं न वाहयेदित्यर्थः । अत्र ह्रधातोर्विकल्पविधानात् शूद्रेणेति अनुक्तकर्त्तरि तृतीया ।

याज्ञवल्क्यः ।

स दग्धव्य उपेतश्चेदाहिताग्न्याहृतार्थवत् ।

उपेत उपनीतः । शूद्रस्य वस्त्रद्वयग्रहणयोग्यकालीन उपनीतसद्रव्यः वस्त्रद्वयग्रहणं द्वादशादिषोडशवर्षमध्ये तु । आहिताग्निदाहप्रक्रियया दाहादिकं कार्यम् ।

तत्रायं विशेषः ।

उपनीतस्य लौकिकाग्निना अनाहिताग्नेः स्वगृह्याग्निना आहिताग्नेश्च वैतानाग्निभिरिति ।

लौकिकाग्निश्च चाण्डालाग्न्यादिव्यतिरिक्तः ।

तथाच देवलः ।

चाण्डालाग्निरमेध्याग्निः सूतिकाग्निश्च कर्हिचित् ।

पतिताग्निश्चिताग्निश्च न शिष्टैर्ग्रहणोचितः* ॥ इति ।

स्वगृह्योक्तविधिना असौ स्वर्गाय लोकाय स्वाहेति हुत्वा दग्धव्यः ।

प्रचेताः ।

स्नानमेतस्य पुत्राद्यैर्वस्त्राद्यैः पूजनं ततः ।

नग्नदेहं दहेत्त्वेव किञ्चिद्देयं परित्यजेत् ॥

किञ्चिच्छब्दादस्थ्येकदेशं श्मशानवास्त्यर्थं देयं परित्यजेदित्यर्थः ।

निगमः ।

सन्ध्यायां वा तथा रात्रौ दाहः पार्थिवकर्म च ।

---

* शिष्टकर्तृकचण्डालादिकाग्निपरिग्रहो न उचित इत्यर्थः ।

नवश्राद्धञ्च नो कुर्य्यात्कृतं निष्फलतां व्रजेत् ॥

दाहानन्तरमप्रचेताः ।

प्रेतस्य बान्धवा यथाह्नमुदकमवतीर्य्य नोहर्षयेयु*रुदकाञ्जलिम्प्रसिञ्चेयुः । अपसव्ययज्ञोपवीतवाससा दक्षिणाभिमुखाः ब्राह्मणस्योदङ्मुखाः प्राङ्मुखाश्च राजन्यवैश्ययोरिति ।

याज्ञवल्क्यः ।

सप्तमाद्दशमाद्वापि ज्ञातयोऽभ्युपयन्त्यपः ।

अप नः शोशुचद्घमनेन पितृदिङ्मुखाः ॥

सप्तमाद्दिवसादर्व्वाग्दशमाद्दिवसाद्वा अर्व्वाक् ज्ञातय एकसगोत्रपिण्डाः समानोदकाश्च । एतच्च विषमदिनेषु कार्य्यमेव ।

तथाच गौतमः ।

प्रथमतृतीयपञ्चमसप्तमनवमेषूदकक्रियेति ।

वशिष्ठः ।

सव्योत्तराभ्यां पाणिभ्यामुदकक्रियां कुर्व्वीरन्निति ।

उदकदाने संख्यानियममाह

याज्ञवल्क्यः ।

सकृत्प्रसिञ्चेदुदकं नामगोत्रेण वाग्यतः ।

नामगोत्रेणोपलक्षितमुदकं नामगोत्रे समुच्चार्य्योदकं सिञ्चेयुरित्यर्थः ।

---

* गात्रमार्ज्जनं न कुर्य्यात् । नोहर्षयेरन्निति अन्यत्र पाठः ।

पिण्डयज्ञाहृता देयं प्रेतायान्नं दिनत्रयम् ।
जलमेकाहमाकाशे स्थाप्यक्षीरञ्च मृण्मये ॥

पिण्डयज्ञाहृता पिण्डयज्ञप्रक्रियया प्राचीनावीतित्वदर्भादिना सहितत्वरूपया च आकाशे शिक्यादौ* ।

प्रचेताः ।

प्रेताय स्नाहीत्युदकं स्थाप्यमित्येव चेदक्षीरमिति । पिण्डदानञ्च संस्कृतानां कुशेषु असंस्कृतानां भूमौ पिण्डं दद्यात् ।

संस्कृतानान्तु कुशेषु इति प्रचेतःस्मरणात्पाषाणेऽपि पिण्डो देयः।

तथाच शङ्खः ।

भूमौ माल्यं पिण्डमानीयमुपलेष्वादद्युरिति ।

याज्ञवल्क्येन पिण्डत्रयमेवाभिहितम् । विष्णुस्तु यावत्याशौचदिनानि तावत्पिण्डदानमाह ।

यावदशौचं तावत्प्रेतस्योदकं पिण्डञ्च दद्युरिति ।

पारस्करः ।

प्रेतेभ्यः सर्व्ववर्णेभ्यः पिण्डान्दद्युर्दशैव तु ।

एवम्पिण्डोदकदाने गुरुलघुकल्पावाम्नातौ । तत्र यद्यप्यन्यतरपक्षानुष्ठानेऽपि शास्त्रार्थसिद्धिः तथापि गुरुकल्पे प्रेतोपकारातिशयः कल्पः । अन्यथा गुरुतत्पक्षानुपपत्तेः । एवं दत्तस्य पिण्डस्य प्रतिपत्तिकर्म्माह

---

* रज्जुनिर्मिते पदार्थे यत्र द्रव्यं स्थाप्यते शिका इति प्रसिद्धिः ।

हृद्गातातपः* ।

वाग्यताः प्रयताश्चैव तिष्ठेयुः पिण्डसन्निधौ ।

ततो वास्से निवृत्तेऽस्य नद्यान्तु प्रक्षिपेच्च तम् ॥ इति नद्यभावे प्रशस्ताकाशेषु प्रक्षिपेत् । यत्राशौचस्य ह्रासस्तत्रापि दश पिण्डाः दातव्याः ।

अशौचस्य च ह्रासेऽपि पिण्डान्दद्याद्दशैव तु ।

इति गातातपस्मरणात् ।

पश्चात्त्रिरात्राशौचे पारस्करः ।

प्रथमे दिवसे देयास्त्रयः पिण्डाः समाहितैः ।

द्वितीये चतुरो दद्यादस्थिसञ्चयनन्तथा ॥

पिण्डे द्रव्यादिनियममाह शुनःपुच्छः ।

फलमूलैश्च पयसा शाकेन च गुडेन च ।

तिलमिश्रञ्च दर्भेषु पिण्डं दक्षिणतो हरेत् ॥

द्वारदेशे प्रदातव्यो देवतायतनेऽपि च ।

तूष्णीं प्रसक्तं† पुष्पञ्च धूपदीपस्तथैव च ॥

शालिना शक्तुभिर्व्वापि शाकैर्वाप्यथ निर्व्वपेत् ।

प्रथमेऽहनि यद्द्रव्यं तदेव स्याद्दशाहकम्‡ ॥ इति ।

कर्त्तृनियमो गृह्यपरिशिष्टे ।

असगोत्रः सगोत्रो वा यदि स्त्री यदि वा पुमान् ।

---

* बृहत्प्रचेता इति पाठान्तरम् । † परिता इति पाठान्तरम् । ‡ प्रसक्तमिति सकलपुस्तके पाठः परिदृश्यते परन्तु प्रशस्तमित्येव साधु । § दशमपिण्डदानपर्य्यन्तम् ।

प्रथमेऽहनि यो दद्यात्स दशाहं समापयेत्॥

दशाहपर्य्यन्तमेवायं नियमः। अतस्तन्मध्ये देशान्तरस्थितसन्निहितसपिण्डपुत्राद्यागमनेऽपि प्रथमदिवसोपक्रान्तेनैव* दशपिण्डाः दातव्याः। न पुत्रादिभिः सन्निहितैरपि। दाहानन्तरङ्कृत्यमेकादशाहादिकन्तु सन्निहितसपिण्डेन पुत्रादिनैव कार्य्यं पुत्राद्यभावे प्रथमप्रक्रान्तेनैव†। सपिण्डीकरणे तु विशेषः। स च श्राद्धस्तवके वक्ष्यते।

उदकदानन्तु सर्व्वैः सपिण्डादिभिः कार्य्यं पिण्डदानन्त्वेकेनैव पुत्रादिना। पुत्रबहुत्वे त्वितरानुमत्या ज्येष्ठेनैव पातित्यादिदोषरहितेन।

मरीचिः। अनेनैवाभिप्रायेण।

सर्व्वैरनुमतङ्कृत्वा‡ ज्येष्ठेनैव तु यत्कृतम्।

द्रव्येण वा विभक्तेन सर्व्वैरेव कृतम्भवेत्॥ इति।

अविभक्तानान्तु द्रव्यमविभक्तमेव। विभक्तैस्तु स्वस्वशक्त्यपेक्षया स्वाङ्गनाक्लिन्नदीर्घदेहिकोद्देश्ययुक्तमुद्धृत्य ज्येष्ठाय निवेदयेत्। तदा च द्रव्यमविभक्तमेव भवतीति द्रव्येण वाविभक्तेनेत्यस्य निर्व्वाहः। विभक्तेषु द्रव्यसमीकरणेनैकस्य कर्त्तृत्वं षोड़शश्राद्धादावेव न सांवत्सरिके।

पिण्डदानाधिकारिक्रममाह शङ्खः।

पितुः पुत्रेण कर्त्तव्या पिण्डदानोदकक्रिया।

---

* प्रथमपिण्डदेनैव। † पूरकपिण्डदाता। ‡ सर्व्वेषान्तु मतं कृत्वा इति यत्रान्तरीयपाठः।

पुत्राभावे तु पत्नी स्यात्पत्न्यभावे तु सोदरः ॥

गौतमः ।

पुत्राभावे सपिण्डा मातृसपिण्डाः शिष्याश्च दद्युस्तद्भावे ऋत्विगाचार्याः ।

अत्र शङ्खवचनानुरोधेन पुत्राभावे पत्नी तदभावे सपिण्डा इति क्रमः । पुत्राश्च द्वादशविधा औरसादयः ।

अतएवौरसादिपुत्रपरिगणनानन्तरम्

याज्ञवल्क्यः ।

पिण्डदोंऽशहरश्चैव पूर्वाभावे परः परः । इति ।

तत्रापि औरसाभावे पौत्रः तदभावे प्रपौत्रस्तदभावे पुत्रिकादिक्रमः ।

अतएव स्मृतिसङ्ग्रहे ।

पुत्रः पौत्रश्च तत्पुत्रः पुत्रिकासुत एव च । इति ।

ऋष्यशृङ्गः ।

पुत्रेषु वर्त्तमानेषु नान्यो वै कारयेत्स्वधाम् ।

आनुकूल्यात्पुत्रस्य श्राद्धं कुर्य्यात्समन्त्रकम् ॥

बौधायनः ।

अपुत्रस्य स्त्रिया कार्य्यं पिण्डश्राद्धं तथोदकम् ।

क्रियालोपो न कर्त्तव्यः प्रेतस्य गतिकाङ्क्षिभिः ॥

यदा त्वनुपनीतः पुत्रः संस्कर्त्ता पत्नी वा तदग्निदानमेव समन्त्रकङ्कार्य्यम् ।

तथाच कात्यायनः ।

असंस्कृतेन पत्न्या च ह्यग्निदानं समन्त्रकम्।
कर्त्तव्यमितरत्सर्व्वङ्कारयेदन्यमेव* हि ॥ इति।

अत्र विशेषमाह सुमन्तुः।

अनुपनीतोऽपि कुर्व्वीत मन्त्रवत्पितृमेधिकम्† ।
यद्यसौ कृतचूड़ः स्याद्यदि स्याच्च त्रिवत्सरः ॥

वर्षत्रयानन्तरं चूड़ाभावेऽपि स एवौर्द्ध्वदेहिकं मन्त्रवच्च कुर्य्यात् वर्षत्रयादर्व्वाक् कृतचूड़ोऽपि शक्तश्चेत्सर्व्वं मन्त्रवच्च कुर्य्यात्। यद्यशक्तः अथाकृतचूड़ो वा तदाग्निदानमात्रं कुर्य्यादिति व्यवस्था।

शङ्खः।

भार्य्यापिण्डं पतिर्दद्याद्भर्त्रे भार्य्या तथैव च।
श्वश्वादेस्तु स्नुषा चैव तदभावे तु सोदरः ॥

भार्य्यापिण्डमित्यादि पुत्राद्यभावविषयम्।

वीजिन्येत्रिणोर्विषये मरीचिः।

सगोत्रे वान्यगोत्रे‡ वा यो भवेद्विधवासुतः।
पिण्डश्राद्धविधानन्तु क्षेत्रिणे प्राग्विनिर्वपेत् ॥
वीजिनेऽपि ततः पश्चात्क्षेत्री जीवति चेत्क्वचित्।
वीजिने दद्युरादौ च मृते पश्चात्प्रदीयते ॥
उभौ यदि मृतौ स्यातां वीजिन्यादौ तदा ददेत्।

---

* अन्यद्वारा कारयेदित्यर्थः। † पितुरौर्द्धदेहिककर्म्मकलापम्। ‡ सगोत्रादन्यगोत्राद्वा इति चन्द्रिकाधृतपाठः।

चैत्रिण्यादौ न दत्तं स्याद्बीजिनेनोपतिष्ठते* ॥

चैत्रिणे दत्त्वा बीजिने दत्ते तद्बीजिने नोपतिष्ठत इत्यर्थः। एतच्च विधवानियोगविधिना यत्र नियोगस्तद्विषयम्। अनियोगस्थले तु नारदोक्तं द्रष्टव्यम्।

जाता ये त्वनियुक्तायामेकेन बहुभिस्तथा।
अरिक्थभाजस्ते सर्वे बीजिनामेव ते सुताः ॥
दद्युस्ते बीजिने पिण्डं माता चेच्चूल्कतां हृता।
अमुत्रोपनीतायान्तु† पिण्डता बीजिनैव तु ॥ इति।

पिण्डता बीजिमापिण्डामात्रमेव तेषां न पिण्डदानाद्यधिकारः। ते सुता बीजिनैव नैत्रिण एवेत्यर्थः। पिण्डदाबीजिनैव ते इत्यपि पाठः। मापिण्डेऽपि सत्यपि न ब्रह्मचार्यादिभिः पिण्डोदकदानादिकङ्कर्त्तव्यम्।

तथाच याज्ञवल्क्यः।

न ब्रह्मचारिणः कुर्युरुदकं पतितास्तथा।

उदकमिति पिण्डदानाद्युपलक्षणं ब्रह्मचारिणः‡ उदकदानादि-

---

* चैत्रिणे प्राक् प्रदापयेदादौ चैत्रिणि सति इति शेषः सतः। चैत्रिमरणानन्तरं बीजिमरणे पश्चाद्बीजिने तु दापयेदित्यन्वयः। कथित उदाहितवर्तमे नोपतिष्ठति अधोदादौ बीजी सतः तदा बीजिने आदौ दद्यः सति तु तदनन्तरं चैत्रिणि चेत् तदा पश्चात् चैत्रिणे प्रदीयते। उभौ यदि स्तौ एकदेति शेषः। तत्रादौ बीजिने चाहे पश्चात् चैत्रिणे तत्र हेतुं दर्शयति आदौ न दत्तं स्यादित्यादि। † अमुत्रोपनीतायान्तु इति याज्ञवल्क्यीयपाठः। ‡ ब्रह्मचारिकर्तृकोदकदानादिनिषेध इत्यर्थः।

निषेधो मातापित्रादिव्यतिरिक्तविषयः।

तथाच स एव।

आचार्य्यपित्रुपाध्यायान्निर्हृत्यापि व्रती व्रती।
शकटान्नञ्च नाश्नीयान्न च तैः सह संविशेत्॥

व्रती ब्रह्मचारी व्रती व्रत्येव नाम्य ब्रह्मचर्य्यव्रतभ्रंश इत्यर्थः। स ब्रह्मचारी शकटान्नमार्द्रौदनं नाश्नीयात्। निर्हृत्येत्यनेन दाहाद्यौर्द्ध्वदैहिकं सकलमपि लक्ष्यते।

मात्रादिव्यतिरिक्तविषये मनुः।

आदिष्टो नोदकं कुर्य्यादाव्रतस्य समापनात्।
समाप्ते तूदकङ्कृत्वा त्रिरात्रमशुचिर्भवेत्॥

आदिष्टो ब्रह्मचारी। केचन प्रायश्चित्तिनमादिष्टीति मन्यन्ते। व्रते समाप्ते तूदकङ्कृत्वा दिनत्रयमशुचिः स्यादित्यर्थः।

हृद्धमनुः।

स्त्रीवाद्या नोदकं कुर्य्युः स्तेनव्रात्याविधर्म्मिणः।
गर्भभर्त्तृद्रुहश्चैव सुराप्यश्चैव योषितः॥

पूर्व्वोक्तब्रह्मचार्य्यादिव्यतिरिक्तैरपि सपिण्डैर्मृतपाषण्डाद्युद्देशेनोदकादिकं न कार्य्यम्।

तथाच याज्ञवल्क्यः।

पाषण्डाश्रमाश्रिताः स्तेना भर्त्तृघ्नाः कामगादिकाः।
सुराप्य आत्मत्यागिन्यो नाश्नीयोदकभाजनाः॥

वेदबाह्यलिङ्गधारणं पाषण्डम्। अनाश्रिताः अधिकारे सत्यप्याश्रमविशेषरहिताः। स्तेनाः ब्राह्मणसुवर्णव्यतिरिक्तोत्तमद्रव्य-

हारिणः। पाषण्डादिमरणस्याशौचादिनिमित्ताभावान्मरणे सति सपिण्डैरुदकादिकं न कर्त्तव्यमित्यर्थः। सुराप्य इत्यादिषु* लिङ्गमविवक्षितमुद्देश्यगतत्वात्।

आत्मत्यागिषु विशेषमाह गौतमः।

प्रायोऽनाशकशस्त्राग्निविषोदकोद्बन्धनप्रपतनैः स्वेच्छतामिति।

प्रायो महाप्रस्थानम्। अनाशकमनशनम्। प्रपतनं शैलशिखरादवपातनम्। इत्यादिभिर्निमित्तैः शास्त्राविहितमार्गेणेच्छापूर्व्वकं मृतानामशौचादिकं न कर्त्तव्यमित्यर्थः।

अङ्गिराः।

चाण्डालादुदकात्सर्पाद्ब्राह्मणाद्धुतादपि।
दंष्ट्रिभ्यश्च पशुभ्यश्च मरणं पापकर्म्मिणाम्॥
उदकं पिण्डदानञ्च प्रेतेभ्यो यत्प्रदीयते।
नोपतिष्ठति तत्सर्व्वमन्तरीक्षे विनश्यति॥

मनुः।

व्रथासङ्करजातानामव्रज्यासु च तिष्ठताम्।
आत्मनस्त्यागिनाञ्चैव निवर्त्तेतोदकक्रिया॥

व्रथासङ्करजातानामिति व्रथाजाताः पञ्चमहायज्ञादिरहिताः सङ्करजाताः प्रतिलोमजाः। प्रमादात्पूर्व्वोक्तनि-

---

* आदिना आत्मत्यागिन इत्यत्र स्त्रीत्वमविवक्षितम्। † व्रथाजातानां सङ्करजातानाचेत्यर्थः इन्द्वात्परः व्रयमाणः प्रत्येकं सम्बध्यते इति न्यायादिति शेषः।

मित्तैर्मरणे विद्यत एवाशौचादिकम्।

अतएवाङ्गिराः।

अथ कश्चित्प्रमादेन म्रियेताग्न्युदकादिभिः।
तस्याशौचं विधातव्यं कर्त्तव्या चोदकक्रिया॥

चाण्डालादिमृताहिताग्नेरग्न्यादीनां प्रतिपत्तिकर्म्म च स्मृत्यन्तरेऽभिहितम्।

वैतानस्थाग्निपेदसु आवसथ्यञ्चतुष्पथे।
पात्राणि तु दहेदग्नौ यजमाने हृथामृते॥

हृथामृतः अविहितमार्गेण मृतः।

तथा।

आत्मनस्त्यागिनां नास्ति पतितानां तथा क्रिया।
तेषामपि च गङ्गायास्तीरे संस्थापनं मतम्॥

गङ्गेति पुण्यनद्युपलक्षणम्। एवं पूर्व्वोक्तनिन्दितमरणे मृतानां स्नेहादिनाग्न्याद्यौर्द्ध्वदेहिककरणे स्मृत्यन्तरे प्रायश्चित्तमाम्नातम्।

कृत्वाग्निमुदकं स्नानं स्पर्शनं वहनं हृथा।
रज्जुच्छेदाश्रुपातञ्च तप्तकृच्छ्रेण शुध्यति॥ इति।

एतच्च बुद्धिपूर्व्वकप्रत्येकाग्न्यादिकरणे।

अबुद्धिपूर्व्वके तु संवर्त्तः।

एषामन्यतमं प्रेतं यो वहेत दहेत वा।
कटोदककृत्यां कृत्वा कृच्छ्रं सान्तपनं चरेत्॥

यच्च सुमन्त्वादिभिर्मांसं भैक्षाहारस्त्रिषवणञ्च तथा एकरात्राभोजनादिकञ्चाभिहितम् तदशक्तविषये देशकाला-

व्यपेक्षानुसारेण योजनीयम्। यम्—हृद्रादिर्लुप्तभिषक्क्रियः*
स्तस्यात्महननमप्यनुज्ञातमादिपुराणेषु।

हृद्रः शौचस्मृतिर्लुप्तः प्रत्याख्यातभिषक्क्रियः।
आत्मानङ्गातयेद्यस्तु भृग्वग्न्यनशनाम्बुभिः॥
तस्य विरात्रमाशौचं द्वितीये त्वस्थिसञ्चयः।
तृतीये तृदकङ्कृत्वा चतुर्थे श्राद्धमारभेत्॥

तथा।

गच्छेन्महापथं वापि तुषारगिरिमादरात्।
प्रयागे वटशाखायां देहत्यागङ्करोति यः॥
स्वयं देहविनाशस्य काले प्राप्ते महामतिः।
उत्तमान्प्राप्नुयाल्लोकान्नात्मघाती भवेत्क्वचित्।
एतेषामधिकारस्तु सर्व्वेषां सर्व्वजन्तुषु।
नराणामथ नारीणां सर्व्ववर्णेषु सर्व्वदा।
अशौचं स्यात्त्रयहं तेषां वह्न्यानलक्षतेषु च॥
वाराणस्यां स्त्रियेद्यस्तु प्रत्याख्यातभिषक्क्रियः।
प्रणवं तारकं ब्रूते नान्यथा कस्यचित्क्वचित्॥

विवस्वान्।

सर्व्वेन्द्रियविमुक्तस्य स्वव्यापाराजमस्य च।
प्रायश्चित्तमनुज्ञातमग्निपातो महापथः॥

---

* औषधसेवनादिचिकित्सारहित इत्यर्थः। † शौचेन सह स्मृतिः तथाः स्मृत्याचाररहित इत्यर्थः।

धर्म्मार्ज्जनासमर्थस्य* द्वादशवार्षिकादिरूपप्रायश्चित्तासमर्थस्य। एवं शास्त्राविहितमार्गेण मृतानां चाण्डालादिमृतानां संवत्सरादूर्द्धमौर्द्ध्वदेहिकङ्कार्य्यम्।

षट्त्रिंशन्मते।

गोब्राह्मणैर्हतानाञ्च पतितानां तथैव च।
ऊर्द्धं संवत्सरात्कुर्य्यात्सर्व्वमेवौर्द्ध्वदेहिकम्॥

अत्रापरं विशेषमाह

पराशरः।

चाण्डालेन श्वपाकेन गोभिर्विप्रैर्हतो यदि।
आहिताग्निर्मृतो विप्रो विशेषेणात्मघातकः॥
दहेत ब्राह्मणं विप्रो लोकाग्नौ मन्त्रवर्ज्जितम्।
दग्ध्वास्थीनि पुनर्गृह्य क्षारेण क्षालयेत्ततः।
स्वेनाग्निना स्वमन्त्रेण पृथगेतत्पुनर्दहेत्॥

संवत्सराद्ध्वमपि तत्तत्पापानुसारेण द्विगुणादिकं प्रायश्चित्तं विधाय नारायणबलिञ्च कृत्वा और्द्ध्वदेहिकङ्कार्य्यम्। आयुषोऽनित्यत्वेन† संवत्सरानन्तरमौर्द्ध्वदेहिकादिलोपप्रसङ्गात्।

तच्च नारायणबलिङ्कृत्वा।

तथाच वृद्धयाज्ञवल्क्यः।

---

* बहुषु पुस्तकेषु दर्शनादेवं रचितं परन्तु स्वव्यापाराचमस्य इत्येव पाठो युक्तः।

† पुत्रादिरूपाधिकारिणामिति शेषः।

नारायणबलिः कार्य्यो लोकगर्हाभयान्नरैः ।
तथा तेषां भवेच्छौचं नान्यथैत्यत्रवीद्यमः ॥

नारायणबल्यौर्द्ध्वदैहिककरणे भवतीत्यर्थः ।

सर्पहतेषु विशेषः ।

संवत्सरं यावत्पञ्चम्यां नागपूजां विधाय तदनन्तरं नारायणबलिङ्कृत्वा सौवर्णनागं प्रत्यब्दाङ्काञ्च व्यासोद्देशेन ब्राह्मणाय दत्त्वा और्द्ध्वदैहिकङ्कुर्य्यात् ।

नारायणबलिस्वरूपञ्च विष्णुनाभिहितम् ।

एकादशीं समासाद्य शुक्लपक्षस्य वै तिथिम् ।
विष्णुं समर्च्चयेद्देवं यमं वैवस्वतं तथा ॥
दश पिण्डान् घृताभ्यक्तान्दर्भेषु मधुसंयुतान् ।
तिलमिश्रान् प्रदद्याद्वै संयतो दक्षिणामुखः ॥
विष्णुं बुद्धौ समासाद्य नत्वभ्यर्च्य ततः क्षिपेत् ।
नामगोत्रग्रहङ्कृत्वा पुष्पैरभ्यर्चनं तथा
धूपदीपप्रदानञ्च भक्ष्यभोज्यं तथापरम् ॥
निमन्त्रयेत विप्रान्वै पञ्च सप्त नवापि वा ।
विद्यातपःसमृद्धान्वै कुलोत्पन्नान् समाहितान् ॥
अपरेऽह्नि समाप्ते मध्याह्ने समुपस्थितः ।
विष्णोरभ्यर्चनङ्कृत्वा विप्रांस्तानुपवेशयेत् ।
उदङ्मुखान्यथाज्येष्ठं पितृरूपमनुस्मरन् ॥
मनो निवेश्य विष्णौ वै सर्व्वङ्कुर्य्यादतन्द्रितः ।
आवाहनादि यत्प्रोक्तं दैवपूर्व्वं तथाचरेत् ॥

तस्मान्नात्वा ततो विप्रस्तृप्तिं पृष्ट्वा यथाविधि ।
हविष्यव्यञ्जनेनैव तिलादिसहितेन च ।
पञ्च पिण्डान् प्रदद्याच्च दैवं रूपमनुस्मरन् ॥
प्रथमं विष्णवे दद्याद्ब्रह्मणे च शिवाय च ।
यमाय सानुमाराय चतुर्थं पिण्डमुत्सृजेत् ॥
मृतं सङ्कीर्त्य मनसा गोत्रपूर्व्वमतःपरम् ।
विष्णोर्नाम गृहीत्वैवं पञ्चमं पूर्व्ववत्क्षिपेत् ॥
विप्रानाचम्य विधिवद्दक्षिणाभिः समर्च्चयेत् ।
एकं वृद्धतमं विप्रं हिरण्येन समर्च्चयेत् ।
गवा वस्त्रेण भूम्या च प्रेतत्वं मनसा स्मरेत् ॥
ततस्तिलाम्भो विप्रास्तु हस्तैर्दर्भसमन्वितैः ।
क्षिपेयुर्गोत्रपूर्व्वन्तु नामवृद्धौ निवेश्य च ॥
हविर्गन्धतिलाम्भस्तु तस्मै दद्युः समाहिताः ।
मित्रभृत्यजनैः सार्द्धं पश्चाद्भुञ्जीत वाग्यतः ॥

भविष्यपुराणे ।

सुवर्णभारनिष्पन्नं नागङ्कृत्वा तथैव गाम् ।
व्यासाय दत्त्वा विधिवत्पितुरानृण्यमाप्तवान् ॥ इति ।

उदकादिदानानन्तरकर्त्तव्यतामाह

याज्ञवल्क्यः ।

कृतोदकान् समुत्तीर्णान्मृदुशाद्वलसंस्थितान् ।
स्नाता नाववदेयुस्तानितिहासैः पुरातनैः ॥

अववदेयुः बोधयेयुः ।

इतिहासरूपञ्च ।

मानुष्ये कदलीस्तम्भे निःसारे सारमार्गणम् ।
करोति यः स मूढात्मा जलबुद्बुदसन्निभे ॥ इति ।

तथाच न रोदितव्यमपीति स एवाह ।

श्लेष्मासु बान्धवैर्मुक्तं प्रेतो भुङ्क्ते यतोऽवशः ।
अतो न रोदितव्यं हि क्रियाः कार्याः स्वशक्तितः ॥

इतिहासश्रवणानन्तरं किङ्कर्त्तव्यमित्यत आह ।

इति संश्रुत्य गच्छेयुर्गृहं बालपुरःसराः ।
विदश्य निम्बपत्राणि नियता द्वारवेश्मनि* ॥
आचम्यादाय सलिलं गोमयं गौरसर्षपान् ।
प्रविशेयुः समालभ्य कृत्वाश्मनि† पदं शनैः ॥

धर्म्मार्थप्रेतनिर्हरणादिकर्त्तव्यतायामपि स्नानानन्तरं प्राणानायम्य निम्बपत्रदंशनप्रभृतिगृहप्रवेशात्प्राक्कर्म्मकरणेन सद्यः शुद्धिः‡ ।

यतः स एवाह ।

प्रवेशनादिकङ्कर्म्म प्रेतसंस्पर्शिनामपि ।
इच्छतां तत्क्षणाच्छुद्धिं परेषां§ स्नानसंयमात् ॥

पराशरः ।

अनाथं ब्राह्मणप्रेतं ये वहन्ति द्विजातयः ।

* द्वारि वेश्मनः इति पाठान्तरम् । † प्रस्तरे । ‡ सम्बन्धज्ञानानामिति शेषः ।
§ उदासीनानामशौचसम्बन्धरहितानामिति यावत् ।

पदे पदे यज्ञफलमानुपूर्व्वीमभन्ति ते ॥
न तेषामशुभं किञ्चित्पापं वा शुभकर्म्मणाम्* ।
जलावगाहनात्तेषां सद्य.शौचं विधीयते ॥

यत्तु स्नेहादिवगान्निर्हृत्य† तदन्नमश्नाति तद्गृहे च निवसति तस्य दशाहाच्छुद्धिर्यस्तत्पूर्व्ववदेव निर्हृत्य तद्गृहे वसति न तदन्नमश्नाति स त्रिरात्राच्छुध्यति । यश्च निर्हरणादिकमेव करोति न तद्गृहवासं न च तदन्नभोजनं स त्वेकाहात् ।

तथाच मनुः ।

असपिण्डं द्विजं प्रेतं विप्रो निर्हृत्य बन्धुवत् ।
विशुध्यति त्रिरात्रेण मातुरान्तांश्च बान्धवान् ॥
यद्यन्नमत्ति तेषान्तु दशाहेनैव शुध्यति ।
अनदन्नन्नमह्नैव न चेत्तस्मिन् गृहे वसेत् ॥

एतच्च सजातीयविषयम् ।

विजातीयविषये तु गौतमोक्तो विशेषः ।

अवरश्चेद्वर्णः पूर्व्ववर्णमुपस्पृशेत्पूर्व्वो वावरम् । तत्र शावोक्तमाशौचमिति ।

उपस्पृशेन्निर्हरेत् । हीनवर्णश्चेदुत्कृष्टं निर्हरति उत्कृष्टश्चेन्नीचं तत्र निर्हरणीयाशौचदिनैः शुद्धिः । ब्राह्मणश्चेच्छूद्रं निर्हरति तदा मासेन शुद्धिः, शूद्रश्चेद्ब्राह्मणं तदा दशभिर्दिनैः, इत्यनेन प्रकारेणानुसन्धेयम् ।

---

* शुभं कर्म्म येषां शुभकर्म्मकारिणामित्यर्थः । † दाहं कृत्वा ।

ब्रह्मपुराणे ।

ब्राह्मणस्त्वन्यवर्णानां न करोति कदाचन ।
कामान्मोहाद्भयाल्लोभात्कृत्वा तज्जातितां व्रजेत् ॥
पुत्राः क्रुर्व्वन्ति विप्रायाः* क्षत्रविट्शूद्रयोनयः ।
सः† ताद्गेभ्यः‡ पुत्रेभ्यो न करोति कदाचन ॥
राज्ञि मृते सपिण्डे तु निरपत्ये पुरोहितः ।
मन्त्री वा तद्गोचन्तु चोत्वा पश्चात्करोति सः ॥

अनपत्ये अविद्यमानसपिण्डे च राज्ञि मृते स्वपुरोहितस्तस्मै राज्ञे आद्यं कुर्य्यात्तत्प्रयुक्ताशौचं चोत्वेत्यर्थः शवसंस्पर्श-निमित्तं चाशौचं स्पर्शवत एव न तस्याद्यादीनां तद्व्याप्तां वा।

तथाचाङ्गिराः ।

आशौचं यस्य संसर्गाज्जायते गृहमेधिनः ।
क्रियास्तस्य न लुप्यन्ते ब्रह्मणान्न तद्भवेत् ॥

क्रिया वैतानोपासनाद्याः । ब्रह्मणां गृहे भवानामति-क्रान्ताशौचेऽप्येवमेव ।

अतिक्रान्ते दशाहे तु पश्चाज्ज्ञानाति चेद्गृही ।
त्रिरात्रं सूतकं तस्य न तद्व्यस्य कर्हिचित्§ ॥

इति स्मरणात् । त्रिरात्रमिति मातापित्रतिरिक्तविषयम् ।

आशौचिनां नियमविशेषो याज्ञवल्क्येन दर्शितः ।

---

* क्षत्रमिति शेषः । † विप्रमिति तत्पदार्थान्तरम् । ‡ विप्रेभ्यइति शेषः । § क्षत्रिय-यादिष्वपि जातिषु । ¶ कस्मिन् स्यादशौचमित्यत्र । क्षत्रियादिष्वेव साधु ।

क्रीतलब्धागता भूमौ स्वपयुस्ते पृथक् पृथक्।

क्रीताग्नना अयाचितलब्धाग्नना भवेयुरिति नियमादर्थादेतदभावे अनग्नं मिदं दिनत्रयपर्य्यन्तमयं नियमः।

तथाच वशिष्ठः।

गृहाद्गत्वा अयस्तस्तरे त्र्यहमनग्नन्त आसीरन्।

क्रीतोत्पन्नेन वर्त्तेरन्निति।

आशौचिनां शयनाय तृणमयस्तस्तरः अयस्तस्तर इत्युच्यते।

मनुः।

अचारलवणान्नाः स्युर्निमज्जेयुश्च ते त्र्यहम्।

मांसाशनञ्च नाश्नीयुरिति॥

गौतमः।

अधःशय्यागायिनो ब्रह्मचारिणः सर्व्व इति।

तथा वपनं दुःखानुभाविभिः सर्व्वैः सपिण्डैः पुत्रैरेव स्वस्वदेशाचारानुसारेण। प्रथमदिनप्रभृति विषमदिनेषु अपि आद्यादिप्रदानात्पूर्व्वङ्कर्त्तव्यम्।

यदाहापस्तम्बः।

अनुभाविनाञ्च परिवापनमिति।

अनुभाविनोऽल्पवयसः सपिण्डाः पुत्राश्च।

तथा।

द्वितीयेऽहनि कर्त्तव्यं क्षुरकर्म्म प्रयत्नतः।

तृतीये पञ्चमे वापि सप्तमे वा प्रदानतः॥

तथा।

गङ्गायां भास्करे क्षेत्रे मातापित्रोर्गुरौ मृते ।
आधाने सोमपाने* च वपनं सप्तसु स्मृतम् ॥ इति ।

देवलः ।

दशमेऽहनि सम्प्राप्ते स्नानङ्गामाद्बहिर्भवेत् ।
तत्र त्याज्यानि वासांसि केशश्मश्रुनखानि च ॥ इति ।

प्रथमादिदिनेषु क्षतक्षौरस्यापि शुद्ध्यर्थं दशमदिनेऽपि वपनङ्कर्त्तव्यम् । दशमदिनमिति सूतकान्तोपलक्षणम् । अन्ते च वाससां त्याग इति स्मरणात् । सूतकान्तकर्त्तव्यवासस्त्यागसाहचर्य्यात्केशश्मश्रुादित्यागोऽपि सूतकान्तेऽपि कर्त्तव्यः ।

अस्थिसञ्चयनदिनमपि वैकल्पिकम् ।

तत्र संवर्त्तः ।

प्रथमेऽह्नि तृतीये वा सप्तमे नवमे तथा ।
अस्थिसञ्चयनङ्कार्य्यं दिने तद्गोत्रजैः सह ॥

विष्णुः ।

चतुर्थे दिवसेऽस्थिसञ्चयनं कुर्य्यात्तेषाञ्च गङ्गाम्भसि प्रक्षेपः । द्वितीये त्वस्थिसञ्चय इति स्वगृह्यानुसारेण व्यवस्था । अस्थिसञ्चयनदिवसे च श्मशानवासिदेवतानामुद्देशेन पूजा कर्त्तव्या ।

अस्पृश्यत्वलक्षणाशौचनिवृत्तिकालनियममाह

देवलः ।

दशाहादित्रिभागेन क्षते सञ्चयने क्रमात् ।

* आधानकाले सीमे च इति पाठान्तरम् ।

अङ्गस्पर्शनमिच्छन्ति वर्णानां तत्त्वदर्शिनाम् ॥
त्रिचतुःपञ्चदशभिः स्पृश्या वर्णक्रमेण तु ।
अस्थिसञ्चयनकृतएव स्नाशौचत्रिभागतः ॥

शुद्धिर्न त्वस्थिसञ्चयनाभाव इति तात्पर्यम् ।

तथाच स्मर्यते ।

अस्थिसञ्चयनादूर्ध्वमङ्गस्पर्शो न दुष्यति । इति ।

एतदुपनीतविषयम् । अनुपनीतं त्वस्थिसञ्चयनमन्तरेण स्नाशौचत्रिभागतः स्पृश्यत्वम् ।

तदाह देवलः ।

स्नाशौचकालादिज्ञेयं स्पर्शनन्तु त्रिभागतः ।
शूद्रविट्क्षत्रविप्राणां यथाशास्त्रं प्रचोदितम् ॥ इति ।

कर्म्मानधिकारलक्षणं स्नाशौचं स्ववर्णाशौचकालानन्तरं स्नानादिभिरपगच्छति । एतच्चाशौचमाहिताग्नेः संस्कारदिनप्रभृति अनाहिताग्नेस्तु मरणदिनप्रभृति अस्थिसञ्चयनं तूभयोरपि संस्कारादिदिनप्रभृतीति विवेकः ।

तथाचाङ्गिराः ।

अनग्निमत उत्क्रान्तैः* साग्नेः संस्कारकर्म्मणः† । इति ।

पैठीनसिरपि ।

अनग्निमत उत्क्रान्तैराशौचादिर्द्विजातिषु ।
दाहादग्निमतो विद्यादिदेशस्थे मृते तथा ॥ इति ।

---

* जननमरणदिनैः । † दाहदिनमारभ्य ।

साग्निकस्य दाहप्रभृत्येवाशौचादीनि तत्पुत्रादीनामासंस्कारात्सन्ध्यादिकर्म्मलोपो नास्ति* ।

अग्नौचे नित्यनैमित्तिकयोर्निवृत्तिः पारस्करेण दर्शिता ।

नित्यानि विनिवर्त्तेरन्नित्यवैतानवर्जं शालाग्नावेकः अन्य एतानि कुर्युः ।

अत्र नित्यशब्देनावश्यकर्त्तव्यनैमित्तिकानामप्युपसंग्रहणम् । अतो वैतानानां स्मार्त्तानाञ्च कर्म्मणां प्रतिप्रसवेऽपि नैमित्तिकस्यापि प्रतिप्रसवः । काम्यानान्तु सर्व्वत्र सर्व्वव्यापिनिवृत्तिः । वितानाग्नीनां विस्तारः वैताग्निः । तत्र क्रियमाणानि नित्याग्निहोत्रादीनि वैतानानि वर्जयित्वा नित्यानि विनिवर्त्तेरन् इत्ययं निषेधो नित्याग्निहोत्रादिषु न प्रवर्त्तते इत्यर्थः । अतः स्वयमेव कुर्य्यात् । शालाग्निर्गृह्याग्निस्तत्सम्बन्धिनां सायंप्रातर्होमस्थालीपाकादीनां पारिक्रो कर्त्तव्यता करणमकरणं वा शास्त्रार्थ इत्यर्थः । यदा करणपक्षस्वीकारः तदा अन्य असपिण्डा एतानि कुर्युः अन्येनासपिण्डेनैतानि कारयेदित्यर्थः । तत्रापि स्वद्रव्यत्यागात्मकप्रधानं स्वयमेव कुर्य्यात् । तस्यानन्यनिष्पाद्यत्वात् ।

पुलस्त्यः ।

सन्ध्यामिष्टिं चरुं होमं यावज्जीवं समाचरेत् ।
न त्यजेत्सूतके वापि त्यजन् गच्छेदधो द्विजः ॥

* दाहात्प्राक् सन्ध्यादिकर्म्मलोपो नास्तीत्यर्थः ।

इष्टिराहिताग्नेर्दर्शपौर्णमासादिकश्चरुः। अनाहिताग्नेः स्थालीपाकादिरूपः।

जातूकर्णः।

सूतके तु समुत्पन्ने स्मार्त्तञ्चाग्नं कथं भवेत्।
पिण्डयज्ञं चरुं होममसगोत्रेण कारयेत्॥

पिण्डयज्ञः पिण्डपितृयज्ञः। चरुश्चपणकर्म्माश्वयुज्यादिकः स्थालीपाकश्च। असगोत्रा असपिण्डाः पिण्डनिषेधस्याशौचनिमित्तत्वात्। अशौचरहितेन ब्रह्मचारिणा सपिण्डेन होतव्यमिति गम्यते।

बृहस्पतिः।

सूतके मृतके चैव अग्नौ श्राद्धभोजने।
प्रवासादिनिमित्तेषु हावये*न्न तु हापयेत्†॥

अग्निसाध्येऽपि वैश्वदेवस्य निवृत्तिस्तथा पञ्चयज्ञादीनामपि।

तथाच संवर्त्तः।

विप्रो दग्धाहमासीत वैश्वदेवविवर्जितः।
पञ्चयज्ञविधानन्तु न कुर्य्यान्मृत्युजन्मनोः॥ इति।

एवञ्चोक्तनित्यनैमित्तिकव्यतिरेकेणेतरेषां नैमित्तिकानामपि निवृत्तिः। यत्पुनः

दानं प्रतिग्रहो होमः स्वाध्यायश्च निवर्त्तते। इति

तत्काम्यहोमाभिप्रायं वैश्वदेवाभिप्रायं वा।

---

* अन्येन होमं कारयेत्। † न तु त्यजेदित्यर्थः।

सन्ध्याविषये विष्णुपुराणे ।

सर्व्वकालमुपस्थानं सन्ध्यायाः पार्थिवेष्यते ।

अन्यत्र सूतकार्शौचविभ्रमातुरभीतितः ॥

सूतके आर्शौचे सन्ध्यायाः न स्वरूपतः परित्यागः अपि तु मन्त्रोच्चारणपूर्व्विकायाः । पुलस्त्येन प्राणायामरहितमानसिक-सन्ध्याभ्यनुज्ञानात् ।

सूतके मृतके चैव सन्ध्याकर्म्म समाचरेत् ।

मनसा धारयेन्मन्त्रान् प्राणायामादृते द्विजः ॥ इति ।

अञ्जलिप्रक्षेपम् सावित्रीमुच्चार्य्य कार्य्यः ।

तथाच पैठीनसिः

सूतके सावित्र्या चाञ्जलिं प्रक्षिप्य दक्षिणाङ्गुत्वा सूर्य्यं ध्यायन्नमस्कुर्य्यात् । इति ।

सूतकादौ ग्रहणे जाते स्नानदानश्राद्धे न दोषः ।

तथाच हेमाद्रौ व्यासः ।

चन्द्रसूर्य्यग्रहे स्नायान्मृतके सूतकेऽपि च ।

अस्नायी मृत्युमाप्नोति स्नायी मृत्युं न विन्दति ॥

तथा ।

सूतके मृतके चैव न दोषो राहुदर्शने* ।

तावदेव भवेच्छुद्धिर्यावन्मुक्तिर्न दृश्यते ॥

सूतके मृतके वाऽपि पिण्डैरसमानोदकैर्याशौचान्नं न भोक्तव्यम् ।

---

* राहुदर्शननिमित्तस्नानदानश्राद्धादिकरणे इति ग्रन्थकाराशयः ।

उभयत्र दशाहानि* कुलस्यान्नं न भुज्यते।
उभयत्र सूतके मृतके च। सकुल्यानान्तु न दोषः।
सूतकेषु कुलस्यान्नमदोषं मनुरब्रवीत्।
इति तेनैवोक्तत्वात्।

षट्त्रिंशन्मते।

उभाभ्यामपरिज्ञाते सूतकं नैव दोषकृत्।
एकेनापि परिज्ञाते भोक्तुर्दोषोऽनुपावहेत्॥

उभाभ्यां दातृभोक्तृभ्यां यद्यपि दात्रा सूतकाद्यपरिज्ञाते दातुः सूतकं नास्ति ज्ञातस्यैव जननादेर्निमित्तत्वात्† तथापि दातृपरिज्ञानमन्तरेण केवलं भोक्तुर्ज्ञानेऽपि वचनाद्भोजने दोषो भोक्तुरेव उपपद्यते भोक्तुरपि ज्ञानं भोजननिवृत्तौ निमित्तम्। सूतकादिस्वरूपनिष्पत्तिरेकोऽंशः तज्ज्ञानञ्चापरः एतदुभयविशिष्टं‡ निमित्तम्। एवञ्च निमित्तैकदेशस्य प्रसवादेर्भोक्तृज्ञातत्वादेकदेशविभावितन्यायेनाऽन्यस्यापि सम्भाव्यमानत्वात्

---

* दशाहानि इत्युपलक्षणं तेन क्षत्रियादेरपि जननमरणाशौचे जाते असपिण्डैः असमानोदकैश्च दशाहादिपर्यन्तम् अशौचन्नं न भोक्तव्यम्। † अशौचं प्रतीति शेषः।

‡ सूतकादिस्वरूपोत्पत्तितज्ज्ञानरूपोभयविशिष्टम्।

§ निबन्धे लिखितं नैकमेकदेशविभावितः।
दाप्यः सर्वं तृणेनार्थमग्राह्यस्त्वनिवेदितः॥

इति याज्ञवल्क्यवचनम्। यो लिखितानेकं सुवर्णादिकमपलपति स एकद्रव्ये साक्ष्यादिभिर्विभावितः सर्वं दद्यात्। एकदेशविभावनादिज्ञानतः एव तस्य तदपलापेन दुःशीलत्वावधारणादपरांशेऽपि तथात्वमेव सम्भाव्यते। सत्यविभावकस्यापि प्रक्रान्तविषये यथार्थवाक्यनिश्चयादविभावितांशेऽपि सत्यवादित्वसम्भावनमित्येव तर्कपरम्परागत एकदेशविभावितन्यायः।

केवलभोक्तृज्ञानेऽपि भोजननिवृत्तिः। यदा तु दात्रा ज्ञातं न भोक्त्रा एकदेशविभाविन्यायात्तदापि भोक्तृरेव वचनाद्भोजननिमित्तो दोषः न दातुः। अपि च दातुः सूतकाद्भोजयितृत्वदोषोऽस्त्येव अयत्ने भोजयितृत्वनिमित्तो दोषः सूतके सूतके विहितप्रथमादिदिननवश्राद्धादिव्यतिरिक्तकाले विज्ञेयः तत्काले विहितत्वात्।

ब्रह्मपुराणे।

अपि दासगृहीतायां सूतके सूतके तथा।
अविज्ञाते न दोषः स्याच्छ्राद्धादिषु कदाचन॥
विज्ञाते भोक्तृरेव स्यात्प्रायश्चित्तादिकं क्रमात्॥

बृहस्पतिः।

विवाहोत्सवयज्ञेषु त्वन्तरा सूतसूतके।
परैरन्नं प्रदातव्यं भोक्तव्यञ्च द्विजोत्तमैः॥
भुञ्जानेषु च विप्रेषु त्वन्तरा सूतसूतके।
अन्यगेहोदकाचाम्ताः सर्व्वे ते शुचयः स्मृताः॥

मरीचिः।

लवणे मधुमांसे च पुष्पमूलफलेषु च।
शाककाष्ठतृणेष्वम्बु दधिसर्पिःपयःसु च॥
तिलौषधाजिने† चैव पक्वापक्वे स्वयङ्गृहः§।

---

* भोजनकारयितृत्वनिमित्तदोषः। † यत्नकारणमते प्राप्ते ज्ञाते वा श्राद्धादौ ब्राह्मणभोजने कोऽपि दोषो नास्ति। ‡ तिलौषधाजिन इति पाठान्तरम्। § स्वयंगृह इति यज्ञान्तरीयः पाठः।

पुष्पेषु चैव सर्व्वेषु नाशौचं सूतसूतके ॥

स्वयङ्गृहः स्वाम्यनुज्ञातो गृह्णीयादित्यर्थः । पक्वापक्व इति पक्वं भक्ष्यजातमपक्वं तण्डुलादिकं चान्नसत्रप्रवृत्तादेव ग्राह्यं नान्यस्मात् ।

तथाचाङ्गिराः ।

अन्नसत्रप्रवृत्तानाम*माममन्नमगर्हितम् ।

भुक्त्वा पक्वान्नमेतेषां चिराच्चरु† पयः पिबेत् ॥

अत्र भक्ष्यव्यतिरिक्तादनादिविषये पक्वशब्दः । इतरथा मरीचिवचनविरोधात् । व्रतादिचारम्भेषु सत्सु पश्चाच्चेत्सूतकादिकं भवति तदा तावन्मात्रे सूतकाभावः ।

व्रतयज्ञविवाहेषु श्राद्धे होमेऽर्चने जपे‡ ।

प्रारब्धे सूतकं न स्यादनारब्धे तु सूतकम् ॥

इति स्मरणात् । सूतकमिति मृतकस्याप्युपलक्षणम् । प्रारम्भश्च तेनैवोक्तः ।

प्रारम्भो वरणं यज्ञे सङ्कल्पो व्रतजापयोः§ ।

नान्दीमुखं§ विवाहादौ श्राद्धे पाकपरिक्रिया ॥

प्रारम्भाभावेऽपि कन्याया अधार्य्यत्वे, सन्निहितलग्नान्तराभावे च विष्णुनैवाभ्यनुज्ञा दत्ता ।

---

* अन्नदानरूपयज्ञप्रवृत्तानामशौचिनां सकाशात् आमान्नग्रहणे दोषो नास्ति इति समुदायार्थः । † तवेति पाठान्तरम् । ‡ व्रतसञ्चयोरिति पाठान्तरम् । § नान्दीश्राद्धमिति पाठान्तरम् ।

अनारब्धविशुद्ध्यर्थं कुष्माण्डैर्जुहुयाद्घृतम् ।
गां दद्यात्पञ्चगव्याशी ततः शुध्यति सूतिकी ॥

कुष्माण्डैः कुष्माण्डमन्त्रैः* ।

---

* यद्देवा देवहेलनं देवासश्चकृमा वयम् ।
आदित्यास्तस्मान्मा मुञ्चतर्तस्यर्तेन मामित ॥
देवा जीवनकाम्या यद्वाचानृतमूदिम ।
तस्मान्न इह मुञ्चत विश्वेदेवाः सजोषसः ॥
ऋतेन द्यावापृथिवी ऋतेन त्वꣳ सरस्वती ।
कृतान्नः पाह्यंहसो यत्किञ्चानृतमूदिम ॥
इन्द्राग्नी मित्रावरुणौ सोमो धाता बृहस्पतिः ।
ते नो मुञ्चन्त्वंहसो यदन्यकृतमारिम ॥
स जात श्रꣳसादुत जामिश्रꣳसाज्जायसः श्रꣳसादुत वा कनीयसः ।
अनाधृष्टं देवकृतं यदेनस्तस्मान्मा त्वमस्माज्जातवेदो मुमुग्धि ॥
यद्वाचा यत्मनसा बाहुभ्यामूरुभ्यामष्ठीवद्भ्याꣳ शिश्नैर्यदनृतं चकृमा वयम् ।
अग्निर्मा तस्मादेनसः गार्हपत्यः प्रमुञ्चतु चकृम यानि दुष्कृता ॥
येन चितो अर्णवान्निर्बभूव येन सूर्यं तमसो निर्ममोच ।
येनेन्द्रो विश्वा अजहादरातीस्तेनाहं ज्योतिषा ज्योतिरानशान आचि ॥
यत्कुसीदमप्रतीतं मयेह येन यमस्य निधिना चरामि ।
एतत्तदग्ने अनृणो भवामि जीवन्नेव प्रति तत्ते दधामि ॥
यन्मयि माता यदा पितेष यदन्तरिक्षं यदा श्वसाति ।
क्रामामि चित्ते देवा दिवि जाता यदाप इदं दिवं मे ।
वरुण तत्त्वायामि त्वन्नो अग्ने सत्वन्नो अग्ने त्वमग्ने अयासि ॥
सुमुग्धि, सप्त च ॥ ३ ॥
तैत्तिरीय आरण्यके द्वितीयप्रपाठके तृतीयोऽनुवाकः ।
यददीव्यन्नृणमहं बभूवादित्यन्वा सङ्गर जनेभ्यः ।

अथानुलोमजविजातीयसपिण्डाशौचम् ।

तत्र बौधायनः ।

क्षत्रविट्शूद्रजातीया ये स्युर्विप्रस्य बान्धवाः ।
तेषामशौचे विप्रस्य दशाहाच्छुद्धिरिष्यते ॥

तेषामशौचे क्षत्रियादिजननादिनिमित्ताशौचे ।

हारीतः ।

दशाहाच्छुद्धयते विप्रो जन्महानौ* स्वयोनिषु ।

अग्निर्मा तस्मादिन्द्रश्च संविदानौ प्रमुञ्चताम् ॥
यद्ब्रह्माण्यौ चक्रथुः किल्बिषाण्यृषीणां वयुमुपजिघ्रमाणः ।
उभयस्याः च राष्ट्रस्य तान्यग्नेरसावनूदन्तासृणानि ॥
उभयस्यै राष्ट्रस्यै किल्बिषाणि यदक्षन्नमनूदन्तसीतत् ।
नेत्र ऋणान्यृण धन्यमानौ यमस्य लोके अधिरज्जुराय ॥
अवते हेड उदुत्तमांसमयं वरुण तत्त्वायामि त्वन्नौ अग्ने स त्वन्नौ अग्ने ।
सकुल्मकौ विकुल्मकौ निर्ऋथौ यश्च निखनः ॥
ते यौऽस्मत् यन्ममनागसौ दूराद्दूरमचीचतम् ।
निर्यन्ममचीचते कृत्यान् निर्ऋतिश्च ॥
तेन यौऽस्मत्समृच्छाते तमग्ने प्रसुवामसि ।
दुःशꣳ सानृशꣳ साभ्यं घणेनासुघणेन च ।
तेनार्योऽस्मत्समृच्छाते तमग्ने प्रसुवामसि ॥
संवर्चसा पयसा सन्तनूभिरगन्महि मनसा सꣳ शिवेन ।
त्वष्टा नो अत्र विदधातु रायोऽनुमार्ष्टु तन्नीतयइलिष्टं ॥
कृत्यान् निर्ऋतिश्च पञ्च च ॥ ४ ॥

तैत्तिरीये आरण्यके द्वितीयप्रपाठके चतुर्थोऽनुवाकः ।

* जननमरणे इत्यर्थः ।

विष्णुः ।

क्षत्रियस्य विट्शूद्रेषु सपिण्डेषु षड्रात्रत्रिरात्राभ्यां वैश्यस्य शूद्रे सपिण्डे षड्रात्रेण शुद्धिर्हीनवर्णानामुत्कृष्टेषु सपिण्डेषु जाते मृते वा तदाशौचव्यपगमे शुद्धिः ।

बौधायनेनोक्तमनापद्विषयं हारीतादुक्तं त्वापद्विषयमिति व्यवस्था । एतेषां सापिण्ड्यं त्रिपुरुषमेव पिण्डास्त्वावर्त्तन्ते त्रिष्विति सापिण्ड्यप्रकरणेऽभिहितत्वात् ।

अपरो विशेषः आपस्तम्बेनोक्तः ।

क्षत्रविट्शूद्रजातीनां यावन्मृतकसूतके ।
तेषान्तु पैतृकं शौचं विभक्तानान्तु मातृजम् ॥

पितृगेहेऽवस्थितानां तदविभक्तानां पितृजातीयमाशौचं विभक्तानान्तु मातृजात्याभिहितमित्यर्थः । प्रतिलोमानान्तु सूतकादिकं नास्त्येव प्रतिलोमा धर्महीना इति स्मरणात् । मूत्रपुरीषोत्सर्गवन्मलापकर्षणार्थं शौचं कुर्य्यात् ।

अथ समानोदकाशौचम् ।

जन्मन्येकोदकानान्तु त्रिरात्राच्छुद्धिरिष्यते ।

तत्र मनुः ।

दशाहं शावमाशौचं सपिण्डेषु विधीयते ।
जननेऽप्येवमेव स्यान्निपुणं शुद्धिमिच्छताम् ॥

एकोदकाः समानोदकाः ते च सप्तमपुरुषार्द्धभागिनः* ।

---

* गामिन इत्यर्थः ।

समानोदकभावानुवृत्तिश्च यावज्जन्मनान्नोर्विज्ञानम्।

तथाच मनुः।

सपिण्डता तु पुरुषे सप्तमे विनिवर्त्तते।

समानोदकभावस्तु जन्मनान्नोरवेदने॥ इति।

वर्त्तत इत्यन्वयः।

अथ प्रोषितमरणजननाशौचम्।

तत्र निर्दशजननश्रवणे पितुः सचेलस्नानाच्छुद्धिः।

यदाह मनुः।

निर्दशं ज्ञातिमरणं श्रुत्वा पुत्रस्य जन्म च।

सवासा जलमाप्लुत्य शुद्धो भवति मानवः॥

पुत्रस्य इति सम्बन्धसूचकत्वात्पितुरेव स्नानं सपिण्डानान्तु दशाहादिके व्यतीते सूतकं नास्त्येव।

अतएव देवलः।

नाशुद्धिः प्रसवाशौचव्यतीतेषु* दिनेष्वपि।

प्रोषितमरणे तु याज्ञवल्क्यः।

प्रोषिते कालशेषः स्यादिति।

देशान्तरस्थसपिण्डमरणे दशरात्राद्यशौचकाले चानतिक्रान्ते दशरात्रादिशेषं यावदशौचं भवति। न श्रवणप्रभृति पुनर्दे-

---

* नाशौचं प्रसवेष्वस्तीति ग्रन्थान्तरीयः पाठः।

शाहिकमित्यर्थः। दशाहाद्यनन्तरं मासत्रयपर्य्यन्तं त्रिरात्रं ततः षण्मासपर्य्यन्तं पक्षिणी ततो नवमादर्व्वागेकाहः। ततः संवत्सरपर्य्यन्तं स्नानोदकदानाभ्यामेव शुद्धिः। संवत्सरानन्तरं स्नानेनेति विवेकः।

यदाह हरदत्तमिश्रः।

मासत्रये त्रिरात्रं स्यात् षण्मासे पक्षिणी तथा।
अहस्तु नवमादर्व्वागूर्द्धं स्नानेन शुध्यति॥

स्नानं सहचरितमुदकदानमप्याक्षिपति।

मनुः।

संवत्सरे व्यतीते तु स्नात्वैवापो विशुध्यति।

स्नात्वा स्नानेनेत्यर्थः। अन्यानि यानि विरुद्धवचनानि तानि पूर्व्वोक्तविषय एव योज्यानि एतन्मातापित्रतिरिक्तविषयम्। अतएव पैठीनसिः।

पितरौ चेन्मृतौ स्यातां दूरस्थोऽपि हि पुत्रकः।
श्रुत्वा तदिनमारभ्य दशाहं सूतकी भवेत्॥

दशाहमिति द्वादशाहाद्युपलक्षणार्थम्। सूतकी भवेदित्यनेन प्रेतकार्य्यकर्त्तव्यतां दर्शयति। मापत्न्यमातरि विशेषा दक्षेणोक्तः।

पितृपत्न्यामपेतानां मातृवर्ज्जं द्विजोत्तमः।
संवत्सरे व्यतीते तु त्रिरात्रमशुचिर्भवेत्॥

---

* स्वसहचरितमिति पाठान्तरम्।

एतच्च वक्ष्यमाणदेशान्तरलक्षणरहितदेशान्तरस्थसपिण्डमृतौ । देशान्तरमृते तु सपिण्डे मासत्रयादर्वागपि सद्यःशौचम् ।

देशान्तरमृतं श्रुत्वा क्लीवे वैखानसे* पतौ† ।
मृते स्नानेन शुध्यन्ति गर्भस्रावे च गोत्रिणः ॥

इति स्मरणात् ।

देशान्तरलक्षणमाह बृहन्मनुः ।

महानद्यन्तरं यत्र गिरिर्वा व्यवधायकः ।
वाचो यत्र विभिद्यन्ते तद्देशान्तरमुच्यते ॥

बृहस्पतिः ।

देशान्तरं वदन्त्येके षष्टियोजनमायतम् ।
चत्वारिंशद्वदन्त्यन्ये त्रिंशदन्ये तथैव च ॥

अत्र च देशान्तरतो व्यवस्था ।

स्मृत्यर्थसारे तु अन्यथा, तद्यथा

स्त्रीपुरुषयोः परस्परं त्वेवं सवर्णोत्तमपत्नीषु चैवम् ।

एवमित्यनेन मातापितृसवर्णाशौचमेवेति ग्रन्थकारः परामृष्टवान् । देशान्तरे कालान्तरे च हीनवर्णायाः मातुः सपत्न्या मरणे तु पुत्रस्य चिरात्तं हीनवर्णपत्नीषु चैवम् । संवत्सरे व्यतीते तु सपत्न्योः परस्परं चैवमिति । अतिक्रान्ताशौचमुपनीतोपरमएव । एतच्च वयोवस्थाशौचवत्सर्ववर्णसाधारणम् ।

तथाच व्याघ्रपादः ।

---

* वानप्रस्थाश्रमिणि । † भर्तरि, अस्य च क्लीवे वैखानसे च इत्यनेन सम्बन्धः । तथाच क्लीवे पतौ वानप्रस्थे च पतौ भर्तरि मृते स्नानमात्रमशौचम् ।

तुल्यं वयसि सर्व्वेषामतिक्रान्ते तथैव च।
उपनीते तु विषमं तस्मिन्नेवातिकालजम्॥

अयमर्थः। जन्मप्रभृत्युपनयनादर्व्वाचीने* वयसि मदाशौचं तत् सर्व्वेषां ब्राह्मणादीनां तुल्यम्। यच्च दशाहादिके अतिक्रान्ते तदपि तुल्यम्। उपनीतोपरमे दशदादशैत्यादिरूपेण विषमम्। तस्मिन्नेव उपनीतोपरम एवातिकालजमतिक्रान्ताशौचभवति। न पुनर्व्वयोवस्थाशौचातिक्रम इति।

अथ प्रोषितस्तदाहविधिस्तदशौचम्।

प्रोषितादिस्तगरीरालाभे तदस्थिभिः प्रतिकृतिं† कृत्वा अस्थ्नामप्यलाभे स्वस्वगृह्योक्तप्रकारेण पर्णगरैः प्रतिकृतिं कृत्वा दाहः कार्य्यः। तत्राहिताग्निर्यदि प्रोषितस्तत्सदा दशाहदादशाहादिकमेवाशौचं भवति।

तथाच वशिष्ठः।

आहिताग्निश्चेत्प्रवसन् म्रियेत पुनः संस्कारङ्कृत्वा शववदशौचमिति।

सम्पूर्णाशौचं संस्कारादूर्द्धमिति शेषः। अनाहिताग्नेस्त्रिरात्रम्।

---

* पूर्व्वकाले। † शवशरीरप्रतिनिधिम्। ‡ शवशरीरालाभे अस्थ्नामप्यलाभे तु आहिताग्नेर्ब्राह्मणस्य दशाहाशौचं क्षत्रियस्य द्वादशाहाशौचं वैश्यस्य पञ्चदशाहाशौचमिति दाहादूर्द्धमिति शेषः।

सुपिष्टै*र्जलसंमिश्रैर्दग्धव्यश्च तथाग्निना।
असौ स्वर्गाय लोकाय स्वाहेत्युक्त्वा स्वबान्धवैः॥
एवं पर्णनरं दग्ध्वा त्रिरात्रमशुचिर्भवेत्।

इति स्मरणात्।

अथोपाध्यायादुपरमे।

तत्र सन्निधाने अहरित्यनुवृत्तौ

याज्ञवल्क्यः।

गुर्व्वन्तेवास्य†नूचान‡मातुलश्रोत्रियेषु च।

गुरुरुपाध्यायः। एकग्रामनिवासिनः सन्निहितश्रोत्रियस्यैतदाशौचम्।

तद्यथाश्वलायनः।

एकाहं सब्रह्मचारिणि समानग्रामे च श्रोत्रियः। इति।

सब्रह्मचारी एकाचार्य्योपनीतः।

आचार्य्यविषये मनुः।

त्रिरात्रमाहुराशौचमाचार्य्ये संस्थिते सति।
तस्य पुत्रे च पत्न्यां च दिवारात्रमिति स्थितिः॥

सन्निहितगुणवच्छ्रोत्रियसन्निहितमातुलाद्युपरमे

मनुरेव।

श्रोत्रिये तूपसम्पन्ने त्रिरात्रमशुचिर्भवेत्।

---

* यवपिष्टैः। † शिष्यः। ‡ साङ्गवेदाध्यायी।

मातुले पत्निणीं रात्रिं गिरयत्रिंशान्यवेषु च ॥

उपसम्पन्नो मैत्रादियुक्तोऽगुणयुक्तो वा ।

हृहस्पतिः ।

ज्यहं मातामहाचार्यश्रोत्रियेषु शुचिर्भवेत् ।

हृद्धप्रचेताः ।

संश्रिते पत्निणीं रात्रिं दौहित्रे भगिनीसुते ।

संस्कृते तु त्रिरात्रं स्यादिति धर्मो व्यवस्थितः ॥

पित्रोरुपरमे स्त्रीणामृतानान्तु कथं भवेत् ।

त्रिरात्रेणैव शुद्धिः स्यादित्याह भगवान्यमः ॥

श्वशुरश्रोर्भगिन्याश्च मातुलान्याश्च मातुले ।

पित्रोः स्वसरि तद्वच्च पत्निणीं त्रयहमेव हि गाम् ॥

तथा

मातुले श्वशुरे मित्रे गुरौ गुर्व्योश्च नाम च ।

अशौचं पत्निणीं रात्रिं सूता मातामहो यदि ॥

विदेशस्थभगिन्यादिषु स्नानाच्छुद्धिः ।

तथाच हृद्धविष्णुः ।

भगिन्यां संस्कृतायान्तु भ्रातर्यपि च संस्कृते ।

मित्रे जामातरि प्रेते दौहित्रे भगिनीसुते ॥

श्यालके तत्सुते चैव सद्यःशौचेन शुध्यति ।

अत्र भ्रात्रपत्न्या भगिन्यास्तदपत्न्या च भ्रातुः स्नानाच्छुद्धिः ।

॥ जन्मयज्ञादियुक्तो । तथाच मनुः । अविद्यमानपुत्रेण यत्कर्म क्रियते परैः । तत्सर्वं निष्फलं याति प्रेतो भवति दुःखभाक् ॥ कुर्यादन्यत्र वा कुर्यान्नैवं ब्राह्मण उच्यते ॥

न तु भ्रात्रन्तरापेक्षया तस्य पूर्वोक्तरीत्या निर्दशादिमरणे* ज्ञेयं तथा सन्निधाने।

ग्रामेश्वरे कुलपतौ श्रोत्रिये च तपस्विनि।
म्रिये पञ्चत्वमापन्ने शुचिर्नक्षत्रदर्शनात्॥

अत्र म्रियश्रोत्रियो निर्गुणौ। दिवा चेदाशौचमायाति† तदा नक्षत्रदर्शनाच्छुद्धिः।

विष्णुः।

असपिण्डे स्ववेश्मनि सूतसूत एकरात्रम्।

बृहद्विष्णुः।

ग्राममध्यगतो यावच्छवस्तिष्ठति कस्यचित्।
ग्रामस्य तावदाशौचं निर्गते शुचितामियात्॥

अनेनैव न्यायेन नगरेऽपि स्वस्ववीथीं‡ यावत् शवस्तिष्ठति तावदाशौचमिति विज्ञेयम्। उक्तप्रकारेण अन्येऽपि गुरुलघ्वाशौचकल्पाः सन्निधिविदेशस्थापेक्षया गुणवद्गुणापेक्षया व्यवस्थापनीयाः। क्षेत्रजादिषु

याज्ञवल्क्यः।

अनीरसेषु पुत्रेषु भार्यास्वन्यगतासु च।

अहोरात्रमित्यनुवर्त्तते। अनीरसेषु क्षेत्रजदत्तकादिषु जातेषु सूतेषु च। प्रतिलोमव्यतिरिक्तमन्यमाश्रिता अन्यगताः। प्रतिलोमाश्रितासु त्वाशौचाभाव एव। एतच्चासन्निधाने।

---

* दशाहादिकालोत्तरमरणश्रवणे। † आपततीति पाठान्तरम्। ‡ स्वकीयपथम्।

सन्निधौ विष्णुः ।

अनौरसेषु पुत्रेषु जातेषु च मृतेषु च ।

परपूर्व्वासु भार्य्यासु प्रसूतासु मृतासु च ॥

अत्र त्रिरात्रमित्यनुवर्त्तते । परः पूर्व्वः पतिर्यासां भार्य्याणां ताः परपूर्व्वाः एवंविधाः स्वैरिण्याद्या यमाश्रितास्तस्यापि त्रिरात्रमित्यर्थः । भार्य्यापुत्रशब्दयोः सम्बन्धिशब्दत्वात् । यस्य च भार्य्या यस्य च पुत्रस्तस्यैवाशौचं सपिण्डानान्तु सद्यः शौचम् ।

तथाच प्रजापतिः ।

अन्याश्रितेषु दारेषु परपत्नीसुतेषु च ।

गोत्रिणः स्नानशुद्धाः स्युस्त्रिरात्रेणैव तत्पिता ॥

एतच्च सन्निधाने असन्निधाने तु पूर्व्वोक्तमेकाहं गोत्रिणः स्नानशुद्धाः स्युरिति । यत्र पितुस्त्रिरात्रात् पूर्णाशौचम्, तत्र सपिण्डानां स्नानाच्छुद्धिः । यत्र तु पितुस्त्रिरात्रं तत्र सपिण्डानामेकाहम्* ।

अतएव मरीचिः ।

सूतके मृतके चैव त्रिरात्रं परपूर्व्वयोः ।

एकाहन्तु सपिण्डानां त्रिरात्रं यत्र वै पितुः ॥

स्वदेशराजनि मृते

---

* वसुषु पुस्तकेषु दर्शनात् एष पाठो रचितः परन्तु यत्र पितुस्त्रिरात्रं तत्रासन्निधाने सपिण्डानां स्नानात् शुद्धिः सन्निधाने तु एकाहमित्येवं भवितुमर्हति ।

मनुः।

प्रेते राजनि सज्योतिर्यस्य स्याद्विषये स्थितः।

ज्योतिषा सह वर्त्तते सज्योतिः अङ्गि चैवास्तमनपर्य्यन्तं रात्रौ चेदुदयपर्य्यन्तमित्यर्थः। राज्ञां विषये विशेषेणैव अशौचाभावमाह।

महीपतीनां नाशौचं हतानां विद्युता तथा।

गोब्राह्मणार्थे सङ्ग्रामे यस्य चेच्छति भूमिपः॥

महीपतीनामाशौचाभावस्तु असाधारणप्रजापरिपालनशान्तिकपौष्टिकादौ नित्यनैमित्तिकादिषु तु पूर्व्वोक्तैव व्यवस्था। यस्य च मन्त्रिपुरोहितादेरनन्यसाध्यकर्म्मणि सद्यः शौचम्।

यदाह प्रचेताः।

कारवः शिल्पिनो वैद्या दासी दासास्तथैव च।

राजानो राजभृत्याश्च सद्यःशौचाः प्रकीर्त्तिताः॥

कारवः सूपकारादयः। शिल्पिनः चेलनिर्णेजकचित्रकारादयः। एतेषाञ्च स्वीयस्वीयासाधारणकर्म्मण्येव सद्यः शौचं नान्यत्र

तथाच विष्णुः।

न राज्ञां राजकर्म्मणि न व्रतिनां व्रते न सत्रिणां सत्रे न कारूणां कारुकर्म्मणि।

शातातपः।

मूल्यकर्म्मकराः शूद्रा दासी दासस्तथैव च।

स्नाने शरीरसंस्कारे गृहकर्म्मण्यदूषिताः॥

एतदापद्विषयम्।

तथाच।

सद्यः स्पृश्यो गर्भदासो भक्तदासस्त्र्यहाच्छुचिः।
चिकित्सको यत्कुरुते तदन्येन न शक्यते॥
तस्माच्चिकित्सकः स्पर्शशुद्धो भवति नित्यशः।

अथानुगमनाशौचम्।

तत्र याज्ञवल्क्यः।

ब्राह्मणेनानुगन्तव्यो न शूद्रो न द्विजः क्वचित्।
अनुगम्याम्भसि स्नात्वा स्पृष्ट्वाग्निं घृतभुक् शुचिः॥

इयञ्च स्नानादिजन्याशुद्धिः समानोत्कृष्टजातीयानुगमने। ब्राह्मणेन क्षत्रियानुगमने कृते

वशिष्ठेनोक्तम्।

मानुषास्थि स्निग्धं स्पृष्ट्वा विरात्रमशौचमस्निग्धं त्वहोरात्रम्। श्ववानुगमने चैवमिति।

एवमित्यनेनाहोरात्रमतिदिशति। वैश्यानुगमने पञ्चदशी परिकल्पनीया। क्षत्रियापेक्षया न्यूनत्वात् शूद्रापेक्षयाधिकत्वात्। ब्राह्मणस्य शूद्रानुगमने

पराशरः।

प्रेतीभूतन्तु यः शूद्रं ब्राह्मणो ज्ञानदुर्बलः।
अनुगच्छेन्म्रियमाणं स विरात्रेण शुध्यति॥

त्रिरात्रे तु ततश्चीर्णे नदीं गत्वा समुद्रगाम्*।
प्राणायामशतं कृत्वा घृतं प्राश्य विशुध्यति॥

अनेनैव न्यायेन त्रिचियस्य वैश्यानुगमने एकाहमित्यनुसन्धेयम्।

शङ्खः।

कृच्छ्रपादः सपिण्डस्य प्रेतालङ्करणे कृते।
अज्ञानादुपवासः स्यादशक्तौ स्नानमिष्यते॥

ज्ञाने तु द्विगुणम्।

पारस्करः।

मृतस्य बान्धवैः सार्द्धं कृत्वा तु परिदेवनम्†।
वर्ज्जयेत्तद्दिनरात्रं दानं श्राद्धादिकर्म्म च॥

अथाशौचसन्निपातनिर्णयः।‡

तत्र यस्याशौचस्य यावत्कालस्तन्मध्ये तत्समस्य न्यूनस्य वा सन्निपाते पूर्व्वाशौचशेषेण शुद्धिरन्तरापतितस्य च।

तथाच याज्ञवल्क्यः।

अन्तराजन्ममरणे शेषाहोभिर्विशुध्यति।

स्वल्पाशौचमध्ये तु दीर्घाशौचसन्निपाते पूर्व्वशेषेण शुद्धिः।

यदाहाश्वलायनः।

स्वल्पाशौचस्य मध्ये तु दीर्घाशौचं भवेद्यदि।

---

* गङ्गाम्। † विलापम्। ‡ अशौचसङ्करनिर्णयः।

न पूर्वेण विशुद्धिः स्यात्स्वकालेनैव शुध्यति ॥

अपरो विशेषस्त्वङ्गिरसाभिहितः ।

सूतके सूतकश्चेत्स्यान्मृतके त्वथ सूतकम् ।
तत्राधिकृत्य सूतकं शौचं* कुर्यान्न सूतकम् ॥
मातर्य्यग्रे प्रमीतायामशुद्धौ† म्रियते पिता ।
पितुः शेषेण शुद्धिः स्यान्मातुः कुर्यात्तु पत्निणीम् ॥

पितुः शेषेण इति पित्राशौचकालनैव शुद्धिः न मात्राशौच-शेषेणेत्यर्थः । पित्राशौचकालमध्ये माता यदि म्रियते तदा पित्राशौचगमनानन्तरं मातुः पत्निणीं कुर्यादिति तात्पर्य्यम् । ब्रह्मपुराणे ।

आद्यं भागद्वयं यावत्सूतकस्य तु सूतके ।
द्वितीये पतिते चाद्यात्सूतकाच्छुद्धिरिष्यते ॥
अत ऊर्द्धं द्वितीयान्तु सूतकान्ताच्छुचिः स्मृता ।
एवमेव विचार्य्यं स्यान्मृतके सूतकान्तरे ॥

अस्यार्थः । सूतकमस्मिन्दिचरमाहोरात्रस्य यदाद्यं भागद्वयं दिवसस्य चतुर्था विभागो यदर्द्धभागात्मकं तत्र द्वितीयसूतके पतित आद्यात् सूतकाच्छुद्धिः । अत ऊर्द्धमस्तमयानन्तरं सूतकान्तरापाते द्वितीयसूतकविशेषमर्थवदिति । अमुमेवाभिप्रायं प्रकटयन्द्वितीयसूतकान्तरमप्याह

---

* शौचं शुद्धिं तथाच सूतकं मरणाशौचमधिकृत्य शुद्धिं कुर्यान्न सूतकं जननाशौचमधिकृत्य इत्यर्थः । † मातृमरणजन्याशौचमध्ये ।

गौतमः।

रात्रिशेषे सति द्वाभ्यां प्रभाते तिसृभिः रात्रिमात्रावशेषेण पूर्व्वाशौचेन शुद्धिः।

अपितु तदनन्तरं द्वाभ्यां प्रभाते रात्रेः पश्चिमयामे जननादिसन्निपाते तिसृभिः रात्रिभिः शुद्धिर्न पूर्व्वशेषेणैव।

शातातपः।

रात्रिशेषे द्वयहाच्छुद्धिः सूतिकामग्निदञ्च हित्वेतरसपिण्डानाम्।

सूतिकामग्निदं हित्वेत्याद्यसंग्रहे स्मरणात्।

शातातपः।

अन्तर्दशाहे जननात्यञ्चात्स्यान्मरणं यदि।
प्रेतमुद्दिश्य कर्त्तव्यं पिण्डदानं स्वबन्धुभिः॥
प्रारब्धे प्रेतपिण्डे तु मध्ये चेज्जननं भवेत्।
तथैवाशौचपिण्डैस्तु शेषं दद्याद्यथाविधि॥

एवमेवाशौचसन्निपातेऽपि।

प्रजापतिः।

अशौचे तु समुत्पन्ने पुत्रजन्म यदा भवेत्।
कर्त्तुस्तात्कालिकी शुद्धिः पूर्व्वाशौचेन शुध्यति॥

जातकर्म्मादिकर्म्मणि तात्कालिकी शुद्धिः।

अथ दहनकालेऽग्निनाशे।

तत्र यमः।

यजमाने चितारूढे पात्रन्यासे तथा कृते।

वर्षाद्यभिहते चाग्नौ ततः पृच्छामि याज्ञिकाः ॥
शेषा लब्ध्वावदग्धेन निर्मन्थ्यं तत्र कारयेत् ।
शेषं लाभे तथा कुर्य्यादग्धशेषस्य वा पुनः ॥
अप्सु प्राग्यन्ततः शेषमाग्नेय्यस्ताः स्मृता बुधैः* ।

शेषं लब्ध्वा अरणिप्रभृतिकाशेषं लब्ध्वा दग्धे वाग्न्युत्पादनसमर्थेन निर्मन्थ्यं वा कृत्वाग्निमुत्पाद्य तेनाग्निना दहेत् । अरण्यादिकाष्ठालाभे दग्धशेषकाष्ठस्य मध्यन्धि योमथितास्तेन तस्याप्यभावे अप्सु प्रक्षिपेत् इत्यर्थः । एवमनाहिताग्नेरपि न्यायस्य समानत्वात् । अयन्तु विशेषः अरण्यभावान्नमन्थीभावइति ।

अथ दग्धाहमध्ये दर्शपाते ।

तत्र भविष्यपुराणे ।

प्रवृत्तार्शौचतन्त्वम् यदि दर्शः प्रपद्यते ।

अशौचसमाप्तिपर्य्यन्तमिति शेषः ।

---

* वङ्गेषु पुस्तकेषु दर्शनात एव पाठो दर्शितः परन्तु अप्रामाण्यम् । तत्र शेषं समर्थेन निमथ्य चेति पाठः समीचीनः । निर्मन्थ्यमन्थी तु वटवाश्वत्थौ प्रति कृत्वा तौ नवकाष्ठिदण्डाभ्यां कृत्वा च वचनं लिखितम् । यथा यज्ञसाने लिखितं पात्रसाने तथा कृते । वर्षाद्यभिहते वह्नौ कथं कुर्य्यामि याज्ञिकाः ॥ तदोदग्धकाष्ठेन मन्थनं तत्र कारयेत् । तच्छेषालाभतोऽन्येन दग्धशेषेण वा पुनः । इत्याद्यं लौकिके वह्नौ पुनश्शेषं दहेत्तु वा दहेत् ।

समाप्य चोदकं पिण्डान् स्नानमात्रं समाचरेत्॥
आशौचमन्तरा दर्शो यदि स्याद्द्विजवर्णिनाम्*।
समाप्तिं प्रेततन्त्रस्य कुर्यादित्याह गौतमः।

पैठीनसिः।

आद्येन्दावेव कर्त्तव्याः प्रेतपिण्डोदकक्रियाः।
द्विरैन्दवे तु कुर्व्वाणः पुनः श्राद्धं समश्नुते॥

द्विरैन्दवे चन्द्रद्वये एकः प्राचीनः क्षीणः चन्द्रः अपरो भावी वृद्धिमान्। एवं सामान्येन मातापित्रविषयेऽपि दर्श एव पिण्डोदकदानादितन्त्रसमाप्तिप्रसक्तौ श्लोको गौतमेनोक्तः।

अन्तर्दशाहे दर्शश्चेत्तत्र सर्व्वं समापयेत्।
पित्रोस्तु यावदाशौचं दद्यात्पिण्डं तिलाञ्जलीन्॥

पित्रोरित्येकशेषः।

यत्तु।

पित्रोराशौचमध्ये तु यदि दर्शः समापयेत्।
तावतैवोत्तरं तन्त्रं पर्य्यवस्य त्र्यहात्परम्॥

इति गालवेवचनम्। तस्य त्वयमर्थः पित्राशौचमध्ये दर्शपाते समाप्तिरुत्तरतन्त्रस्योचिता किमुतान्याशौचमध्य इति। पित्रतिरिक्तसपिण्डविषये तु उत्तरतन्त्रस्यावश्यकसमाप्तिप्रदर्शनार्थं पुनः पित्रविषयेऽपि नियमार्थमिति। भवतु वा पित्रविषयेऽपि नियामकम्। तथापि

* ब्राह्मणादीनाम्। सर्व्ववर्णिनामिति निर्णयसिन्धौ पाठः।

अस्य च पिष्टमेधिकारम्भकालनियमस्वज्ञातमरणदिनस्य सांवत्सरिकस्य कालनियमवहिर्ज्ञेयः । स च श्राद्धप्रकरणे वक्ष्यते । एवं पैष्टमेधिके कृते यदि जीवन्नागच्छेत्तदा तं घृतकुम्भे स्नापयित्वा शुभलग्ने उत्थाप्य जातकर्मादिभिश्चूडाकरणान्तैः संस्कृत्य उपनयनविधानेनोपनीय वहनपूर्वकं द्वादशाहमग्नौ त्रिरात्रं वा व्रतं कारयित्वा स्नानानन्तरं पूर्वस्थितभार्यां तद्भावे अन्यां वा उद्वाहयेत् । ततश्च अग्नय आयुष्मत् पुरोडाशमेकपालं कुर्यादिति विहितामिष्टिमायुष्मतीङ्कृत्वा यद्याधानेच्छुस्तदा व्रात्यस्तोमेनेष्ट्वा तथैन्द्राग्नेन पशुना चेष्ट्वा अग्नीनादध्यात् ।

यदाह मनुः ।

जीवद्यदि समागच्छेद्धृतकुम्भैर्नियोज्य तम् ।
उद्धृत्य स्नापयित्वास्य जातकर्मादि कारयेत् ॥
द्वादशाहं व्रतं कुर्यात्त्रिरात्रमुपवास्य तु ।
स्नात्वोद्वहेत तां भार्यां अन्यां वा तद्भावतः ॥
अग्नीनाधाय विधिवद्व्रात्यस्तोमेन वा यजेत् ।
अथैन्द्राग्नेन पशुना गिरिङ्कृत्वा च तत्र तु ॥
इष्टिमायुष्मतीं कुर्यादीप्सितांश्च क्रतूंस्ततः । इति ।

आहिताग्नेर्यत्र पुरोडाशस्तत्र नाहिताग्निश्चरुः ।

तथाच गृह्यप्रायश्चित्ते ।

यत्र वाहिताग्नेः पुरोडाशस्तत्र वा नाहिताग्नेश्चरवः ।

इति मदनपारिजाते मदनक्षितिपालदानजलरूढ़े।
स्तवकः पञ्चम आसीदामोदाकृष्टपण्डितभ्रमरः॥

मतिर्येषां शास्त्रे प्रकृतिरमणीया व्यवहृतिः
परं शीलं श्राव्यं जगति ऋजवस्ते कतिपये।
चिरं चित्ते तेषां मुकुरतलभूते स्थितिमियात्
इयं व्यासारण्यप्रवरमुनिगिर्यस्य भणितिः॥

इति पण्डितपारिजातकमहारसंग्रहादि विरुदराजी-
विराजमानस्य श्रीमदनपालस्य निदेशे मदन-
पारिजाताभिधेये पञ्चमः स्तवकः।

षष्ठः स्तवकः।

दाहादिकरूपकालापगमे चाशौचस्तवके कुलव्यापिनी शुद्धिरभिहिता। तदनन्तरमिह स्तवके द्रव्यशुद्धिरभिधीयते॥

तत्र याज्ञवल्क्यः।

सौवर्णराजताज्ञानामूर्द्वपात्रग्रहाश्मनाम्।
शाकरज्जुमूलफलवासो विदलचर्म्मणाम्॥
पात्राणां चमसानाञ्च वारिणा शुद्धिरिष्यते।

सौवर्णं सुवर्णविकारः। राजतं रजतविकारः। अज्ञं शङ्खशुक्तिमुक्ताफलादि। ऊर्द्वपात्रं यज्ञियोलूखलादि। ग्रहा ऐन्द्रवायवादयः। अश्मा दृषदादि। मूलमार्द्रकादि। विदलं वेणुदलादि। विदलग्रहणं तद्विकाराणां क्षुत्रादीनामुपलक्षणार्थम्। चर्म्म अजादीनां तच्च तद्विकाराणां वरत्रादीनामुपलक्षणार्थम्। पात्राणि प्रोक्षणपात्रादीनि स्नेहरहितानि। चमसा होत्रचमसादयः। एतेषां लेपरहितानां मूत्रादुच्छिष्टस्पर्शमात्रे वारिणा शुद्धिः प्रक्षालनात् शुद्धिः।

तथा।

चरुस्रुक्स्रुवसस्नेहपात्राण्युष्णेन वारिणा।

चरुर्मृण्मयी चरुस्थाली। स्रुक् जुह्वादि। स्रुवः प्रसिद्धः। सस्नेहपात्राणि प्राश्नित्रहरणादीनि* लेपरहितानि चर्म्मादीनि

---

* प्राश्नितहरणादीनीति पाठान्तरम्। प्राशित्रहरणादीनीति पाठान्तरम्।

उष्णेन वारिणा शुध्यन्ति। सौवर्णादीनां लेपरहितानामेव पूर्वोक्तशुद्धिः।

तथाच मनुः।

निर्लेपद्भाजनं भाण्डमद्भिरेव विशुध्यति।
अजमग्ममयश्चैव राजतञ्चानुपस्कृतम्॥

अनुपस्कृतम् उपस्कृतं उत्कीर्णं रेखाद्युपेतं न उपस्कृतमनुपस्कृतम्। रेखादिखातेषु मूत्राद्युच्छिष्टावस्थानरहितमित्यर्थः।

काकमुखदूषितपात्रस्य शुध्यन्तरमाह

शङ्खः।

क्षणगकुनिमुखावसृष्टं निर्लिखेच्छापदमुखावसृष्टं* पात्रं न प्रयुञ्जीतेति।

निर्लेखनं शस्त्रेणोपरितनावयवापकर्षणं त्वक्क्षणमिति† यावत्। यद्वापस्तम्बेनोक्तम्।

गवाघ्रातानि कांस्यानि शुनोच्छिष्टानि यानि च।
शुध्यन्ति दशभिः‡ क्षारैः श्वकाकोपहतानि च॥ इति।

एतच्च स्वल्पोपहतविषयम्। अत्र च क्षारो भस्म। एवं सर्व्वत्र न्यूनाधिकशौचकल्पाः। स्वल्पाधिकाधिकारविषयत्वेन व्यवस्थापनीयाः। उष्णेन वारिणा शुध्यन्तीत्यनुवर्त्तते

याज्ञवल्क्यः।

स्फ्यसूर्पाजिनधान्यानां मूषलोलूखलानसाम्।

---

* पशुमुखावशिष्टम्। † त्वचां मोचनम्। ‡ दशभिर्दिनैः।

स्रुवः काष्ठकुरिका यज्ञाङ्गम्। अनः शकटम्। अत्र पुनर्जिनग्रहणं यज्ञाङ्गाजिनप्राप्त्यर्थम्। एतेषामुष्णेन वारिणा वक्ष्यमाणमृदाद्यन्यतमेन सहितेन शुद्धिरित्यर्थः।

बौधायनः।

तैजसानां मूत्रपुरीषशुक्रास्रक्कृष्णपमद्यैरत्यन्तवासितानामावर्त्तनम्। अल्पसंसर्गे तु परिलेखनम्। स्वर्णमाक्षोपघाते तु चिःसप्तकृत्वो भस्मना परिमार्ज्जनमतैजसानामेवंभूतानामुत्सर्ग इति।

अग्निसंयोगेन द्रवीकरणमावर्त्तनम्। भस्मना परिमार्ज्जनं कांस्यस्य नियतम्। यत्तु याज्ञवल्क्येन सौवर्णराजताज्ञानामित्युपक्रम्य वारिणा शुद्धिरिष्यते इति केवलोदकमेवोपात्तम्। तदपि मृदादिसहितमेव वारिणा शुद्धिहेतुरिति विज्ञेयम्।

तत्र विशेषमाह हारीतः।

अद्भिः काञ्चनरजतशङ्खशुक्तीनां तद्गुणवर्ज्जनम्। स्नेहवैवर्ण्योपहतानां यवगोधूमकलायमाषमसूरमुद्गमयचूर्णैर्धावनम्। अम्ललवणाभ्यां ताम्राणां भस्मना कांस्यानां शाणतैलसिकता*वघर्षणैः कार्ष्णायसानां† शिलावघर्षणैर्मार्ज्जनैर्मणिमयानामिति।

शाणः‡ लौहभेद्याय साधनम्। तद्गुणवर्ज्जनं तद्व्यापकर्षणम्।

---

* वालुका। † लौहाकर्षणकारिलौहविशेषाणाम्, चुम्बकः यस्य प्रसिद्धिः।

‡ घर्षणयन्त्रविशेषः।

स्नेहवैवर्ण्योपहता: उच्छिष्टादिस्नेहेन विवर्णं यथा भवति तथोपहता इत्यर्थ:। यवादिचूर्णानामेकार्थत्वात्* विकल्प:। उदकस्य तु पूर्वैर्गोधनद्रव्यै: सह समुच्चय:।

शङ्ख:।

सूतिकोच्छिष्टभाण्डस्य सुरामद्यहतस्य च।
विःसप्तमार्ज्जनाच्छुद्धिर्न तु कांस्यस्य तापनम्॥

सूतिकोच्छिष्टादिभि: कांस्यव्यतिरिक्तैजसानामल्पकालोपघाते यवचूर्णादिभिर्मार्ज्जनं शुद्धिहेतु: कांस्यस्य तथा न। अपि तु तापनं मार्ज्जनञ्च शवरापादकमित्यर्थ:। प्रतिमार्ज्जनमुदकप्रक्षालनमावर्त्तते।

द्विजातिभुक्तोच्छिष्टसंस्पर्शे तु स एवाह

शङ्ख:।

ब्रह्मक्षत्रविशाञ्चैव सकृत्सम्मार्ज्जनाच्छुचि:।
चतुर्थेन† तु यद्भुक्तं चतुर्भिश्चैव मार्ज्जनम्॥
अग्नौ प्रक्षिप्य शुल्बीयादस्त्रो प्रक्षाल्य यत्नत:।
गोशृङ्गेण तु संसृष्ट‡क्लत्वाच्च शुचितामियात्॥

आहापस्तम्ब:।

गवाघ्रातानि कांस्यानि शूद्रोच्छिष्टानि यानि च।
मणिमुक्ताप्रवालानां शुद्धि: प्रक्षालनेन तु॥

एतदल्पोपहतविषयम्।

---

* एकरूपेण कार्य्यनिर्व्वाहकत्वात्। † शूद्रेण। ‡ संसृष्टमिति पाठान्तरम्।

मृद्भाण्डानामल्पोपहतौ

याज्ञवल्क्यः ।

पुनःपाकान्मृन्मयमिति ।

मद्याद्युपहतौ तु परित्याग एव ।

तथाच मनुः ।

मद्यैर्मूत्रपुरीषैर्वा क्षीवनैः* पूयशोणितैः ।

संस्पृष्टं नैव शुध्येत पुनःपाकेन मृण्मयम् ॥ इति ।

स्मृत्यन्तरे ।

भस्मना शुध्यते कांस्यं सुरया यत्र लिप्यते ।

सुरामूत्रपुरीषैस्तु शुध्यते तापलेखनैः† ॥

सुरादिग्रहणं शुक्रशोणितादीनामुपलक्षणार्थम् ।

तथा ।

ताम्रमम्लेन शुध्येत न चेदामिषलेपनम् ।

आमिषेण तु यल्लिप्तं पुनर्दाहेन शुध्यति ॥

आदिपुराणे ।

सुवर्णरौप्यशङ्खाश्मशुक्तिरत्नमयानि च ।

कांस्यायस्ताम्ररैत्यानि‡ त्रपु§सीसमयानि च ॥

निर्लेपानि च शुध्यन्ति केवलेन जलेन च ।

शूद्रोच्छिष्टानि शोध्यानि त्रिधा क्षाराम्लवारिभिः ॥

---

* सुखाम्लैः । † बहुषु पुस्तकेषु दर्शनादेष रचितः परन्तु तापनैः खनैरिति पाठः साधुः खनैः मृत्तिकाभ्यन्तररचणैः अथवा लेखनं शाणम् । ‡ पित्तलम् । § रङ्गम् ।

अत्र द्रव्याणां त्रिधा त्रिप्रकारं मार्ज्जनम्। न तु त्रिमार्ज्जनम्। शातातपेन दशकृत्वो मार्ज्जनविधानात्।

गवाह्नातेषु कांस्येषु शूद्रोच्छिष्टे तु वा पुनः।
दशभिर्भस्मभिः शुद्धिः स्वकाकोपहतेषु च॥

एतच्च भस्मभिः शोधनं स्वकाकाद्युपहतौ भूमौ सप्तरात्रखननानन्तरम्।

यथा।

सूतिकागवविण्मूत्ररजस्वलाहतानि च।
प्रक्षेतव्यानि तान्यग्नौ यद्यद्यावत्समर्हति॥

यद्द्रव्यं यावदग्निप्रक्षेपं सहते यावता अग्निप्रक्षेपेण न नश्यति तावत्कुर्य्यादित्यर्थः।

बौधायनः।

तैजसानां सूत्राद्युपघाते पुनःकरणम्। गोमूत्रे वा सप्तरात्रं परिवासनम्*। क्षेपनिर्हरणाभ्यां† शुद्धौ पुनःकरणम्। अन्यथा गोमूत्रे वा वासनमिति व्यवस्था।

अङ्गिराः।

गण्डूषं पादशौचञ्च यः कुर्य्यात्कांस्यभाजने।
षण्मासं भुवि निक्षिप्य पुनराकारमादिशेत्॥

पुनराकारमादिशेत् पुनराकारः पुनःकरणम्।

तथा।

---

* रक्षणम्। † निर्हरणं दहनम्।

लोहानां दहनाच्छुद्धिर्भस्मना गोमयेन वा।
दहनात्खननाद्वापि शैलानाम्*मभसापि वा।
काष्ठानां त्वक्षणा†च्छुद्धिर्मृन्मयजलैरपि॥

याज्ञवल्क्यः।

त्वक्षणं दारुशृङ्गास्थ्नां गोबालैः फलसम्भवाम्।
मार्ज्जनं यज्ञपात्राणां पाणिना यज्ञकर्म्मणि॥

उच्छिष्टस्नेहादिलिप्तानामेषां मृदुदकादिभिर्लेपानपाये त्वक्षणं लेपयुक्तावयवापनयनं शुद्धिः। फलसम्भवां नारिकेलादि-फलसम्भूतानां प्रक्षालनेनानपगतलेपानां गोबालैरवघर्षणं शुद्धिः। यज्ञपात्राणां स्रुवादीनां प्रक्षालनादिभिः कृतशौचानां दर्भैर्देशपविणेण वा कर्म्माङ्गत्वसिद्ध्यर्थं हस्तेन मार्ज्जनं कर्त्तव्यम्। ततो यज्ञकर्म्मणि विनियोजनीयानीत्यर्थः।

हारीतस्मृतौ।

संहतानान्तु पात्राणां यद्येकमुपहन्यते।
तस्यैव शोधनं प्रोक्तं न तु तत्सृष्टिनामपि‡॥

यमः।

मलसंयोगजं तज्जं यस्य येनोपहन्यते।
तस्य तच्छोधनं प्रोक्तं सामान्यं द्रव्यशुद्धिकृत्॥

यस्य शोध्यद्रव्यस्योच्छिष्टादिसंयोगजं तज्जं स्वभावजं च मलं

---

* भस्मनाम्। † त्वचां मोचनात्। ‡ संसर्गिणाम्।

येन भस्मादिनोदकसहितेनोपहन्यते तस्य तच्छोधकं भवतीत्यर्थः ।

इति तैजसादिदाहार्थोदकम् ।

अथ वस्त्रादेः ।

तत्र यमः ।

यदि मूत्रपुरीषाभ्यां रेतसा रुधिरेण वा ।
चेलं समुपहन्येत अद्भिः प्रक्षालयेत्तु तत् ॥
यदम्भसा न शुध्येत्तु वस्त्रं चोपहतं दृढम् ।
छेदनं तस्य दाहो वा यन्मात्रमुपहन्यते ॥

एतच्च छेदनादिना शुद्ध्यापादनमल्पत्वान्मध्योत्तमवस्त्रविषयम् । छिन्नदग्धयोरपि परित्यागविधानाद्दरिद्रस्य च उत्तमेष्वपि छेदनादिना शुद्धिः ।

व्यासः ।

वस्त्रं सदम्भसा शुध्येद्रज्जुवेदलमेव च ।
रज्ज्वादिकञ्चातिदुष्टं त्याज्यं तन्मात्रमेव च ॥

वेणुवेत्रनड्वादिविकारो वेदलं सर्पादि. यदा तु बहुविधान्यपि वासःप्रभृतीनि रागीकृतानि चाण्डालादिभिः स्पृष्टानि तत्रापि स्पृष्टान्यल्पानि अस्पृष्टानि च स्पृष्टापेक्षयाधिकानि वा तदा स्पृष्टमात्रमुद्धृत्य तस्योक्तप्रक्षालनादिभिः शुद्धिः कार्या । अवशिष्टस्य प्रोक्षणाच्छुद्धिः ।

अनेनैवाभिप्रायेण याज्ञवल्क्यः ।

प्रोक्षणं संहतानाञ्च बहूनां धान्यवाससाम्।

तथा स्मृत्यन्तरमपि।

वस्त्रधान्यादिरागीनामेकदेशस्य दूषणे।

तावन्मात्रं समुद्धृत्य शेषं प्रोक्षणमर्हति॥

शेषस्य प्रोक्षणविधानात् उद्धृतस्य प्रक्षालनादिभिः शुद्धिरिति गम्यते। यदा तूक्तबहूनि रागीकृतानि सर्व्वाण्यपि स्पृष्टानि तदा प्रोक्षणादेव शुद्धिः यदा तु पुनः स्पृष्टानि बहूनि अस्पृष्टानि चाल्पानि तदा सर्व्वेषामपि प्रक्षालनमेव।

यदाह मनुः।

अद्भिस्तु प्रोक्षणं शौचं बहूनां धान्यवाससाम्।

प्रक्षालनेन त्वल्पानां अद्भिः शौचं विधीयते॥

रागिगतबहुत्वञ्च पुरुषयाह्यभारादूह्यं वेदितव्यम्। अनेकोद्धार्य्ये दारुशिले भूमिसमे इति बौधायनेनानेकोद्धार्य्यस्यैव द्रव्यान्तरस्य स्वल्पशौचत्वदर्शनात्।

याज्ञवल्क्यः।

सौपरोदकगोमूत्रैः शुध्यत्याविककौशिकम्।

मञ्जीफलैरंशुपट्टं वारिष्टैः कुतपं तथा।

सर्गारमर्पपैः चौममिति।

ऊषरं मृत्तिकाविशेषः। तत्सहितेनोदकेन गोमूत्रेण वाविककौशिकं शुध्यति। ऊर्णामयमाविकं कौशप्रभवं तसरीपट्टादि कौशिकम्। वल्कलं तन्तुकृतमंशुपट्टम्। श्रीफलं विल्वफलम्। पर्व्वतच्छागलोमकृतः कुतपः। अरिष्टफलं फेनकम्। अतसी-

सूत्रनिर्म्मितं क्षौमम्। एतच्चातिघाते अल्पोऽल्पघाते तु प्रोक्षणमेव द्रव्याविनाशेनैव शुद्धेरिष्टत्वादेतेषां क्षालनासहत्वाच्च ।

अतएव देवलः ।

ऊर्णाकौशेयकुतपपट्टक्षौमदुकूलजाः ।
अल्पशौचा भवन्त्येते शेषेण प्रोक्षणादिभिः ।
तान्येवासेध्ययुक्तानि क्षालयेच्छोधनैः स्वकैः ॥
तूलिकामुपधानञ्च पुष्परक्ताम्बरं तथा ।
शोधयित्वातपैः किञ्चित्करैः सम्मार्ज्जयेत्सुधूः ॥
पश्चाच्च वारिणा प्रोक्ष्य विनियुञ्जीत कर्म्मणि ।
तान्यप्यतिमलिष्ठानि यथावच्छोधयेदिति ॥

तूलिकोपधाने चोर्णादिमये ऊर्णादिनिर्म्मितानामिव प्रक्षालनेन पूर्व्वरूपनाशात्। पुष्परक्तग्रहणम् प्रक्षालनासहहरिद्रादिरक्तस्यापि प्रदर्शनार्थम्। एतदुक्तं भवति यत्कुसुम्भादिरागरक्तं क्षालनासहं तदातपशोषणादिना शुध्येत। यच्च मञ्जिष्ठादिकं क्षालनेन न विनश्यति तत्क्षालनेनैव नातपशोषणमात्रेण ।

आपस्तम्बः ।

शुनोपहतक्षैलमवगाहेत प्रक्षाल्यं वा। तं देशमग्निना संस्पृश्य पुनः प्रक्षाल्य पादौ वाचम्य प्रयतो भवति ।

वस्त्रसहितस्यैव नाभेरूर्द्ध्वमंगे अवगाहः अधस्ताच्चेत्प्रक्षालनमिति विवेकः ।

प्रचेताः ।

चेलानामुपहतानामुत्खेदनं गन्धलेपापनयनं तन्मात्र-
च्छेदनं वा नवानां वाससामभ्युक्षणादिति।

उत्खेदनं क्षायनम्। नवानां वाससां यन्त्रादुत्तीर्णानाम्।

शङ्खलिखितौ।

अहतानां प्रोक्षणमिति।

अहतं यन्त्रनिर्मुक्तम्।

शङ्खः।

शयनासनयानानां संहतवच्छौचम्।

संहतवद्रागीभूतद्रव्यवत्। अनेन प्रोक्षणाच्छुद्धिरित्युक्तं भवति।

अङ्गिराः शयनादीनामपि संहतशब्दवाच्यत्वमाह।

शयनासनयानानि रोमबन्धानि यानि च।
वस्त्राणि तानि सर्वाणि संहतानि प्रचक्षते॥

इति चेलादिशुद्धिः।

अथ धान्यादेः।

तत्र बौधायनः।

व्रीहयः प्रोक्षणादद्भिः शाकमूलफलानि च।
तन्मात्रस्यापहाराद्वा निस्तुषीकरणेन वा॥

विष्णुः।

असिद्धस्यान्नस्योपहतमुत्सृज्य शेषे कण्डनप्रक्षालने
कुर्य्यात्। बहूनान्तु कश्यपोक्तं द्रष्टव्यम्। प्रोक्षण-

पर्य्यग्निकरणावगाहनैर्व्रीहियवगोधूमानां विमर्शन-प्रोक्षणैः फलीकृतानां निष्पेषणदलनप्रोक्षणैः श्यामी-धान्यानामिति ।

अस्यार्थः । अनेकपुरुषोद्धार्य्याणां व्रीहियवगोधूमानां प्रोक्षण-पर्य्यग्निकरणावगाहनैः शुद्धिः । पर्य्यग्निकरणमग्न्यभिमर्शनम् । अवगाहनं प्रक्षालनम् । अत्र प्रोक्षणादीनि सर्व्वाणि सर्व्वत्र दोषाल्पत्वमहत्त्वापेक्षया योज्यानि । व्रीह्यादितण्डुलानां फलीकृतानां विमर्शनप्रोक्षणेन च शुद्धिः । विमर्शनमल्पानां बहूनां प्रोक्षणं कण्डनशुष्कीकृता निरस्तक्षुद्रकणास्तण्डुलाः फलीकृता इत्युच्यन्ते । विमर्शनं पाणिभ्यां निर्म्मलीकरणम् । श्यामीधान्यानां कोद्रवधान्यानां मुद्गादीनामेकपुरुषोद्धार्य्याणां विघर्षणविमर्शनं ततोऽल्पानां दलनेन अनेकपुरुषोद्धार्य्याणां प्रोक्षणेन च । यच्च तण्डुलांस्तु परित्यजेदिति तदत्यल्पाल्पपरिमाणविषयम् ।

आदिपुराणे ।

गृहदाहे समुत्पन्ने दग्धे च पशुमानुषे ।
अभोज्यस्पृष्टता व्रीहिधान्यद्रव्यस्य सङ्ग्रहः ॥
मृण्मयेनावटानामधोभुवि च तिष्ठताम् ।
यवमाषतिलादीनां न दोषं मनुरब्रवीत् ॥
ततः संक्रममाणोऽग्नौ स्थाने स्थाने च दृश्यते ।
न च प्राणिवधो यत्र केवलं गृहदीपनम् ।
तत्र द्रव्याणि सर्व्वाणि गृह्णीयादविचारयेत् ॥

शङ्खः ।

पुष्पफलानां विष्किरावधूतानां प्रक्षालनमभ्युक्षणम्*मित्येके । पर्णानामद्भिः प्रक्षालनं शक्तदुपयुक्तानां† मुत्सर्गः । विष्किरा ग्राम्यकुक्कुटादयः । अवधूतं पादावकीर्णम्‡ । विष्किरावधूतानामिति सर्व्वत्रान्वेति ।

बौधायनः ।

असंस्कृतायां भूमौ न्यस्तानां प्रक्षालनं परोक्षाहृतानाम्§-मभ्युक्षणमेवं क्षुद्रसमिधामसंस्कृतानाममेध्याद्युपहतानामेकपुरुषोद्वार्य्याणाम् ।

क्षुद्रसमिधां यज्ञियत्वेन प्रसिद्धपलाशादिव्यतिरिक्तापामार्गादिसमिधाम् ।

विष्णुः ।

मृत्पर्णतृणकाष्ठानां शुभिश्चण्डालवायसैः ।
स्पर्शने विहितं शौचं सोमसूर्य्याग्निमारुतैः ॥

तथा प्रोक्षणेन तु पुस्तकमिति ।

व्यासः ।

रथ्याकर्दमतोयानि नावः पथि तृणानि च ।
मारुतेनैव शुध्यन्ति पङ्क्त्येष्टकचितानि च¶ ॥

इति धान्यादिशौचम् ।

---

* इह अभ्युक्षणमेव प्रक्षालनशब्दलक्ष्यमिति केषाञ्चिद्वादिनां मतम् । † कुक्कुटविष्टोपयुक्तानाम् । ‡ स्पृष्टम् । § अप्रत्यक्षाहृतानाम् । ¶ पंक्तिक्रमेण इष्टकेन रचितानि ।

अथ सिद्धान्नादेः ।

तत्र मनुः ।

पक्षिजग्धं गवाघ्रातमवधूतमवक्षुतम् ।
दूषितं केशकीटैश्च मृत्तोयेन विशुध्यति ॥

भक्ष्यपक्षिजग्धविषयमेतत्* । अवधूतं यस्योपरि वामोऽवधूतः† पक्षिभिरुत्क्षिप्योत्क्षिप्य त्यक्तं वा । अवक्षुतं यस्योपरि क्षुतं क्षुतम् । मृद्ग्रहणमुदकभस्मनोरपि प्रदर्शनार्थम् ।

तथाच याज्ञवल्क्यः ।

सलिलं भस्म मृद्वापि प्रक्षेप्तव्यं विशुद्धये । इति ।

यच्च पाकानन्तरं केशकीटैर्दूषितं तस्य मृदादिप्रक्षेपेण शुद्धिः । यच्च केशकीटावलीभिः सह पक्वं तत्परित्याज्यमेव ।

अनेनैवाभिप्रायेण गौतमः ।

नित्यमभोज्यं केशकीटावपन्नम् । इति ।

पराशरः ।

पक्वं द्रोणाधिकं क्षत्रं काकश्वाद्युपघातितम् ।
ग्रासमुद्धृत्य तन्मात्रं यत्तु लालाक्तं‡ भवेत् ।
हैमोदकेन वाम्भुक्तेद्राजतेनाम्बुनाथ वा ॥
अग्निज्वालोपसंस्पर्शात्सुवर्णमधुसर्पिषाम्§ ।
विप्राणां ब्रह्मघोषेण¶ पूतं भोज्यञ्च तद्भवेत् ॥

---

* येषां पक्षिणां मांसभक्षणं शास्त्रविहितं तद्विषयम् । † वस्त्रं कस्याश्चित् । ‡ लालायुक्तम् । § संस्पर्शादिति शेषः । ¶ वेदध्वनिना ।

द्रोणः षट्पञ्चाशदधिकं पलशतद्वयम् ।

यच्च यमदग्निनाभिहितम् ।

अन्नमेकाहिकं पक्वं शकाकाद्युपघातितम् ।

कृमिकीटावपन्नञ्च तदप्येवं विशुध्यति ।

क्रीतस्यापि विधिर्दृष्टः एष एव मनीषिभिः ॥

तदल्पधनविषयम् ।

वशिष्ठः ।

देवद्रोण्यां विवाहेषु यज्ञेषु प्रकृतेषु च ।

काकैः शकृभिश्च संसृष्टमन्नं तत्र विवर्ज्जयेत् ।

तन्मात्रमन्नमुद्धृत्य शेषं संस्कारमर्हति ॥

देवद्रोणी देवयात्रा । एतद्ग्रहणं बह्वन्नकार्य्यप्रदर्शनार्थम् । प्रकृतेषु प्रस्तेष्ववश्यम्भाविसर्व्वोत्सवेषु च ।

संस्कारमपि स एवाह ।

द्रव्याणां प्लावनेनैव घनानां प्रोक्षणेन च ।

क्वाथेन मुखसंसृष्टमन्नन्तु शुचितामियात् ॥

घनाः पर्पटवटकादयः* । द्रव्याणां प्लावनेनैव तेषां शुद्धिर्गौरमस्य ।

यदाह शङ्खः ।

अपक्वानां घृततैलानां प्लावनक्षीरस्य च ।

भाण्डानि प्लावयेदग्निः शाकमूलफलानि च ॥

---

* पटवटकचय इति पाठान्तरम् । † अग्निना प्रतापनम् ।

अपणासम्भवे सजातीयद्रव्यप्लावनेनैव शुद्धिः*। तथा घृत-दधिपयस्तक्राणामाकरभाण्डस्थितानामदोषः।

तथा।

आधारदोषे तु नयेत्पात्रात्पात्रान्तरं द्रवम्।
घृतञ्च पायसं क्षीरं तथैवेक्षुरसो गुडः।
शूद्रभाण्डस्थितं तक्रं तथा मधु न दुष्यति॥

यमः।

आममांसं घृतक्षौद्रं स्नेहाश्च फलसम्भवाः।
म्लेच्छभाण्डस्थिता दुष्या निष्क्रान्ताः शुचयः स्मृताः॥

एतच्चाकरभाण्डविषयम्। अनाकरेऽपि द्रोणाधिकारोपसेचन-समर्थघृतादिविषयमपि। ततो न्यूनस्य देशकालाद्यपेक्षया अपणादिभिः शुद्धिर्भवति।

यदाह बौधायनः।

देशकालौ तथात्मानं द्रव्यं द्रव्यप्रयोजनम्।
उपपत्तिमवस्थाञ्च ज्ञात्वा शौचमसकल्पयेत्॥ इति।

शातातपः।

गोकुले कुण्डशालायां तिलचक्रेक्षुयन्त्रयोः†।
अमीमांस्यानि शौचानि स्त्रीषु बालातुरेषु च॥

कुण्डशाला यज्ञशाला।

---

* सजातीयेन पात्रान्तरस्थिततज्जातीयेन सह भाजनेन तस्यान्तरितकरणेन इत्यर्थः।

† गोकुले कुण्डशालायां तिलयन्त्रेक्षुयन्त्रयोः इति यज्ञान्तरीयपाठः।

अङ्गः ।

निर्यासानां गुड़ानाञ्च लवणानान्तथैव च ।
कुसुम्भकुङ्कुमानाञ्च जर्णाकार्पासयोस्तथा ।
ग्रंथिषु* कथिता शुद्धिरित्याह भगवान्यमः ॥

निर्यासा हिङ्गुप्रभृतयः । इदं स्वल्पपरिमाणविषयम् । बहुनान्तु बौधायनेनोक्तम् ।

बहूनां कुसुम्भकार्पासगुड़लवणानां सर्षिषां कठिनीभूतानां चाण्डालादिस्पर्शे प्राक्षणेनैव शुद्धिः ।

अत्यल्पे तु परित्यागः । तत्रापि देशकालाद्यपेक्षया परित्यागः ।

मनुः ।

उच्छिष्टेन तु संसृष्टो द्रव्यहस्तः कथञ्चन ।
अनिधायैव तद्द्रव्यमाचान्तः शुचितामियात् ॥

इति सिद्धान्नादिशुद्धिः ।

अथ भक्ष्यादेः ।

त्रिविधाशौचशोध्या भूमिः ।

तथाच देवलः ।

यत्र प्रसूयते जन्तुर्म्रियते दह्यतेऽथवा ।
चाण्डालैर्नोषितं† यत्र यत्र मूत्रादिसङ्गतिः ।

---

* ग्रंथिषु निःशेषेषु परित्यागेषु इति यावत् । † वासः कृतः ।

एवं कश्मलभूयिष्ठा भूरमेध्या प्रकीर्त्तिता ॥
श्वशूकरखरोष्ट्राद्यैः संस्पृष्टा दुष्टतां व्रजेत् ।
अङ्गारतुषकेशास्थिभस्माद्यैर्मलिना भवेत् ॥

एवं त्रिविधायाः अपि शुद्धिप्रकरणमाह

स एव ।

पञ्चधा वा चतुर्धा वा भूरमेध्या विशुध्यति ।

यत्र मनुष्या जायन्ते म्रियन्ते दह्यन्ते वा यत्र चाण्डालैर्नेवाध्युषितमेवंविधा अमेध्या भूः पञ्चधा पञ्चभिर्दहनगन्धार्द्रताव्यपनयनकिञ्चित्कालगोक्रमणसेकोल्लेखनैः शुध्यति । यत्र च मनुष्या जायन्ते म्रियन्ते वा अत्यन्तविष्ठादिसंसर्गवती वा स्यात्सा दहनवर्ज्जितैः पूर्व्वोक्तैश्चतुर्भिरेव शुध्यति ।

दुष्टान्विता द्विधा त्रिधा शुध्यते मलिनैकधा ॥

श्वशूकरखरादिभिः प्रत्येकं मिलित्वा वा चिरकालमधिवासितायां दुष्टायाम् त्रिभिः गोक्रमणसेकोल्लेखनैः । उष्ट्रग्रामकुक्कुटादिभिश्चिरकालमधिवासितायां भुव उल्लेखनेनैकेन शुद्धिः ।

अतएव याज्ञवल्क्यः ।

भूशुद्धिर्मार्জ্জনाद्दाहात्कालाद्गोक्रमणात्तथा ।
सेकादुल्लेखनाल्लेपाद्दृहमार्জ্জनलेपनात् ॥

मार्জ্জनं सम्मार्জ্জन्या तृणादीनामपसारणम् । दाहस्तृणकाष्ठादौ । कालः गन्धलेपादित्त्यो यावता भवति सः । सेकः

---

* अमेध्यायाः दुष्टायाः मलिनायाश्च ।

प्रवर्षणेन क्षीरगोमूत्रयोरुदकेर्वा। उल्लेखनं खननं त्वक्षणं* वा। लेपनं गोमयादिभिः। अत्र भूग्रहणेनैव सिद्धे पुनर्गृहग्रहणं प्रतिदिनं मार्ज्जनलेपनप्राप्त्यर्थं मार्ज्जनमुपलेपनञ्च सर्व्वत्र समुच्चीयते।

यमः।

खननात्पूरणाद्दाहाद्भिर्घर्षण†लेपनात्।
गोभिराक्रमणात्कालाद्भूमिः शुध्यति सप्तधा॥

एतच्च पूर्व्वोक्तहेतुभिः पुनःपुनर्दष्टभूविषये समस्तं शुद्धिहेतुः अन्यत्र व्यस्तं‡ यथायोग्यम्।

तथा।

गोचर्म्ममात्रमुद्विन्दुः गोः शोधयति पातितः।
समूढ़मसमूढ़ं वा यत्र लेपो न दृश्यते॥

यत्रैकादशगावः§ उपविशन्ति तावान् भूभागो गोचर्म्म गोः पृथिव्याः समूढ़ं कृतसम्मार्ज्जनमथवा गोः पुच्छसम्बन्धाद्भुवि पातित उदकविन्दुः गोचर्म्ममात्रं शोधयति। गोपुच्छं स्पर्शयित्वा तेनोदकेन सेके कृते एकेन विन्दुनेयती भूः शुद्धा भवतीत्यर्थः¶।

संवर्त्तः।

---

* उपरितनानां किञ्चित् कृत्वा मृत्तिकोन्मोचनम्। † वर्षण इति पाठान्तरम्।
‡ व्यस्तं असमस्तं अनेकाश इति यावत्। § यत्रैव ता दशगाव इति पाठान्तरम्।
¶ एकेन विन्दुनैव तावत्तीर्थमुद्भावयतीत्यर्थ इति पाठान्तरम्।

गृहशुद्धिं प्रवक्ष्यामि अल्पस्थगवदूषणे ।
प्रोत्सृज्य मृन्मयं भाण्डं सिद्धमन्नं तथैव च ॥
गृहादपास्य तत्सर्व्वं लेपनेनोपलेपयेत् ।
गोमयेनोपलिप्याथ छागेन घ्रापयेद्बुधः ॥
ब्राह्मणैर्मन्त्रपूतैश्च हिरण्यकुशवारिणा ।
सर्व्वमभ्युक्षयेद्देश्म ततः शुध्येद्गृहाश्रयः ॥

बौधायनः ।

घनाया भूमेरुपघात उपलेपनमपरायाः* कर्षणं क्लिन्नाया मेध्यमाहृत्य छादनमृद्भिः गवोपघाते भित्तिलक्षणं सूर्य्यरश्मिप्रवेशोऽग्निज्वालाभिमर्षणम् ।

क्लिन्ना कृमिकीटाद्याक्रान्ता तामाच्छादयेन्मेध्यां मृदमाहृत्य इत्यर्थः ।

व्यासबृहस्पती ।

भूमिष्ठमृदकं मेध्यं वैलक्ष्यं यत्र गोर्भवेत् ।
अव्याप्तं चेदमेध्ये न तद्देव शिलागतम् ॥

देवलः ।

अविगन्धा रसोपेता निर्म्मलाः पृथिवीगताः ।
अर्चीणाश्चैव गोपाना दापः शुद्धिकराः स्मृताः ॥
उद्धृत्य ताः प्रयस्ताः स्युः शुद्धे पात्रे यथाविधि ।
एकरात्रोषितास्तान्तु त्यजेदापः समुद्धृताः ॥

* ऊषरायाः चारसंयुक्तायाः भूमेरित्यर्थः ।

ता इति सर्व्वनाम्नो गोहस्तिमात्रपर्य्याप्ताः अल्पा एव ताः परामृश्यन्ते। अतो बहूदकादेरुद्धृतानां रात्र्युषितानां न दोषः। तड़ागादेरुद्धृता अप्यापो रात्रावनुषितोदकान्तरसम्भवे अशुद्धा एव।

तथा।

अचीर्ण्यानि* तड़ागानि नदीवापीसरांसि च।
चण्डालाद्यशुचिस्पर्शात्तीर्थतः परिवर्ज्जयेत्† ॥

तीर्थमुदकावतरणमार्गः।

बृहस्पतिः।

मृतपञ्चनखाः कुप्या दम्पत्योपहताश्‌स्तथा।
अपः समुद्धरेत्सर्व्वाः§ शेषा वस्त्रेण शोधयेत् ॥
वह्निप्रज्वालनङ्कृत्वा कूपे पक्त्वेष्टकाचिते।
पञ्चगव्यं न्यसेत्यश्चान्नवे तोयसमुद्भवे ॥

हारीतः।

वापीकूपतड़ागे तु मानुषं शीर्य्यते यदि।
अस्थिचर्म्मविनिर्मुक्तैर्दूषितञ्च खरादिभिः।
उद्धृत्य तज्जलं सर्व्वं शोधनं परिमार्ज्जनम् ॥

अस्थिचर्म्मविनिर्मुक्तैः चिरकालवासेन विशीर्णैरित्यर्थः।

---

* अत्र अचीर्णानि इत्येव साधु परन्तु आदर्शपुस्तके अदर्शनान्न लिखितम्। † तीर्थतः परिवर्ज्जयेदित्यनेन तीर्थातिरिक्ते दोषो नास्तीति प्रतीयते। ‡ स्त्रीपुरुषसम्बन्धिरजोरेतसा उपहताः। § शेषं वस्त्रेण शोधयेदिति पाठान्तरम्।

देवलः ।

उद्धरेदुदकं सर्व्वं पञ्चपिण्डान्मृदस्तथा ।

अचिरकालोपघाते स्वल्पे तु

हारीतः ।

घटानां शतमुद्धृत्य पञ्चगव्यं क्षिपेत्ततः ।

श्वभिः श्वपाकचण्डालैर्दूषितेषु विशेषतः ॥

आपस्तम्बः ।

उपानच्छ्लेष्मविण्मूत्रस्त्रीरजोमद्यमेव वा ।

एभिर्विदूषितं कूपं कुम्भानां षष्टिमुद्धरेत् ॥

विष्णुः ।

जलाशयेष्वल्पेषु स्थावरेषु महीतले ।

कूपवत्कथिता शुद्धिर्महत्सु च न दूषणम् ॥

स्थावरेषु प्रवाहरहितेषु ।

शातातपः ।

अल्पैरपि हृते कूपे सेतौ वाप्यादिके तथा ।

तत्र स्नात्वा च पीत्वा च प्रायश्चित्तं न विद्यते ।

यमः ।

चाण्डालभाण्डसंस्पृष्टं पीत्वा कूपगतं जलम् ।

गोमूत्रयावकाहारस्त्रिरात्रेणैव शुध्यति ॥

कश्यपः ।

हृतीनां व्यञ्जनं शुद्धिः ।

हृतिश्चर्म्मकोशः । व्यञ्जनङ्घृतादद्रव्येण शोधनम् ।

यमः ।

प्रपाम्बरण्येऽवटके च कूपे
द्रोण्या जलं कोषगतास्तथापः ।
ऋतेऽपि शूद्रात्तदपेयमाहु-
रापद्गतश्च क्षितिजम्बिवेत्तत् ॥

अयमर्थः । यद्यपि शूद्रव्यतिरिक्तब्राह्मणादिवर्णसम्बन्धि प्रपादि तथापि तद्गतं जलं धर्म्मार्थं दीयमानमनापदि न पेयम् । आपदि तु पेयं यदि चेदरण्यगतं प्रपादि । द्रोणी अश्मादिमयी जलपात्री सर्व्वसाधारणी । कोशोद्गतिः ।

अजा गावो महिष्यश्च ब्राह्मणस्य* प्रसूतिकाः ।
दृग्राचेण शुध्यन्ति भूमिष्ठञ्च नवोदकम् ॥

बौधायनः ।

आत्मशय्यासनं वस्त्रं जायापत्यं कमण्डलुः ।
आत्मनः शुचिरेतानि परेषामशुचीनि च† ॥

हारीतः ।

स्वानुपपत्तौ शुद्धेन तदन्तर्द्धाय समामनन्ति संस्पर्शे सचेलं स्नानमेवं ग्राह्यमिति ।

अयमर्थः । स्वीयशय्याद्यलाभे शुद्धेन कम्बलादिना तत्परकीयं शय्यादिकमन्तर्द्धायोपयोक्तव्यम् । यतः पतितादेः शय्यादिस्पर्शे

---

* ब्राह्मण्यश्चेति पाठान्तरम् । † आसनं शयनं वस्त्रं जायापत्यं कमण्डलुः । शुचीन्यात्मनस्तानि परेषामशुचीनि च इति पाठान्तरम् ।

सचेलं स्नानं विधीयत इति । एतच्च बलात्पतितादिगव्यादि-स्वीकारे प्रायो वेदितव्यम् ।

अथाशुद्धत्रपवादः ।

तत्र मनुः ।

नित्यं शुद्धः कारुहस्तः पण्यं यच्च प्रसारितम् ।
ब्रह्मचारिगतं भैक्ष्यं नित्यं मेध्यमिति स्थितिः ॥

ब्रह्मचारीति विहितभिक्षावृत्तीनामुपलक्षणार्थम् ।

भिक्षावृत्तावधिकारिणमाह

मनुः ।

सान्तानिकं यक्षमाणमध्वगं सर्ववेदसम् ।
गुर्व्वर्थीपित्रमातृर्थैः स्वाध्यायार्थ्युपतापिकः ।
नवैतान् स्नातकान्विद्याद्ब्राह्मणान्धर्मभिक्षुकान् ॥

सन्तानप्रयोजनं सान्तानिकः, दत्तसर्व्वस्वः सर्व्ववेदसः । रोग्युपतापी । यावता रथ्याप्रमर्षणादिदर्शनोपघातेन विना भैक्षं न सिध्यति तन्मात्रापवादो द्रष्टव्यः ।

तथा ।

श्वभिर्हतस्य यन्मांसं शुचि तन्मनुरब्रवीत् ।
काक्याद्भिश्च हतस्यान्येश्चाण्डालार्थे च दस्युभिः ॥

क्रव्यादः श्येनादयः । दस्रवो व्याधाः* ।

मक्षिका विप्रुषश्छाया गौरश्वः सूर्य्यरश्मयः ।
रजो भूर्वायुरग्निश्च स्पर्शे मेध्यानि निर्दिशेत् ॥

मक्षिकाग्रहणमवर्ज्जनीयस्पर्शानां दंशादीनामुपलक्षणार्थम् । विप्रुषः अविज्ञाताकाराः† । छाया निषिद्धातिरिक्ता रजोऽपि निषिद्धेतरत् ।

त्रीणि देवाः पवित्राणि ब्राह्मणानामकल्पयन् ।
अदृष्टमद्भिर्निर्णिक्तं यच्च वाचा प्रशस्यते ॥

एतच्चोपघातसन्देहे विज्ञेयम् ।

शक्रः ।

नारीणाञ्चैव वत्सानां शकुनीनां शुनो मुखम् ।
रतौ प्रस्रवणे हृद्ये मृगयायां‡ सदा शुचिः ॥

यमः ।

मुखतो गौरमेध्या तु मेध्योऽजो§ मुखतस्तथा ।
पृष्ठतो गौर्गजः स्कन्धे सर्व्वतोऽश्वः शुचिस्तथा ॥
अदूष्यं काञ्चनक्षावः स्त्रीमुखं कुतपङ्कुरम् ।
न दूषयन्ति विद्वांसो यज्ञेषु चमसं तथा ॥

---

* दस्रविलः वक्रः इति पाठान्तरम् । † मक्षिकाग्रहणमतिवर्त्तनीयस्पर्शादीनामुपलक्षणार्थमिति पाठान्तरम् । ‡ वेदपाठकालीनच्युतमुखास्रुतविन्दव इति शेषः विप्रुषो-ऽप्यविन्दव इत्यमरः । § रतिकाले स्त्रीमुखं शुचि स्नानात्ययःप्रस्रवणकाले वत्समुखं हृद्ये हृद्यफलभक्षणे पक्षिमुखं शुचि मृगयाकाले मृगदंशने कुक्कुरमुखं शुचि इत्यर्थः ।

¶ छागः ।

ब्राह्मनस्यालङ्करणीभूतस्य खेदादिदोषाभावप्रतिपादनपरम् ।
उच्छिष्टाद्युपहतस्य शुद्धत्वमिधानात् ।

आकराः शुचयः सर्वे शकुनिः फलपातने ।
श्वा मृगग्रहणे मेध्यः स्तोमयज्ञेषु च वारुणी ॥

आकराः सुराकरव्यतिरिक्ताः । आकराः शुचयः सर्वे वर्जयित्वा सुराकरमिति पैठीनसिस्मरणात् । ब्राह्मणभार्यायाअपि शूद्रायाः पीतमद्याया वृद्धिपूर्व्वकं गन्धरसास्वादनरहितं मुखं रतिसंसर्गे शुद्धमेवेत्यर्थः ।

दधि सर्पिः पयः क्षौद्रं भाण्डे दोषो न विद्यते ।
मार्जारश्चैव दर्व्वी च मारुतश्च सदा शुचिः ॥

मार्जारस्य स्पर्शे शुद्धत्वमेवेत्यर्थः । अशुचित्वं कर्म्मकालादन्यत्र तत्र स्नानविधानात् ।

अपिः ।

मधुपर्के च सोमे च अश्नु प्राणाहुतीषु च ।
नोच्छिष्टस्य भवेद्दोषस्त्वेवं वचनं यथा ॥

अपु भोजनानन्तरमस्तापिधानमसीति अन्नीकरणार्थं या आपो गृह्यन्ते ताः मधुपर्काद्युच्छिष्टस्य मन्त्रोच्चारविषयम् ।

बृहस्पतिः ।

पादौ शुची ब्राह्मणानामजाश्वस्य मुखं शुचिः ।
गवां पृष्ठानि मेध्यानि सर्व्वगात्राणि योषिताम् ॥

उपहतिरहितब्राह्मणचरणस्पृष्टं वस्तु शुद्धमित्यर्थः । एवञ्च ब्राह्मणव्यतिरिक्तचरणस्पर्शो दोषावह इत्युक्तं भवति ।

अदुष्टा सन्तता धारा वातोद्धूताश्च रेणवः ।
स्त्रियो हृद्याश्च बालाश्च न दुष्यन्ति कदाचन ॥

षट्त्रिंशन्मते ।

ताम्बूले च फले चैव भुक्तस्नेहावशिष्टके ।
दन्तलग्नस्य संस्पर्शे नोच्छिष्टस्तु भवेन्नरः ॥

दन्तलग्ने तु विशेषो भोजनप्रकरणेऽभिहितः ।

अत्रिः ।

पत्रैर्मूलफलैः पुष्पैस्तृणकाष्ठमयैस्तथा ।
सुगन्धिभिस्तथा द्रव्यैर्नोच्छिष्टस्तु भवेद्द्विजः ॥

याज्ञवल्क्यः ।

मुखजा विप्रुषो मेध्यास्तथाचमनविन्दवः ।
श्मश्रु चास्यगतं दन्तसक्तं त्यक्त्वा ततः शुचिः ॥

मुखजाः विप्रुषः श्लेष्मविन्दवो मुखान्निर्गता आचमनप्रापका न भवन्ति ।

अत्र विशेषमाह गौतमः ।

न मुख्याः* विप्रुष उच्छिष्टं कुर्वन्ति चेदङ्गे निपतन्तीति ।

बृहस्पतिः ।

द्रात्रेत्युयन्त्राकरकारुहस्ता-
र्गोदोहनीयन्त्रविनिःसृतानि ।
बालैरथ स्त्रीभिरनुष्ठितानि
प्रत्यक्षदुष्टानि शुचीनि तानि ॥

---

*मुख्या इति पाठान्तरम् ।

यच्च विनिःसृतानि इक्षुरसादीनि बालैः स्त्रीभिश्च कृतानि रथ्याप्रसर्पणादिभिर्निमित्तैर्यच्चाचमनप्राप्तिस्तच्चाचमनमकृत्वापि, यान्यप्यवस्तुस्पर्शपाकादीनि कृतानि तानि प्रत्यक्षतो दुष्टानि* अशुचिभिः कृतानीति ज्ञातान्यपि शुद्धानीत्यर्थः ।

इह मदनपारिजाते मदनक्षितिपालदानजलरूढे ।
स्तवको हि षष्ठ आसीदामोदाकृष्टपण्डितभ्रमरः ॥
मतिर्येषां शास्त्रे प्रकृतिरमणीया व्यवहृतिः
परं शीलं श्लाघ्यं जगति ऋजवस्ते कतिपये ।
चिरं चित्ते तेषां सुकृतलभूते स्थितिमियात् ॥
इयं व्यासारण्यप्रवरमुनिशिष्यस्य भणितिः ॥

इति पण्डितपारिजातभट्टारकश्रीमल्लेत्यादिविरुदराजी-
विराजमानस्य श्रीमदनपालस्य निबन्धे मदन-
पारिजाताभिधेये षष्ठः स्तवकः ।

---

* दुष्टानीति क्वचित्पाठः ।